THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

GAEKWAD'S ORIENTAL SERIES

No. 154

Gaekwad's Oriental Series
Published under the Authority
of the Maharaja Sayajirao
University of Baroda, Baroda.

General Editor
B. J. Sandesara,
M.A., Ph.D.
Director, Oriental Institute

No. 154

प्रशस्तपादभाष्यम् ।

किरणावली ।

PRAŚASTAPĀDABHĀṢYAM
With the Commentary

KIRAṆĀVALĪ

OF

UDAYANĀCĀRYA

Edited by
Jitendra S. Jetly,
M.A., Ph.D., Nyāyācārya
Director, Institute of Indology,
Dwarka (Saurashtra)

Oriental Institute,
Baroda.
1971

First Edition
Copies 500
1971

Published with the Financial Aid of the University Grants Commission and the Gujarat State

Price Rs. 30/-

Copies can be had from :—

The Manager,
THE UNIVERSITY PUBLICATIONS SALES UNIT,
M. S. University of Baroda Press (Sadhana Press),
Near Palace Gate, Palace Road,
Baroda.

Printed by Shri R. J. Patel, Manager, The Maharaja Sayajirao University of Baroda Press (Sadhana Press), Near Palace Gate, Palace Road, Baroda and published by Dr. B. J. Sandesara, Director, Oriental Institute, Maharaja Sayajirao University of Baroda, Baroda-2, September 1971.

FOREWORD

Old commentaries on Praśastapāda's Bhāṣya on the Vaiśeṣikasūtras of Kaṇāda—like the Vyomavatī of Vyoma Śivācārya, the Kiraṇāvalī of Udayanācārya and the Nyāyakandalī of Śrīdharācārya have always wielded great influence among the students of the Vaiśeṣika school of Indian philosophy and are considered as landmarks in the history of the system. I am glad to put before the world of Sanskrit scholarship a fresh critical edition of the Kiraṇāvalī, prepared by Dr. Jitendra S. Jetly, M.A., Ph.D., Nyāyācārya, who is eminently qualified to edit the learned texts of the Nyāya-Vaiśeṣika system, being very well up in traditional learning as well as modern methods.

It is a tradition among the Sanskrit Pandits to the purport that Udayana had written his Kiraṇāvalī upto the Guṇaprakaraṇa. But the edition of the Kiraṇāvalī which was published about fifty years ago by M. M. Vindhyeshvariprasad Dvivedi and Dhundiraj Shastri on the basis of nine manuscripts read upto some portions of the Buddhiprakaraṇa. There was no evidence to state definitely whether the above-mentioned tradition was correct.

The present edition of the Kiraṇāvalī is mainly based on a rare manuscript from the Jñāna-Bhaṇḍāra at Jaisalmer which, orthographically, appears to belong to about the 13th century. To our great pleasure and surprise, the Jaisalmer manuscript is complete, *i.e.* upto the Guṇaprakaraṇa, and proves the above-mentioned tradition to be correct. In fact, this should be considered a veritable literary discovery.

Dr. Jetly has tried to make the edition as useful as possible, and I trust that it will be welcomed by scholars, as no edition of the Kiraṇāvalī was available in the market for a long time. Dr. Jetly is busy preparing a critical edition of the Nyāyakandalī also and we hope to publish the same in the G.O.S. in near future.

I take this opportunity to thank the University Grants Commission and the Government of Gujarat for jointly giving full financial aid towards the publication of this volume.

Oriental Institute,
Baroda.
Dated 8th June, 1971

B. J. SANDESARA
Director

CONTENTS

INTRODUCTION

यच्चिति-कणिकासङ्गो जगच्चितिविधायकः ।
तद्वन्दे परमं ब्रह्म सच्चिदानन्दलक्षणम् ॥

Editing of the Text :

In the year 1950-51 when I was permitted by the authorities of Sheth B. J. Institute of Learning and Research, Ahmedabad to go Jaisalmer for assisting पू. मुनिश्री पुण्यविजयजी in his rearrangement work of the MSS. libraries of Jaisalmer, I had a good fortune of coming across a number of MSS. which were unknown to the world of orientalists. The present edition of the किरणावली of उदयनाचार्य is one of the outcome of the work done in those days.

At that time I came across a MS. of the किरणावली. When the said MS. was examined and compared with the printed text of the किरणावली, to my surprise I found that the MS. contained some more portion than the printed text did. The MS. was complete upto the end of the गुणप्रकरण. It was known to the world of orientalists that उदयनाचार्य had written the किरणावली, a commentary on the प्रशस्तपादभाष्य of प्रशस्तपादाचार्य upto the end of the गुणप्रकरण but unfortunately no MS. was available containing even that much matter. Hence the किरणावली which was edited by Late म. म. पं. विन्ध्येश्वरीप्रसाद द्विवेदी and पं. ढुण्ढिराज though based on eight to nine MSS. was upto the incomplete portion of the topic बुद्धि of the गुणप्रकरण. It ended with न शब्दोऽर्थप्रत्यायक इति स्ववचनविरोधी ।[1]

In the beginning it was thought to publish the new discovered portion of the किरणावली in some oriental journal, but as the printed text which was first edited and published in the year 1919 was out of print and was not available in the market it was found advisable to re-edit the whole text once again and publish. My

1 Vide—The किरणावली, p. 340, edited by late म. म. पं विन्ध्येश्वरीप्रसादand ढुण्ढिराजशास्त्री and published in the Benares Sanskrit Series as Nos. 15, 50, 155 156, 157, in the year 1919.

friend Dr. B. J. Sandesara, the Director of the Oriental Institute, Baroda inspired me to re-edit the work and accordingly the किरणावली is re-edited.

In the same Jaisalmer MSS. Library a Palm-leaf MS. of the प्रशस्तपादभाष्य was also discovered. This MS. was not complete but with the help of that MS. and other MS. of the देवशापाडा's जैनज्ञानभण्डार MS. library which was made available then it was thought to re-edit the प्रशस्तपादभाष्य also. Of course, the printed text of the भाष्य with the (1) न्यायकन्दली of श्रीधर भट्ट (2) with the किरणावली of उदयनाचार्य and the (3) प्रशस्तपादभाष्य of प्रशस्तपादाचार्य and the वैशेषिकसूत्र of कणाद with the उपस्कार of शङ्करमिश्र were all available at that time. Thus, not only the present edition of the किरणावली but the प्रशस्तपादभाष्य is also once again re-edited. I must make it clear that while editing the प्रशस्तपादभाष्य with the किरणावली I have tried to include all the useful foot-notes of the first edition of the किरणावली. As a suppliment to the work of उदयनाचार्य a small treatise viz. the लक्षणावली which was also attached to the first edition is attached here also as an appendix No. I. I have also tried to give the वैशेषिकसूत्र पाठ with its comparative readings of the different editions particularly that of Mithila Research Institute and of G.O.S. No. 136. It is given in this edition as an appendix No. 2.

In editing the किरणावली help of the printed text is taken but with that I have also taken the help of one more MS of the किरणावली which was made available to me from देवशा's पाडा MSS. Library, Ahmedabad. Of course, this MS. also contained the same portion as it is found in the printed text of the किरणावली. The MS. of the किरणावली of the Jaisalmer MSS. library measure 6.5″ × 4.5″ while that of देवशा's पाडा measures 10″ × 3.5″. In the foot-note, the different MSS. and the text are indicated by the following signs. भा or मु.भा. printed प्रशस्तपादभाष्य. क is equal to the same with the न्यायकन्दली of श्रीधरभट्ट. कि is equal to the printed text of the किरणावली which was first edited and published in the year 1919.

Text of the MS. of देवशा's पाडाज्ञानभण्डार = दे and the text of the MS. of the Jaisalmer Bhandara = जे.

The brief historical account of the न्याय and वैशेषिक system.

In the realm of Indian philosophy both these systems go together because both the systems accept elements of each other without any reservation. If there is any difference it is in the number of प्रमाणs. The न्याय system accepts four प्रमाणs viz. प्रत्यक्ष, अनुमान, उपमान and शब्द while the वैशेषिक system does only two प्रमाणs viz. प्रत्यक्ष and अनुमान. It includes उपमान and शब्द in अनुमान. But the whole of the logic of the न्याय system is acceptable to the वैशेषिक system. On the other hand all the elements of the वैशेषिक systems are acceptable to the न्याय system. वात्स्यायन the author of the न्यायभाष्य clearly states this in his भाष्य on the न्यायसूत्र of गौतम alias अक्षपाद.[1] Dr. D. R. Bhandarkar considers both the systems as Śaivaits i.e. of महेश्वर sect. His views are based on the statement of हरिभद्रसूरि the author of the षड्दर्शनसमुच्चय who states नैयायिकs as Śaivaits and वैशेषिकs as पाशुपत[2]. Dr. Bhandarkar also thinks that गौतम the founder of the न्याय system and कणाद the founder of the वैशेषिक system were the pupils of the said teacher. To support his thesis he quotes the following verses from the वायुपुराण:—

सप्तविंशतितमे प्राप्ते परिवर्ते समागते।
जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः ॥ २०१ ॥
तदाऽहं सम्भविष्यामि सोमशर्मा द्विजोत्तमः।
प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः ॥ २०२ ॥
अत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः।
अक्षपादः कणादश्च उलूको वत्स एव च ॥ २०३ ॥[3]

But how far the authorities of the different पुराणs are acceptable as historical facts is also a problem which requires serious consideration. However, there is no doubt that both these systems

1 अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायः प्रमेयम्। तद्भेदेन चापरिसङ्ख्येयम्। अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात्संसार इत्यत उपदिष्टं विशेषेणेति। न्यायसूत्र-वात्स्यायन भाष्य १-१-९.

From very ancient time न्याय also came with वैशेषिक as a sister system probleming the atomic theory and many other things in common—A. B. Keith, Indian Logic and Atomism, p. 3.3.3.

2 Vide the तर्कभाषा edited by Dr. D. R. Bhandarkar, Bomby Sanskrit and Prakrit Series, No. XXXIV, intro. p.p. ii to vi.

3 Ibid intro., P. VII.

were inter-related from their very inseption.[1] राजशेखरसूरि following his ancient predecessor हरिभद्रसूरि gives the brief पौराणिक history of the न्याय system as follows:

अथ **योगमतं** ब्रूमः शैवमित्यपराभिधम् ।
ते दण्डधारिणः प्रौढकौपीनपरिधायिनः ॥ ८४ ॥

कम्बलिकाप्रावरणा जटापटलशालिनः ।
भस्मोद्धूलनकर्तारो नीरसाहारसेविनः ॥ ८५ ॥

दोर्मूले तुम्बुकभृतः प्रायेण वनवासिनः ।
आतिथ्यकर्मनिरताः कन्दमूलफलाशनाः ॥ ८६ ॥

सस्त्रीका अथ निस्त्रिका निःस्त्रीकास्तेषु चोत्तमाः ।
पञ्चाग्निसाधनपराः प्राणलिङ्गधराः करे ॥ ८७ ॥

विधायदन्तपवनं प्रक्षाल्याङ्घ्रिकराननम् ।
स्पृशन्ति भस्मनाङ्गं त्रिस्त्रिः शिवध्यानतत्पराः ॥ ८८ ॥

यजमानो वन्दमानो वक्ति तेषां कृताञ्जलिः ।
ॐ नमः शिवायेत्येवं शिवाय नम इत्यसौ ॥ ८९ ॥

तेषां च **शङ्करो देवः** सृष्टिसंहारकारकः ।
तस्यावतारा सारा ये तेऽष्टादश तदर्चिताः ॥ ९० ॥

तेषां नामान्यथ ब्रूमो **नकुलीशोऽथ कौशिकः** ।
गार्ग्यो मैत्र्यः कौरुषश्च ईशानः षष्ठ उच्यते ॥ ९१ ॥

सप्तमः **पारगार्ग्यस्तु कपिलाण्डमनुष्यकौ** ।
अपरकुशिकोऽत्रिश्च पिङ्गलाक्षोऽथ पुष्पकः ॥ ९२ ॥

बृहदाचार्योऽगस्तिश्च सन्तानः षोडशः स्मृत ।
राशीकरः सप्तदशो **विद्यागुरुरथापरः** ॥ ९३ ॥

एतेऽष्टादश तीर्थेशास्तैः सेव्यन्ते पदे पदे ।
पूजनं प्रणिधानं च तेषां ज्ञेयं तदागमात् ॥ ९४ ॥

---

1 *cf.*

न सामयिकत्वाच्छद्बार्थसम्प्रत्ययस्य । न्या. सू. 2-1-55
सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य । वै. सू. 7-2-20

वात्स्यायन in his न्यायभाष्य on the न्यायसूत्र 2-1-34 quotes the tenets of the वैशेषिक system as follows:—

यद्यवयवी नास्ति सर्वस्य ग्रहणं नोपपद्यते । किं तत्सर्वम्?

द्रव्यगुणकर्मसामान्यविशेषसमवायाः । Similarly वै. सू. 3-1-16 and 4-1-6 indirectly referred to in the न्यायभाष्य of the न्या. सू. 3-1-33 and 3-1-67.

अक्षपादो गुरुस्तेषां तेन तेह्याक्षपादिकाः ।
उत्तमां संयमावस्थां प्राप्ता नग्ना भ्रमन्ति ते ॥ ९५ ॥[1]

In the same texts regarding the वैशेषिक system the author states briefly as follows :—

अथ वैशेषिकं ब्रूमः पाशुपतान्यनामकम् ।
लिङ्गादि यौगवत्तेषां ते ते तीर्थकरा अपि ॥[2]

Regarding the founder of the school the author of the same षड्दर्शनसमुच्चय states that :—

शिवेनोलूकरूपेण कणादस्य मुनेः पुरः ।
मतमेतत् प्रकथितं तत औलूक्यमुच्यते ॥ ३० ॥
अक्षपादेन ऋषिणा रचितत्वात्तु यौगिकम् ।
आक्षपादमितिख्यातं प्रायस्तुल्यं मतद्वयम् ॥ ३१ ॥[3]

Here it should be however noted that राजशेखरसूरि is dependent for his above contentions on ancient पुराणs. But as we have stated that the authority of पुराणs regarding their historical contents have not become acceptable to all the oriental scholars.

As far as the न्याय system is concerned the date of its founder गौतम or अक्षपाद is not yet certainly fixed. Some scholars do not accept the identity of गौतम and अक्षपाद. Of course, पुराणs state गौतम as the author of न्यायशास्त्र.[4] विश्वनाथ the author of the न्यायवृत्ति accepts गौतम as the author of the present न्यायसूत्र.[5] while वात्स्यायन the author of the न्यायभाष्य, उद्योतकर the author of the न्यायवार्तिक, वाचस्पतिमिश्र the author of the न्यायवार्तिकतात्पर्यटीका and जयन्तभट्ट the author of the न्यायमञ्जरी accept अक्षपाद as the author of the present न्यायसूत्र.[6] In

1 Vide षड्दर्शनसमुच्चय by राजशेखरसूरि pp. 8-9. यशोविजयग्रन्थमाला (17). In these verses, it should be noted that the term योग means here न्याय therefore यौगाः means नैयायिकाः because they are more concerned with °युक्ति's or arguments.

2 Ibid p. 11.

3 Ibid p. 12.

4 **गौतमेन** तथा न्यायम्' Vide पद्मपुराण, उत्तरखण्ड 'अ' 263. **गौतमः** स्वेन तर्केण etc. स्कन्द-पुराण कालिका खण्ड अ. 96.

5 एषामुनिप्रवरगौतमसूत्रवृत्तिः Vide beginning of the न्यायसूत्रवृत्ति.

6 **योऽक्षपाद**मृषिं न्यायः प्रत्यभाद्वदतां वरम् ।
तस्य **वात्स्यायन** इदं भाष्यजातमवर्तयत् ॥ ending of the न्या. भा. ।

the same context, we get the name of मेधातिथि. In the V act of the प्रतिमानाटक of भास it is stated that भोः काश्यपगोत्रोऽस्मि । साङ्गोपाङ्गं वेदमधीये, मानवीयं धर्मशास्त्रं माहेश्वरं योगशास्त्रं, बार्हस्पत्यमर्थशास्त्रं मेधातिथेर्न्यायशास्त्रं प्राचेतसं श्राद्धकल्पं च । Dr. Dasgupta thinks that गौतम learnt न्यायशास्त्र from मेधातिथि. He states that गौतम was not a historical personality, the real author of the न्यायसूत्र is अक्षपाद[1]. But म. म. डॉ. सतीशचन्द्र विद्याभूषण accepts मेधातिथि गौतम as a historical personality. According to him मेधातिथि गौतम is the founder of आन्वीक्षिकी, while अक्षपाद गौतम is altogether a different person who is the author of the न्यायसूत्र.[2] आचार्य विश्वेश्वर also thinks अक्षपाद and गौतम as different persons. According to him, मेधातिथि गौतम is the author of the न्यादर्शन.[3] On the other side श्रीफणीभूषणतर्कवागीश thinks that मेधातिथि अक्षपाद and गौतम are identical names of the one and the same person. He thinks that this गौतम is none else but the famous गौतम of the रामायण the husband of अहल्या According to him, he is the author of the न्यायसूत्र. He depends upon a verse of स्कन्दपुराण.[4]

All these references however do not lead to any definite conclusion regarding the अक्षपाद, गौतम or मेधातिथि. There are other such conjectures also but by such conjectures the date of the author of the present न्यायसूत्र can be adjusted somewhere between fifth and fourth century B.C. The भाष्य on the न्या. सू. is the work of वात्स्यायन. हेमचन्द्रसूरि in his अभिधानचिन्तामणि considers पक्षिलस्वामी, वात्स्यायन, कौटिल्य and चाणक्य as identical personalities.[5] In the त्रिकाण्डशेष the author पुरुषोत्तमदेव also

---

यदक्षपादः प्रवरो मुनीनां, शमाय शास्त्रं जगतां जगाद । मङ्गल verse of न्या. वा. अथ भगवता अक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते । न्या. ता. टी. आरम्भ । अक्षपादप्रणीतो हि विततो न्यायपादपः ॥ न्या. मं. ।

1 Vide History of Indian Philosophy by Dasagupta, Vol. II, pp. 393-94.

2 Vide History of Indian Logic (Ancient).

3 Vide Intro. P.p. 25-27 हिन्दी तर्कभाषा by आचार्य विश्वेश्वर.

4 अक्षपादो महायोगी गौतमाख्योऽभवन्मुनिः ।
गोदावरी समानेता अहल्यायाः पतिः प्रभुः ॥ स्कं. पु. महे. खं. २ कु. खं. अ. ५५.५

5 वात्स्यायनो मल्लनागः कौटिल्यश्चणकात्मजः ॥ ५१७ ॥
द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः ॥ ५१८ ॥ अभि. चि. मर्त्यकाण्ड

refers these names[1]. However, there are no definite references to decide that वात्स्यायन the author of the न्यायभाष्य and चाणक्य, कौटिल्य and others are identical persons. He may be put somewhere in the 2nd century A.D. or so. On the न्यायभाष्य of वात्स्यायन, उद्योतकर alias भारद्वाज wrote the न्यायवार्तिक where he has vehemently refuted the views of the famous logicians like दिङ्नाग. He was also known as पाशुपताचार्य. He in the मङ्गलश्लोक of his वार्तिक clearly states his purpose of writing the न्यायवार्तिक[2]. As the Buddhist logician दिङ्नाग refuted the views of the न्यायभाष्य, उद्योतकर in his न्यायवार्तिक refuted दिङ्नाग. Maxmular puts दिङ्नाग in the 6th century A.D. So the date of उद्योतकर may be put after that. His वार्तिक was refuted by धर्मकीर्ति another Buddhist logician who flourished in the 7th century A.D. His views were refuted by वाचस्पतिमिश्र in his न्यायवार्तिकतात्पर्यटीका and also by उदयनाचार्य in his तात्पर्यपरिशुद्धि a detailed commentary on the तात्पर्यटीका of वाचस्पतिमिश्र. Thus on the न्यायसूत्र we get good chain of works. On all the three works viz. भाष्य, वार्तिक and तात्पर्यटीका one अनिरुद्ध wrote short commentary viz. विवरणपञ्जिका. Following him श्रीकण्ठ tried to write a commentary on all the four works of न्याय but unfortunately he could not complete it but a Jain scholar अभयतिलकसूरि did this work of श्रीकण्ठ and wrote a big commentary on all the four न्याय works viz. भाष्य, वार्तिक, तात्पर्यटीका and तात्पर्यपरिशुद्धि. He flourished in the 14th century A.D. and the name of his work is न्यायालङ्कारसूत्रवृत्ति alias न्यायपञ्चप्रस्थान. There are also other works on the न्याय system like the तात्पर्यपरिशुद्धिप्रकाश of वर्धमानोपाध्याय (15th century A.D.) the न्यायसूत्रोद्धार of वाचस्पतिमिश्र (द्वितीय) 15th century A.D. the न्यायसूत्रवृत्ति of विश्वनाथ न्यायपञ्चानन (17th century A.D.) the न्यायसंक्षेप of गोविन्द खन्ना (17th century A.D.) the न्यायसूत्रविवरण of राधामोहन गोस्वामी (19th century A.D.) and the गौतमसूत्रसंदीप of श्री कृष्णकान्त वागीश (19th century A.D.).

Unfortunately this is not the case with the वैशेषिकसूत्र though according to some scholars the वैशेषिक system is older than the न्याय

---

1 **विष्णुगुप्तस्तु कौण्डिन्यश्चाणक्यो द्रामिलोंऽशुलः।**
वात्स्यायनो मल्लनाग पक्षिलस्वामिनावपि॥ त्रिकाण्ड-शेष कोष-ब्रह्मवर्ग।

2 **यदक्षपादः** प्रवरो मुनीनां शमाय शास्त्रं जगतां जगाद।
कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः॥ न्या. वा.

system.[1] Still however, the वैशेषिकसूत्र did not get that much importance as the न्यायसूत्र got. The latest discoveries fortunately show that the system was studied by the scholars of all the philosophical schools of India whether orthodox or heterodox. In the orthodox system it is acclaimed that काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् ।

According to the name of the propounder of the वैशेषिक system it is known as काणाद or औलूक्य. On the basis of the name of the गोत्र of कणाद or उलूक it is also known as काश्यपीयदर्शन. Like the history of गौतम alias अक्षपाद the history of कणाद or उलूक is also fully filled up with पौराणिक legends, so no definite date can be ascertained to his work viz. वैशेषिकसूत्र. The reason why the school is named वैशेषिक is explained by different scholars in different ways. गुणरत्नसूरि in his commentary on the षड्दर्शनसमुच्चय of हरिभद्रसूरि states that नित्यद्रव्यवृत्तयोऽन्त्या [विशेषाः] । विशेषा एव वैशेषिकं, विनयादिभ्यः स्वार्थे इकच् । तद् वैशेषिकं विदन्त्यधीयते वा 'तद्वेत्त्यधीते' इत्यणि वैशेषिकाः । तेषामिदं वैशेषिकम्[2] । उदयनाचार्य also in his किरणावली states that विशेषो व्यवच्छेदः तत्त्वनिश्चयः, तेन व्यवहरतीत्यर्थः while दुर्वेकमिश्र in his धर्मोत्तरप्रदीप states that द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकैः पदार्थविशेषैः व्यवहरन्तीति वैशेषिकाः । रूढेश्चाभ्युपगतकणादशास्त्रा एवोच्यन्ते । अथवा षट्पदार्थप्रतिपादकतया विशेष्यते तदन्यस्माच्छास्त्रादिति विशेषः काणादं शास्त्रं विवक्षितम् । तद्विदन्त्यधीयते वा इति वैशेषिकाः[3] ।

Wi gives quite different tradition from c–I–Tsan's commentary the शतशास्त्र of देव in Chinese[4] "वैशेषिक the name of the सूत्र means superior or excellent and distinguished (or different). The origin of the name is in the fact that the system is distinguished from and superior to the साङ्ख्य". Some scholars opine that the Śāstra in its initial state had its affiliation to "an" Anti-Vedic logic and epistemology of the Pre- Buddhist "वैशेषिक".[5] However the available literature does not support this notion. On the contrary वैदिकसंहिताs, ब्राह्मणs and उपनिषद्s evince a strong urge to know

1 Vide introduction p. XXXV of the तर्कसंग्रह edited by Athalye and Bodas, and published in the Bombay Sanskrit Series No. LV.

2 Vide षड्दर्शनसमुच्चय of हरिभद्रसूरि with the वृत्ति of गुणरत्न, p. 23, also of न्यायावतारटिप्पण, p. 9, edited by Dr. P. L. Vaidya.


3 Vide धर्मोत्तरप्रदीप p. 240.

4 Wi-Vaiśeṣika Philosophy Intro. p. 4.

5 A Primer of Indian Logic, Madras, 1951, intro. p. 10.

the properties of entities and often record the result of investigation of the seers which bear close resemblance to the वैशेषिक system. The later वैशेषिकs try to see the seed of the system in उपनिषद्s like श्वेताश्वतर and others.[1] This is also the case with other systems too. We also see that the वैशेषिक terms like अणु, परमाणु, वैशेषिकगुण, निःश्रेयस and समवाय are used in the old texts of the महाभारत also.[2]

Inspite of the olderness of the वैशेषिक system no भाष्य like the न्यायभाष्य on the न्यायसूत्र is available on the वैशेषिकसूत्र. Of course, the recent discoveries have brought before us the two old commentaries on the वैशेषिकसूत्र. The one is edited by Prof. A. L. Thakur and published by Mithila Research Institute, Darbhanga, in the year 1957. The commentary though old the name of the commentator is not definitely known. वादीन्द्र may be the supposed commentator but authentic proofs are yet to be found. Another old commentary on the वैशेषिकसूत्र is by चन्द्रानन्द and is edited by the learned जैनमुनि श्री जम्बूविजयजी and published by the Gaekwad Oriental Series in the year 1961. Both these commentaries are older than the available commentary viz. उपस्कार by शङ्करमिश्र.[3] The editor of the वैशेषिकसूत्र with the वृत्ति of चन्द्रानन्द gives the following table of the commentaries on the वैशेषिकसूत्र on the basis of his another edited important work. द्वादशारनयचक्र.[4] According to that following were commentaries.



1 cf. संबाहुभ्यां धमति संपतत्रैः-श्वेताश्व. III-3 and also cf. षष्ठेन परमाणुरूप प्रधानाधिष्ठेयत्वम् । ते हि गतिशीलत्वात् तत्रव्यपदेशाः पतन्तीति. The कुसुमाञ्जलि of उदयनाचार्य, V. 3.

2 For the term अणु vide महाभारत V. 16-12 VIII. 8-16 गीताप्रेस, गोरखपुर (आवृति). For the term वैशेषिक Vide Ibid VII. 5.15 and XII. 47.71. For the term निःश्रेयस vide Ibid V, 25.12; 33.15; 63.9.95.4 and 124.24 and others.

3 Vide वैशेषिकदर्शन edited by Prof. A. L. Thakur. Intro. p. 8 and also the वैशेषिकसूत्र edited by मुनिश्रीजम्बूविजयजी. Sanskrit Intro. p. 12-13.

4 Vide Sanskrit Intro. p. 5-11 of the वैशेषिकसूत्र with the वृत्ति of चन्द्रानन्द.

There was also the भाष्य of आत्रेय on the वैशेषिकसूत्र.[1] Moreover, a भाष्य on the वैशेषिकसूत्र by रावण is referred to by मुरारि in his अनर्घराघव by पद्मनाभमिश्र in his किरणावली भास्कर, by गोविन्दप्रभु in his रत्नप्रभा a commentary on the शाङ्करभाष्य of the ब्रह्मसूत्र and by अनुभूतिस्वरूपाचार्य in his प्रकटार्थविवरण.[2] मुनिश्रीजम्बूविजयजी on the strength of a reference from the अनर्घराघव of मुरारि concludes that a scholar viz. रावण (not the famous king of Laṅkā as referred to by मुरारि). was the author of कटन्दी a commentary on the वैशेषिकसूत्र.[3] Besides this the table referred to in this introduction shows that there was a commentary viz. वाक्य on the वैशेषिकसूत्र. On the वाक्य there was a commentary भाष्य and on the भाष्य there was commentary by प्रशस्तमति. Whether प्रशस्तमति and प्रशस्तपाद are identical or different persons requires thoughtful consideration. All these वैशेषिक works referred to in the table are not available in any form at present. MSS. or Ms. of any of the वैशेषिक work referred to in their introduction by Prof. A. L. Thakur and मुनिश्रीजम्बूविजयजी are yet to be discovered. Instead of these works as stated above a commentary on the वैशेषिकसूत्र by some unknown author (perhaps वादीन्द्र) and another by चन्द्रानन्द are discovered and edited by Prof. A. L. Thakur and मुनिश्रीजम्बूविजयजी respectively. These two works are not referred to by शङ्करमिश्र in his उपस्कार, so it seems that they were not easily available in the days of even शङ्करमिश्र. The सूत्रपाठ of these two editions also differ than that accepted by the author of the उपस्कार. The problem of the वैशेषिकसूत्र is well discussed in detail by Prof. A. L. Thakur in the introduction of वैशेषिकदर्शन edited by him.[4] It does not require any more repeatation here. There he has also pointed out how the पदार्थधर्मसङ्ग्रह alias प्रशस्तपादभाष्य of प्रशस्तपाद proved to be the worst enemy of the वैशेषिकसूत्र as far as its study was concerned. Due to more popularity of प्रशस्तपादभाष्य the learned scholars wrote commentaries on this भाष्य instead of वैशेषिकसूत्र. However, by this time now

---

1 Ibid English Intro. p. 12-13.

2 Ibid appendix VI. p. 150. Foot-note No. 1.

3 Ibid Sanskrit Intro. pp. 7.

4 Vide intro. pp. 9-15 वैशेषिकदर्शन with the commentary of an unknown author edited by Prof. A. L. Thakur.

three commentaries of वैशेषिकसूत्र are made available (1) उपस्कार of शङ्करमिश्र, (2) a commentary by वादीन्द्र or unknoun author and (3) a commentary by चन्द्रानन्द. Later on sub-commentaries on the उपस्कार are (1) the वृत्ति by जयनारायणतर्कपञ्चानन and (2) the उपस्कारपरिष्कार by पञ्चाननतर्करत्न. Both these commentaries show marked influence of the Neo-logical system. चन्द्रकान्त तर्कालङ्कार gives an Advaitic interpretation in his भाष्य of वैशेषिकसूत्र. while the भारद्वाजवृत्तिभाष्य of गङ्गाधर वैद्य shows the influence of साङ्ख्य, आयुर्वेद and other systems. Thus the traditional interpretation of the वैशषिकसूत्र is partly vitiated. In the interpretation of the वैशेषिकसूत्र the व्याख्या of an unknon author and the वृत्ति of चन्द्रानन्द are of immense help. Their interpretations are often supported by ancient sources including the Jaina and Buddhist texts. चन्द्रानन्द shows his close acquaintance with the पदार्थधर्मसङ्ग्रह of प्रशस्तपाद and is singularly free from any non-Vaśieṣika bias.[1]

With all this available material the study of the वैशेषिक system was made popular with the help of प्रशस्तपादभाष्य. Though it is the digest of the वैशेषिकसूत्र for the study of the system it proved to be the worst enemy of the सूत्र text. Four commentaries were written on this भाष्य by different learned scholars, (1) the व्योमवती by व्योमशिवाचार्य, (2) the न्यायलीलावती.[2] by वत्साचार्य, (3) the किरणावली by उदयनाचार्य and (4) the न्यायकन्दली by श्रीधरभट्ट. Out of these commentaries the लीलावती of वत्साचार्य is yet to be discovered. It is not available even in the Ms. form in any of the MSS. libraries of India and abroad. From the available three commentaries the व्योमवती of व्योमशिवाचार्य seems to be the oldest one. व्योमशिव's views are referred to by the author of the न्यायकन्दली and by the author of the किरणावली by the name आचार्य. व्योमशिव thinks that वैशेषिकs are also agreeable in accepting शब्द as an independent प्रमाण.

---

1 Vide Eng. intro. pp. 21-22 of the वैशेषिकसूत्र with the वृत्ति of चन्द्रानन्द. Prof. A. L. Thakur also refers to the मानमनोहर a वैशेषिक treatise of वादी वागीश्वर in the introduction p. 21 of the edition of वैशेषिकदर्शन edited by him.

2 The available न्यायलीलावती by वल्लभ is quite different work than this लीलावती.

The system was studied not only by the scholars of orthodox schools but it was studied by the scholars of the heterodox schools too. The वैशेषिक views are referred to in the old Buddhist works like the लङ्कावतारसूत्र, the सूत्रालङ्कार which is attributed to अश्वघोष and in the रत्नावली of नागार्जुन.[1] In his एकश्लोकशास्त्र, नागार्जुन refers to the system as the system of उलूक as Kimura informs.[2] In the तत्त्वोपप्लवसिंह the only available authentic work of चार्वाक system जयराशि the author of the work refutes the वैशेषिक views[3]. जैनs go to that extent that one रोहगुत्त or रोहगुप्त the pupil of सिरिगुत्त or श्रीगुप्त a जैनाचार्य was the founder of the वैशेषिक school. According to them उलूक is another name of that रोहगुत्त. Prof. A. L. Thakur has discussed this problem in his introduction of the वैशेषिकसूत्र edited by मुनिश्रीजम्बूविजयजी[4]. Whether उलूक or कणाद the founder of the वैशेषिक system is identical with this रोहगुत्त requires thoughtful consideration unless historically it is proved so. In the प्रमाणसमुच्चय of दिङ्नाग the वैशेषिक tenets are examined in detail[5]. However, जैनs continued their interest in the study of the न्याय and the वैशेषिक system to such an extent that जैनाचार्यs began to write honest and faithful commentaries on the different न्याय and वैशेषिक works e.g. नरचन्द्रसूरि (13th century A.D.) and राजशेखरसूरि (14th century A.D.)-both wrote commentaries on the न्यायकन्दली of श्रीधर known as टिप्पण and पञ्जिका respectively. अभयतिलकसूरि (14th century A.D.) wrote न्यायालङ्कारटिप्पण alias पञ्चप्रस्थान on all the four works viz. the न्यायभाष्य the वार्तिक the तात्पर्यटीका and the तात्पर्यपरिशुद्धि. जिनवर्धन (15th century A.D.) wrote a commentary viz. जिनवर्धनी on the सप्तपदार्थी of शिवादित्य (10th century A.D.) गुणरत्नगणि (17th century A.D.) wrote a detailed commentary viz. तर्कतरङ्गिणी on the प्रकाश of गोवर्धन a commentary on the तर्कभाषा of केशवमिश्र. शुभविजयगणि (17th century A.D.) pupil of हीरविजयसूरि wrote the वार्तिक on the तर्कभाषा of केशवमिश्र. क्षमाकल्याण wrote a commentary on the दीपिका of the तर्कसङ्ग्रह

---

1 Vide Eng. Intro. p. 9 of the वैशेषिकसूत्र edited by मुनि श्रीजम्बूविजयजी,

2 Ibid Eng. Intro. p. 9.

3 Ibid Eng. Intro. p. 9.

4 Ibid Eng. Intro. pp. 6-9.

5 Ibid Appendices 6 to 7.

both of अन्नंभट्ट[1]. So it is not surprising now that Jaina scholars discuss in detail the tenets of the वैशेषिक schools in all their philosophical works. In the वैशेषिक works the study of the न्यायकन्दली of श्रीधरभट्ट the inhabitant of राढ region of Bengal gained much popularity. Good many MSS. of this work are available in different जैनभण्डारs. Similarly small treatise like सप्तपदार्थी, तर्कभाषा and तर्कसङ्ग्रह were also popular works of their study. The MSS. of different न्याय and वैशेषिक works found in the different जैनभण्डारs are the proofs of the same.[2]

उदयनाचार्य the author of the किरणावली

Before some years there was a controversy among scholars regarding the place of उदयनाचार्य. Some thought that he was of south, others thought that he was of Bengal and still others thought that he was of Mithila.[3] But all these views do not hold much water. By this time it is a proved fact that he was a native of the village मङ्गरौनी situated at 21 miles north of दरभङ्गा situated on the eastern bank of the river कनका. Thus he was of मिथिला region of the present Bihar. Regarding his date there is no much dispute, because he himself mentions his date in his लक्षणावली and writes that he composed this work at the end of 906 शक year.[4]

---

1 जिनवर्धनी on the सप्तपदार्थी of शिवादित्य and a commentary on the दीपिका of अन्नंभट्ट by क्षमाकल्याण are edited by me and published by L. D. Institute of Indology Ahmedabad and Rajasthan Puratattva Series, Jaipur respectively, while तर्कतरङ्गिणी is edited by Dr. Vasant G. Parikh as his Ph.D. work and avaits its publication.

2 Vide जिनतरत्नकोश of Prof. H. D. Velankar and other MSS. catalogues of different जैनभण्डारs published and unpublished.

3. Vide intro. of the किरणावली pp. 26-27 edited by म. म. विन्ध्येश्वरीप्रसाद and ढुण्ढिराजशास्त्री.

4 Vide colophon of the लक्षणावली.

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः ।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥

Also vide Intro. pp. 1-2 of लक्षणावली edited by Late Pt. शशिनाथ झा and published by Mithila Research Institute in the year 1963.

HIS WORKS

About his independent works known to the oriental scholars are: (1) The न्याय-कुसुमाञ्जलि proving the existence of God, (2) the आत्मतत्त्वविवेक alias the बौद्धधिक्कार refuting बौद्ध tenets regarding आत्मा in detail, (3) the लक्षणमाला a small treatise on the वैशेषिक elements, (4) The लक्षणावली a primer of again वैशेषिक tenets and (5) the न्यायपरिशिष्ट alias प्रबोधसिद्धि–an independent exposition of the 1st chapter of the न्यायसूत्र of गौतम. Other two works are the commentaries on न्याय and वैशेषिक works. The तात्पर्यपरिशुद्धि is a detailed commentary on the तात्पर्य-टीका of वाचस्पतिमिश्र. It is not yet fully published. MSS. are there and awaits publication. The किरणावली is another work a commentary on the प्रशस्तपादभाष्य of प्रशस्तपादाचार्य and is now re-edited and published. It is said that श्रीहर्ष refuted the views of उदयन in his खण्डनखण्डखाद्य to take revenge of his father whom उदयन had defeated in an open debate. We do not know how far this legend is historically true because it reflects on the proved date of उदयन.[1]

Commentaries and sub-commentaries on the किरणावली

उपाध्याय वर्धमान the son of the great savant उपाध्याय गङ्गेश the famous author of the चिन्तामणि and the father of नव्यन्याय had written commentaries on almost all the works of उदयन. उपाध्याय वर्धमान names his commentaries as प्रकाश. So he has written the प्रकाश on the किरणावली also.[2] On the प्रकाश of उपाध्याय वर्धमान there is a commentary viz.

---

1 For detail vide intro. 26 and footnote No. 1 and 2 of the first edition of the किरणावली.

2 This commentary measures about 6000 श्लोकप्रमाण. It is in two parts द्रव्यप्रकाश and गुणप्रकाश. It begins as follows:—

मिलन्मन्दाकिनीमल्लीदामां मूर्ध्नि पुरद्विषः।
विश्वबीजाङ्कुरप्रख्यां वैधवीं तां कलां नुमः॥

कर्तव्यविघ्नविघातकं रविनमस्कारं निबध्नाति विद्येति। यदिति सामान्यतोऽपि कर्तृनिर्देशो विद्याविद्ययोः सन्ध्यारजनीभ्यां निरूपणात् रविरुदेता लभ्यते— and so on. The end reads in the 1st part as follows:

समुच्चयभ्रमं निराकरोति क्वचिदिति। सुषुप्त्यनन्तरं केवलादृष्टजन्या मनःक्रियेत्यर्थः। आशुभं चास्त्वित्यत्रेति शब्दस्यार्थमाह इति शब्द इति। अत्र वर्तते इति शेषः।

प्रकाशिका[1] by भगीरथ ठक्कुर alias मेघठक्कुर of Mithila. He was a pupil of

Contd. Foot-note No. 2 from page No. 27

यस्तर्कतन्त्रशतपत्रसहस्ररश्मि
गङ्गेश्वरः सुकविकैरवकाननेषु ।
तस्यात्मजोऽतिगहनां **किरणावलीं** तां
प्राकाशयत् कृतिमुदे बुध-**वर्धमानः** ॥

The 2nd part begins as follows :

एकत्रसंन्निपतितासितकण्ठबिम्बमन्यत्र चन्द्रकिरणाहितशुभ्रभावम् ।
सन्ध्याञ्जलिमहमनङ्गरिपोर्नमामि, हस्तप्रविष्टमिव पुण्यतमं प्रयागम् ॥

नतिवन्नुतेरपि प्रारीप्सितविघ्नविघातकत्वात् तामादौ कृतां निबध्नाति **तुष्टेरिति** । etc.

The end reads as follows :

कारणाभावादिति । कारणत्वं कार्यनिरूप्यमिति कार्यस्य प्राक् सत्त्वं सिद्धमित्यर्थः । and the verse which is at the end of the 1st part is once again repeated here. Ibid. Intro. pp. 2-3, footnote No. 1.

1 This commentary measures about 5500 श्लोकप्रमाण. It is only on the 1st part of the प्रकाश. It begins as follows :

कैशोरं कलयन्तं मायाकायं पुरातनं पुरुषम् ।
नन्दालिन्दनिकेतं निगमरहस्यं नमस्यामि ॥

यः कैशोरे विश्वविख्यातकर्मा
धर्माचार्यः श्रीमहादेवशर्म्मा ।
तत्सोदर्यो **वर्धमानस्य** सूक्तौ
भावं **मेघः** सम्यगाविष्करोति ॥

मूर्ध्नि पुरद्विष इति पूर्वान्वयि । तेनान्यदपि बीजं जलसम्बधेनाङ्कुरतीति ध्वनिर्लभ्यते । **विद्याविद्ययोरिति**-नन्वत्र व्याख्याने विपरीतो रूप्यरूपकभाव इति चेदत्र विभक्तिविपरिणामेन तथैवान्वय इति मिश्राः ।

The end reads as follows :

यद्यपि यत्र तृतीय क्षण एव द्रव्यनाशस्तत्र न परत्वापरत्वोत्पत्तिर्द्वितीयक्षणे कालादिसंयोगस्यासमवायिकारणस्योत्पत्तेः, तृतीयक्षणे च द्रव्यस्यैव नाशादिति व्यभिचारो भवत्येव; तथापि स्वरूपयोग्यतामात्रमिह साध्यम् । तत्सिद्धे च नित्यत्वसमानाधिकरणायास्तस्याः फलोपधानव्याप्यतया परत्वादिति भावः । शेषं सुबोधम् ।

विंशाद्वै जयदेवपण्डितकवेस्तर्काब्धिपारं गतः
श्रीमानेष **भगीरथः** समजनि **श्रीचन्द्रपत्यात्मजः** ।
श्री**धीरा**तनयेन तेन रचिता श्री**मन्महेशाग्रज-**
श्री**दामोदरपूर्वजेन** जयतादाचन्द्रमेषा कृतिः ॥

हंहो गिरीश करुणामय मानसोऽपि, किं मां मुहुः क्षिपसि दुःखमये शरीरे ।
सत्कर्म तादृगिति चेन्ननु चन्द्रचूड, तत्कर्म कारयसि ननु हतचेतसं माम् ॥

Ibid page 3, foot note No. 1.

पक्षधरमिश्र a great neologician of मिथिला and a contemporary of वासुदेव सार्वभौम. It seems that भगीरथ ठक्कुर has commented upon almost all the works of उपाध्याय वर्धमान who was the native of the village करिजन in the दरभङ्गा district of मिथिला. Another commentary on this work of उपाध्याय वर्धमान is of रघुनाथ शिरोमणि of Bengal. The name of this commentary is गुणप्रकाशविवृति alias गुणदीधिति.[1] He was one of the main four pupils of the famous वासुदेव सार्वभौम. Other pupils and colleagues of रघुनाथ शिरोमणि were (1) गौराङ्गदेव, (2) रघुनन्दन and (3) कृष्णानन्द. गौराङ्गदेव was known as चैतन्यप्रभु and was considered to be the incarnation of विष्णु by his devotees.[2] रघुनन्दन was a scholar in the धर्मशास्त्र while कृष्णानन्द was a scholar in the मन्त्रशास्त्र. रघुनाथशिरोमणि the famous neologician is more known as दीधितिकार by the name of his commentary दीधिति on several न्याय works like the आत्मतत्त्वविवेक and others.

मथुरानाथ तर्कवागीश of Bengal was the pupil of रघुनाथशिरोमणि as believed by some scholars He has commented upon almost all the works of रघुनाथशिरोमणि and also on the आत्मतत्त्वविवेक of उदयनाचार्य and तत्त्वचिन्तामणि of उपाध्याय गङ्गेश. His commentaries are known as माथुरी by his own name in the realm of neologicians. Thus his commentary on the

---

1 The work is about 1500 श्लोकप्रमाण. It is on the गुण chapter. The 1st part on the द्रव्य chapter is however not available. It begins as follows :—

ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते।
अखण्डानन्दबोधाय पूर्वाय परमात्मने॥

विनापि धर्मिनिरूपणं धर्मनिरूपणं भवत्येव, तद्धर्मत्वेन निरूपणं। तन्निरूपणाधीनमिति चेत्, तद्धर्मितया तन्निरूपणाधीनमेव। निरूपितानि च गुणतद्विशेषतया द्रव्याणीत्यत आह यद्धेति॥

etc. As the ending page is broken the end is not available. Ibid. p. 4 foot note No. 1.

2 शाके मुनिव्योमयुगेन्दुगण्ये
पुण्ये तिथौ फाल्गुनपौर्णमास्याम्।
त्रैलोक्यभाग्योदयपुण्यकीर्ति-
देवः शचीनन्दन आविरासीत्॥

This work was obtained by the editor of the 1st edition of the किरणावली from व्रजनाथ शिरोमणि indicating the date of गौराङ्गदेव Vide ibid Intro. p. 32. Foot Note No. 1.

गुणदीधिति of रघुनाथ शिरोमणि is known as गुणदीधितिमाथुरी.[1] Thus on the किरणावली we get the chain of commentaries and sub-commentaries. (1) The commentary प्रकाश of उपाध्याय वर्धमान, (2) On it the द्रव्यप्रकाशिका of भगीरथठक्कुर, (3) One another commentary on the प्रकाश is of रघुनाथ शिरोमणि known as the गुणप्रकाशविवृति alias गुणदीधिति, (4) On it there is गुणप्रकाशविवृतिरहस्य alias गुणदीधितिमाथुरी by मथुरानाथतर्कवागीश, (5) One more commentary on the work of रघुनाथशिरोमणि is गुणविवृतिभावप्रकाशिका by रुद्रभट्टाचार्य. The work is known as गुणप्रकाशविवृतिपरीक्षा,[2] (6) Still another

---

1 Vide Ibid Intro. p. 4 Foot Note No. 2. The work measures about 10000 श्लोकप्रमाण. It begins as follows :—

कुञ्चिताधरपुटेन पूरयन्, वंशिकां प्रचलदङ्गलिपङ्क्तिः।
मोहयन्नखिलवामलोचनाः, पातु कोऽपि नवनीरदच्छविः ॥
श्रीमता **मथुरानाथतर्कवागीश**धीमता ।
गुणप्रकाशविवृतेर्भावो व्याख्यायते मया ॥

निर्विघ्नं प्रारिप्सितग्रन्थपरिसमाप्तिकामनया कृतं भगवन्नमस्काररूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति ॐ **नम** इति। **अनुमानदीधितिरहस्ये** प्रपञ्चितमेतत्।

The end is not available because the editing base is broken. मथुरानाथ has also commented upon the गुणकिरणावलीं and its प्रकाश. His work is known as रहस्य.

2 Vide Ibid Intro. p. 4, Foof Note No. 3. The work is of about 4000 श्लोकप्रमाण. It begins as follows:—

भवजलनिधौ भीमावर्ते जनस्य निमज्जतो
निरूपमकरालम्बो लम्बोदरप्रणयोत्सुकः।
परमकरुणासिन्धुर्बन्धुर्वरस्य नतिप्रियो
हरतु दुरितं प्रारब्धेऽस्मिन् प्रतीपमुमापतिः।
अभ्यामृशन् मृदुमृणाललताभ्रमेण
हस्तेन बाहुलतिकां बहुशः शिवायाः।
आलोलकण्ठगतषण्मुखदन्तताली
बालो विभावयतु भावुकमेकदन्तः ॥
विद्यानिवास-पुत्रस्य न्यायवाचस्पतेरियम्।
कृतिः कृतिधियां भूरि परितोषाय जायताम् ॥
गुणप्रकाशविवृतेरियं **भावप्रकाशिका**।
इतः स्यादपि मन्दानां सफलोऽत्र परिश्रमः ॥

तुष्ट्यतुष्ट्योः सुखदुःखयोरीश्वरेऽसम्भवादाह **प्रकाशे तुष्टिस्तुति**रिति।

It ends as follows :—

तस्मात्समवायिकारणमात्रवृत्तिरेव विभागस्तथा। न च साक्षात्परम्परासाधारणसमवायित्वं प्रयोजकं तस्य दुर्वचत्वाद् गुरुत्वाच्च। इति श्रीमहामहोपाध्याय**श्रीविद्यानिवासभट्टाचार्यात्मजश्रीरुद्रभट्टाचार्य**विरचिता **गुण**प्रकाशविवृतिपरीक्षा समाप्ता।

commentary is by रामकृष्ण[1] and (7) Another also by जयराम भट्टाचार्य.[2] There is also one more independent commentary on the किरणावली is the किरणावलीभास्कर by the son of बलभद्रमिश्र.[3]

---

1 Ibid Intro. p. 5, Foot Note No. 1

The MS. of this work is broken at the end so the ending sentence and the measure of the work are not available. It begins as follows : —

वाणि प्रसीद करुणामयि ते नतोऽस्मि त्वं येन देवि सुतवत्यसि पुत्रिणीषु ।
येनोदधारि कुनिबन्धतमोऽन्धकूपे, भग्नाक्षपादकणभक्षमतं निरीक्ष्य ॥
यन्मूलमेव सुकृतानि तयोः कृतानि व्यासादयः सदसि नित्यमुदाहरन्ति ।
तस्याशयं गुणविवेचनमाकलय्य, ब्रूते शिरोमणिगुरोरिह रामकृष्णः ॥
निरूपणं शाब्दबोधानुकूलव्यापारः and so on.

2 Ibid Intro. p. 5, Foot Note No. 2.

The ending portion of this work is also broken so the end and the measure of the work both are not available.

It begins as follows :—

निराकारं नराकारं जगदाकारमद्वयम् ।
गोपीदृगञ्जनं वन्दे निरञ्जनमहो महः ॥

धीरः श्रीजयरामोऽसौ युक्तियुक्ताभिवन्दिताम् ।
गुणदीधितिगूढार्थां विवृणोति सरस्वतीम् ॥

" प्रकाशे एकत्र अञ्जलिमूलस्थे अन्यत्रतदग्रहस्ते हस्तारूण्ये न स्वाभाविकजलशुक्लताभिभवाद् " and so on.

3 Ibid Intro. p. 6, Foot Note No. 1.

This commentary is of 2000 श्लोकप्रमाण. It begins as follows :—

उपदिष्टा गुरुचरणैरस्पृष्टा वर्धमानेन ।
किरणावल्यामर्थास्तन्यन्ते पद्मनामेन ॥

विलसद्वर्धमानापि तिरोहितदिवाकरा ।
सकलार्थप्रकाशाय न क्षमा किरणावली ॥

बलभद्रमुखाम्भोजवचनादुदयाचलात् ।
उदितो भास्करस्तस्मादादरेण निषेव्यताम् ॥

The end reads a follows :—

यस्तर्कदुस्तरतरार्णवकर्णधारो ।
वेदान्तवर्त्मनिरताध्वगसार्थवाहः ।
श्रीपद्मनाभरचितेन दिवाकरेण
तुष्टोऽमुनास्तु सुकृती बलभद्रमिश्रः ॥

Thus we have got a chain of works on the किरणावली of उदयनाचार्य This shows its usefulness as well as popularity. Same is the case with the other works of उदयनाचार्य. We get प्रकाश of उपाध्याय वर्धमान on the न्यायकुसुमाञ्जलि and the आत्मतत्वविवेक of उदयनाचार्य. However, we do not get any commentary of वर्धमान on the small treatise viz. लक्षणावली. There is a commentary in the MS form of the लक्षणावली by शेषशार्ङ्ग-धराचार्य. It is not yet published. Another commentary by केशवभट्ट on the लक्षणावली is edited by शशिनाथ झा and published by Mithila Institute Darbhanga in the year 1963. There are good many commentaries on the न्यायकुसुमाञ्जलि. Its popularity has urged आचार्य विश्वेश्वर to translate it into Hindi. The लक्षणावली seems to be the 1st work tending somewhat towards neologic. It is a small treatise giving essence and definition of वैशेषिक elemeans. We have here added it in this edition as an appendix No. I. As this is a वैशेषिक work it was thought worthwhile to give वैशेषिक सूत्रपाठ with all available latest readings. We have edited the सूत्रपाठ accordingly and added in this edition as an appendix No. 2. The सूत्रपाठ bears the readings of the सूत्रपाठ of the Mithila edition as well as that of G.O.S. edition. उपस्कार is accepted as the base of the सूत्रपाठ.

Acknowledgment

In preparing this edition I am very much indebted to पू. मुनिश्री पुण्यविजयजी for allowing me to use a valuable single MS. of the किरणावली of Jaisalmer MSS. library. I am also much indebted to पू. मुनि-श्रीजम्बूविजयजी who gave me considerable help and guided me in preparing the presnt edition as well as for using his valuable edition of the वैशेषिकदर्शन. I must acknowledge with thanks and due regards the suggestions given by different scholars and friends particularly great savant प्रज्ञाचक्षु पं. सुखलालजी, पं दलसुखभाई मालवणिया and प्राध्या, श्री. अनन्तलाल ठाकुर. Prof. L. Alsdorf, my teacher Prof. R. C. Parikh of B. J. Research Institute, my late teacher पं मयाशङ्करशर्मा and my learned teacher in न्याय पं. आशुतोष भट्टाचार्य, for encouraging me in preparing this edition I feel highly thankful to Dr. B. J. Sandesara, the Director of Oriental Institute, Baroda, Dr. Umakant P. Shah, Deputy Director and Head of the Ramayana Department, of the Oriental Institute, Baroda and Prof. J. P. Thaker Curator of the

MSS Department, Oriental Institute, Baroda. I should not forget here the Manager of the University Press Shri Ramanbhai Patel and his colleagues for their co-operation in printing of the edition. With all this help if a few printing mistakes or any other mistakes are found by scholars in this edition, the responsibility is mine for which learned friends will excuse me.

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

प्रियन्तां गुरवः ।

॥ भूमिका ॥

यच्चितिकणिकासङ्गो जगच्चितिविधायकः ।
तद्वन्दे परमं ब्रह्म सच्चिदानन्दलक्षणम् ॥

खिस्तीये १९५० तमे वर्षेऽहं "शेठ भो. जे. अध्ययन- संशोधन- विद्याभवनाध्यक्षैर्जैसलमेरनगरे तत्रभवद्भिर्मुनिभिः पुण्यविजयैः क्रियमाणस्य हस्तलिखितपुस्तकभाण्डागारस्य संशोधनकार्यस्य यत्किञ्चित्साहाय्यार्थं प्रेषित आसम् । तदानीं न्यायवैशेषिकविषयाणि हस्तलिखितपुस्तकान्यवलोकयतो म **उदयनाचार्यरचितकिरणावल्या** एकं हस्तलिखितपुस्तकं दृष्टिपथं समायातम् । प्रथममुद्रितकिरणावल्या सह तुलनया ज्ञातं यदिदं हस्तलिखितपुस्तकं मुद्रितपुस्तकादधिकभागं भजते । अधिकपरीक्षणेन विज्ञातं यदस्मिन् हस्तलिखितपुस्तके किरणावल्या गुणप्रकरणं सम्पूर्णं वर्तते । अद्यावधि न केनाप्येतावद्भागपर्यन्तं हस्तलिखितपुस्तकं प्राप्तमत एव मुद्रितपुस्तकं यद्यप्यष्टादर्शपुस्तकाधारितं तथाप्यपूर्णमेव । प्रथमं तत् पण्डितवर्यैः **म. म. विन्ध्येश्वरीप्रसादमहोदयैः ढुण्ढिराजशास्त्रिभिश्च** मिलित्वा संशोध्य सम्पादितं प्रकाशितं च १९१९ तमे खिस्तीयवर्षे । अस्मिन्प्रथमप्रकाशिते किरणावलीग्रन्थे "**न शब्दोऽर्थप्रत्यायक इति स्ववचनविरोधी**" इत्येतत्पर्यन्त एव भागः ।[1]

उपलब्धो नवीनो भाग एव सम्पादनं कृत्वा कस्मिंश्चित्संशोधनसामयिके प्रकाशनीय इति तदानीं विमृष्टं, किन्तु मुद्रितकिरणावल्या अपि तदानीमेव दुष्प्रापणीयत्वात् सम्पूर्णकिरणावल्याः पुनः सम्पादनं विधेयमिति विचारितम् । समर्थितश्चायं विचारो विदुषा मित्रेण **साण्डेसरा** इत्युपाह्वेन **भोगीलालमहोदयेन** । तदानीमेव तत्र जैसलमेरभण्डारे **प्रशस्तपादभाष्यस्या**प्येमकमसम्पूर्णं ताडपत्रीयं हस्तलिखितपुस्तकं समायातं दृष्टिगोचरम् । तत्सहायेन तथैव अहमदाबादनगरे देवशापाडास्थितस्य हस्तलिखितपुस्तकभाण्डागारस्य प्रशस्तपादभाष्यकिरणावल्याश्च हस्तलिखितपुस्तकसाहाय्येन प्रशस्तपादभाष्यं किरणावली च द्वेऽपि सम्पादिते । प्रकाशनं चास्य न्यग्रोधपुरीयप्राच्यविद्यामन्दिराधिकारिभिः सानुग्रहं स्वीकृतम् । प्रथममुद्रितकिरणावलीपुस्तके **उदयनाचार्य**विरचिता लक्षणावली समाविष्टाऽऽसीदतोऽत्रापि सा परिशिष्टं १ कृत्वा समाविष्टा । तथैव तत्र वैशेषिकसूत्रपाठोऽपि समाविष्ट आसीत् । अतोऽत्रापि शङ्करमिश्रकृतोपस्कारस्वीकृतवैशेषिकसूत्रपाठं प्रधानीकृत्य

---

१ द्रष्टव्या प्रथमप्रकाशितकिरणावल्याः पृ. ३४० । इयमेव किरणावली स्व. म. म. विन्ध्येश्वरीप्रसादद्विवेदीमहोदयैः ढुण्ढिराजशास्त्रिभिश्च मिलित्वा सम्पादिता, खिस्तीये १९१९ तमे च वर्षे बनारससंस्कृत सिरीज इति ग्रन्थमालायां प्राकाश्यं नीता ।

तुलनात्मकः सूत्रपाठः परिशिष्ट २ इति कृत्वा समाविष्टः । परिशिष्टद्वयं विदुषामुपयोगीति मत्वाऽत्र समाविष्टम् ।

न्याय-वैशेषिकपरम्परयोः सङ्क्षिप्तमितिवृतम् ।

भारतीयदर्शनपरम्परासु न्यायवैशेषिकदर्शने समानतन्त्रत्वं भजेते इति सुविदितमेव विदुषाम् । समानतन्त्रत्वादिमे द्वेऽपि परम्परे परस्परं पदार्थानङ्गीकुर्वाते । प्रमाणसङ्ख्यां विहाय परस्पर-पदार्थाङ्गीकारे नैतयोर्मतवैमत्यम् । प्रत्यक्षानुमानं द्वे एव प्रमाणे इति वैशेषिकाणां मतम् । "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति चत्वारि प्रमाणानि नैयायिकैस्स्वीकृतानि । एवं न्यायदर्शने प्रतिपादिता तर्कपद्धतिर्वैशेषिकैर्विना विरोधमङ्गीकृता । तथैव वैशेषिकाभिमतपदार्थानां स्वीकारो नैयायिकैरपि कृतः । इत्थं प्राचीनकालादेवेमे परम्परे सङ्गच्छेते । स्वीकृतमेतच्च **न्यायभाष्यकृता वात्स्यायनमु**निना ।[२]

परम्पराद्वयमिदं शैवमिति **स्व. डॉ. भाण्डारकरमहोदयस्य** मतम् । आधारश्चास्मिन् विषये **षड्दर्शनसमुच्चय**कर्ता **हरिभद्रसूरिः । षड्दर्शनसमुच्चये हरिभद्रसूरि**र्नैयायिकान् शैवान् वैशेषिकांश्च पाशुपतान् वर्णयामास ।[३] वायुपुराणमाश्रित्य डॉ. भाण्डारकरमहोदयो **गौतमर्षिं न्यायशा**स्त्रस्य कणादर्षिं च **वैशेषिकशा**स्त्रस्य प्रस्थापकत्वेन मन्यते ।[४] किन्तु पुराणानामाधार इतिहासविषये कियान् प्रामाणिक इत्यत्र विदुषां वैमत्यमत एतादृशा आधारास्सदैव चिन्तनीयाः ।

इदं तु निश्चितप्रचं यत्प्राचीनसमयादेव द्वे अपीमे शास्त्रे परस्परं सम्बद्धे बभूवतुः ।[५] **हरिभद्रानुसारी राजशेखर**सूरिरपि स्वकीये षड्दर्शनसमुच्चये[६] न्यायवैशेषिकयोरितिवृत्तं वर्णयन् वैशेषिकान् पाशुपतानाचष्टे[७] । अनयोः शास्त्रयोः प्रस्थापकविषयेऽपि स्पष्टमेव तस्य षड्दर्शन-समुच्चये निर्दिष्टं यदुलूकरूपेण शिवेनैतत्मतं कणादस्य मुनेः पुरः प्रकथितमितीदं मतमौलूक्य-मुच्यते । एवमेवाक्षपादेन प्रस्थापितं न्यायमतं युक्त्यनुसारीति **यौगिकमाक्षपादम्** इत्युच्यते । द्वयमपि मतं प्रायस्तुल्यमित्यपि कथितवान् ।[८] इदं राजशेखरसूरिवर्णितं वृत्तमपि पौराणिकमिति विद्वद्भिश्चिन्तनीयम् ।

---

२ द्रष्टव्याऽत्रैवास्मदाङ्लभाषाप्रस्तावना पृ. ३ पा. टि. १.

३ द्रष्टव्या डॉ. भाण्डारकरमहोदयसम्पादिततर्कभाषा प्रस्तावना पृ. २-७.

४ द्रष्टव्या तदेव.—पृ. ७.

५ द्रष्टव्याऽत्रैवास्मदाङ्लभाषाप्रस्तावना पृ. ४ पा. टि. १.

६ षड्दर्शनसमुच्चय पृ. ८. ९. अत्रैवास्मदाङ्लभाषाप्रस्तावनायामुद्धृताः श्लोकाश्च, प्रस्तावना पृ. ४.

७ द्रष्टव्यं तदेव पृ. ११.

८ द्रष्टव्यं तदेव पृ. १२ ।

न्यायशास्त्रप्रस्थापकस्य **गौतमर्षे**र्निश्चितः कालोऽद्यावधि न निर्णीतः। केचिद्विद्वांसस्तु **गौतमाक्षपादौ** द्वौ भिन्नावेव बभूवतुरिति मन्यन्ते। पुराणैस्तु **गौत**म एव न्यायशास्त्रप्रवक्ताऽङ्गीक्रियते।[९] **न्यायवृत्तिकारो विश्वनाथो गौतमं** न्यायसूत्राणां कर्तारं वर्णयति।[१०] भाष्यकारो **वात्स्यायनमुनिर्वार्तिककार उद्योतकरः, तात्पर्यटीकाकृद्वाचस्पतिमिश्रः,** न्यायमञ्जरीकर्ता जयन्तभट्टश्च ऋषि**मक्षपादं** न्यायसूत्राणां कर्तारं ज्ञापयन्ति।[११] महाकवि**भास**विरचिते **प्रतिमा**नाटकस्य पञ्चमाङ्के "भोः काश्यपगोत्रोऽस्मि। साङ्गोपाङ्गं वेदमधीये, मानवीयं धर्मशास्त्रं, माहेश्वरं योगशास्त्रं, बार्हस्पत्यमर्थशास्त्रं **मेधातिथेर्न्यायशास्त्रं** प्राचेतसं श्राद्धकल्पं च" इत्युल्लेखेन मेधातिथिं न्यायशास्त्रकर्तारमनुमापयति। डॉ. दासगुप्तामहोदयः स्वकीये भारतीयदर्शनेतिहासे 'गौतमेन मेधातिथेर्न्यायशास्त्रमधीतमिति निरूपयति। तन्मतेन गौतमो नैतिहासिकः पुरुषः किन्तु न्यायसूत्राणामवितथः कर्ताऽक्षपाद एव।[१२] किन्तु स्व. म. म. शतीशचन्द्रविद्याभूषणमहोदयो **मेधातिथिंगौतम**मैतिहासिकपुरुषत्वेन मन्यते। मेधातिथिर्गौतम एवान्वीक्षिक्या प्रस्थापकस्तन्महोदयस्य मतेन भिन्न **एवाक्षपादो गौतमः**[१३]**।** आचार्यविश्वेश्वरमहोदयो **गौतमाक्षपादौ** भिन्नौ मन्यते। स तु मेधातिथिगौतमं न्यायदर्शनकर्तारं मन्यते।[१४] **फणीभूषणतर्कवागीशमहोदयो मेधातिथिगौतममक्षपादं** चाभिन्नपुरुषं गणयति[१५]। तन्मतेन रामायणे प्रसिद्धोऽहल्यापतिर्गौतम एव गौतमो न्यायसूत्रकर्ता। तन्महोदयमतम्—

> अक्षपादो महायोगी गौतमाख्यो महामुनिः।
> गोदावरी समानेता अहल्यायाः पतिः प्रभुः॥

इति स्कन्दपुराणोक्तावाश्रितम्।

सर्वाण्यप्येतानि विदुषां मतानि न नो निश्चितनिर्णयं प्रति नयन्ति। अन्येषां विदुषामप्यनेकान्यनुमानानि सन्ति किन्तु न तान्यस्मिन् विषये स्पष्टतया निर्णायकानि। अतो गौतमोऽक्षपादो मेधातिथिश्चाभिन्ना भिन्ना वा, कश्च तेषां निश्चितः काल इति विषये नाद्यापि कस्यचिद्विदुषो प्रामाणिको निर्णयः। तथाप्येतानि प्रमाणान्याश्रित्य यथाकथंचित् खिस्तीयवर्षारम्भात्पञ्चशताब्दीपूर्वमस्य न्यायसूत्रकर्तुः समयोऽनुमातुं शक्येत। एवं न्यायसूत्रभाष्यकृ-

---

९ गौतमेन तथा न्यायम् पद्म. पु. उ. खण्ड अ. २६३; गौतमः स्वेन तर्केण इत्यादि स्कन्द पु. कालिका ख. अ. ७६।

१० एषा मुनिप्रवरगोतमसूत्रवृत्तिः—न्यायसूत्रवृत्तेर्मङ्गलम्।

११ द्रष्टव्यमत्रैवाङ्ग्लभाषाप्रस्तावना पृ. ५. पा. टि ६.

१२–१३ तदेव पृ. ६. पा. टि. २.

१४ हिन्दी तर्कभाषा—आचार्य विश्वेश्वरसम्पादिता प्रस्तावना पृ. २५-२७.

१५ स्कन्द पु. महेश्वरखण्ड कुमार ख. अ. ५५. श्लो. ५.

द्वात्स्यायनस्य समयोऽपि न पूर्णतया निश्चितः। जैनाचार्यो **हेमचन्द्रः** स्वीयेऽ**भिधानचिन्तामणौ** वात्स्यायनस्य पक्षिलस्वामी, कौटिल्यः, चाणक्य, इत्यादीन्यनेकानि नामानि गणयति।[१६] पुरुषोत्तममहोदयः त्रिकाण्डशेषेऽप्येतानि नामानि परिगणयति।[१७] पुस्तकद्वयेऽपि विष्णुगुप्तः, द्रामिलः, अङ्गुलोंऽशुलो वा इत्यन्यानि नामान्यपि परिगणितानि। किन्त्वेतानि सर्वाणि भाष्यकर्तुर्वात्स्यायनस्यैवाभिधानानि वा एते सर्वे भिन्नाः पुरुषा वा इति विषये निर्णायकं प्रमाणं नोपलभ्यते। इतिहासविदो भाष्यकर्तुर्वात्स्यायनस्य कालं खिस्तीयाब्दस्य द्वितीयशताब्दीमनुमन्यन्ते। न्यायभाष्यस्य व्याख्यारूपं वार्तिकं पाशुपताचार्येण भारद्वाजापरनामधेयेनोद्योतकरेण व्यधायि। तेन स्ववार्तिके भाष्यकारमतखण्डनकर्तुर्बौद्धतार्किकस्य[१८] **दिङ्नागस्य** मतं खण्डितमिति **वार्तिककार उद्योतकरो** दिङ्नागात्पश्चाद्भावीति निश्चितमेव। दिङ्नागस्य समयः खिस्तीया षष्ठी शताब्दीति गण्यते। अतो वार्तिककारस्तत्पश्चाद्भावीति स्थितम्। वार्तिककारस्य मतानि बौद्धतार्किकेण **धर्मकीर्तिना** खण्डितानि। तन्मतानि **तात्पर्यटीकायां** विदुषा **वाचस्पतिमिश्रेण** तथैव **तात्पर्यपरिशुद्धौ** तत्कर्त्रा **उदयनाचार्येण** च खण्डितानि।

इत्थं न्यायसूत्रेषु न्यायभाष्यादारभ्यानेकाः सुन्दरा व्याख्योपव्याख्याश्चोपलभ्यन्ते। अन्यैर्विद्वद्भिरपि न्यायशास्त्रविषयका ग्रन्था रचिताः। तद्यथा **जयन्तभट्ट**रचिता **न्यायमञ्जरी**, उदयनाचार्यविरचिता **प्रबोधसिद्धिर्न्यायपरिशिष्टे**त्यपरनामधेया, विदुषाऽ**निरुद्ध**विरचिता न्यायभाष्य-वार्तिक-तात्पर्यटीकासु टिप्पणस्वरूपा **विवरणपञ्चिका**। अयमनिरुद्धः साङ्ख्यसूत्रटीकाकर्तुरनिरुद्धाद्भिन्नः। अनेन तात्पर्यपरिशुद्धिः स्वटिप्पणे विवरणपञ्चिकायां न स्पृष्टाऽतोऽनुमीयतेऽयमुदयनाचार्यात्पूर्वभावीति। तमनुसरता विदुषा **श्रीकण्ठेन** भाष्य-वार्तिकतात्पर्यटीका-तात्पर्यपरिशुद्धिषु चतुर्षु ग्रन्थेषु व्याख्याऽऽरब्धा किन्तु सा न समाप्तिं प्राप्ता। श्रीकण्ठस्यापूर्णां रचनां दृष्ट्वा सूरिणाऽ**भयतिलकेन** पूर्वोक्तेषु चतुर्षु न्यायमहाग्रन्थेषु पञ्चममिदं व्याख्यानमिति कृत्वा **न्यायपञ्चप्रस्थानं न्यायालङ्कारटिप्पण**मित्यपरनामधेयं टिप्पणं विदधे। **उपाध्यायवर्धमानेन** तात्पर्यपरिशुद्धौ **परिशुद्धिप्रकाश**व्याख्याऽलेखि। **द्वितीयवाचस्पतिमिश्रेण न्यायसूत्रोद्धार** इति ग्रन्थो रचितः। **विश्वनाथपञ्चाननेन न्यायसूत्रवृत्ती** रचिता। गोविन्दखन्ना इत्यनेन विदुषा **न्यायसङ्क्षेपो** विदधे, राधामोहनगोस्वामिना च **न्यायसूत्रविवरणं** कृतम्। तथैव विदुषा कृष्णकान्तवागीशेन **गौतमसूत्रसंदीपो** रचितः। अन्या अपि टीकोपटीका न्यायसूत्रमुद्दिश्य सञ्जाताः।

---

१६ अभि. चि. मर्त्यकाण्ड श्लो. ५१७-१८ अत्रैव आङ्ग्लभाषाप्रस्तावनायां पृ ६. पा. टि. ५

१७ त्रिकाण्डशेषकोषे-ब्रह्मवर्गः; अत्रैवाङ्ग्लभाषाप्रस्तावनायां पृ. ७. पा. टि. ५

१८ न्यायवार्तिक-मङ्गल श्लोकः।

केषांचिद्विदुषां मतेन यद्यपि न्यायपरम्परातो वैशेषिकपरम्परा प्राचीनतरा[19] तथापि न्यायसूत्रसदृशी व्याख्योपव्याख्यापरम्परा वैशेषिकसूत्राणां नोपलभ्यते। दर्शनान्तरेषूपलभ्यैर्वैशेषिकमतसन्दर्भैरेतत्तु ज्ञायते यदिदं शास्त्रं सर्वेषामपि नास्तिकानामास्तिकानां च दार्शनिकानां सुपरिचितं स्वधीतं चासीत् । आस्तिकपरम्परायां तु "**काणादं पाणिनीयं** च सर्वशास्त्रोपकारकम्" इति प्रसिद्धैवोक्तिः। इदं च शास्त्रं स्थापकस्य **कणाद**र्षेर्नाम्ना **काणादमौलूक्यं** वाऽभिधीयते । ऋषेर्गोत्रनाम्ना **काश्यपीय**मित्यप्युच्यते। कथङ्कारमस्य शास्त्रस्य **वैशेषिक**मित्यभिधानमित्यत्रानेकानि भिन्नानि मतानि ।

हरिभद्रसूरेः षड्दर्शनसमुच्चयस्य व्याख्याकृता गुणरत्नसूरिणा[20] व्युत्पद्यते "नित्यद्रव्य[वृत्तयोऽन्त्याविशेषाः] विशेषा एव वैशेषिकं विनयादिभ्यः स्वार्थे इकच्। तद्वैशेषिकं विदन्त्यधीयते वा तद्वेत्ति अधीते इत्यपि वैशेषिकाः तेषामिदं **वैशेषिकम्**। उदयनाचार्यस्तु किरणावल्यां "विशेषो व्यवच्छेदस्तत्त्वनिर्णयः तेन व्यवहरतीति" वैशेषिक इत्यस्यार्थं प्रख्यापयति। दुर्वेकमिश्रो धर्मोत्तरप्रदीपे "द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकैः पदार्थविशेषैर्व्यवहरन्तीति वैशेषिकाः। रूढेश्चाभ्युपगतकणादशास्त्रा एवोच्यन्ते। अथवा षट्पदार्थप्रतिपादकतया विशेष्यते तदन्यस्माच्छास्त्रादिति विशेषः **काणादं** शास्त्रं विवक्षितम्। तद्विदन्त्यधीयते वेति वैशेषिकाः।[21] मतमिदमनुसृतं वि महोदयेन चीनप्रदेशविदुषा।[22] केचिद्विद्वांसोऽस्य शास्त्रस्य श्रुतिविरुद्धतर्कप्रतिपादकत्वं बौद्धमतप्रभावित्वं च प्रतिपादयन्ति;[23] किन्तु तेषामिदं मन्तव्यं वितथं दृश्यते वैदिकसंहितानां ब्राह्मणग्रन्थानामुपनिषदां चावलोकनेन। वस्तुतस्तूपनिषत्सु श्वेताश्वतरसदृश्य उपनिषदो वैशेषिकपरम्परापरा दृश्यन्ते।[24] **महाभारते**ऽपि वैशेषिकपारिभाषिकशब्दाना**मणुपरमाणु**वैशेषिकगुणादीनामनेकेषु स्थलेषूपयोगो दृश्यते।[25]

इत्थं वैशेषिकपरम्परायाः प्राचीनत्वेऽपि वैशेषिकसूत्राणां न्यायभाष्यसदृशं प्राचीनं प्रामाणिकं च भाष्यं नोपलभ्यते। भाग्यवशात् साम्प्रतं संशोधनेन किञ्चित्प्राचीनं टीकाद्वयं समुपलब्धम्। तयोरेका व्याख्या विदुषा सुहृदा **ठाकुर इत्युपाह्वेनानन्तलाल शर्म्मणा** सम्पादिता प्रकाशिता च **दरभङ्गास्थमिथिलासंशोधनमन्दिरेण** खिस्तीय १९५७

---

१९ आथल्येबोडाससम्पादित तर्कसंग्रह प्रस्तावना पृ. ३५.

२० हरिभद्रसूरेः षड्दर्शनसमुच्चये गुणरत्नसूरिटीका पृ. २३.

२१ धर्मोत्तरप्रदीप :—पृ. २४०.

२२ 'वि' प्रणीतं वैशेषिकदर्शनं प्रस्तावना पृ. ४.

२३ द्रष्टव्यं "प्राइमर ऑफ इण्डिअन लोजिक" इति नाम पुस्तकम् प्रस्तावना पृ. १०.

२४ 'तु' श्वेताश्वतर—३.३; अत्रैवाङ्ग्लभाषाप्रस्तावना पृ. ९. पा. टि. १

२५ वै. द. अनन्तलालशर्म्मण आङ्ग्लभाषाप्रस्तावना पृ. ८.

तमेऽब्दे, अज्ञातकर्तृकेयं व्याख्या। द्वितीया तु **चन्द्रानन्दवृत्ति**स्तत्रभवता विदुषा **मुनिना जम्बूविजयमहोदयेन** सम्पादिता प्रकाशिता च **गायकवाडप्राच्यग्रन्थमालायां** खिस्तीय १९६१ तमे वर्षे। इदं टीकाद्वयं **शङ्करमिश्रस्योपस्कारात्** प्राचीनतरमिति निश्चितम्।[२६] द्वितीयटीकायाश्चन्द्रानन्दवृत्तेः प्रस्तावनायां विद्वन्मुनिना स्वसम्पादित**द्वादशारनयचक्र**-माश्रित्याधोनिर्दिष्टा वैशेषिकटीकापरम्परा प्रदर्शिता।[२७] तद्यथा

वैशेषिकसूत्र
- वाक्य
  - भाष्य
    - प्रशस्तमतेष्टीका
- कटन्दी

अन्यच्च वैशेषिकसूत्रेष्वात्रेयप्रणीतं भाष्यमप्यासीत्।[२८] महाकविर्मुरारिः स्वकीयेऽ**नर्घराघव**नाटके वैशेषिकभाष्यकर्तारं **रावण**नामानं विद्वांसं निर्दिशति। अयं रावणो लङ्केशो रावण इति मुरारेर्भ्रान्तिरेव। वैशेषिकसूत्रभाष्यकृद्रावणस्तु भिन्न एव। **पद्मनाभमिश्रेणा**पि **किरणावलीभास्करे** भाष्यकृद्रावणस्य नाम निर्दिष्टम्। इत्थं **ब्रह्मसूत्रशाङ्करभाष्यटीकायां रत्नप्रभायां** गोविन्दप्रभुणा, **प्रकटार्थविवरणे** चानुभूतिस्वरूपाचार्येणापि तन्निर्दिष्टम्।[२९] **कटन्दी**टीकायाः कर्ताऽयमेव रावण इति मुरारिवचसाऽनुमीयते।[३०] प्रदर्शितकोष्टकानुसारं वैशेषिकसूत्राणां **वाक्य**नाम्नी व्याख्याऽऽसीत्। **वाक्य**स्योपरि भाष्यं तस्य च **प्रशस्तमति**ना टीकेति व्याख्यात्रयमासीत्। **प्रशस्तपादः प्रशस्तमतिश्च** भिन्नावेकस्य पुरुषस्य वाऽभिधानं द्वयमिति चिन्तनीयमेतत्। एता सर्वा अपि कृतयो न केनापि स्वरूपेणोपलभ्यन्ते। पूर्वग्रन्थेष्वनिर्दिष्टं यट्टीकाद्वयं प्राप्तं सम्पादितं च तत्तूक्तमेव। इदं सम्पादितं टीकाद्वयं शङ्करमिश्रोऽपि स्वकीयोपस्कारे न निर्दिशति। अतोऽनुमीयते यत्प्राचीनतरमपीदं टीकाद्वयं तदानीं शङ्करमिश्रस्य दृष्टिपथं नायातम्। वैशेषिकसूत्राणां समयस्य विषये विस्तरार्थं जिज्ञासुभिर्विदुषोऽनन्तलालशर्मणः प्रस्तावनाऽवश्यं द्रष्टव्या।[३१] प्रशस्तभाष्येण वैशेषिकसूत्राणामध्ययनमधरीकृतमित्यपि तत्र कथितमेव।

---

२६ चन्द्रानन्दवृत्तिसहित वै. सू. प्रस्तावना : पृ. १२-१३.

२७ तत्रैव प्रस्तावना. पृ. ५-११.

२८ तदेव आङ्गलभाषाप्रस्तावना पृ. १२-१३

२९ तदेव परिशिष्ट. ६ पृ. १५० पा टि- १.

३० तदेव संस्कृतप्रस्तावना पृ. ७

३१ द्रष्टव्या वै. द. अनन्तलाल ठाकुर सम्पादितम्, आङ्गलभाषा. प्रस्ता. पृ. ९-१५

प्रशस्तपादभाष्यस्याध्ययनमियत्प्रसृतं येन विद्वद्भिस्तस्यैव टीकोपटीका रचिता न वैशेषिकसूत्राणाम्। अधुना तु संशोधनेन यट्टीकाद्वयं प्राप्तं तत्तु दर्शितमेव। तृतीयव्याख्या या प्रथिता वर्तते सा **शङ्करमिश्रस्योपस्कारः।** अस्मिन्नुपस्कारेऽपि टीकाद्वयमुपलभ्यते। (१) **जयनारायणतर्कपञ्चाननकृता वृत्तिः**, (२) **पञ्चाननतर्करत्नकृत उपस्कार-परिष्कारश्च।** इदं टीकाद्वयं नव्यन्यायप्रभावयुतम्। **चन्द्रकान्ततर्कालङ्कार**कृते वैशेषिक-सूत्रभाष्ये तु वेदान्तस्य प्रभावो दृश्यते। **गङ्गाधरवैद्य**कृतभारद्वाजवृत्तिभाष्ये वैशेषिकसूत्र-भाष्ये साङ्ख्यायुर्वेदादिशास्त्राणां प्रभावो दृष्टिगोचरो भवति। अतो वैशेषिकसूत्राणां प्राचीनपरम्पराया ज्ञानार्थं संशोधनादुपलब्धं टीकाद्वयमभ्यसनीयम्। तत्र चन्द्रानन्दवृत्तिस्तु प्रशस्तपादकृतस्य पदार्थसङ्ग्रहस्य परिचयं निर्दिशति। चन्द्रानन्दवृत्तावज्ञातकर्तृकटीकायां च न वैशेषिकेतरस्यान्यस्य प्रभावो रचयित्रोः पूर्वग्रहो वा दृश्यते।[३२]

अधुनैतावत्यः कृतयः समुपलभ्यन्ते किन्तु यत्तु कथितं प्रशस्तपादभाष्येण वैशेषिक-सूत्राणामध्ययनमेतावदधरीकृतमासीद्यद् वैशेषिकपरम्पराविद्भिः पण्डितैर्वैशेषिकपरम्पराध्ययनार्थं प्रशस्तपादभाष्यस्य टीका रचिताः। एवं वैशेषिकविचारधाराया अध्ययनं प्रशस्तपादद्वारैवाधिकं प्रसृतम्। प्रशस्तपादभाष्यं तु न वैशेषिकसूत्राणां न्यायभाष्यसदृशं भाष्यं किन्तु स्वतन्त्रैव वैशेषिककृतिर्यत्र सर्वेऽपि वैशेषिकराद्धान्ता व्यवस्थितरूपेण प्रतिपादिताः। अस्याः कृतेर्लोक-प्रियत्वात् अस्यैव प्राचीनाश्चतस्रष्टीकाः प्रथिताः। (१) **व्योमशिवाचार्यस्य व्योमवती,** (२) **श्रीवत्साचार्य**स्य लीलावती,[३३] (३) **उदयनाचार्य**स्य किरणावली, (४) **श्रीधर-भट्ट**कृता **न्यायकन्दली** च। आसु टीकासु **लीलावती** केनापि स्वरूपेण नोपलभ्यते। उदयनाचार्येण किरणावल्यां श्रीधरभट्टेन च न्यायकन्दल्यां तत्र तत्राचार्यमतस्योल्लेखेन तेषां मतानां च व्योमवत्यां दर्शनेनानुमीयते यद् व्योमवत्युपलब्धासु टीकासु प्राचीनतमेति। तेषां मतेन वैशेषिकाः शब्दप्रमाणमप्यङ्गीकुर्वते।

वैशेषिकस्याध्ययनं न केवलं वैदिकदर्शनानुयायिभिरेव कृतमपि तु खण्डनप्रयोजनेन श्रुतिविरोधिभिरितरदर्शनानुयायिभिरपि गभीरतया कृतम्। बौद्धग्रन्थेषु **लङ्कावतारसूत्रेऽ-श्वघोषस्य सूत्रालङ्कारे, नागार्जुनस्य रत्नावल्यां च** वैशेषिकमतखण्डनं दृश्यते।[३४] एवमेवं नागार्जुनः स्वकीय **एकश्लोकशास्त्रे उलूकशास्त्रनाम्ना** वैशेषिकं निर्दिशति।[३५] लोकायतिकानां **जयराशि**कृते तत्त्वोपप्लवसिंहेऽपि वैशेषिकमतं खण्डितम्।[३६] जैनास्तु न केवलं खण्डन-

---

३२ जिज्ञासुभिर्द्वावपि ग्रन्थौ दर्शनीयौ।

३३ टीकेयं वल्लभप्रणीताया न्यायलीलावत्या भिन्ना।

३४ आलङ्ग्लभाषाप्रस्तावना पृ. २, वै. सू. सं. जम्बूविजयमुनिः।

३५ तदेव पृ. ९

३६ तदेव पृ. २

मुद्दिश्यैव न्यायवैशेषिकशास्त्राध्ययनं विदधते किन्तु तैः न्यायवैशेषिककृतिषु प्रामाणिक्यो व्याख्या अपि रचिता। जैनानां मतेन कस्यचिद् **श्रीगुप्ताचार्य**स्य शिष्येणोलूकापरनामधेयेन रोहगुप्तेन शास्त्रमिदं प्रस्थापितमिति। विस्तरार्थं जिज्ञासुभिर्जम्बूविजयसम्पादितवैशेषिकसूत्रस्याङ्ग्लभाषाप्रस्तावनाऽवलोकनीया।[३७] अत्र तु विस्तरभयात्पुनरुक्तिभयाच्च न चर्च्यते। **प्रमाणसमुच्चये दिङ्नागेनापि** वैशेषिकमतं प्रस्थाप्य खण्डितम्।[३८]

यथा च जैनाचार्यैर्न्यायवैशेषिकग्रन्थेषु याष्टीका रचितास्तासां नामान्येव विदुषां परिचयार्थं दीयन्ते। (१) **नरचन्द्रसूरिणा न्यायकन्दलीटिप्पण**कम्, (२) **राजशेखरसूरिणा न्यायकन्दलीपञ्जिका** च। (३) **अभयतिलकेन न्यायालङ्कारटिप्पणं पञ्चप्रस्थानाभिधेयमत्रैव** पूर्वं वर्णितम्। (४) जिनवर्धनेन शिवादित्यस्य **सप्तपदार्थ्याष्टीका जिनवर्धनी**। (५) **गुणरत्नगणिना गोवर्धनस्य तर्कभाषाप्रकाशस्य तर्कतरङ्गिणी**। शुभविजयगणिना **तर्कभाषावार्तिकम्** (७) **क्षमाकल्याणेन तर्कसङ्ग्रहदीपिका**याः फक्किका।[३९] एवमन्या अपि जैनाचार्यप्रणीताष्टीकास्सन्ति।[४०]

उदयनाचार्यस्य सङ्क्षिप्तमितिवृत्तम्।

पुरा उदयनाचार्यस्य निवासस्थानविषयेऽनेके विवादा आसन्।[४१] इदानीं तु निश्चतमेव तस्य स्थानं '**मङ्गरौनि**' इति ग्रामः। ग्रामोऽयं मिथिलाप्रदेशान्तर्गतदरभङ्गामण्डले विद्यते। तस्य कालविषये नास्ति सर्वेषां विदुषां विवादः तेन '**लक्षणावली**पुष्पिकायां स्वयमेवास्याः कृते रचनाकालो दर्शितः।[४२] तस्य कृतयस्तु व्याख्या स्वरूपा अन्येषां ग्रन्थानां (१) तात्पर्यपरिशुद्धिः तात्पर्यटीकाया व्याख्या, (२) किरणावली प्रशस्तपादभाष्यटीका च। स्वतन्त्रा कृतयस्तु, (१) न्यायकुसुमाञ्जलिः, (२) आत्मतत्त्वविवेकः, (३) लक्षणावली, (४) लक्षणमाला, (५) **प्रबोधसिध्य**परनामधेयं **न्यायपरिशिष्टं** च। तात्पर्यशुद्धिं विहाय सर्वा अपि इमा कृतयः सकृत्प्रकाशिता एव। तात्पर्यपरिशुद्धिर्यद्यपि हस्तलिखितपुस्तकरूपेण सम्पूर्णा तथापि नेयं सम्पूर्णतयाऽद्यावधि प्राकाश्यं नीता। श्रूयते यन्महाकविना

---

३७ तदेव पृ. ६-९

३८ तदेव परिशिष्ट ७

३९ दीपिकायाः फक्किका सप्तपदार्थ्या जिनवर्धनी च मत्सम्पादिते प्रकाशिते च क्रमशः राजस्थान-पुरातन-ग्रन्थमालायां-ला. द. भारतीयसंस्कृतिप्रचलितग्रन्थमालायां च।

४० द्रष्टव्य-जिनरत्नकोषः जैनभण्डारेषु स्थिता हस्तलिखितपुस्तकानां सूचयोऽन्याश्च हस्तलिखित पुस्तकसूचयः।

४१ किरणावल्याः प्रथमावृत्ति प्रस्तावना, पृ. २६-२७.

४२ **तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः। वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्** कैश्चित्पुष्पिकेयं कृत्रिमाऽपि मन्यते।

श्री हर्षेण स्वकीये खण्डनखण्डखाद्ये उदयनाचार्यस्य मतं खण्डितं यत उदयनाचार्येण श्रीहर्षस्य पिता शास्त्रार्थे राजसभायां पराजितः। वृत्तान्तस्यास्य सम्पूर्णा प्रामाणिकताऽद्यावधि न स्थापिता।[४३]

किरणावल्याष्टीकोपटीकाश्च ।

नव्यन्यायप्रस्थापकस्य महाविदुषो **गङ्गेशोपाध्यायस्या**त्मजः पितृसदृश एव मेधावी पण्डितश्च वर्धमानोपाध्यायः प्राय उदयनाचार्यस्य सर्वासु कृतिषु **प्रकाशनाम्नीं** व्याख्यां विदधौ। इत्थं तेन **किरणावल्याः प्रकाशो**ऽपि रचितः।[४४] **मेघठक्कुर** इत्यपरनामधेयेन **भगीरथठक्कुरेण** विदुषाऽस्य **वर्धमान**कृत**प्रकाशस्य प्रकाशिका**[४५] नाम्नी टीका किरणावलीप्रकाशस्य विदधे। अयं **भगीरथठक्कुरो वासुदेवसार्वभौम**कालिकस्य पक्षधरमिश्रस्य शिष्यः। तेन वर्धमानोपाध्यायस्य सर्वासु कृतिषु टीका व्यधायि। वर्धमानोपाध्यायः मिथिलाप्रदेशस्य दरभङ्गामण्डलस्य **करिजन** इति ग्रामस्य निवासी बभूव। बङ्गदेशीयेन विदुषा **रघुनाथशिरोमणिना**ऽपि **गुणदीधिति**रित्यपरनामधेया[४६] **गुणप्रकाश-**विवृतिनाम्नी टीका वर्धमानकृतप्रकाशस्य विदधे। **रघुनाथशिरोमणिः** प्रसिद्धतार्किकविदुषो तत्र भवतो **वासुदेवसार्वभौमस्य** शिष्यः। रघुनाथस्य सतीर्थ्या अन्ये (१) **गौराङ्गदेवश्चै-तन्यमहाप्रभुरिति**[४७] नाम्ना बङ्गेषु ख्यातः। (२) **रघुनन्दनो** धर्मशास्त्रधूरीणः, (३) **कृष्णानन्दो** मन्त्रशास्त्रविद्वांश्च बभूवुः। नव्यन्यायपण्डितग्रामणी **रघुनाथशिरोमणिस्तु** नैयायिकेषु **दीधितिकार** इति नाम्नाऽपि ख्यातः। **तेनोदयनाचार्यस्यात्मतत्त्वविवेके**ऽपि दीधिती रचिता।

रघुनाथशिरोमणिशिष्येण बङ्गदेशनिवासिना **मथुरानाथतर्कवागीशेन** शिरोमणिग्रन्थेषु **माथुरी**ति स्वनाम्ना प्रसिद्धाष्टीका विदधिरे। तेनापि **गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणा**वुद-यनाचार्यस्यात्मतत्त्वमिवेके च माथुरी व्यधायि। किरणावल्या गुणदीधितौ **गुणदीधितिमाथुरी** विद्यते।[४८] इत्थं किरणावल्याष्टीकोपटीकासङ्क्षेपे (१) वर्धमानस्य प्रकाशः, (२) प्रकाशस्य प्रकाशिका भगीरथ-ठक्कुररचिता, (३) प्रकाशिकाया गुणप्रकरणे रघुनाथशिरोमणेर्गुणदीधितिः, (४) तस्याश्च मथुरानाथकृता गुणदीधितिमाथुरीति परम्परा। दीधितेरन्याष्टीका **रुद्रभट्टाचार्य-**

---

४३ प्रथमसम्पादितकिरणावली प्रस्तावना, पृ. २६ पा. टि. १.

४४ तदेव प्रस्तावना पृ. २-३ पा. टि. १ अत्रैवाङ्ग्लभाषाप्रस्तावना पृ. १४ पा. टि. २.

४५ तदेव प्रस्तावना पृ. ३ पा. टि. १ आङ्ग्लभाषाप्रस्ता. पृ. १५ पा. टि. १.

४६ तदेव पृ. ४ पा. टि. १ आङ्ग्लभाषाप्रस्तावना पृ. १६ पा. टि. १.

४७ तदेव पृ. ३२ पा. टि. १ आङ्ग्लभाषाप्रस्तावना पृ. १६ पा. टि. २.

४८ तदेव पृ. ४ पा. टि. २ आङ्ग्लभाषाप्रस्तावना पृ. १७ पा. टि. १.

रचिता **गुणविवृतिभावप्रकाशिका** विद्यते। तस्या '**गुणप्रकाशविवृतिपरीक्षा** इत्यप्यपरमभिधानम् ।[४९] दीधितेस्तृतीया टीका **रामकृष्ण**विरचिताऽपि वर्तते।[५०] चतुर्थी टीका **जयरामभट्टाचार्येण** विदधे[५१]। **बलभद्रमिश्रात्मजेन पद्मनाभेन किरणावलीभास्कर**[५२] इति नाम्ना विख्याता स्वतन्त्रा टीकाऽरच्यत ।

एताः सर्वाष्टीकोपटीकाः किरणावल्या लोकप्रियतामुपयोगितां च निर्दिशन्ति। एवमेवोदयनाचार्यस्यान्यासु कृतिष्वपि विद्वद्भिर्व्याख्या रचिताः। एतत्सर्वं न केवलमुदयनाचार्यस्य वैदुष्यमपि तु तस्य कृतीनां विद्वत्प्रियत्वमुपयोगितां च शंसति। इदानीमपि न्यायकुसुमाञ्जलिसदृशीनां कृतीनां लोकप्रियत्वाद् हिन्दीभाषायामनुवादा उपलभ्यन्ते।

सम्पादनेऽस्मिन् यैर्विद्वद्भिर्मित्रैश्च साहाय्यं दत्तं तेषामृणाङ्गीकरणमस्माभिराङ्ग्लभाषाप्रस्तावनायां कृतमित्यत्र नाभ्यस्यते। यद्यपि सावधानेनेदं पुस्तकं संशोधितं तथापि ये केचन दोषास्युस्ते विद्वांसः क्षमादृष्ट्या द्रक्ष्यन्ति।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥

प्रीयन्तां गुरवः।

---

४९ तदेव पृ. ४. पा. टि. ३ आङ्ग्लभाषाप्रस्तावना पृ. १७ पा. टि. २.
५० तदेव पृ. ५. पा. टि. १ ,, पृ. १८ पा. टि. १.
५१ तदेव पृ. ५. पा. टि. ३ ,, पृ. १८ पा. टि. १.
५२ तदेव पृ. ६. पा. टि. १ ,, पृ. १८ पा. टि. २.

किरणावलीसहितप्रशस्तपादभाष्यस्य विषयानुक्रमः

(अत्र किरणावली समाप्यते)

(अथ अवशिष्टप्रशस्तपादभाष्यमात्रस्य विषयानुक्रमः)

किरणावलीसहितप्रशस्तपादभाष्यस्य अकारादिक्रमानुसारेण विषयानुक्रमः ।

(१) ॥ प्रशस्तपादभाष्यम् ॥

प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः ।
पदार्थधर्मसङ्ग्रहः प्रवक्ष्यते महोदयः ॥

प्रशस्तपादभाष्यस्य किरणावली ॥

श्रीगणेशाय नमः ॥

(१) विद्यासन्ध्योदयोद्रेकादविद्यारजनीक्षये ।
यदुदेति नमस्तस्मै कस्मैचिद्विश्वतस्त्विषे ॥ १ ॥
यतो द्रव्यं गुणाः कर्म तथा जातिः परापरा ।
विशेषाः समवायो वा तमीश्वरमुपास्महे ॥ २ ॥

---

१ कर्तव्यविघ्नविघातकं रविनमस्कारं निबध्नाति—**विद्येति** । **यदिति** सामान्यतोऽपि कर्तृनिर्देशे विद्याऽविद्ययोः सन्ध्यारजनीभ्यां निरूपणाद् रविरुदेता लभ्यते । विद्येव या पूर्वसन्ध्या तदुदयोद्रेकादुत्पत्त्याधिक्यादविद्येव या रजनी तत्क्षये सति यदुदेति—उदयगिरिशिखरमधिरोहति । सन्ध्या च न रात्रिभागविशेषः । निरस्तैतद्द्वीपवर्तिरविरश्मिजालस्य कालविशेषस्य रात्रित्वात् । सन्ध्यायां चात्र द्वीपे कतिपयतत्सत्त्वात् । अत एव रात्रिसन्ध्ययोर्धर्मशास्त्रे पृथगभिधानम् ।

*यद्वा ल्यब्लोपे पञ्चमी, सप्तमी च निमित्ततायाम् ; तथा च विद्याहेतुर्या सन्ध्या तदुदयोद्रेकं प्राप्याविद्याहेतुर्या रजनी तत्क्षयार्थं यदुदेति तस्मै विश्वतो—विश्वस्मात् त्विट् दीप्तिर्यस्य तथाभूताय कस्मैचिद्विशिष्याशक्यनिर्वचनतत्तद्गुणगरिम्णे नमः ।

यद्वा एतच्छास्त्रसाध्यमोक्षहेतुतत्त्वज्ञानविषयाय आत्मन एवायं नमस्कारः । विद्या—आत्मसाक्षात्कारः, सैव तत्त्वप्रकाशकत्वात्सन्ध्या, तदुदयोद्रेकाद् दृढतरसंस्कारजननादविद्या—आत्मनि मिथ्याज्ञानम् ; सैव तज्ज्ञानविरोधित्वाद् रागजनकत्वाद्वा रजनी, तस्याः क्षये सति यदात्मकस्वरुपमुदेति मोक्षरूपप्रयोजनभाग्भवति **तस्मै कस्मैचित्**सर्वोत्कृष्टाय **विश्वतस्त्विषे** योगजधर्मसाचिव्याद्विश्वविषयज्ञानाय नमः । कि. प्र. व.

२ एतच्छास्त्रप्रतिपाद्यपदार्थोद्देशं कुर्वन्नेव नमस्कारवद् रूपान्तरेणापि भगवदुपासनमिष्टसाधनमिति दर्शयति **यत** इति । उत्पत्तिज्ञप्तिहेतुत्वं नित्यानित्ययोर्यथायोगम् । अत्र द्रव्याणां बहुत्वेऽप्यात्मनः प्राधान्यख्यापनाय **द्रव्य**मित्येकवचनम् । तद्विषयाणां श्रवणादिप्रतिपत्तीनां बहुत्वं **गुणा** इति बहुवचनेन व्यज्यते । परा व्यापिका । अपरा व्याप्या । 'वा' शब्दः समुच्चये ।

---

* ननु निरस्तरविकत्वमेककालस्य रात्रित्वं लाघवात्, अत; सन्ध्यापि रात्रिरेव । धर्मशास्त्रे पृथगुपादानं गोबलीवर्दन्यायेन दोषातिशयप्रतिपादनार्थमित्यस्वरसादाह **यद्वेति** । कि. प्र. व्याख्यायां द्रव्यप्रकाशिकायां भगीरथठक्कुरः ।

अर्थानां प्रविवेचनाय जगतामन्तस्तमःशान्तये
सन्मार्गस्य विलोकनाय गतये लोकस्य यागार्थिनः ।
[1]तत्तत्तामसभूतभीतय इमां विद्यावतां प्रीतये
[2]व्यातेने **किरणावलीमुदयनः** सत्तर्कतेजोमयीम् ॥ ३ ॥

अतिविरसमसारं पानवार्ताविहीनं
प्रविततबहुवेलं[1] प्रक्रियाजालदुःखम् ।
उदधिसममतन्त्रं तन्त्रमेतद्वदन्ति
प्रखलजडधियो ये तेऽनुकम्प्यन्त एते ॥ ४ ॥

शास्त्रारम्भे [2]सदाचारपरिप्राप्ततया कायवाङ्मनोभिः कृतं परापर गुरुनमस्कारं शिष्यान् शिक्षयितुमादौ [3]निबध्नाति— **प्रणम्येति** । कर्तव्यापेक्षया [4]पूर्वकालभावित्वात् प्रणामस्य क्त्वानिर्देशः । भक्तिश्रद्धातिशयलक्षणः [3]प्रकर्षः 'प्र' शब्देन द्योत्यते । तथा भूता हि

यद्वा **द्रव्यं** हिरण्यादि, **गुणाः** शास्त्रादयः **कर्म** हिताहितहेतुंव्यापारः, **जातिः** परा-उत्कृष्टा ब्राह्मणत्वादिः अपरा-अधमा चाण्डालत्वादिः, जातेरनिमित्तकत्वेपि तज्जातीयशरीरोत्पत्तिस्तद्धेतुका । **विशेषा** अतिशयरूपाः । **समवायो** मेलकः । सदसदभ्यां सह इत्येतत्सर्वं यत ईश्वराद्भवति स उपास्यः इति युक्तमिति । कि. प्र. व.

१ **तत्तदिति** । ते ते तामसाः कुतर्काभ्यासजनित तमोगुणप्रधाना नास्तिका नक्तंचराश्च भूताः प्राणिनः, तेषां भीतये भीत्यै । प्राचीननिबन्धाश्च **सौगता**द्युत्थापितकुहेतुसन्तमसाच्छादितास्तत्त्वज्ञानाय न पर्याप्ता इति तन्निरासाय । कि. प्र. व. ।

२ **व्यातेने** व्यातनोत् । आशंसायां भूतवच्चेत्याशंसायां लिडिति मतमयुक्तम्, तत्र भूतसामान्य-प्रत्ययस्यैवातिदेशात् भूतविशेषविहितयोर्लङ्लिटोरनतिदेशात् तिङन्तप्रतिरूपकोऽयं निपातः । चक्रे सुबन्धुः सुजनैकबन्धुरितिवदिति केचित् । वस्तुतः णलुत्तमो वेंति ज्ञापकात् कर्त्रपरोक्षेपि लिट् साधुः । ग्रन्थकरण-रभसवशेन चित्तविक्षेपो वा ऋजुवस्तुनाऽयमाचार्यस्य श्लोकः किन्त्वन्यस्येति समादधुः । कि. प्र. व. ।

३ ननु नत्वेत्यनेनैव नमस्कारनिबन्धनात् 'प्र' शब्दो व्यर्थ इत्यत आह **भक्तीति** । आराध्यत्वेन ज्ञानं भक्तिः । आराधना च गौरवितप्रतीतिहेतुः क्रिया । वेदबोधितफलावश्यंभावनिश्चयः श्रद्धा । यद्वा* भक्तिश्रद्धे ज्ञानत्वव्याप्यजातिविशेषौ । कि. प्र. व.

---

* ननु प्रीतिजनकतावच्छेदकं च रूपं प्रतीतं न वा ? आद्ये तन्निश्चय एव प्रवर्तकः तदेव च प्रकर्ष उपजीव्यत्वात् । अन्त्ये **कथमु**क्तरूपनिश्चयोऽपीत्यरुचेराह—**यद्वेति** भक्तिश्रद्धेति भावप्रधानो-निर्देशः । तेनादृष्टविशेषोपगृहीतमनःप्रयोज्यौ नमस्कारहेतुज्ञाननिष्ठजातिविशेषौ भक्तित्वश्रद्धात्वे क्रियातौ-ल्येऽपि फलसत्त्वासत्त्वाभ्यां कल्प्येते इति भावः । कि. प्र. व्या. भ

1 वेल मु. कि. । 2 सदाचारपरम्परा-क । 3 न बध्नाति-जे । 4 कालत्वात्-जे; क ।

परमेश्वरनतिर्मङ्गलमावहति । कृतमङ्गलेन चारब्धं कर्म निर्विघ्नं [1]परिसमाप्यते प्रचीयते च । आगममूलत्वाच्चास्यार्थस्य व्यभिचारो न दोषाय; तस्य [2]कर्तृकर्मसाधवैगुण्य[3]हेतुकत्वात् साद्गुण्येऽपि विघ्नहेतूनां बलीयस्त्वात् । न चैवं [4]सति किमनेनेति वाच्यम्, प्रचितस्यास्यैव बलवत्तरविघ्नवारणेऽपि कारणत्वात् । नहि घनविमुक्तमेकस्तृणस्तम्बो नि[5]वारयितुमसमर्थ इति तदर्थं नोपादीयते, सजातीयप्रचयसम्वलितस्यैव[6] विघ्नवारणे शक्तत्वात् । न च विघ्नहेतु-सद्भावनिश्चयाभावात् तद्वारणे कारणमनुपादेयम्; यतस्तत्सन्देहेऽपि तदुपादानस्य न्याय्यत्वात् । अन्यथाऽनुपस्थितपरिपन्थिभिः पार्थिवैर्द्विरदयूथपतयो नाद्रियेरन्निति ।

ईश्वरमित्यनेनैव लब्धे जगद्धेतुत्वे **हेतु**मिति पुनर्विशेषणोपादानं प्रमाणसूचनाय । कार्यं हि हेतुना विनाऽऽत्मानमनाप्नुवद्धेतुमत्तया कर्तारमाक्षिपति । ईश्वरपदसन्निधिप्रयुक्तो वा हेतुशब्दो विशिष्ट एव श्रेयःसमधिगमनिमित्ते प्रवर्तते । प्रस्तुतशास्त्रहेतुत्वाद्वा हेतुमित्याह । स्मर्यते हि यत **कणादो** मुनिर्महेश्वरनियोगप्रसादावधिगम्य प्रणीतवांस्तेन तं **हेतुं प्रणम्य सङ्ग्रहः प्रवक्ष्य**ते इत्यर्थः । **अतः** ईश्वरप्रणामादनु पश्चात् **कणाद**नामानं मुनिं प्रणम्येत्यनुषज्यते । यद्यपि गुरुतमगुरुतरगुरु[7]क्रमेणैव प्रणामः क्रियते इति शिष्टाचारादेव लभ्यते, तथापि शिष्यशिक्षायै क्रमो[8] निबद्धोऽन्विति । तथा च मुनिप्रणतेः पश्चाद्भावे दर्शिते सन्निधिसिद्धमवधित्वमीश्वरप्रणामस्येत्यत इति मन्दप्रयोजनमित्यपि न वाच्यम्; श्रुतिप्राप्तेऽर्थे[9] प्रकरणादीनामनवकाशात् । अथवा यतः शुश्रूषवः श्रेयोऽर्थिनः श्रवणादि-पटवोऽनसूयकाश्चान्तेवासिन[10] उपसेदुरतो वक्ष्यत इत्यनेन सम्बद्ध्यते; अन्यथाऽरण्यरुदितं स्यादित्यपि शिष्यशिक्षायै । एवं हि शिक्षिते शिष्या अपि तथा कुर्युस्तथा [11]चाविच्छिन्न-सम्प्रदायवीर्यवत्तरं[12] शास्त्रं स्यात्, येन विद्येवाह—

---

१ प्रचयश्च प्रारिप्सितग्रन्थस्य गुरुणा शिष्याय दानस्यावेच्छेदः । कि. प्र. व.

२ आगमेति । दोषाय यो व्यभिचारो व्याप्यव्यभिचारः, विनापि मङ्गलं समीहितसिद्धिरित्येवं रूपः; स इह नास्ति, कुतः, आगममूलत्वात् । अस्यार्थस्य कार्यकारणभावस्य तथा चागमात् कार्यकारण-भावेऽवधृते यत्रापाततो नमस्कारादर्शनेऽपि निर्विघ्नं समाप्तिर्दृश्यते तत्रापि तथैव लिङ्गेन जन्मान्तरीयो नमस्कारोऽनुमीयत इत्यर्थः । कि. प्र. व.

---

1 समाप्यते–जे । 2 कर्मकर्तृ,–जे; क । 3 हेतुत्वात्–जे । 4 'सति'–जे; क पुस्तक-योर्नास्ति । 5 न वारयितुं–°जे, वारयितुं न–क । 6 तस्य शक्तत्वात्–जे; क । 7 प्रक्रमेणैव–जे । 8 क्रमोऽपि बद्धो–जे । 9 प्राप्ते प्रकरणादीनां–°जे । 10 अनुयवनश्च–जे । 11 चानवच्छिन्न–क । 12 वीर्यवच्च–जे; वीर्यवत्तरं च–क ।

→ '[1]विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि' ←
असूकायाऽनृजवे जडाय[2] न मां ब्रूया अवीर्यवती तथा स्याम्' ॥

इति एतेन सौत्रमप्यतः[3] पदं[4] व्याख्यातं स्यात् ।

(२) द्रव्यगुणकर्मसामान्यविशेषसमवायानां [5]पदार्थानां [6]साधर्म्यवैधर्म्य-तत्त्वज्ञानं निःश्रेयसहेतुः । तच्चेश्वर-चोदनाभिव्यक्ताद्धर्मादेव ।

पदार्थधर्मसङ्ग्रह इति—पदार्था द्रव्यादयः, तेषां धर्माः साधर्म्यवैधर्म्यरूपास्त एव परस्परं विशेषणीभूतास्तेऽनेन सङ्गृह्यन्ते । शास्त्रे नाना स्थानेषु वितता एकत्र सङ्कलय्य कथ्यन्त इति सङ्ग्रहः । स प्रकृष्टो वक्ष्यते; [7]प्रकरणशुद्धेः सङ्ग्रहपदेनैव दर्शितत्वात् । वैशद्यं लघुत्वं [8]कृत्स्नत्वं च प्रकर्षः । [9]सूत्रेषु वैशद्याभावात्, भाष्यस्य च विस्तरत्वात् प्रकरणादीनां [10]चैकदेशत्वात् । एतेनाभिधेयं [11]दर्शितम् । न च तत्प्रतीतावपि प्रेक्षावान् प्रयोजनं विना प्रवर्तते इति [12]तदाह **महोदय** इति । महानुदय[13] उद्गम उद्बोधो ज्ञानमिति यावत्; सोऽस्माद् भवतीति महोदयः सङ्ग्रह उक्तः ।

ततः किं न ह्ययं पुरुषार्थः । के[14] पदार्थाः के च तेषां धर्मा इत्यत आह **द्रव्ये**ति । [15]अत्र के पदार्था इत्यपेक्षायां पदार्था [16]द्रव्यादयः । के धर्मा [17]इत्यपेक्षायां साधर्म्यवैधर्म्यरूपाः—अनुवृत्तव्यावृत्तरूपा इत्यर्थः । तेषामुद्बोधः कथं पुरुषार्थ इत्यत्र **तत्त्वज्ञानं निःश्रेयस**हेतुरिति । तत्त्वमनारोपितं रूपम्, तच्च साधर्म्यवैधर्म्याभ्यामेव विविच्यते । साक्षादपि हि दृश्यमाना अत्यन्ता असङ्कीर्णाः स्थाण्वादयो वक्रकोट्यादिभिः पुरुषादिभ्यो विविच्यन्ते [18]नत्वन्यथा किं पुनरतीन्द्रिया मिथो मिश्रीभूता [19]अत्यन्तसङ्कीर्णाः कालाकाशादयः [20]शरीरेन्द्रियात्मादयो वेति । एतेन पदार्था एव प्रधानतयोद्दिष्टा वेदितव्याः । अभावस्तु स्वरूपवानपि पृथङ्नोद्दिष्टः; प्रतियोगिनिरूपणाधीननिरूपणत्वात्, न तु

---

1 →← एतच्चिह्नान्तर्गतः पाठः जे क पुस्तकयोर्नास्ति । 2 ऽदान्ताय–जे । 3 सौत्रमतः–जे । 4 अथातो धर्मं व्याख्यास्यामः वै. सू. १. १. १. । 5 'षण्णां पदार्थानां'–इति कं; व्यो; पुस्तकयोः । 6 साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं–कि. दे; साधर्म्यतत्त्वज्ञानं–जे । 7 प्रकरणशुद्धः पदेन–क । 8 कृत्स्नता–जे. क । 9 सूत्रे–जे. क । 10 देशत्वादिति–जे । 11 दर्शितं भवति–क । 12 तत्राह–जे; तमाह–क । 13 महानुदय उद्बोधस्तत्त्वज्ञामिति–क । 14 के ते पदार्थाः–क । 15 'अत्र'–'क' पुस्तके नास्ति । 16 द्रव्यादयः षट्–मु. कि. । 17 इत्यत्र–मु. कि. । 18 नान्यथा–मु. कि. । 19 'अत्यन्तसङ्कीर्णाः' इति जे. क पुस्तकयोर्नास्ति । 20 शरीरात्मादयो–जे; क ।

तुच्छत्वात्। उत्पत्तिविनाशचिन्तायां प्रागभावप्रध्वंसाभावयोर्वैधर्म्ये चेतरेतराभावात्यन्ताभावयोस्तत्र [1]तत्र दर्शयिष्यमाणत्वादिति। तेन द्रव्यादीनां साधर्म्यवैधर्म्याभ्यां तत्त्वं प्रतिपादयन् सङ्ग्रहो निःश्रेयसं साधयति यतोऽतः प्रेक्षावतामुपादेय इति तात्पर्यम्।

निःश्रेयसं पुनर्दुःखनिवृत्तिरात्यन्तिकी। अत्र च वादिनामविवाद एव, नह्यपवृक्तस्य दुःखं[2] प्रत्यापद्यत इति कश्चिदभ्युपैति। केवलमात्माऽपि दुःखहेतुत्वान्निवर्तयितव्यः शरीरादिवदिति ये वदन्ति तेषां यद्यसौ नास्ति किं विनिर्तयितव्यम्? अत्यन्ताऽसतो नित्यनिवृत्तत्वात्। अथास्ति, तथापि किं निवर्तनीयम्? नित्यत्वेन तन्निवृत्तेरशक्यत्वात्। अथ ज्ञानस्वभाव एवासौ निवर्तनीय इति मतम्; अनुमतमेतत्। दग्धेन्धनानलवदुपशमो मोक्ष इति वक्ष्यमाणत्वात्। तस्मादतिरिक्ते आत्मनि प्रमाणं वक्तव्यमित्यवशिष्यते तद्वक्ष्यामः।

साङ्ख्यानामपि दुःखनिवृत्तिरपवर्ग इत्यत्र न विप्रतिपत्तिः। [१]प्रकृत्याश्रयं तु[3] दुःखं न पुरुषाश्रयमिति [4]विवादस्तन्मतमग्रे निराकरिष्यामः। ये [२]त्वनुपप्लवां चित्तसन्ततिमनन्तामपवर्गमाहुस्तेऽप्युपप्लवस्य दुःखमयत्वात् तन्निवृत्तिमेवेच्छन्ति। न च चित्तसन्ततेरनन्तत्वं प्रामाणिकम्; निमित्तस्य शरीरादेरपाये नैमित्तिकस्य चित्तस्योत्पादयितुमशक्यत्वात्। उपप्लवावस्थायां तन्निमितमिति चेत्, न, अनुपप्लवस्यापि तत्साध्यत्वात्। नहि शरीरनिरपेक्षा तत्सिद्धिः सम्भवति; योगाभ्याससाध्यत्वात्तस्य। अन्यथाऽन्योन्याश्रयप्रसङ्गात्। शरीरादिनिवृत्तावनुपप्लवः चित्तस्य[5], अनुपप्लवे च तस्मिन् शरीरादिनिवृत्तिरिति। अथ शरीरादिकमपि चित्तविलसितमात्रं न तु [6]वास्तवमित्यभिप्रायः; तत्र वक्ष्यते।

वे[३]दान्तिनामपि अविद्यायां निवृत्तायां केवलमात्मैवापवर्गे वर्तत इति मते न नो

---

१ **प्रकृत्याश्रय**मिति—यद्यपि भावाष्टकसम्पन्नतया महत एव दुःखमुपेयते साङ्ख्यैः तथापि तन्मते कार्यकारणयोरभेदात् प्रकृत्याश्रयं दुःखमुक्तम्। एतस्य विवादस्य मोक्षाविषयत्वेऽपि यस्य दुःखनिवृत्तिस्तस्य मुक्तिरिति प्रकृतेरेव मोक्षो नात्मन इति मोक्षविषयत्वमस्यास्त्येवेति भावः। कि. प्र. व ॥

२ प्रवृत्तिविज्ञानोपादानमालयविज्ञानसन्तानः पूर्वपूर्वतज्जातीयज्ञानोपादेयः स एवैको मोक्षेऽनुवर्तते इति मतमुत्थाप्य निराकरोति **ये त्विति**। उपप्लवः संसारः। **उपप्लवेति**—अनुपप्लवावस्थायां शरीरं विना पूर्वपूर्वालयविज्ञानेनैवोत्तरोत्तरं तदुत्पाद्यते इत्यर्थः। अनुपप्लवस्यापीति— उपप्लवध्वंसो वा अनुपप्लवः। अविद्यमान उपप्लवो यत्रेति चित्तविशेषो वा; उभयत्रापि शरीरं कारणमित्यर्थः। कि. प्र. व.।

३ **वेदान्तिनामिति**—वस्तुतो ब्रह्माद्वैतसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवलमात्माऽपवर्गे वर्तत इत्येकदण्डिमतमप्ययुक्तम्। स्वप्रकाशसुखात्मकस्य ब्रह्मणो नित्यतया मुक्तसंसारिणोऽ-

---

1 निर्दिष्य°—क। 2 'दुःखमुत्पद्यते' इति 'प्रकाशसम्मतः' पाठः। 3 'तु' 'मु. कि.' पुस्तके नास्ति। 4 °स्तमेनमग्रे—जे। 5 नुपप्लुते—मु. कि.। 6 बाह्य—जे।

विवादः [1]न पुत्राय प्रियो भवति, आत्मने वै पुत्रः प्रियो[2] भवति इत्यादि श्रौतोपपत्तिबलात् सर्वस्यात्मौ[3]पाधिकप्रियत्वं स्वभावतश्चात्मैव [4]प्रियो इति पुनरवशिष्यते तत्रापि वक्ष्यते । तोतातितास्त्वकार्यमपि ईश्वरज्ञानं शरीरमन्तरेणानिच्छन्तः कार्यमेव सुखज्ञानमपवर्गेऽस्तीति वदन्तः त्रपा, विरोधो, भयमिति त्रयमपि [5]त्यक्तवन्तः । एतेन पारतन्त्र्यं बन्धः, स्वातन्त्र्यं च मुक्तिरित्य[6]प्यपास्तम् । न हि पारतन्त्र्यं स्वरूपतो हेयमपि तु दुःखहेतुतया स्वातन्त्र्यमपि यदि दुःखतत्साधननिवृत्तिस्तदा ओमित्युच्यते । ऐश्वर्यं चेत् कार्यतया तदपि साधनपरतन्त्रं क्षयि चेति दुःखाकरत्वाद्धेयमेवेति । तस्मादनिष्टनिवृत्तिरात्यन्तिकी निःश्रेयसमिति ।

[7]नन्वपुरुषार्थोऽयं [8]सुखस्यापि हानेरिति चेन्न । बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वात् ; मधुविषसम्पृक्तान्नभोजनजन्यसुखवत् । तथापि दुःखोच्छितिरपुरुषार्थः;

विशेषापातात् पुरुषप्रयत्नं विनापि तत्सत्त्वेन तस्यापुरुषार्थत्वात् । अविद्यानिवृत्तिमात्रस्य प्रयत्नसाध्यत्वेऽप्यपुरुषार्थत्वात् । कि. प्र. व. ॥

१ न पुत्र इति—एषा श्रुतिः पुत्रस्यात्मसम्बन्धेन प्रियत्वं बोधयन्त्यात्मनः स्वाभाविकप्रियत्वं बोधयति । यदन्वये तु यत्प्रतीयते यद्विरहे तु यन्न प्रतीयते तत्तस्य स्वाभाविकमिति लोकसिद्धव्युत्पत्तेः । आनन्दं ब्रह्मणो रूपमित्येकवाक्याच्चात्मनः प्रियात्मकानन्दरूपत्वं प्रतीयते । न चात्मने इति तादर्थ्ये चतुर्थ्यनुपपत्तिः, 'यूपाय दारु' इत्यत्र दारुस्वरूपयूपार्थत्ववदुपपत्तेरित्यर्थः । कि प्र. व.

२ दुःखसाधनशरीरविनाशे नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भाट्टं मतं निराकरोति तोतातितास्त्विति । ईश्वरे शरीरं विना नित्यमपि न ज्ञानमित्यङ्गीकृत्य मुक्तस्य भोगायतनं विना भोग इत्यभ्युपगमात् त्रपा । कारणं विनापि कार्यमिति विरोधः । शरीरं विनापि ज्ञानसत्त्वेनानभिमतेश्वरसिद्धिप्रसक्त्या भयमित्यर्थः । कि. प्र. व. ।

३ ऐश्वर्यमिति—अणिमाद्यष्टसिद्धिरित्यर्थः कि प्र. व. ।

४ सुखस्यापीति—तुल्यायव्ययत्वाद्दुःखाभावोऽपि न पुरुषार्थ इत्यर्थः । बहुतरेति—ननु तथाप्यावश्यकत्वेन दुःखस्यैव हेयत्वं सुखस्य निरुपाधीच्छाविषयत्वात्; अन्यथा दुःखाननुविद्धतया तस्य काम्यत्वेन स्वतः पुरुषार्थत्वविरोधः ? मैवम्; सुखमनुद्दिश्यापि दुःखभीरूणां दुःखहानार्थं प्रवृत्तिदर्शनेन दुःखाभावस्यैव स्वतः पुरुषार्थत्वात् । न हि दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखाभावार्थं प्रवर्तन्ते; वैपरीत्यस्यापि सुखत्वेन सुखस्यापुरुषार्थत्वापत्तेः । अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखभावार्थिनः प्रवृत्तिप्रतिबन्धकम् । दुःखभीरुणां सुखालिप्सूनां मोक्षेऽधिकारादिति भावः । कि. प्र. व. ॥

५ अपुरुषार्थत्वं कृत्यसाध्यत्वम् । कि. प्र. व. ॥

---

1 'न वाऽरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति, आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति' —इत्यधिकं ३ पु. । 2 सर्वं प्रियं—पा. ३ पु । 3 त्मौपाधिक—कि । 4 प्रियो भवतीति—मु. कि; जे । 5 त्यक्तवन्तश्च—क । 6 गतार्थम्—जे । 7 तथाप्यपुरुषार्थोऽयं—जे । 8 सुखस्यापि पुरुषस्यापि—ते ।

अनागतस्य निवर्तयितुमशक्यत्वात्, वर्तमानस्य च पुरुषप्रयत्नमन्तरेणैव विरोधिगुणान्तरोपनिपातनिवर्तनीयत्वादतीतस्याप्यतीत्वादेवेति चेत्, न, हेतूच्छेदे पुरुषव्यापारात् प्रायश्चित्तवत्। तथा हि मिथ्याज्ञानं सवासनम् इह संसारमूलकारणम्; तच्च तत्त्वज्ञानेन विरोधिना निवर्त्यते। तन्निवृत्तौ रागाद्यपाये प्रवृत्तेरपायाज्जन्माद्यपायः, तथा च दुःखसन्तानोच्छेदः। तच्च तत्त्वज्ञानं पुरुषप्रयत्नसाध्यमिति।

किं पुनरत्र प्रमाणम्? 'दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात्, प्रदीपसन्ततिवद्' इत्या**चार्याः**। पार्थिवपरमाणुगतरूपादिसन्ताने नानैकान्तिकमिदमिति चेत्, न; सर्वात्मगतदुःखसन्ततेः[1] पक्षीकरणे फलतस्तस्यापि पक्षेऽन्तर्भावात्। न हि सर्वमुक्तिपक्षे सर्वोत्पत्तिमन्निमित्तस्याहष्टस्याभावात् तदुत्पत्तौ बीजमस्ति। न च सर्वभोक्तृणामपवृक्तौ[2] [3]तदुत्पत्तेः प्रयोजनमस्ति। न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति। सर्वमुक्तिरित्येव नेष्यत इति चेत्, तर्हि य [4]एवात्र नापवृज्यते तस्यैव [5]दुःखसन्तानेनानैकान्तिकमिदं [6]किमुदाहरणान्तरगवेषणया? एवमस्तु, न चोदाहरणमादरणीयमिति चेत्, न; असिद्धेः। सिद्धौ वा संसार्येकस्वभावा एव केचिदात्मान इति स्थिते 'अहमेव यदि तथा स्यां तदा मम विपरीतप्रयोजनं पारिव्राजकम्' इति शङ्कया न कश्चित्तदर्थं ब्रह्मचर्यादिदुःखमनुभवेत्। अथ यदि [7]सर्वदुःखसन्ततिनिवृत्तिर्भविष्यति तर्हि इयता कालेन किं नाभूत्? एकैकस्मिन् कल्पे यद्येकैकोऽप्यपवृज्येत [8]तथाप्युच्छिन्नः संसारः स्यात्। कल्पानामनन्तत्वादनन्ता[9] एव ह्यपवृक्ताः, सत्यम्, न तु सर्वे, संसारस्य प्रत्यक्षसिद्धत्वात्। नन्वेतदेव न स्यादित्युच्यते इति चेत्, न; कालनियमे प्रमाणाभावात्। न च सर्वोत्पत्तिमन्निमित्तादृष्टानुत्पत्तौ सर्वमुक्ते-[10]रनुपपत्तिः, अपवर्गस्य भोगतत्साधनेतरत्वात्। नह्यदृष्टनिवृत्तिरप्यदृष्टान्तरसाध्या,[11] एकस्याप्यपवर्गप्रसङ्गादिति[12]।

स्यादेतत्: आदिमती प्रदीपसन्ततिर्निवर्तते, दुःखसंन्ततिस्तु अनादिरियमनुवर्तिष्यत इति चेत्, न; मूलोच्छेदानुवृत्त्योः प्रयोजकत्वात्। मूलोच्छेदाद्धि सन्ततेरुच्छेदः,

---

१ **सवासनमिति**—वासना—तज्जन्यः संस्कारः। **तच्चेति**—सवासनं मिथ्याज्ञानम्। कि. प्र. व.

२ **आदिमतीति** तथा च तद्व्यतिरेकमादाय केवलव्यतिरेकिणा सत्प्रतिपक्षत्वमादिमत्त्वं

---

1 सन्ततिपक्षीकरणे–मु. कि। 2 मप्रवृत्तौ–जे। 3 तदुत्पत्ते–जे। 4 एव–मु. कि.। 5 दुःखसन्ताने–क। 6 मुदाहरणगवेषणया–मु.-कि. 7 सर्वमुक्तिर्भविष्यति–पा. ४. पु.। 8 उच्छेदः संसारस्य स्यात्–क। 9 सत्यमनन्ता एव ह्यपवृक्ताः न तु सर्वे सम्प्रति–मु. कि.। 10 दृष्टानुत्पत्तौ सर्वमुक्तेरनुत्पत्तिः–क. मु. कि.। 11 अदृष्टसाध्या–क.। 12 प्रसङ्गात्–क।

मूलानुवृत्तौ चानुवृत्तिः। अन्यथात्वादिमत्त्वाविशेषे कालानियमो न स्यात्। काचित्प्रदीपसन्ततिः प्रहरमनुवर्तते, काचिदहोरात्रमित्याद्यनियमो हि तैलादिमूलोच्छे[1]दानियमप्रयुक्त इति।

'[3]अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः' [2]इत्याद्यागमाच्चायमर्थोऽध्यवसेयः।

स्यादेतत्, तत्त्वज्ञानं हि विरोधितया समूलं मिथ्याज्ञानमुन्मूलयन्निःश्रेयसहेतुः। न चोपपत्त्या [3]शब्देन तर्केण वा जनितमिदं [4]परोक्षमपरोक्षं मिथ्याज्ञानं निवर्तयितुमुत्सहते, दिङ्मोहादौ तथानुपलब्धेः। [5]अतोऽपरोक्षमव्युत्थायि बलवत्तरं तत्त्वज्ञानं तन्निवर्तनसमर्थम्। [6]तच्च कुतो [7]भविष्यतीत्यत आह **तच्चेति**— ईश्वर[8]चोदना उपदेशो वेद इति यावत्। तेनाभिव्यक्तात्—प्रतिपादिता[9]द्धर्मात्। अयमर्थः—शास्त्रेण पदार्थान् विविच्य श्रुतिस्मृतीतिहासपुराणोपदिष्टयोगविधिना दीर्घकालादरनैरन्तर्यसेविताद्निवृत्तिलक्षणाद्धर्मादेव तत्त्वज्ञानमुत्पद्यते यतोऽपवृज्यते। नह्युपपत्त्या विना विवेकः। न च [10]विवेचनाद्विना उपदेशमात्रेणाश्रद्धामलक्षालनम्। → [11]न च तेन विना ← शङ्काशू[12]कत्यागः। न च तमन्तरेण निवर्तको धर्मः। न च तेन विना दृढभूमिविभ्रमसमुन्मूलसमर्थश्च तत्त्वसाक्षात्कार इति।

चोपाधिरित्यर्थः। **अनादिरिति**-स्वाश्रयध्वंसव्याप्यप्रागभावप्रतियोगिमात्रवृत्तिजातिमत्त्वम*नादित्वम्॥ कि. प्र. व.

१ स्थापनायां विपक्षे बाधकमाह—**अशरीरमिति**। वावसन्तमिति यङ्लुकि, तेन संसारावस्थायां क्षणमात्रमशरीरतया नान्यथासिद्धिः। यद्वा वा एवार्थे, तेनाशरीरमेव वसन्तमित्यर्थः। वावेति सम्बोधनम्। तेनाशरीरमेव सन्तं वर्तमानम्, वर्तमानकालस्य क्षणादधिकत्वे नोक्तदोषः। कि. प्र. व.।

२ **दिङ्मोहेति**—सूर्योदयेन प्राचीनमनुमायापि मुह्यन्तीत्यर्थः। कि. प्र. व.।

३ **अव्युत्थायीति**—व्युथातुं भ्रमितुं शीलमस्येति व्युत्थायि भ्रान्तं न तथेत्यर्थः। **बलवत्तरम्** बहुतरसंस्काराधायकं च शरीरादावात्मधीः प्रत्यक्षापरोक्षेण शब्दानुमानजन्येन ज्ञानेन निवर्तयितुमशक्येति तन्निवर्तनक्षमा शरीरभिन्नात्मधीरध्यक्षा स्यात् साधनशास्त्रादित्यर्थः। **तत्त्वज्ञानमिति** शरीरादिभिन्नात्मभावनातः साक्षात्काररूपमित्यर्थः। कि. प्र. व.।

---

* नन्वनादित्वं प्रागभावाप्रतियोगित्वं दुःखसन्ततावसिद्धमत आह अनादित्वमिति। येन रूपेणानादित्वं तदिह स्वपदेन विवक्षितं, तदाश्रयस्य यो ध्वंसस्तद्व्याप्यो यः प्रागभावस्तत् प्रतियोगिमात्रवृत्तिजातिमत्त्वमित्यर्थः॥ कि. प्र. व्या भ.

1 च्छेदादिनियम–क। 2 इत्यागमा–मु. कि.। 3 शब्देन वा जनित–मु. कि., क.। 4 परोक्षं तत्त्वज्ञानं–जे। 5 ततो–पा. ३. पु.। 6 तत्कुतो पा. ३–६। 7 भवति–क.। 8 नोदना–मु. कि.। 9 धर्मादेवेत्यर्थः–क.। 10 विवेकादिना–क.। 11 → ←एतच्चिह्नान्तर्गतः पाठः जे पुस्तके नास्ति। 12 शूकस्याभ्यायोगः–जे।

[१]एतेन सत्त्वशुद्धिद्वारेणारादुपकारकं कर्म, सन्निपत्योपकारकं च [1]तत्त्वज्ञानमिति मन्तव्यम्। न तु तुल्यकक्षतया तत्समुच्चयः, नापि ज्ञानेन धर्मो जन्यते विहितत्वादिति धर्मस्यैव प्राधान्यम्। दृष्टद्वारेणोपपत्तावदृष्टकल्पनानवकाशात्। अन्यथा भेषजादिष्वपि तथा कल्प्येत। उपपत्तिविरुद्धश्च → [2]ज्ञानकर्मसमुच्चयः ← काम्यनिषिद्धयोस्त्यागादेव समुच्चयानुपपत्तेः। नापि [3]असङ्कल्पितफलकाम्यकर्मसमुच्चयः, चतुर्थाश्रमविधिविरोधात्। यावन्नित्यनैमित्तिककर्मसमुच्चयस्यापि तत एवानुपपत्तेः। यत्याश्रमविहितेन कर्मणा [4]ज्ञानसमुच्चय इत्यपि नास्ति, तदभावेपि [5]गृहस्थस्यापि ज्ञाने सति मुक्तेः। यतः स्मरन्ति—

'कर्मणैव हि संसिद्धिमास्थिता जनकादय' इति

'न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।

श्राद्धकृत् सत्यवादी च गृहस्थोऽपि [6]विमुच्यते॥ इति च।

न च साध्यस्यावैचित्र्ये साधनवैचित्र्यमुपपद्यते। न च स्वर्गवदपवर्गेऽपि प्रकारभेदः सम्भवति। तस्मात् तत्त्वज्ञानमेव निःश्रेयससाधनम्। कर्माणि त्वनुत्पन्नतत्त्वज्ञानस्य तत्त्वज्ञानार्थिनस्तत् [7]प्रतिबन्धकाधर्मतिरोधानद्वारेण प्रायश्चित्तवदुपयुज्यन्ते। उत्पन्नतत्त्वज्ञानस्य त्वन्तरालब्धवृष्टेः प्रारब्धकारीरीपरिसमाप्तिवत् प्रारब्धाश्रमधर्मसमापनं लोकसङ्ग्रहार्थमिति युक्तमुत्पश्यामः। [२]एतेन 'अथातो धर्मं व्याख्यास्यामः' 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः', [8]तद्वचनादाम्नायप्रामाण्यमिति त्रिसूत्री व्याख्याता। अन्यथा व्याख्याने हि यतोऽभ्युदयेति प्रत्येकसमुदायाभ्यामुभयत्राप्यव्यापकं स्यात्। [9]यतोऽभ्युदयसिद्धिः स धर्म इत्येतावतैव लक्षणे सिद्धे पारम्पर्येण निःश्रेयसेऽप्यस्य हेतुत्वं प्रतिपादयितुं निःश्रेयसग्रहणमिति॥

---

१ ननु तत्त्वज्ञानवत्कर्मापि श्रुत्या बोधितमिति तत्कुतो नोद्दिष्टमित्यत आह—एतेनेति—सत्त्व आत्मा तस्य शुद्धिस्तत्त्वज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवृत्तिः तद्द्वारा परम्परया कर्म मोक्षकारणम्। तत्त्वज्ञानं तु सन्निपत्य कर्मापेक्षया सन्निधायोपकारकम्, कर्मानन्तरं तदुत्पत्तेरिति। कि. प्र. व॥

२ ननु यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म इति सूत्रे धर्मस्य मोक्षहेतुताबोधकत्वविरोध इत्यत आह—**एतेनेति**। सूत्रमप्यभ्युदयमात्रसाधकधर्मपरतयैव व्याख्येयमित्यर्थः। अभ्युदयोऽत्र तत्त्वज्ञानम्। **तद्वचनादिति** तेनेश्वरेण वचनात्प्रणयनादाम्नायस्य प्रामाण्यमित्यर्थः। अन्यथेति यद्येकोऽभ्युदयसाधकोऽन्यश्च निःश्रेयससाधक इत्यर्थः। न चैकस्यैव धर्मस्योभयसाधकतायां **नोक्तदोषः**, उक्तयुक्तेस्तत्त्वज्ञानोत्पादनेनैवान्यथोपपत्तौ धर्मस्य निःश्रेयसहेतुत्वे मानाभावादिति भावः। कि. प्र. व॥

---

1 च ज्ञानमिति–मु. कि। 2 → ← एतच्चिह्नान्तर्गतः पाठः जे पुस्तके नास्ति। 3 असङ्कल्पितफलकर्मसमुच्चये चतुर्थाश्रमविरोधात्–पा. ३. पु; चतुर्थाश्रमविरोधात्–मु. कि.। 4 ज्ञानस्य–जे. क.। 5 गृहस्थस्य ज्ञाने मु. कि; क। 6 मुच्यते–जे. क। 7 °काधर्मापनयद्वारेण–पा. ३. ६। 8 °दाम्नायसिद्धेः प्रामाण्य°–क। 9 तद्यतो पा. २ पु।

(३) अथ के द्रव्यादयः पदार्थाः किञ्च तेषां [1]साधर्म्यं वैधर्म्यं चेति ॥

एवं[१] प्रतिपन्नप्रयोजनाभिधेयसम्बन्धो जिज्ञासुः पृच्छति—**अथेति**। [2]अथ कानि द्रव्याणि कियन्ति च; के च गुणाः कियन्तश्च; कानि कर्माणि कियन्ति[२] च; किं सामान्यं कतिविधं च; के विशेषाः कः समवाय इत्यर्थः। **किं च तेषामिति**—सामान्यतो विशेषतश्च पदार्थानां द्रव्याणां गुणानां कर्मणामित्यादि [3]नेयम्। [4][३]चकारौ समुच्चये। साधर्म्य-वैधर्म्ययोरेतेष्वेवान्तर्भूतत्वात् पृथग्लक्षणार्थमपि न प्रश्नः ॥

(४) तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनां[5]-सीति सामान्यविशेष[6]सञ्ज्ञयोक्तानि [7]नवैव। [8]तद्व्य-तिरेकेणान्यस्य सञ्ज्ञानभिधानात् ॥

तत्रेति। तत्र—तेषु द्रव्यादिषु वक्तव्येषु द्रव्याणि [9]पृथिव्यादीनि। यद्यपि विभागस्य न्यूनाधिकसङ्ख्याव्यवच्छेदपरत्वादेव नवत्वं लब्धं तथापि स्फुटार्थं नव-ग्रहणम्। एवकारश्च [10]विप्रतिपत्तिनिराकरणार्थः। सामान्यसञ्ज्ञा द्रव्यमिति। विशेषसञ्ज्ञा पृथिवीत्यादिका। तथोक्तानि सूत्रकृतेति शेषः, अवगताप्तभावस्य तस्योक्तेरागमत्वात्। अनवगताप्तभावस्यापि लोकप्रसिद्धार्थानुवादकत्वात्। लोके च तावतामेव सामान्यतो

---

१ एवमिति। अभिधेयं द्रव्यादि; प्रयोजनं निःश्रेयसम्; सम्बन्धः तत्त्वज्ञाननिःश्रेयसयोर्हेतु-हेतुमद्भावः। कि. प्र. व ॥

२ अग्रे विभागस्यापि वचनात्तद्विषयां जिज्ञासामाह कियन्तीति। विशेषाणामानन्त्यात् समवायस्यैकत्वात् तत्र न विभागे जिज्ञासा। कि. प्र. व ॥

३ 'अथ के द्रव्यादयः पदार्थाः किं च तेषां साधर्म्यं चे'ति पाठो वर्धमानोपाध्यायसम्मतः। **चकारा**दिति—किं चेति चकारः प्रश्नसमुच्चये वैधर्म्यं चेति चकारः साधर्म्यसमुच्चय इत्यर्थ इति व्याख्यानात् ॥

४ ननु द्रव्यादीनां लक्षणात्मकस्य साधर्म्यादेर्लक्षणं किन्न पृष्टमित्यत आह—**साधर्म्यैति**। **एष्वेव**—द्रव्यादिष्वेवेत्यर्थः। तथा च द्रव्यादेः साधर्म्यादेश्च मिथो विशेषणविशेष्यभावाल्लक्ष्यलक्षणभाव इत्यर्थः। यद्वा ननु द्रव्यादीनां लक्षणप्रश्नः कुतो नेत्यतआह—**साधर्म्यैति**। **एष्वेव**—लक्षणेष्वेव। तथा च साधर्म्यप्रश्नेन तत्प्रश्न इत्यर्थः ॥ कि. प्र. व.

---

1 साधर्म्यं चेति–कि। 2 कानि २. ३. पु०। 3 ज्ञेयम् पा. १ पु.। 4 चकारौ मिथः समुच्चये–मु. कि। 5 मनांसि–कि; मनांसि च दे। 6 सञ्ज्ञोक्तानि–कि. व्यो. जे। 7 नवैवेति–कं। 8 तद्व्यतिरेकेण सञ्ज्ञान्तरानभिधानात्–व्यो, कि, दे, तद्व्यतिरेकेण सञ्ज्ञानभिधानात्–जे। 9 'पृथिव्यादीनि' इति जे पुस्तके नास्ति। 10 परविप्रतिपत्ति पा. २ पु.।

विशेषतश्च व्यवहारात्। किं पुनरत्र प्रतिषिद्धयते नवैवेति ? नह्यनवगतस्य प्रतिषेधः सम्भवति इति, उच्यते; द्रव्यस्य सतो नवबाह्यत्वम्, नव बाह्यस्य [1]सतो द्रव्यत्वं वा; तथा च प्रतिपन्नस्यैव प्रतिपन्ने प्रतिषेध इति न किञ्चिद्दुष्यति। अतः परं न शङ्का न चोत्तरम्। [१]तथा हि इदं द्रव्यमेभ्योऽधिकं स्यादिति [2]वाऽऽशङ्केत इदमेभ्योऽधिकं द्रव्यं स्यादिति वाऽऽशङ्केत। [3]प्रथमे [4]आधिक्यं निराकरिष्यामो यथा सुवर्णस्य। [5]द्वितीये द्रव्यत्वं निराकरिष्यामो यथा तमसः। अतः परं न शङ्का [6]न चोत्तरम्; धर्मिण एव बुद्धयनारोहात्। यदि कथञ्चिद् बुद्धिमारोक्ष्यते तदाऽस्माभिरप्युक्तेष्वेवान्तर्भावयिष्यते। अनन्तर्भावे वा द्रव्यत्वं तस्य निराकरिष्यत इत्यभिप्रायवानाह—'**तदव्यतिरेकेण सञ्ज्ञान्तरानभिधानात्**' इति सूत्रकृतेति शेषः। लोकेनेति वा।

स्यादेतत्। अन्धकारस्तावदनुभवसिद्धतया दुरपह्नवः। न च सामान्यविशेषसमवायेष्वन्यतमत्तमः; तेषां व्यञ्जकवैचित्र्येऽपि व्यक्त्याश्रयसम्बन्धिनामुपलम्भमन्तरेणानुपलम्भनियमात्। उपलम्भे वा तत्त्वव्याघातात्। न[7] च कर्म, संयोगविभागयोरकारणत्वात्। नह्यन्धकारेण किञ्चित् कुतश्चिद् विभज्य केनचित् संयोज्यते। अतथाभूतस्य च तल्लक्षणानुपपत्तेरतत्त्वात्। न गुणः; द्रव्यासमवायात्। द्रव्यासमवेतं ह्यसमवेतमेव स्यादद्रव्यसमवेतं वा; उभयथापि गुणत्वव्याघातः। सामान्यवतः स्वतन्त्रस्य द्रव्यत्वापत्तेः। निःसामान्यस्य [8]गुणलक्षणव्याघातात्। गुणकर्मणोर्निर्गुणतया गुणस्य तत्र समवायविरोधात्। द्रव्यासमवाय एवास्य कथम् ? इति चेत्; इत्थम् :—न दिक्कालमनसामयं तेषां विशेषगुणविरहात्। सामान्यगुणस्य चाश्रयसहोपलम्भ[9]नियमे तदप्रत्यक्षतायामप्रत्यक्षत्वप्रसङ्गात्। नात्मनो बाह्यकरणप्रत्यक्षत्वादिदन्तास्पदत्वाच्च। नापि नभोनभस्वतोः, चाक्षुषत्वात्। चाक्षुषता हि गुणानां रूपिद्रव्यसमवायेन व्याप्ता। तच्च रूपित्वं गगनपवनाभ्यां व्यावर्तमानं चाक्षुषगुणसम्बन्धमपि व्यावर्तयति। न [10]तेजसः, तत्प्रतीतौ तद्विरोधित्वात्, शैत्यवत्। गुणिनः स्वगुणप्रतीतिपरिपन्थित्वे गुणस्य नित्यमनुपलम्भप्रसङ्गात्। सत्याश्रये तेनैव प्रतिबन्धात्। [11]स्वाश्रयेऽसति गुणिनि गुणस्यासत्वात्; तत्सहचरितगुणान्तरानुपलब्धेश्च। न ताव-

---

१ तथाहीति। इदं द्रव्यमिति सूत्रपाठे एभ्यो नवभ्योऽधिकं तमो द्रव्यमिति योजना। **इदमेभ्य** इति—इदं द्रव्यं सुवर्णमेभ्यः पृथिव्यादिभ्योऽधिकं स्यादित्यर्थः। कि. प्र. व.॥

---

1 सतो 'जे' पुस्तके नास्ति। 2 वा इदमेभ्यो–मु. कि। 3 द्वितीये तु–जे। 4 अधिक्ये –जे। 5 द्वितीये–जे। 6 'न चोत्तरम्'–जे पुस्तके नास्ति। 7 न कर्म इति प्रकाशसम्मतः पाठः। 8 गुणत्व–क। 9 नियमेन–मु. कि। 10 तेजसः तद्विरोधित्वात्–मु. कि। 11 असति गुणिनि–मु. कि; स्वाश्रये असति गुणस्यासत्त्वात्–जे, क।

च्छाया तेजसो रूपमेव; तद्रूपस्य शुक्लभास्वरत्वनियमात्। [1]न चेन्द्रनीलप्रभावादाश्रयोपाधेरतथाभूतमिदमाभातीति साम्प्रतम्; शैलभूतलस्फटिकपद्मरागाद्याश्रयरूपाननुविधानात्। तस्माद् गुणान्तरमेवेदं तेजस इति वाच्यम्। तथा च [2]तद्ग्रहे तदग्रहः तद्विरह एव, तद्ग्रहणमिति विपरीतम; इति महत्यनुपपत्तिः। [3]→ नापि पाथःपृथिव्योः, आलोकनिरपेक्षचक्षुर्ग्राह्यत्वात् ←। पार्थिवमेवेदमारोपितं रूपमित्यपि न समीचीनम्; बाह्यालोकसहकारिविरहे चक्षुषस्तदारोपेऽप्यसामर्थ्यात्। तदेव हि [4]धर्म्यन्तरे [5]समारोप्येत पित्तपीतिमवत्। तत्रैव [6]वा नियतदेशेऽनियतदेशत्वम्। ¹नेदीयस्यणीयस्यपि महत्त्ववत्। उभयथाऽपि [7]तत्प्रथनमन्तरेणानुपपत्तिरेव, एकत्रारोप्यत्वादन्यत्रारोपविषयत्वात्तस्यैव। न चालोकमन्तरेण रूपग्रहणे चक्षुषः सामर्थ्यमित्युक्तम्। न चारोप्यारोपविषयाप्रथने भ्रान्तिसम्भवः। न चोभयोरन्यतरस्मिन्नव्यापृतस्यैव चक्षुषो भ्रान्तिजनकत्वम्। न चायमचाक्षुषः प्रत्ययः, तदनुविधानस्यान्यथासिद्धत्वात्। स्वप्नविभ्रमवन्मानस एवायं न चाक्षुष [8]इत्येत्तदपि नाशङ्कनीयम्; निमीलितनयनस्य [9]गेहेऽस्त्यन्धकारो न वेति सन्देहानुपपत्तेः। तस्मात् क्रियावत्त्वाद् [10]गुणवत्त्वाच्च द्रव्यमेतत्। क्रियावत्त्वादेव [11]नाकाशाद्यात्मकम्। रूपवत्त्वादेव न मनोवायू। [12]स्पर्शरहितत्वाच्च न पृथिवी, जलं, तेजो वा। इति दशमं [13]द्रव्यं प्राप्तम्; तत् कथं नवैवेति ?

न, वस्तुतोऽस्य क्रियावत्त्वे रूपवत्त्वे वा, अचाक्षुषत्वप्रसङ्गात्। आलोकसहकारिण एव चक्षुषस्तत्र सामर्थ्याव[14]धारणादित्युक्तम्। न चेदमद्रव्यं रूपिद्रव्यम्; रूपवतो मूर्तिना-

---

१ नेदीयसीति—गोलकसन्निकृष्टाणुनि यथाधिकदेशत्वमारोप्यत इत्यर्थः। तत्प्रथनं रूपसाक्षात्कार इत्यर्थः। कि. प्र. व.।

२ अद्रव्यमिति—न विद्यते द्रव्यं समवायिकारणतयासम्बन्धि यस्य निरवयवमित्यर्थः। रूपवत इति—अस्य च चाक्षुषत्वादित्यर्थः। अनित्यत्वाच्चेत्यपि द्रष्टव्यम्। स्पर्शरहितेति—स्पर्शवत्तयाऽऽरम्भकत्वेनानारब्धस्यास्पर्शवत्त्वानियमादित्यर्थः। न चेति—साम्प्रतमित्यग्रेतनेन सम्बन्धः। स्पर्शरहितस्यापि तमसः पुरुषार्थत्वहेतुत्वेनारब्धत्वसम्भवादप्रयोजकत्वम्। मनस्तु नारम्भकम्, तदारब्धस्य शरीरेन्द्रियहेतुत्वाभावेन वैयर्थ्यात्। साधनावच्छिन्नसाध्यव्यापकस्य नीरूपत्वस्योपाधित्वाच्च। अन्यथा रूपवत्त्वेनारम्भकत्वे नीरूपस्यानारब्धत्वाद्वायुरप्यनुद्भूतरूपा पृथिवी स्यात्। अत एव तमःपरमाणुर्न द्रव्यारम्भकः स्पर्शशून्यत्वान्मनोवदित्यपास्तम्, सिद्ध्यसिद्धिव्याघाताच्च। तस्माद् भोजकादृष्टाधीनमुद्भवत्त्वमिति तदभावान्न तमसि स्पर्शोद्भव इति भावः। कि. प्र. व॥

---

1 न चेदं-क। 2 तदग्रहणे तद्विरह एव-जे। 3 →← एतच्चिह्नान्तर्गतः पाठः 'जे' पुस्तके नास्ति। 4 धर्मान्तरे-क। 5 समारोप्यते-मु. कि। 6 तत्रैव च. मु. कि। 7 ग्रहण-क। 8 इति-मु. कि। 9 गेहेऽन्धकारो-जे। 10 गुणसम्बन्धाच्च-जे; रूपवत्त्वाच्च-क। 11 क्रियावत्त्वान्नाकाशाद्यत्मकम्-पा. २. पु. नाकाशात्मकम्-क। 12 स्पर्शविरहत्वाच्च-पा. १. पु। 13 द्रव्यमिति प्राप्ते-मु. कि। 14 °वधारणेत्युक्तम्--पा. १. पु।

न्तरीयकत्वेन निरवयवस्य परमाणुतयाऽतीन्द्रियत्वापत्तेः। नाप्यनेकद्रव्यं द्रव्यम्; स्पर्शरहितत्वद्रव्यत्वेनानारब्धत्वान्मनोवत्। न च रूपवत्तया स्पर्शोऽप्यनुमास्यते; तद्रहितस्यापि पुरुषार्थहेतुत्वादारब्धं वा स्यात्। प्रारब्धस्य चानुभवसिद्धत्वात्, मनसोऽनुपलभ्यमानधर्मस्य स्वयमनुपलभ्यमानस्य च वैयर्थ्यादिवारम्भानुपपत्तिरिति साम्प्रतम्। रूपवत्त्वस्य प्रागेवाप्रत्यक्षत्वप्रसङ्गेनापास्तत्वात्। [1]प्रत्यक्षत्वस्य चानुभवसिद्धत्वाद् इत्येतत्स[2]र्वमभिसन्धाय भगवान् मुनिराह 'द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भाभावस्तम' इति। सोऽपि कथमालोकमन्तरेण प्रतियोगिस्मरणाधिकरणग्रहण[3]विरहेऽपि विधिमुखेन च चाक्षुषः? इति चेत्, न; यद्ग्रहे हि यदपेक्षं चक्षुः, तदभावग्रहेऽपि तदपेक्षते। एवं हि तदितरसामग्रीसाकल्यं स्यात्। [4]→यदि चालोकग्रहे आलोकान्तरमपेक्षते← तदाऽऽलोकाभावेप्यालोकापेक्षा [5]स्यात्। न त्वेतदस्ति; प्रत्युत विरोध एव। तस्मिन् [6]सति हि तदभाव एव न स्यात्, किं तदपेक्षेण चक्षुषा गृह्येत? दिवा च प्रतियोगिनः प्रभा[7]मण्डलस्य ग्रहण एव प्रदेशान्तरे [8]तदभावग्रह इति न किञ्चिदनुपपन्नम्। अन्यत्रापि न रात्रिमप्रतिसन्धायान्धकारग्रहः। रात्रिज्ञानं च न दिवसमप्रतिसन्धाय। निरस्तैतद्दीपवर्त्तिरविरश्मिजालः कालविशेषो ह्यत्र रात्रिरित्युच्यते। गिरिदरीविवरवर्त्तिनस्तु यदि योगिनः, न ते तिमिरावलोकिनः; तिमिरदर्शिनश्चेत्, नूनं स्मृतालोका इति।

अधिकरणमपि दृष्टमनुमितं स्मृतं वा, 'इहेदानीमन्धकारः' इति प्रत्ययात्। विधिमुखस्तु प्रत्ययोऽसिद्धः। न हि नञोऽप्रयोग एव विधिः; प्रलयविनाशावसानादिषु व्यभिचारात्। नञर्थान्तर्भावेन वाक्यार्थे पदप्रयोग इति तु समं समाधानम्, अन्यगाभिनिवेशात्। गतेः का गतिः? इति चेत्; भ्रान्तिः, स्वाभाविक्याङ्गतावावरकद्रव्यानुविधानानुपपत्तेः। प्रभातुल्यत्वे तेजःप्रभाश्रयेषु रत्नविशेषेषु छाया दिवसे न स्यात्। छाययैव तदभिभवे बहुलतमे तमसि तेषामालोको न स्यात्। आलोकान्तरेण वा तदभिभवे [9]छायाया अपि उद्भवो न स्यात्। तस्माद् आवरकद्रव्ये गच्छति यत्र यत्र तेजसोऽसन्निधिः, तत्र तत्र छायाग्रहणादन्यदेशतानिबन्धनो गतिभ्रम इति।

कथं भावधर्माध्यारोपोऽभाव इति चेत्, न किञ्चिदेतत्। सारूप्यतत्त्वाग्रहाविह, तन्निबन्धनम्, न त्वन्यत्। दृष्टश्च दुःखाभावे [10]सुखाध्यारोपः, यथा [11]दुःखापगमे 'सुखिनः

1 तस्य-जे। 2 सर्वमनुसन्धाय-क। 3 विरहे विधिमुखेन मु. कि। 4 →←एतच्चिह्नान्तर्गतः पाठः मु. कि इत्यत्र नास्ति। 5 स्यात् यद्यालोके तदपेक्षा स्यात् नत्वेतदस्ति; मु. कि। 6 सति तद्भाव मु. कि.। 7 मण्डलग्रहण मु. कि। 8 तद्ग्रह-क। 9 छायाया उद्भवो-मु. कि। 10 सुखत्व-क। 11 भारापगमे-पा. २. पु; भारावतारे-मु. कि।

संवृत्ताः स्मः' इति, संयोगाभावे [1]विभागाभिमान इत्यादि। एतेन नीलिमाध्यारोपो व्याख्यातः। शुक्लभास्वरविरोधित्वसारूप्येण तदारोपोपपत्तेः। न चैवं [2]रक्तत्वाद्यारोपप्रसङ्गोऽपि, आरोपे सति निमित्तानुसरणात्। न तु निमितमस्तीत्यारोपः; अदृष्टादिकं चात्र नियामकमध्यवसेयम्। स्मर्यमाणं चैतद्रूपमारोप्यते, रजतत्ववन्न गृह्यमाणम्, अतो न सहकार्यपेक्षाचोद्यमाशङ्कनीयम्; धर्मिणि निरपेक्षत्वात्। यद्येवमारोपितं रूपं न तमो भाभावस्तु [3]तम इति विनिगमनायां को हेतुरिति चेत्, उच्यते; एषा तावदनुभवस्थितिः 'तमो नीलम्' न तु 'नीलिमा तमः' इति। न चारोपितेन वास्तवेन [4]वा नीलिम्ना तमोबुद्धिव्यपदेशौ समानार्थौ, सहप्रयोगानुपपत्तेः। नीलीद्रव्योपरक्तेषु [5]वस्त्रचर्मादिषु तमोबुद्धिव्यपदेशप्रसङ्गाच्च। अवश्यम्भावी च भाभावानुभवो निरालम्बनस्य भ्रमस्यानुपपत्तेः। न च तमःप्रत्ययो बाध्यते। नीलप्रत्ययस्तु बाध्यत 'इह' इति प्रत्ययवत्। तस्माद्यत्र गुणक्रियारोपः तदन्धकारो न तु नीलिमेति सुष्ठूक्तं नवैवेति॥

(५) [6]गुणाः रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेष[7]प्रयत्नाश्चेति कण्ठोक्ताः सप्तदश। 'च' शब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः इत्येव' चतु[8]र्विंशति-गुणाः॥

५ गुणान् विभजते—**गुणा** इति। रूपादयः सप्तदश कण्ठोक्ता[१] सूत्रकारेण। अभ्युपगमसिद्धान्तन्याये[9]नान्येऽपि सप्त सिद्धगुणभावाः, तत्र तेषां व्युत्पादनात्; [10]अनभ्युपगमे व्युत्पादनविरोधात्। तथा च विभागसूत्रं न्यूनम्। "रूपरसगन्धस्पर्शाः, सङ्ख्याः, परिमाणानि, पृथक्त्वम्, संयोगविभागौ, परत्वापरत्वे, बुद्धयः, सुखदुःखे, इच्छाद्वेषौ प्रयत्नाश्च गुणाः"। (वै. सू. १-१-६) इति हि तत्। अत आह—'च शब्दसमुच्चिताश्च सप्त' इति। [11]अदृष्टशब्देन धर्माधर्मयोः, संक्षेपेणाभिधानम्। न त्वदृष्टत्वं नाम सामान्यमस्ति; कार्यकारणलक्षणानां तद्व्यवस्थापकानामभावात्। तेन 'गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्मा-धर्म-शब्दाः' इत्युक्तं भवति। एवं कण्ठोक्त्या समुच्चयेन चैकतया चतु-

१ **कण्ठोक्ता** इति—असाधारणस्वशब्देनोक्ता इत्यर्थः। कर्त्रपेक्षायामाह **सूत्रकारेणेति**। **अभ्युपगमेति**—साक्षादसूत्रितत्वेऽपि समानतन्त्राभिहितत्वेनाभ्युपगम्यमानत्वादित्यर्थः। कि प्र. व॥

1 विभागमात्राभिमान–जे; विभागत्वाभिमान–क। 2 तदत्वाद्यारोपः–जे, क। 3 तद्–जे। 4 'वा' 'क' पुस्तके नास्ति। 5 वस्त्रधर्मा–क। 6 गुणाश्च–कं। 7 प्रयत्नाश्च–जे। 8 चतुर्विंशतिगुणाः–कि। 9 ऽन्ये सप्त–क। 10 अनभ्युपगमे तेषां–क। 11 ननु अदृष्टशब्देन–क।

विंशतिर्गुणा व्यवहर्तव्याः, तथाविधबुद्धिविषयतया सारूप्येण, न तु सङ्ख्यायोगेन। यथा चैतत् [1]तथा वक्ष्यामः।

(६) **उत्क्षेपणा[2]पक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि। गमनग्रहणाद् भ्रमणरेचनस्पन्दनोर्ध्वज्वलन[3-4]तिर्यक्पवननमनोन्नमनादयो [5]गमनविशेषा न जात्यन्तराणि॥**

६ कर्माणि विभजते—**उत्क्षेपणेति**—अत्रापि 'पञ्चैव' इति स्पष्टार्थम्; विभागवचनादेव पञ्चत्वसिद्धेः। आधिक्यमाशङ्क्याह '**गमनग्रहणाद्**' इति। कर्मपदार्थे चैतद्व्युत्पादनीयम्।

(७) **सामान्यं द्विविधं परमपरं [6]च, [7]अनुवृत्तिप्रत्ययकारणम्। तत्र परं सत्ता, महाविषयत्वात्। सा चानुवृत्तेरेव हेतुत्वात् सामान्यमेव। द्रव्यत्वाद्यपरम्, अल्पविषयत्वात्। तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सह विशेषाख्यामपि लभते॥**

७ सामान्यं विभजते—**सामान्यमिति**। [1]समानानां भावः स्वाभाविकोऽनागन्तुको [8]बहूनां धर्मः सामान्यमित्यर्थः। तथा च धर्मिणां बहुत्वे धर्मस्य चानागन्तुकत्वे विवक्षिते 'नित्यमेकमनेकवृत्ति सामान्यम्' इति लक्षणं सूचितम्। तद् द्विविधम्; [9]द्वैविध्यं दर्शयति—**परमपरं चेति**। एकव्यक्तिसमावेशे सतीति चकारार्थः। नैकव्यक्तिकं सामान्यमस्तीति आकाशादौ वक्ष्यते। नान्यूनानतिरिक्तव्यक्तिकमिति बुद्धिरुपलब्धिर्ज्ञानमित्यादि-

---

१ समानानां भाव उपाधिरपीत्यत उक्तं **स्वाभाविक** इति। सोऽपि यदि स्वभावजन्यस्तर्ह्यसिद्धिः। स्वभावाश्रितश्चोपाधिरपीत्यत उक्तम् '**अनागन्तुक**' इति। साक्षात्समवेत इत्यर्थः। **नित्यमिति** एकमिति स्वरूपाभिधानमात्रं न तु लक्षणार्थमित्येके। एकं लक्षणमिति योज्यम्। लक्षणान्तरं चासमवायित्वे सत्यनेकसमवेतत्वमित्यन्ये। अनेकवृत्तित्वम्—अनेकाधारत्वम्, तच्चाभावसमवाययोरप्यस्तीत्यत उक्तम् एकम्—असहायम्। अभावसमवाययोश्च प्रतियोगिसम्बन्धिनौ सहायौ इत्यपरे। अनेकवृत्तित्वं च स्वाश्रयान्योन्याभावसामानाधिकरण्यम्। असमाविष्टजात्योर्व्यावर्तनार्थमाह—समावेशे सतीति। सामानाधिकरण्ये सतीत्यर्थः। यदा सामान्यं समाविष्टमसमाविष्टं चेत्येको विभागः। समाविष्टमपि परमपरं चेति विभक्तत्रिभाग इत्यसमाविष्टजात्यपेक्षया समुच्चयार्थश्चकार इत्यर्थः॥ कि. प्र. व।

---

1 तथा गुणे–मु. कि। 2 वक्षेपण–पा. ६। 3–4 तिर्यक्पवनादयो–जे, पतन–कि। 5 गमनविशेषा एव न–जे;। गमनविशेषा एव न तु–कि। 6 चेति–कि; जे; दे। 7 नचानुवृत्तिप्रत्ययकारणम्–कि; दे। 8 ऽनागन्तुको धर्मः–क। 9 द्विविधे–क।

प[1]र्यत्रस्थितौ। न मिथो व्यभिचारीति निष्क्रमणत्वप्रवेशनत्वादिजातिसङ्करापत्तौ। न सामान्यादिव्यक्तिकम्; अनवस्थानाल्लक्षणव्याघाताद[2]म्बन्धाच्चेति। तस्मात्परस्परपरिहारस्थितिविरुद्धम्। अविरुद्धं तु परापरभावस्थितीति नियमः। **परं** व्यापकम्, **अपरं** व्याप्यमित्यर्थः। प्रमाणं सूचयति—**अनुवृत्तिप्रत्ययकारणमि**ति। यदि सामान्यं न स्याद् भिन्नेष्वेष्वनुगताकारः प्रत्ययो न स्यात्। द्रव्यगुणकर्मणामपि सामान्यद्वारेणैवानुवृत्तिप्रत्ययहेतुत्वात्। परमुदाहरति—**तत्र[3] परं सत्ते**ति। सत्तासामान्यं परमिति व्यवहर्तव्यम्। कुतः? महाविषयत्वात्। द्रव्यत्वादिभ्योऽधिकविषयत्वात्। एवमन्यत्रापि [4]यदल्पविषयापेक्षयाधिकविषयं तत्तदपेक्षया परमिति व्यवहर्तव्यं यथा सत्तेत्यर्थः। सा च सत्ता सामान्यमेव न तु द्रव्यत्वादिवद्विशेषोऽपि; कुतः? [5]अनुवृत्तेरेवेति।

ननु सामान्यादिभ्यो व्यावर्तमानापि सत्ता यदि स्वाश्रयं ततो न व्यावर्तयेत् तर्हि द्रव्यत्वादिकमपि न व्यावर्तयेदविशेषात्? न; सत्ताया व्यक्तिस्वरूपमात्रव्यङ्ग्यतया [6]व्यक्त्यैकनियमाभावात्। बाधकात्तु सामान्यादौ [7]तस्यास्त्यागः। सामान्यान्तरस्य हि संस्थान[8]गुणविशेषकार्यकारणादिव्यङ्ग्यतया तेषां च नियतत्वान्न सर्वत्राभिव्यक्तिः, तर्हि वस्तुस्वरूपमेव सत्ताऽस्तु। न च गोत्वाद्यभावेऽपि यदि [9]गौ गौरिति प्रत्ययानुवृत्तिः स्वरूपतः स्यात्, तदाऽश्वादावपि स्यादितिवत् यदि सत्तया विनापि 'सत्सद्' इति प्रत्ययानुवृत्तिः स्वरूपतः स्यात्, सर्वत्र स्यादित्यनिष्टापत्तिः इति वाच्यम्; तदनुवृत्तेस्तदभावेऽपीष्टत्वादिति। न; प्रत्ययानुवृत्तेर्निमित्तमन्तरेणानुपपत्तेः। न च विशेषा एव तन्निमित्तम्; लक्षणमात्रं वा, [10]सामान्योच्छेदप्रसङ्गात्। नहि [11]विशेषान् लक्षणं वा विहाय क्वचित्सामान्याभिव्यक्तिरस्ति। कथं तर्हि सामान्यादौ 'सत्सद्' इति प्रत्ययः? [12]सत्तयैकार्थसमवायात्; गुणादिषु [13]सङ्ख्यादिप्रत्ययवत्। अभावेऽपि तर्हि स्यात्; इति चेत्, न; तस्य सद्विरुद्धतयैव प्रतीतिरिति।

द्रव्यत्वाद्यपरम्; सत्तापेक्षयाऽल्पविषयत्वात्। **तच्चे**ति—चस्तु अर्थः;। अपिः

---

१ न सामान्यादीति—सामान्यादित्रिके जात्यनुपपत्तौ यथासङ्ख्यमनवस्थानादिहेतुत्रयम्। लक्षणेति—विशेषस्य सामान्यवत्त्वे सामान्यवत्तद्भिन्नत्वे सति समवेतत्वलक्षणव्याघात इत्यर्थः। **असम्बन्धा**दिति—समवायस्य समवायन्तराभावादित्यर्थः। कि. प्र. व।

---

1 पर्यायस्थितौ–मु. कि; 2 सम्बन्धाच्चेति साधर्म्यम्–क। 3 तत्रेति। परं सत्ता–क। 4 यद्यदपेक्षया–मु. कि। 5 अनुवृत्तेरेव हेतुत्वात्–मु. कि। 6 व्यञ्जक–क। 7 तत्त्यागः–मु. कि; क। 8 गुणकार्य°–क। 9 गौरितिप्रत्यया°–क। 10 सामान्यमात्रोच्छेद–क। 11 विशेषानु–जे। 12 सत्तैकार्थ–मु. कि। 13 सङ्ख्याप्रत्ययवत्–मु. कि।

समुच्चये । 'अनुवृत्तेर्हेतुत्वाद्' इति हेतुमनुकर्षति, सत्ताया[1]मन्त्येषु विशेषेषु चैकैकनिमित्त-वशादेकैका सञ्ज्ञा; इह तु निमित्तद्वयसमावेशात्सञ्ज्ञाद्वयसमावेश इत्यर्थः । एतद्द्वयुत्पादन-प्रयोजनं साधर्म्यादौ भविष्यतीति ॥

(८) नित्यद्रव्यवृत्तयोऽ[2]न्त्या विशेषाः । ते[3] च खल्वत्यन्त-[4]व्यावृत्तिहेतुत्वाद्विशेषा [5]एव ॥

विशेषान् आह—नित्येति । '**विशेषाः**' इति[6] बहुवचनेनानन्त्यं [7]विव-क्षितम् । के ते ? **अन्त्याः**—अन्ते—अवसाने भवन्ति सन्तीति यावत् । येभ्योऽपरे विशेषा न सन्तीत्यर्थः । सामान्यरूपेभ्यो हि विशेषेभ्योऽपरे गुणादयो विशेषाः सन्ति, एभ्यस्तु नापरे, किन्त्वेतेष्वेव वैशिष्ट्यं समाप्यते । क ते वर्तन्त इत्यत उक्तम्—**नित्येति** । अयमर्थः—अनित्यद्रव्येषु तावदाश्रयादिभिरेव विशिष्टबुद्धिरुपपन्नेति[8] ततोऽधिकेषु विशेषेषु प्रमाणाभावः । नित्येषु तु द्रव्येष्वाश्रयरहितेषु समानजातीयेषु समानगुणकर्मसु च भवितव्यं व्यावर्तकेन[9] धर्मेण, व्यावृत्तत्वात् । न चैवं गुणादिष्वपि [10]तत्कल्पनाऽवकाशः, आश्रय-विशेषेणैव तद्व्यावृत्त्युपपत्तेरिति प्रमाणसूचनम् । तथा च वक्ष्यते ।

[11]ननु तथापि सामान्यान्येव कानिचित्तथा भविष्यन्ति, गुणा वा; किं पदार्थान्तर-कल्पनया ? इत्यत आह—**ते चेति** । चस्त्वर्थः । अयमर्थः—ते पुनर्यद्ये[12]कैकवृत्तयः कथं सामान्यरूपाः ? अनेकव्यक्ति[13]वृत्तित्वे च कथमत्यन्तव्यावृत्तबुद्धिहेतवः ? गुणा अपि भवन्तः सामान्यवन्तः स्युः, तथाप्यत्यन्तव्यावृत्ति[14]बुद्धिहेतुत्वं व्याहन्येत अतो निःसामान्याः, तथा च गुणत्वव्याघातः । तस्मादन्त्यव्यपदेशादत्यन्तव्यावृत्तबुद्धेरेव हेतुत्वाद् विशेषा एव विशेषा नान्यत्रान्तर्भूता इति । एतेन एकद्रव्याः[९] [15]एकस्वरूपाः स्वरूपसन्त इति सूचितं भव[16]ति । एवं च निःसामान्यत्वेपि विशेषोऽयं विशेषोऽयमित्यनुगतव्यवहार उपाधेर्लक्षणं च उपाधिरध्य-वसेय इति ॥

१ **एकद्रव्या इति**— एकमात्रद्रव्याश्रया इत्यर्थः । **स्वरूपेति**—स्वरूपेणैव सन्तो न तु सत्तायोगेन । निःसामान्यत्वे सत्येकद्रव्यमात्रवृत्तित्वमिति लक्षणार्थः । **एवं चेति**—विशेषपदसङ्केतग्रहोऽपि तत एवेति द्रष्टव्यम । कि. प्र. व ।

1 °मन्त्येषु चैकैक–क । 2 ह्यन्त्या–कि । 3 ते खलु–क । 4 व्यावृत्तिबुद्धिहेतुत्वात्–व्यो; (५८) कि; ते च खल्वितरव्यावृत्तिहेतुत्वाद्विशेषा एव–पा. ८. पु । 5 एव विशेषाः–कि । 6 इति च–जे; विशेषा इति 'क' पुस्तके नास्ति । 7 वक्ष्यति जे; लक्षयति–क । 8 अधिकविशेषेषु–क । 9 केनचिद्धर्मेण–क । 10 तत्कल्पनानवकाशः–जे । 11 ननु सामान्या°–क । 12 कैकव्यक्तिवृत्तयः–क । 13 वृत्तित्वेन –क । 14 व्यावृत्तहेतवः–क । 15 एकद्रव्याः स्वरूप–कि. क । 16 भवतीति-मु. कि ।

(९) अयुतसिद्धानामाधार्याधारभूतानां [1]यः सम्बन्धः 'इह'-प्रत्ययहेतुः स समवायः ॥

समवायस्यैकत्वाद्विभागो नास्तीति लक्षणमाह—**अयुतसिद्धाना**मिति । अयुताः—प्राप्ताश्च ते सिद्धाश्चेत्ययुतसिद्धाः, प्राप्ता एव सन्ति न वियु[2]क्ता इति यावत् । तेषां सम्बन्धः प्राप्तिलक्षणः समवायः । तेन संयोगो व्यवच्छिन्नः, तस्याप्राप्तिपूर्वकत्वात् । [3]तथा च नित्या प्राप्तिः समवाय इति लक्षणं सूचितं [4]भवति । अजसंयोगाभावो वक्ष्यते, समवायस्य नित्यत्वं च । प्राप्तिपदेनैव वाच्यवाचकभावादिलक्षणः सम्बन्धो न प्रसज्यते । एतदेव स्पष्टयति—**आधार्याधारभूताना**मिति । स्वभावत आधार्याधाराणां न त्वागन्तुकेन धर्मेणेत्यर्थः । प्रमाणमाह—**इहप्रत्ययहेतु**रिति । 'इह तन्तुषु पट' 'इह पटे शुक्लत्वम्' 'इह गवि गोत्वम्' इत्यादयः [5]प्रत्ययाः सम्बन्धमन्तरेणानुपपद्यमानास्तं व्यवस्थापयन्तीत्यर्थः ॥

(१०) एवं धर्मैर्विना धर्मिणामुद्देशः कृतः ॥

अथाऽन्येपि शक्तिसङ्ख्यासादृश्यादयः पदार्थाः किमिति नोद्दिष्टा इत्यत आह—**एव**मिति । [6]उक्तेन क्रमेण धर्मिणामुद्देशः कृतो धर्मैर्विना धर्मा एव परं नोद्दिष्टाः, शक्त्यादीनामेष्वेवान्तर्भावात् । तथा च वक्ष्यामः । यद्यपि सामान्यविशेषसमवायानां लक्षणमप्युक्तं तथापि तस्येहाऽव्युत्पादनादनुक्तकल्पतयोद्देशः कृत इत्याह ।

(११) षण्णामपि [7]पदार्थानामस्तित्वाभिधेयत्वज्ञे[8]यत्वम्; आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः ॥

---

१ ननु चायुतसिद्धौ यदि युतौ न सिद्धौ तदा कयोः सम्बन्धः ? धर्मिणोरेवाभावात् । अथायुतसिद्धौ तथापि कयोः सम्बन्धः ? सम्बन्धिनोरपृथग्भूतत्वात् पृथग्भूतयोरेव सम्बन्धादित्यत आह—**अयुता** इति । अन्योन्यपरिहारेण पृथगाश्रयाऽनाश्रिता इत्यर्थः । एतदेव स्पष्टयति **प्राप्ता एवे**ति । अनेन अप्राप्तिर्निषिध्यते । सा च प्राप्तिप्रागभावः । तथा च तदप्रतियोगी सम्बन्ध इत्यर्थः । तेन विशेषणतारूपोऽपिनित्यः सम्बन्धो निरस्तः । कि. प्र. व ॥

२ **अजेति**—विभुनोर्मिथः संयोगो यास्त्यज इति न तत्रातिव्याप्तिरित्यर्थः । **प्राप्तिपदेनेति**—न च नित्यपदेनैव तन्निरासः तस्येश्वरेच्छारूपतया नित्यत्वात् । यद्यपि प्राप्तित्वं संयोगसमवायान्यतरत्वमित्यन्योन्याश्रयः तथापि जातिशून्यत्वे सति सामान्यत्वविशेषत्वशून्यभावत्वं तल्लक्षणमनेनोपलक्षितम् । कि. प्र. व ॥

---

1 इह इति प्रत्ययहेतुर्यः-दे । 2 अप्राप्ता-क । 3 तेन-पा. १. पु ३ । 4 'भवति' 'क' पुस्तके नास्ति । 5 'प्रत्ययाः' 'क' पुस्तके नास्ति । 6 एवमुक्तेन- । 7 पदार्थानां साधर्म्यमस्तित्व°-कि; जे । 8 ज्ञेयत्वानि-क. कि. दे ।

[1]यद्यपि धर्मा अपि षड्भ्यो नातिरिच्यन्ते तथापि त एव [2]परस्परसङ्गतामापन्नाः परस्परविवेकायोपयोक्ष्यन्त इति पृथगुच्यन्त इत्यभिप्रायवानाह—**षण्णामपीति**। अपरिभिव्याप्तौ। **अस्तित्वम्**—विधिमुखप्रत्ययविषयत्वम्; प्रतियोग्यनपेक्षनिरू[3]पणत्वमितियावत्। **अभिधेयत्वम्**—अभिधानयोग्यता। शब्देन सङ्गतिलक्षणः सम्बन्धः। **ज्ञेयत्वम्**—ज्ञानयोग्यता; ज्ञाप्य[4]ज्ञापकलक्षणः सम्बन्धः। नन्वेतद् द्वयमभावेऽप्यस्ति, इति चेत्; अस्तु; न हि तदपेक्षया वैधर्म्य[5]मिदं विवक्षितम्, अपि तु षडपेक्षया साधर्म्यम्। **आश्रितत्वम्**—[6]आश्रयता स्वाभाविकी, सा च नित्यद्रव्येषु नास्तीत्यत आह—**अन्यत्रेति**। नित्यद्रव्याणि विहायेदं सा[7]धर्म्यमुक्तमित्यर्थः। ननु समवायेऽप्येतन्नास्ति, [8]इति चेत्, न; समवायस्य समवायान्तराभावेऽपि स्वभावत एवाधारसन्निकृष्टत्वात्। तथा च वक्ष्यामः। चकारा[9]न्मूर्तं विहाय [१]निष्क्रियत्वम्॥

(१२) द्रव्यादीनां [10]पञ्चानामपि समवायित्वमनेकत्वं च॥

अथ समवायाद्वैधर्म्यमितरेषां साधर्म्यमाह—**द्रव्यादीना**मिति। [२]समवायित्वं समवायलक्षणः सम्बन्धः। अनेकत्वं [३]स्वरूपभेदः चकारात् समवायादन्यत्वम्॥

(१३) गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे॥

द्रव्यं विहाय पञ्चानामाह—**गुणादीना**मिति। निर्गुणत्वं गुणाभावविशिष्टत्वम्। निष्क्रियत्वं क्रियाया असमवायः॥

---

१ **निष्क्रियत्वमिति**—न च निष्क्रियविनष्टे मूर्ते क्रियात्यन्ताभाववत्त्वमित्यतिव्यापकम्, कर्मवद्वृत्तिद्रव्यत्वव्याप्यजातिशून्यभावत्वस्येन्द्रियवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिशून्यभावत्वस्य वा विवक्षितत्वात्। कि. प्र. व॥

२ **समवायित्वमिति**—यद्यपि समवायित्वं यदि समवेतत्वं तदा नित्यद्रव्याव्याप्तिः। समवायाश्रयत्वं च सामान्याद्यव्यापकं तयोः समवेतधर्माभावात्। तथापि समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं विवक्षितम्। कि. प्र. व॥

३ **स्वरूपेति**—यद्यपि स्वरूपभेदः प्रामाणिकत्वमितरनिष्ठान्योन्याभावप्रतियोगित्वं वा द्वयमपि समवाये गतम्। तथापि स्वाश्रयान्योन्याभावसमानाधिकरणविभाजकोपाधिमत्त्वे तात्पर्यम्। कि. प्र. व॥

---

1 यद्यपि च–जे; क। 2 परस्परमङ्गता–मु. कि। 3 निरूपणीयमिति–पा. ३. पु; निरूपणमिति–क। 4 ज्ञाप्यज्ञापकसम्बन्धः–जे; सम्बन्धलक्षणः–मु. कि; किन्तु अशुद्धतया प्रकरणसङ्गत्या च °लक्षणः सम्बन्धः, इति स्थापितम्। 5 इह–क। 6 आधेयता–जे। 7 साधर्म्यमित्यर्थः–क। 8 'इति चेत्' 'क' पुस्तके नास्ति। 9 मूर्तत्वं–क। 10 पञ्चानां–क।

(१४) **द्रव्यादीनां [1]त्रयाणामपि सत्तासम्बन्धः, सामान्यविशेषवत्त्वम्, स्वसमयार्थशब्दाभिधेयत्वं, धर्माधर्मकर्तृत्वं च। कार्यत्वानित्यत्वे कारणवतामेव। कारणत्वं चान्यत्र [2]पारिमाण्डल्यादिभ्यः। द्रव्याश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः।**

द्रव्यादीनां त्रयाणामिति—सत्तासम्बन्धः समवायलक्षणः। सामान्यविशेषा द्रव्यादयस्तद्वत्त्वम्। निरूपपदेनार्थशब्देन द्रव्यादयस्त्रय एवाभिधीयन्ते नापरे। एष एव स्वसमयो **वैशेषिकाणां** स्वशास्त्रे लाघ[3]वाय। यथा ध्यानधारणासमाधित्रयमेकत्र 'संयम' इति योगानुशासने। द्रव्यादित्रयं तु प्रत्येकसमुदायाभ्यामिति विशेषः। तदिदमुक्तं **स्वसम**येति। **धर्माधर्मकर्तृत्वं चे**ति—साधर्म्यद्वयसूचनाय चकारः। धर्मकर्तृत्वमधर्मं विहाय, अधर्मकर्तृत्वं च धर्मं विहाय। ननु जात्यादीनां कथं नैतत्? उच्यते; द्र[4]व्यादीनां विहितनिषिद्धभावनाविष्टानां हि तद्धेतुत्वं न स्वरूपतः। न च [5]भावनावेशो स्वरूपतो द्रव्यादिकमनन्तर्भाव्य सम्भवति, नित्यत्वेनाव्यापारत्वात्; अनित्य[6]धर्मायोगेनाव्यापारित्वात्। न च ज्ञानमात्रेण तेषां [7]तदुपयोगोऽभियोगवदनिषेधात्। तस्मात् स्वाश्रयावच्छेदकमात्रेणैवोपयुज्यन्त इति॥

कार्यत्वम्—अभूत्वा भावित्वम्। अनित्यत्वं च भूत्वा भावित्वमिति हि विवक्षितम्; अन्यथा 'कारणवतामेव' इति नियमो न स्यात्। तदनपेक्षान् विहायेत्येवकारार्थः।

कारणत्वं च ज्ञातृधर्मेतरकार्यापेक्षया; अन्यथा पारिमाण्डल्यादिव्यवच्छेदः; त्रयग्रहणं

---

१ अभियोगो-विधिः। 'नियोगवद्' इति पाठे नियोगो विधिरित्यर्थः। कि. प्र. व॥

२ ननु ज्ञानादिकं प्रति सामान्यादीनामपि कारणत्वमस्त्येवेत्यत आह—**ज्ञातृधर्मे**ति। **अन्यथेति**—यद्यपि योगिप्रत्यक्षस्य विषयाजन्यतया पारिमाण्डल्यमपि न ज्ञातृधर्मजनकं तथापि अतद्गुणसंविज्ञानबहुव्रीहिणाऽऽदिपदग्राह्याणामस्मदादिप्रत्यक्षज्ञानजनकत्वात् ते व्यवच्छेद्या द्रष्टव्याः। योगिप्रत्यक्षमपि विषयजन्यमिति केचित्। **त्रयग्रहणं चे**ति—अत्र त्रयाणामित्यनुवृत्तेः त्रयस्यैव तत्साधर्म्यम्, तच्च सामान्यादेरपि ज्ञानकारणत्वात् कारणत्वमात्रविवक्षायां नोपपद्येत। न चाग्रे सामान्यादेरकारणत्वमेतद्वैधर्म्यं स्यादित्यर्थः। कि. प्र. व॥

---

1 त्रयाणाम्–कि। 2 पारिमाण्डिल्यादिभ्यः–कि. ५। 3 व्यवहारलाघवाय–क। 4 'द्रव्यादीनां' 'क' पुस्तके नास्ति। 5 भावनादेशो–जे; 'जात्यादिषु' इत्यधिकं 'क' पुस्तके। 6 धर्मायोगित्वेन–जे। 7 तेषामुपयोगो–मु. कि।

च नोपपद्येत पा[1]रिमाण्डल्यम्—परमाणुपरिमाणम् । आदिग्रहणात् पर[2]ममहत्त्वम्, अन्त्यावयविगतरूपरसगन्धस्पर्शपरिमाणानि, द्वित्वद्विपृथक्त्वपरत्वापरत्वानि, विन[3]श्यदवस्थद्रव्यनिष्ठसंयोगविभागवेगकर्माणि, अन्त्यः शब्दः, चरमः संस्कारो, ज्ञानं च गृह्यते ॥

द्रव्याश्रितत्वं च द्रव्यसमवायिकारणता । एवं द्रव्यत्वादिसामान्यविशेषपदार्थयोरप्रसङ्गः । तथाप्यव्यापकमतआह—**अन्यत्रेति** । नित्यद्रव्येभ्य इत्युपलक्षणं नित्य[4]गुणेभ्य इत्यपि द्रष्टव्यम् । नित्यद्रव्याणि नित्यगुणांश्च विहायेदं पदार्थत्रि[5]तयसाधर्म्यमित्यर्थः । आद्यौ संयोगविभागौ नित्यधर्मं च विहाय गुणासमवायिकारणकता च इति चार्थः ॥

(१९) सामान्यादीनां [6]त्रयाणामपि स्वात्मसत्त्वं, बुद्धिलक्षणत्वम्, अकार्यत्वम्, अकारणत्वम्, असामान्यविशेषवत्त्वं, नित्यत्वम्, अर्थशब्दानभिधेयत्वं [7]चेति ॥

सामान्यादीनामिति—स्वात्मसत्त्वं सत्ताविरहः । बुद्धिलक्षणत्वम्—बुद्धिमात्रममीषां लक्षणं प्रमाणम्, न तु द्रव्यादिवत्प्रमाणान्तरमस्तीत्यर्थः । अनुवृत्तबुद्धिर्व्यावृत्तबुद्धिरिह इति बुद्धिरित्येव हि सामान्यादित्रये प्रमाणमिति । अकार्यत्वम्—अनादित्वम् । कथम्? इति चेत्; अन्यथा स्वरूपव्याघातात् । सामान्यस्य हि कार्यत्वे व्यक्तिरेव [8]समवायिकारणं स्यात् । तथा च तदुत्पत्तिविनाशयोर्जात्युत्पत्तिविनाशे प्रतिव्यक्तिभिन्नं सत् सामान्यरूपतां जह्यात् । अभेदे तु व्यक्तेः पूर्वमपि सत्त्वान्न तत्कारणकं स्यात् । [9]एवं पूर्वपूर्वतरपूर्वतमादिव्यक्तिभ्यो प्राक् सत्त्वाद् अनादित्वं सामान्यस्य । अन्यथा स्वरूपव्याघात इति । नित्यद्रव्याणां च कदाचिद्विशेषाभावे व्यावृत्तिरपि निवर्तेत तथा च द्रव्यसङ्करः स्यात् । न च स्वभावसाङ्कर्ये पुनरसाङ्कर्यम्, स्वभावपरावृत्तिप्रसङ्गात्; ततः सर्वदैवासङ्कीर्णत्वात् सर्वदैव विशिष्टानीत्यनादय एव विशेषाः । समवायोऽपि निःसमवायः कथं समवायिकारणं विना भवेत्? भवन् वा कथं कार्यान्तरमर्यादामतिक्रामेत्? कथं चोत्पन्नोऽपि विनश्येत्? तथा च कथमुत्पद्येतापि? भावस्याविनाशिनोऽनुत्पत्तेः । समवायान्तराभ्युपगमे च कथमनवस्थां नापादयेत्? कथं वा पश्चादुत्पद्यमानः संयोगलक्षणप्राप्तौ स्वभावं न जह्यात्? अप्राप्तिपूर्विका-

1 भवन् वेति—भावकार्यस्य मर्यादामतिक्रामेदित्यर्थः । कि. प्र. व ॥

1 बहुषु प्राचीनपुस्तकेषु 'पारिमाण्डिल्यम्' इति पाठः किन्तु शुद्धतया 'पारिमाण्डल्यम्' इति स्थापितः 'नित्यं परिमण्डलम्' इति सूत्रम् परिमण्डलमेव पारिमाण्डल्यमिति शङ्करमिश्राः । कन्दल्यामन्यत्र च परिमाण्डल्यमिति पाठः । 2 द्व्यणुकपरिमाणमित्यधिकं–१. ३. पु । 3 विनश्यदवस्थद्रव्ये–मु. कि । 4 गुणेषु–क । 5 त्रयं–क । 6 त्रयाणाम्–कि. दे । 7 च–दे । 8 समानाधिकरणं–क । 9 एवं पूर्वतर–मु. कि ।

प्राप्तिरिति हि तत् नित्यसम्बन्धिषु तत्रानभ्युपगमाच्चेति। तस्मात्सुष्ठूक्तम् 'सामान्यादीनां त्रयाणामकार्यत्वम्' इति।

अकारणत्व[1]मात्मधर्मेतरकार्यापेक्षया। असामान्यविशेषवत्त्वमपरसामान्यविरहः, स च सामान्येष्वनवस्थानात्, विशेषेष्वपि सामान्यसद्भावे गुणत्वापत्तौ, पुनः समानगुणेषु समवायस्यै[2]कत्वात् समवायान्तरापेक्षायामनवस्थानाच्चेति। नित्यत्वमनन्तत्वम्, तच्चाकार्यत्वात्। अनित्यत्वं हि [3]कार्यतया व्याप्तम्। सा च सामान्यादिभ्यो व्यावर्तमाना स्वव्याप्यमनित्यत्वमुपादाय निवर्तते। अकार्यमपि हि यद्याकाश[4]परमाण्वादि सामान्यादि वा निवृत्तं स्यात्, पुनस्तन्न स्यात्, कारणाभावात्। ततस्तदभावेऽपि निराश्रयं किञ्चिदपि न स्यादिति।

अर्थशब्दानभिधेयत्वम्—स्वसमयार्थशब्दानभिधेयत्वम्। चकारात् [5]कारणानपेक्षत्वम्। उपलक्षणं चैतत्। एवमन्यदप्यूहनीयम्। तद्यथा—अनित्यधर्मत्वमविशेषाणामेव, नित्यत्वमक[6]र्मकाणामेव, अयोगिप्रत्यक्षत्वं द्रव्यादीनां चतुर्णामेव, असमवायिकारणत्वं गुणकर्मणोरेव, असमवेतत्वं नित्यद्रव्यसमवाययोरेव॥

(१६) पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः, [7]स्वात्मन्यारम्भकत्वं [8]गुणवत्त्वं, कार्यकारणविरोधित्वम्, अन्त्यविशेषवत्त्वम्, अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः॥

इदानीं द्रव्याणामेव साधर्म्यं वैधर्म्यं चाह **पृथिव्यादीना**मिति। कियतामित्यत आह—**नवानामपी**ति। अपिरभिव्याप्तौ। द्रव्यत्वयोगो द्रव्यत्वसमवायः। द्रव्यत्वमित्येतावति वक्तव्ये योगग्रहणमुपलक्षणनियमार्थम्। अपरिच्छिन्नदेश[9]त्वात्तु सामान्यसमवाययोः कथमत्रैवेदं नान्यत्रेति प्रत्ययनियम इति [10]केचिद्दर्शयन्ति तत्रेदमुत्तरम् 'अत्रैव द्रव्यत्वं वर्तते यतः' इत्युच्यते। अयमेव हि द्रव्यत्वस्य स्वभावो यदेतत्समवायमभिव्य[11]ञ्जयेत्, एताभिर्व्यक्तिभिः सह न रूपादिभिः। गुणत्वं च रूपादिव्यक्तीरादाय न पृथिव्यादिव्यक्तीरित्यादि वक्ष्यते। द्रव्यत्वमेव नास्ति गोत्वादिवदनुपलब्धेः, इति चेत्,[12] न; [13]कार्याश्रयतोपलक्षणेन साधर्म्येणाभिव्यक्तस्य सामान्यस्य सास्नादिसंस्थानाभिव्यक्तगोत्वादिवत् प्रतीतेः। अन्यथा

1 त्वनात्मधर्मापेक्षया–क। 2 °कत्वाच्च–जे। 3 कार्यतया व्याप्तम्–मु कि। 4 परमात्मादि–पा. २. पु। 5 कारणानपेक्षत्वमिति–जे। 6 मकर्मणामेव–मु. कि. क। 7 स्वात्मनारम्भकत्वम्–जे। 8 गुणवत्त्वं च–दे। 9 देशत्वात्सामान्य–मु कि–। 10 केचिच्चोदयन्ति तत्रेदमुत्तरं तत्रैव–पा. १ पु। 11 व्यञ्जयन्ति पा. २ पु। 12 केचित्–जे; क। 13 अकार्याश्रय–क।

कार्याश्रयत्वमपि सामान्यानियतं न वस्त्वेव न स्यात्। कारणत्वं हि सामान्येन नियम्यते, [1]कार्यत्वं च। तच्च स्वाभाविकमबाधनात् [2]साधनाच्चौपाधिकमिति विशेषः॥

[1]व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥

व्यञ्जकधर्मानुपादाय जातिनिराकरणे गोत्वादिकमपि न स्यात्। न हि सास्नासम्बन्धाद्यनव[3]भासने कस्यचिद् गौरिति प्रत्ययानुवृत्तिरप्यस्ति; तस्मादस्ति द्रव्यत्वम्। **स्वात्मन्यारम्भकत्वम्**—स्वसमवेतकार्य[4]कारित्वं समवायिकारणत्वमित्यर्थः। **गुणवत्त्वम्**—गुणसमवायः, तदेतद्द्वयं निमित्तव्यवस्थापकम्। द्रव्यत्वं तु द्रव्यव्यवहारनिमित्तमि[5]त्यवधेयम्। [2]**कार्यकारणाविरोधित्वम्**—कार्यकारणयोरन्यतरेणापि द्रव्यजातीयं न विरुध्यत इत्यर्थः। **अन्त्यविशेषवत्त्वम्**—एतद् द्रव्यजातीयस्यैव सम्भवतीत्यर्थः। अथवाऽन्यत्रावयविद्रव्येभ्य इति भविष्यति॥ अनाश्रितत्वम्—आधारैकस्व[6]भावता। **नित्यत्वम्** द्रव्यत्वे सतीति बोध्यम्। चकाराद् विपर्ययेण विशेषरहितद्रव्यत्वम्, आश्रितद्रव्यत्वम्, अनित्यद्रव्यत्वं चान्यत्र निरवयवद्रव्येभ्य इति।

(१७) पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्त्वे।

---

१ जातौ बाधकमेव किम् इत्यत आह—**व्यक्तेरभेद** इति। अभिन्नव्यक्तिकान्यजात्या सह अन्यूनानतिरिक्तव्यक्तिका च परस्परात्यन्ताभावसमानाधिकरणवत्त्वे सति परस्परसमानाधिकरणा। अनवस्थादिपराहता च जातिर्न भवतीत्यर्थः। तथा हि 'आकाशत्वं न जातिः, एकव्यक्तिमात्रवृत्तित्वात्, एतद्घटत्ववत्'। अन्यथा जातिलक्षणव्याघातात्। "बुद्धित्वम् ज्ञानपदवृत्तिनिमित्तं" न ज्ञानत्वभिन्ना जातिः, ज्ञानभिन्नावृत्तित्वे सति सकलज्ञानवृत्तित्वात्, विषयित्ववत्'। निष्क्रमणत्वप्रवेशनत्वे न जाती, परस्परात्यन्ताभावसमानाधिकरणत्वे सति परस्परसमानाधिकरणत्वात्; भूतत्वमूर्तत्ववत्। 'सामान्यं यदि द्रव्यकर्मभिन्नं सज्जातिमत् स्याद्, गुणः स्यात्' इति सामान्यरूपाव्यवस्थैवाऽनवस्थाविशेषः। 'यदि द्रव्यकर्मान्यत्वे सति जातिमान् स्यात्' गुणः स्यात् तथा च व्यावृत्तधीहेतुर्न स्यात्। समवायो यदि प्राप्तित्वे सति समवायवान् स्यात् संयोगः स्यात्। न च प्राप्तित्वात् समवायत्त्वं साध्यम्, साधनावच्छिन्नसाध्यव्यापकस्य संयोगत्वस्योपाधित्वाद्' इति। परमते समवायनानात्वमभ्युपेत्योक्तम्। अस्माकं व्यक्तेरभेद एव तत्रापि बाधक इति क्रमेणापादनमिति भावः। कि. प्र. व॥

२ **कार्यकार**णेति—यथा शब्दो गुणः कार्येण शब्देन नाश्यते, कर्म चोत्तरसंयोगेन तथाऽन्त्यः शब्द उपान्त्येन, नैवं द्रव्यजातीयम्; तद्धि क्वचित् समवायिकारणनाशेन, क्वचिदसमवायिकारणनाशेन नश्यतीत्यर्थः। कि. प्र. व॥

---

1 कार्यत्वं भूतत्वं-जे। 2 बाधनं त्वौपाधिकमिति विशेषः-क। 3 भासनैकस्य कस्यचित्-क। 4 कार्यत्वम्-क। 5 त्ववसेयम्-पा. २. पु। 6 स्वभावत्वम्-पा. इ. पु।

पृथिवीत्यादि । **अनेकत्वम्**—बहुत्वस[1]ङ्ख्या । अपराजातिः पृथिवीत्वादिका; तद्वत्ता तत्समवायः । संस्कारवत्ता चेति द्रष्टव्यम् ॥

(१८) क्षितिजलज्योतिरनिलमनसां क्रियावत्त्वमूर्तत्वपरत्वापरत्ववेगवत्त्वानि ॥

क्षितीत्यादि । क्रिया—स्पन्दः तद्वत्ता । **मूर्तत्वम्**—असर्वगतपरिमाणयोगः । **परत्वापरत्वे** गुणविशेषौ वक्ष्येते । **वेगः**—संस्कारविशेषः, तद्वत्ता ॥

(१९) आकाशकालदिगात्मनां सर्वगतत्वं, परममहत्त्वं, सर्वसंयोगिसमानदेशत्वं [2]च ।

आकाशादीनामिति । **सर्वगतत्वम्**—पूर्वोक्तेषु सर्वेषु मूर्तेषु गतत्वं सम्बन्धः । **परमहत्त्वम्**—प्रकर्षकाष्ठा[3]प्राप्तमहत्परिमाणयोगः । ननु इयत्तैव परिमाणमुच्यत इति चेत्; न; सङ्ख्यागुरुत्वयोरपि तथाभावप्रसङ्गात् । हस्तवितस्त्यादिपरिकल[4]नाभावे । परमाणुषु[5] तदभावप्रसङ्गाच्च । तदभावेऽपि परमसूक्ष्मत्वात् परिमिति एव परमाणुः, इति चेत्; न; तदभावेऽपि परमहत्त्वात् परिमितमेवाकाशादि, इति न कश्चिद्विशेषः । तस्माद्धस्तवितस्त्यादिप्रकर्षनिकर्षवान्, इतरेभ्यो व्यावृत्तः, परस्परमनुवृत्तश्च गुणविशेषः प्रत्यक्षसिद्धो दुरपह्नवः । तस्य यथा निकर्षकाष्ठया → [6]परमाणुत्वं तथा प्रकर्षकाष्ठया ← परममहत्त्वमपीति । **सर्वसंयोगिसमानदेशत्वम्**—सर्वेषां संयोगिनां मूर्तानां संयोगवृत्त्या समाना आकाशादयो देशाः, तेषां भावः, तत्त्वम् । पूर्वमाकाशाद्येव सर्वमूर्तेषु वर्तत इत्युक्तम् । सम्प्रति त एवाकाशादिषु वर्तन्त इत्यपौनरुक्त्यम् । अथवा पूर्वं मूर्तसंयोगा एव आकाशादिषु वर्तन्त इत्युक्तम् । सम्प्रति मूर्ता एवनभःप्रभृतिषु वर्तन्त इत्यपौनरुक्त्यम् । चकारात् क्रियापरत्वापरत्ववेगविरहः ॥

(२०) पृथिव्यादीनां [7]पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्वबाह्यैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि । चतुर्णां द्रव्यारम्भ-

१ धात्वर्थः क्रियाऽतिव्यापिका इत्यन्यथा व्याचष्टे स्पन्द इति । स्पन्दवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्यर्थः । एवं परत्वादावपि नोत्पन्नविनष्टा व्याप्तिः । कि. प्र. व ।

1 बहुत्वसमवाया-क । 2 चेति-कि, दे । 3 ग्राह्य-जे । 4 कल्पनाभावे-मु. कि; 'तदभाव इति चेन्न' इत्यधिकम्-१. पु । 5 त्वस्याप्यभावेऽपि प्रसङ्गात्-मु. कि; अत्र 'अपि' इति स्थाने 'अति' इति भाष्यम्-सं । 6 →← एतच्चिह्नान्तर्गतः पाठः-'क' पुस्तके नास्ति । 7 पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्वं-दे ।

-कत्वस्पर्शवत्त्वे; त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्र[1]वत्वानि द्वयोर्गुरुत्वं रसवत्त्वं [2]च ।

पृथिव्यादीनामिति--भूतत्वम् औपाधिकं[१] सामान्यम् । अथ जातिरेव किं न स्यात्? न स्यात्,[3] व्यञ्जकाभावेन व्यक्तिनियमानुपपत्तेः । बहिरिन्द्रिय[4]ग्राह्य विशेषगुणवत्त्वैव व्यञ्जिका, इति चेत्, न; तदा मूर्तत्वमपि जातिरेव स्यात्; अवच्छिन्नपरिमाणस्य [5]व्यञ्जकस्य सद्भावात् । एवमस्तु, को दोष इति चेत्, न; जातिसङ्करप्रसङ्गात् । तथा हि मनसि मूर्तत्वं नभसि च भूतत्वं मिथः परिहारेण वर्तमानं पृथिव्यादौ सङ्कीर्यते । अस्तु तर्हि पृथिवीत्वाद्यनेकनिबन्धनप्रवृत्तिरेव भूतशब्दः, अक्षादिवत्, इति चेत्; न; एकनिमित्तत्वे सम्भवति अनेकार्थत्वकल्पनानवकाशात् । तस्माद् [6]भोक्तव्यविषयाश्रयतया भूतानि सिद्धानि [7]प्रसिद्धानि भूतानीत्युच्यन्ते ।

इन्द्रियप्रकृतित्वम्—इन्द्रियोपा[8]दानत्वम्; तच्च नभसोऽवच्छिन्नाऽनवच्छिन्न-भेदकल्पनयोपपादनीयम् । अन्यथा 'भूतेभ्यः' इति पञ्चमी समानतन्त्रे[२] स्वतन्त्रे च मनस एतद्वैधर्म्यं न स्यादिति । 'प्रकृति' शब्दः स्वभावार्थो वा, तथा च मनोव्यवच्छेदाय सन्निद्धिसिद्धं बाह्यपदमनुसन्धेयम् । **बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वम्**—बाह्येनानात्मगुणग्राहिणा[३]; एकैकेनेन-प्रतिनियतेनेन्द्रियेण साक्षात्कारिज्ञानसाधनेन च ग्राह्या ग्रहणयोग्या ये गुणा गन्धादयः परस्परं विशेषा व्यवच्छेदहेतवः तद्वत्त्वम् । अत्र विवक्षा-भेदेन बाह्यैकैकेन्द्रियग्राह्यगुणवत्त्वं बाह्येन्द्रियग्राह्यविशेषगुणवत्त्वं वेति बोद्धव्यम् ।

चतुर्णां पृथिव्यप्तेजोवायूनां **द्रव्यारम्भकत्वम्**—द्रव्यसमवायिकारणत्वम् । स्पर्शवत्त्वं स्पर्शसमवायः । उपलक्षणं चैतत् । अवान्तराणुत्वमहत्त्वे, स्थितिस्थापकसंस्कार-योगः, शरीरेन्द्रियारम्भकत्वं च इत्यपि द्रष्टव्यम् ।

---

१ **औपाधिक**मिति—संस्कारत्वान्यबहिरिन्द्रियग्राह्यगुणत्वव्याप्यजातिमद्विशेषगुणवत्त्वम्, आत्म-भिन्नविशेषगुणवत्त्वं वेत्यर्थः ॥ कि. प्र. व. ॥

२ 'घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः' इति पञ्चमी समानतन्त्रे गौतमसूत्रे ॥ न्या. सू. १-१-१२.

३ **अनात्मेति**—अनात्मगुणग्राहकत्वं मनस्यपि इत्यात्मगुणग्राहकेणेत्यर्थः । कि. प्र. व ।

---

1 द्रवत्ववत्त्वानि-कि; रूपवत्त्ववत्वानि-दे । 2 चेति-कि; दे । 3 व्यञ्जकनियमाभावेन-क । 4 ग्राह्यगुणवत्ता-क । 5 व्यञ्जकसद्भावात्-पा. र. पु । 6 भोक्तव्याश्रयतया-क । 7 नासिद्धानीति-जे, सिद्धानि भूतानि-कि । 8 पादानकारणत्वम्-क ।

त्रयाणां पृथिव्यप्तेजसां **प्रत्यक्षत्वम्**—बाह्येन्द्रियग्राह्यत्वम् । **रूपवत्त्वम्**—रूपसमवायः । **द्रवत्ववत्त्वम्**—द्रवत्वसमवायः । सम्भाव्यते चैतत् ॥

द्वयोः पृथिव्युदकयोः **गुरुत्वम्**, तत्कार्यं पतनं च । **रसवत्त्वं च**—रसो माधुर्यादिस्तद्वत्त्वम् । आलोकप्रकाश्यत्वमभास्वररूपत्वत्त्वं चेति चार्थः ॥

(२१) **भूतात्मनां वैशेषिकगुणवत्त्वम्** ॥

भूतात्मनाम्—पृथिव्यादीनां पञ्चानामात्मनां च **वैशेषिकगुणवत्त्वम्**—स्वाश्रयव्यवच्छेदौपयिकावान्तरसामान्यविशेषवन्तो वैशेषिका गुणा रूपादयो बुद्ध्यादयश्च तद्वत्त्वम् । उपलक्षणं चैतत् प्रत्यक्षगुणवत्त्वम् इत्यपि द्रष्टव्यम् ॥

(२२) **क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम्** ॥

क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम् [1]सङ्ख्यामात्रेण साधर्म्यमेतत् । न तु गुणा विशेषतो विवक्षिताः सम्भावितं चैतत् साधर्म्यं न तु व्यापकं परमेश्वरात्मन्यसम्भवात् । तानग्रे गणयिष्यति ।

(२३) **आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम्** ।

आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम् । क्षणिका आशुतरविनाशिनः, एकदेशवृत्तयोऽव्याप्यवृत्तयः, विशेषाय-स्वाश्रयव्यवच्छेदाय गुणा विशेषगुणाः, तद्वत्त्वम् । अत्रापि विवक्षाभेदाद् एकदेशवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं वेति द्रष्टव्यम् । आकाशे तादृशो गुणः शब्दः; आत्मनि बुद्ध्यादिः ।

(२४) **दिक्कालयोः पञ्चगुणवत्त्वं सर्वोत्पत्तिमतां निमित्तकारणत्वं च** ॥

दिक्कालयोः पञ्चगुणवत्त्वम्—सङ्ख्या-परिमाण-पृथक्त्व-संयोगविभागाः पञ्चैव गुणाः दिशि काले च । **सर्वोत्पत्तिमतां निमित्तकारणत्वं च** । तत्समवेत—द्वित्वद्विपृथक्त्वादिसंयोगविभागवर्जं सर्वाण्युत्पत्तिमन्ति गृह्यन्ते, तेषां निमित्तकारणं दिक्कालौ । न हि देशकालानपेक्षं किञ्चिदुत्पद्यते । तथा च व्यपदिश्यते ‘ इहेदानीं जातः ’ इति । ‘ गेहे जातः ’ ‘ गोष्ठे जातः ’ इत्यनिमित्तमपि गेहादि व्यपदिश्यते, इति चेत्, न;

---

१ **अव्याप्येति**—समानाधिकरणात्यन्ताभावप्रतियोगिन इत्यर्थः । कि. प्र. व ।

---

1 सङ्ख्यामाश्रित्य–पा. २ पु ।

तस्याप्यधिकरणतया निमित्तत्वात् । न ह्यधिकरणमकारणमिति । यद्येवं सम्प्रदानतयाऽदृष्ट-द्वाराधिष्ठातृतया वाऽऽत्मनामपि सर्वोत्पत्तिनिमित्तकारणत्वमस्ति, तत्कथमनयोरेवोपन्यासः? इति चेत्, सत्यम्; अधिकरणतया तु सर्वोत्पत्तिमन्निमित्तत्वं विवक्षितम् । यथा हि दिक्कालोपाध्यधिकरणा [1]सर्वस्योत्पत्तिः, नैवमात्मोपाध्यधिकरणेति । परत्वापरत्वानुमेयत्वं च इति चार्थः ॥

(२५) क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः ॥

क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः । अग्निसंयोगान्निमित्तादुत्पद्यते यद् द्रवत्वं तत्समवायः सुवर्णादौ तेजसि, घृतादौ पार्थिवे ॥

(२६) [2]एवं सर्वत्र साधर्म्यं विपर्ययाद्वैधर्म्यं च वाच्यमिति ॥

एवं सर्वत्र विपर्ययात् साधर्म्यं वैधर्म्यं च वाच्यमिति— एवमनेन न्यायेन सर्वत्र साधर्म्यं यत्तदेव विपर्ययाद् व्यावृत्तेर्वैधर्म्यम्, वैधर्म्यं यत्तदेव विपर्ययादनुवृत्तेः साधर्म्यम् । अथवा साधर्म्यविपर्ययोऽप्यन्यस्माद् [3]वैधर्म्यम्, वैधर्म्यविपर्ययोऽ[4]प्यन्यस्मात् [5]साधर्म्यं च स्वयमूहित्वा वाच्यमध्यापकेन ग्राह्यं च शिष्यैरिति ।

तद्यथा 'गन्धवती पृथिवी' इति वैधर्म्यं वक्ष्यति, तद्विपर्ययाद् निर्गन्धत्वमबादीनां साधर्म्यमुक्तम् । जलभूम्योः साधर्म्यं गुरुत्वं रसवत्त्वं च तद्विपर्ययादितरेभ्यो वैधर्म्यम् । विपर्ययस्त्वितरेषां तेजःप्रभृतीनां साधर्म्यमगुरुत्वं नीरसत्वं च । एवमात्मानं विहाय परार्थत्वमचेतनत्वं च । मनो विहाया[6]नन्तःकरणत्वमनष्टगुणवत्त्वं च । अम्भो विहाय निःस्नेहत्वमक्लेदत्वं च । तेजो विहायाऽनुष्णत्वमदाहकत्वम् । जलज्योतिरनिलानामपाकजस्पर्शवत्त्वम् । जलज्योतिषोरपाकजरूपवत्त्वम् । दिक्कालमनसां वैशेषिकगुणविरहः । वाय्वाका-

१ **साधर्म्यविपर्ययोऽप्यन्यस्मात्साधर्म्य**मित्यत्र वैधर्म्यं चेत्यपि द्रष्टव्यम् । अन्यस्मादिति ल्यब्लोपे पञ्चमी, अन्यं प्राप्य साधर्म्यमित्यर्थः । वैधर्म्यविपर्ययोऽप्यन्यस्माद्वैधर्म्यं साधर्म्यं चेत्यपि द्रष्टव्यम् । कि. प्र. व ।

२ **परार्थत्वम्** —भोगानधिकरणत्वमित्यर्थः । **अनन्तरिति**— आत्मग्राहकेन्द्रियान्यद्रव्यत्वमित्यर्थः । कि. प्र. व ।

३ अक्लेदत्वमिति—सांसिद्धिकद्रवत्वविरहिद्रव्यत्वमित्यर्थः । कि. प्र. व ।

1 सर्वोत्पत्तिः–कि । 2 एवं सर्वत्र विपर्ययात् साधर्म्यं वैधर्म्यं च वाच्यमिति–कि । 'द्रव्यासङ्करः' इत्यधिकं 'क' पुस्तके । 3 साधर्म्यम्,–कि; क. प्रकाशकारेणाप्ययं पाठः स्वीकृतस्तथापि 'वैधर्म्यं च' इत्यधिकं स्थापितम् । 'जे' पुस्तके तु 'वैधर्म्यम्' इति समीचीनः पाठोऽस्ति, अतः स्वीकृतः–सं । 4 प्यन्यस्य–जे । 5 वैधर्म्यम्–कि; क । 6 °नन्तःकरणत्वमनणुत्वं–पा, १. पु; नन्तःकरणत्वमणुकरणत्वं–क ।

-शदिक्कालमनसामतीन्द्रियत्वम् । आत्ममनसोः शरीरावच्छेदेन वृत्तिलाभः । वाय्वादीनां नीरूपत्वम् ॥ आकाशादीनां स्पर्शशून्यत्वम् । कालादीनाममूर्तत्वमित्यादि ।

तदेवमुक्तैर्द्रव्यत्वादिभिर्द्रव्यमितरेभ्यो विवेचितं न तु मध्यवर्तिभिरन्त्यविशेषवत्त्वादिभिरव्याप्तेः । नापि परस्परतोऽतिव्याप्तेः, किन्तु कियानपि विवेकः [1]सिद्ध्यतीत्युक्तम् । न चैतावतैव कृतकृत्यत्वम्, अविवेकस्य तदवस्थत्वादिति । तत्कुतो विवेकः स्यादित्यपेक्षायामाह—

(२६ अ) [2]इहेदानीमेकैकशो वैधर्म्यमुच्यते ॥

इहेदानीमिति—इह प्रकरणे इदानीमवसरप्राप्तौ एकैकमित्येतावतैव [3]चरितार्थत्वे 'शस्' प्रत्ययोपादानं वीप्सायां भूयस्त्वज्ञापनार्थम् ।

(२७) पृथिवीत्वाभिसम्बन्धात् पृथिवी । रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती ।

पृथिवीत्वाभिसम्बन्धात् पृथिवीति । पृथिवीत्वं नाम सामान्यविशेषः, तेनाभिमतः सम्बन्धः समवायलक्षणः तस्मात् । न [4]त्वेकार्थसमवायसंयुक्तसमवायादेरित्यर्थः ।

---

१ **आत्ममनसो**रिति । शरीरावच्छेदः शरीरसंयोगविशेषः । वृत्तिलाभो भोगजनकत्वम्, तच्चासमवायिकारणत्त्वम् । तेन भोगासमवायिकारणसंयोगाश्रयत्वमित्यर्थः । शरीरतत्संयोगौ च निमित्तकारणे इति नातिव्याप्तिः । *यद्वा निरवयत्वे सति ज्ञानहेतुशरीरसंयोगवत्त्वमित्यर्थः । कि. प्र. व ।

२ **मध्यवर्तिभिः**—एकदेशवृत्तिभिरित्यर्थः । **अन्त्यविशेषवत्त्वादिभि**रित्यत्र 'आदि'पदेन मूर्तत्वादिग्रहणम् । अव्याप्तेः भागासिद्धतया सर्वद्रव्याव्यावर्तकत्वाद् इत्यर्थः । कि. प्र. व ।

*यदि कार्यैकार्थप्रत्यासत्त्या शरीरात्मसंयोगोऽप्यसमवायिकारणं तदा शरीर एव तदव्याप्तम्, अतो लक्षणान्तरमाह—**यद्वे**ति । प्राणाद्यतिव्याप्तिनिरासायाद्यविशेषणम् । ज्ञानहेतुमनःसंयोगवति श्रोत्रेऽतिव्याप्तिरिति 'शरीर' पदम् । शरीरेन्द्रियसंयोगस्य ज्ञानहेतुत्वे मानाभाव इति तद्विशेषणेनातिव्याप्तिनिरासः । न च तस्याहेतुत्वे 'शरीरसंयुक्तं सह' इत्यग्रिममूलविरोधः; तत्तेन नियमभागाभिधानान्न तु हेतुत्वाभिधानात् । यदि शरीरेन्द्रियसंयोगोऽपि हेतुः, तदा श्रोत्रातिव्याप्तिनिरासाय श्रोत्रान्यत्वं विशेषणम् । यद्वा ज्ञानहेतुत्वं सकलजन्यज्ञानहेतुत्वं विवक्षितमित्यदोषः । 'शरीर' पदं चैवं सति व्यर्थमिति केचित् । वयं तु उद्भूतरूपपरमाणुनिष्ठमहत्त्वाभावसाक्षात्कारप्रत्यासत्तिघटकचक्षुःसंयोगवति परमाणावतिव्याप्तिवारणाय 'शरीर' पदमिति ब्रूमः । कि. प्र. व्या. भ ।

---

1 सम्भवति–क । 2 'इह' इत्यादिकः समग्रः पाठः 'जे' पुस्तके नास्ति । 3 चरितार्थत्वात्–पा. २. पु; चरितार्थे–पा. ३. पु । 4 त्वेकार्थसंयुक्तसमवायादित्यर्थः–क ।

ननु पृथिवीस्वरूपसिद्धौ किं लक्षणेन? [1]सिद्धे[द्धौ] साधनस्य वैयर्थ्यात्, तदसिद्धौ आश्रयासिद्धेः। न; [2]स्वरूपसिद्धावपीतरव्यवच्छेदस्य साध्यमानत्वात्। तथाहि 'पृथिवी-अबादिभ्यो भिद्यते पृथिवीत्वात्। यत्पुनरितरेभ्यो न भिद्यते नासौ पृथिवी, यथाऽबादि। न चेयं न पृथिवी, तस्मादितरेभ्यो न भिद्यते। तथाप्यप्रसिद्धविशेषणः पक्षः, इतरव्यवच्छेदस्य क्वचिदप्यप्रसिद्धेः; सिद्धौ वा साधनवैयर्थ्यात्। [3]न; [4]इतरव्यावृत्तेर्घटादावेव प्रत्यक्षसिद्धत्वात्। किन्त्वापरमाणोरा च भूगोलकात् पृथिवीत्वनिमित्ताक्रान्ते व्याप्त्या [5]व्यवच्छेदभेदव्यावृत्त्या व्यावृत्तिर्न सिद्धेति साध्यत इति न दोषः।

अथ किमेतल्लक्षणमिति? उच्यते। केवलव्यतिरेकिहेतुविशेष एव लक्षणम्। तथा **चाचार्याः** 'समानासमानजातीयव्यवच्छेदो लक्षणार्थः' इति। एवं तर्हि पृथिवीत्व-निमित्ताक्रान्ते [१]व्याप्त्यावच्छेदभेदव्यावृत्त्या व्यावृत्तिः क्वचिन्न सिद्धा, इति पुनरप्यप्रसिद्ध-विशेषणत्वं समायातम्; इति चेत्; न; पक्षसम्बन्धिनो विशेषणस्य [6]सर्वत्रान्वयिन्यपि [7]अपूर्वस्यैव साध्यत्वात्। प्रसिद्धो हि धर्मो धर्मिणमन्वेति न तु धर्म्यन्विततयैव प्रसिद्धः साध्यत इति। तथा सति सिद्धेः साधनवैयर्थ्यादिति। तथापि घटादौ चेद् इतरव्यावृत्तिः प्रत्यक्षसिद्धा ततस्तद्दृष्टान्तबलेनान्वयादेव परमाण्वादौ साध्यतां किं घटादिकमपि पक्षे निक्षिप्य व्यतिरेक आद्रियते? इति चेत्, आस्तां तावदयं सुहृदुपदेशः, केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम्।

[२]व्यवहारसिद्धिर्वा लक्षणप्रयोजनम्। तथाहि—विवादाध्यासितं द्रव्यं पृथिवीति [8]व्यवह्रियते, पृथिवीत्वात्। यत्पुनः पृथिवीति न व्यवह्रियते न सा पृथिवी, यथा अबादि। [9]न चेयं न पृथिवी, तस्मान्न तथा व्यवह्रियत इति। अत्रापि व्यवहारविषयस्य स्वरूपतः

---

१ व्याप्त्येति अस्यैव व्याख्यानमवच्छेदेति। अवच्छेदभेदो घटत्वपटत्वादिः। तस्य व्यावृत्त्या विरहितत्वेन लक्षिता व्यावृत्तिरित्यर्थः। कि. प्र. व॥

२ व्यवहारसिद्धेर्वेति। ननु पृथिवीव्यवहारः पृथिवीपदप्रयोगविषयत्वं वा, पृथिवीपदजन्यज्ञान-विषयत्वं वा, पृथिवीत्वेन निमित्तेन पदवाच्यत्वं वा पृथिवीत्वेऽप्यस्ति इति, ततो न हेतुव्यावृत्तावसाधा-रण्यम्। मैवम्, पृथिवीत्वेन निमित्तेन पृथिवीशब्दाभिधेयत्वस्य तद्व्यवहारार्थत्वात्। कि. प्र. व।

---

1 'सिद्धौ' इति समीचीनं भाति, प्रकाशकारस्यापि सम्मतः पाठोऽयम्–सं। 2 स्वरूप-सिद्धस्यापि व्यवच्छेदस्य साध्यत्वात्–क। 3 'न'–कपुस्तके नास्ति। 4 इतरव्यवच्छेदस्य–क। 5 अवच्छेदभेदेन व्यावृत्ति 'न'–पा. ३. पु। 6 सर्वत्राप्रसिद्धस्यैव–पा. १. पु। 7 अप्रमितस्यैव–क। 8 व्यवह्रियते लोकेन–कि; क। 9 न चेयं पृथिवी तस्मात्तथा व्यवह्रियते इति–कि।

सिद्धेर्नाश्रयासिद्धिः। पृथिवीव्यवहारस्य संमुग्धस्य सिद्धे[1]र्नाप्रसिद्धविशेषणत्वम्। पक्षे व्याप्त्या निमित्तविशे[2]षवतः साध्यत्वान्नसाधनवैयर्थ्यम्, सर्वपृथिवीपक्षीकरणेन च नान्वयित्वम्। यद्यस्यान्वयव्यतिरेकावनुविधत्ते तत् तद्धेतुकम्, यथा घटादि मृदादिहेतुकम्, अनुविधत्ते च पृथिवीव्यवहारः पृथिवीत्वस्यान्वयव्यतिरेकौ इति चेत्, न, पृथिवीत्वनिमित्तकत्वे पृथिवीव्यवहारस्य साध्ये अन्वयाभावात्। १केवलं [3]सर्वनाम्ना व्यवहारमात्रेण वक्तोऽयमन्वयः, स च व्यतिरेकान्नभिद्यते, विवक्षाभेदादिति।

यत्पुनराह **भूषणो** '[4]लक्षणं चिह्नं लिङ्गमिति पर्याया' इति, तदसत्; व्यावृत्तौ व्यवहारे वा साध्येऽन्वयिनोऽनवकाशात्। व्युत्पन्नस्य स्वयमेव व्यवहारात्। अव्युत्पन्नस्य सपक्षपरिचयाभावात्। कथं तर्हि शास्त्रे 'क्रियावद् द्रव्यम्' इति [5]द्रव्यलक्षणेषु पठ्यते? द्रव्यस्यैवायमसाधारणो धर्मः समवायिकारणत्ववद् गुणवत्त्ववच्चेति प्रतिपादनार्थम्, न तु लक्षणत्वेन द्रव्यमात्रं पक्षीकृत्य, व्यावृत्तिसाधने भागासिद्धत्वात्। मूर्तद्रव्यमात्रपक्षीकरणेऽप्यासाधारणत्वात्। तस्माद् वायुमनसोरप्रत्यक्षत्वेन द्रव्यत्वविप्रतिपत्तौ च क्रियावत्त्वेन तत्प्रसाध्य भागासिद्धिः [6]परिहरणीयेति तस्य तात्पर्यम्।

ये तु प्रमाणमेव सर्वस्य व्यवस्थापकं न तु लक्षणम्, तद२पेक्षायामनवस्थामाहुः; तेषां निन्दामि च पिबामि चेति [7]न्यायः। यतोऽव्याप्त्यतिव्याप्तिपरिहारेण तत्तदर्थव्यवस्थापकं तत्तद्व्यवहारव्यवस्थापकं च प्रमाणमुपाददते तदेव लक्षणम्। अनुवादः स३ इति चेत्, अस्माकमप्यनुवाद एव। न ह्यलौकिकमिह किञ्चिदुच्यते। न चानवस्था, वैद्यकादौ रोगादिलक्षणवद् व्याकरणादौ शब्दादिलक्षणवच्च व्यवस्थोपपत्तेः। [8]तत्रापि हि संबन्धव्यवहारमाश्रित्य लक्षणैरेव व्युत्पत्तिरिति।

---

१ केवलमिति। न हि यत्त्वं तत्त्वं चानुगतमिति व्यतिरेकव्याप्तिमुपजीव्य सर्वनाम्नाऽन्वयाभिधानमेव वक्तव्यार्थः। कि. प्र. व।

२ तदपेक्षायामिति—लक्षणेऽपि लक्षणापेक्षायामित्यर्थः। कि. प्र. व।

३ स इति—'लक्षणरूपोऽर्थोऽनुवादो न त्वपूर्वार्थप्रापकः, *मानान्तरप्रतीतार्थप्रमाकत्वाद्' इत्यर्थः। कि. प्र. व।

* प्रमितार्थप्रतिपादकत्वाद् इत्यपि पाठः पुस्तकान्तरे।

---

1 नाप्यसिद्धि–क। 2 विशेषणवतः–क। 3 सर्वनामशब्देन पा ३ पु.; क। 4 लक्षणं चिह्नं गमकं लिङ्गमिति–पा. ३ पु। 5 द्रव्यलक्षणं–कि; द्रव्यलक्षणमुपपद्यते–पा. १. पु। 6 प्रतीकरणीयेति–जे। 7 न्यायापातः–पा. १. पु। 8 तत्रापि संमुग्ध–मु. कि।

क्षित्युदकात्मनां चतुर्दशगुणवत्त्वं साधर्म्यमित्युक्तम्। तत्र के ते चतुर्दश गुणाः पृथिव्यामित्यत आह—[1]रूपेति। [2]ननु गन्धसाहचर्याद्रूपादयोऽप्यसाधारणतामा[3]पन्नास्तत्कथं न लक्षणम्? [4]इति चेत्, न; केवलस्यैव गन्धस्यासाधारणत्वे विशेषणासामर्थ्यात्। एतच्चानुपदमेव स्फुटयिष्यति।

(२८) एते च गुणविनिवेशाधिकारे रूपादयो [5]गुणविशेषाः सिद्धाः। 'चाक्षुष' वचनात्सप्तसङ्ख्यादयः। पतनोपदेशाद् गुरुत्वम्। 'अद्भिः सामान्य'वचनाद् द्रव्यत्वम्। 'उत्तरकर्म'वचनात् संस्कार इति॥

[6]एषु सूत्रकारसम्मतिमाह—**एते** **चेति**। गुणानां विनिवेशो द्रव्येषु समवायः। स च प्रतिपाद्यत्वेनाधिक्रियतेऽस्मिन्निति गुणविनिवेशाधिकारः द्वितीयोऽध्यायः। [7]तथा च सूत्रम्—'**तत्र**[8]**रूप-रस-गन्धस्पर्शवती पृथिवी**'—इति (वै. सू. २-१-१) सूत्रकारवचनाद्रूपादयः सिद्धाः। [9]सङ्ख्यादौ सूत्रकारसम्मतिमाह **चाक्षुषवचनात् सप्त सङ्ख्यादय इति**—"**सङ्ख्याः, परिमाणानि, पृथक्त्वम्, संयोगविभागौ, परत्वापरत्वे कर्म च रूपद्रव्यसमवायाच्चाक्षुषाणि**" (वै. सू. ४-१-११) इति सूत्रे सङ्ख्यादीनां चाक्षुषत्वे हेतुत्वेन रूपद्रव्यसमवाय उक्तः। न चासिद्धश्च हेतुत्वम्; अतस्तेऽपि रूपवत्यां पृथिव्यां सप्त सिद्धाः। **पतनोपदेशाद् गुरुत्व**मिति—"**संयो**[10]**गविभागप्रयत्नवेगाद्यभावे गुरुत्वात् पतनम्**" (वै. सू. ५-१-७) इति पतने गुरुत्वस्य हेतो[11]रुपदेशात् पतनवत्यां पृथिव्यां गुरुत्वमपि सिद्धम्। नह्यसिद्धस्य हेतुत्वम्, नापि व्यधिकरणस्य कर्मासमवायिकारणत्वम् नोदनादिषु विपर्यासदर्शनात् इति। **अद्भिः सामान्यवचनाद् द्रवत्व**मिति—"**सर्पिर्जतुमधूच्छिष्टानां** [12]**पार्थिवानामग्निसंयोगाद्**-अद्भिः **द्रवत्वम्** सामान्यम्"–(वै. सू. २-१-६) इति सूत्रे सर्पिरादीनां पार्थिवानां

---

1 रूपेत्यादि- जे। 2 न तु–क। 3 °पन्ना इति युक्तम्–क। 4 'इति चेत् न' इति क पुस्तके नास्ति। 5 विशेषगुणाः–जे 'तथा च रूपरसगन्धवती पृथिवी' इत्यनेन विशेषगुणाश्चत्वारोऽभिहिताः (व्यो.५. १९४) गुणविशेषा इत्यनेकेषु पुस्तकेषूपलभ्यते इति स्वीकृतः–सं। 6 अत्र–जे। 7 'तथा च सूत्रम्'–इति जे पुस्तके नास्ति। 8 'तत्र' इति सूत्रे नास्ति। 9 वाक्यमिदं कि; जे पुस्तकयोर्नास्ति। 10 संयोगाभावे इति मूलसूत्रपाठः, संयोगाद्यभावे–पा. १. पु; संयोगवेगप्रयत्नाभावे–क। 11 रुद्देशात्–कि। 12 'पार्थिवानाम्' इति मूलसूत्रे नास्ति।

द्रवत्वमद्भिः समानो धर्म इत्युक्तम्, अतो द्रवत्वमपि सिद्धम्। **उक्तकर्मवचनात् संस्कार** इति—"**नोदनादाद्यमिषोः कर्म, तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च**" (वै. सू. ५-१-१७) इति सूत्रे इषुकर्मोपदेशेन पार्थिवद्रव्यस्योत्तरस्मिन् कर्मणि संस्कारः कारणतयोक्तः, अतः सोऽपि सिद्धः। उपलक्षणं चैतत्, आद्यकर्मकार्यतयाप्युक्तस्तत्रैव सिद्ध इत्यपि द्रष्टव्यम्।

तदनेन सूत्रकारसम्मतिप्रदर्शनव्याजेन सर्वत्र [1]प्रमाणमादर्शितम्, तथाहि—रूपादिष्वेकादशसु प्रत्यक्षं [१]पतनलिङ्गकमनुमानं गुरुत्वे। 'अग्निसंयोगान्वयव्यतिरेकानुविधायितया नेदमिह क्षीरादिवत् संयुक्तसमवायेन नान्यस्येति प्रत्यक्षमेव सोपपत्तिकं द्रवत्वे निरन्तरो गतिसन्तान एव वेगव्यवहारहेतुरिति [2]**मीमांसक**दुर्दुरूढादिप्रतिपत्तिव्युदासाय [२]कार्यलिङ्गकमनुमानं संस्कार इति।

(२९) क्षितावेव गन्धः। रूपमनेक[3]प्रकारं शुक्लादि। रसः षड्विधो मधुरादिः। गन्धो द्विविधः सुरभिरसुरभिश्च। [4]स्पर्शोऽनुष्णाशीतत्वे सति पाकजः।

एवं गुणवत्त्वेन द्रव्यत्वे व्यवस्थिते पृथिवीत्वव्यवस्थाहेतून् गुणविशेषानाकृष्य दर्शयति-**क्षितावेव गन्ध** इति। क्षितावेव गन्धो वर्तते न द्रव्यान्तरे। तेन गन्धसमवायः[5] पृथिवीत्वव्यवस्थाहेतुरित्युक्तं भवति। यत्तु 'सुगन्धि सलिलम्'; 'सुरभिः समीरण', इति तत्पार्थिवकुसुमाद्यधिवासनिबन्धनम्। तदन्वयव्यतिरेकानुविधानात् न तु स्वभावत इत्यवधेयम्। ननु तथाप्यव्यापको गन्धः क्षितेः, वक्ष्यमाणेषु मणिवज्रादिष्वनुपलब्धेः; तत्कथं तद्व्यवस्थाहेतुः? न, पाकेन पूर्वरूपनि[6]वृत्तौ रूपान्तरोत्पत्तौ च पाकजरू[7]पस्यैव गन्धसहचरिततया तत्रापि तदनुमानात्। अनुद्भवात्तु तदनुपलम्भः तत्र घ्राण इवेत्य[8]भिप्रायः।

---

१ **पतनलिङ्गकमिति**—गन्धवत्यधःसंयोगफलिकाक्रिया सा समवायिकारणिका, क्रियात्वात्, सम्प्रतिपन्नवद्, इति, न तेजस्यगुरुण्यपि तद्दर्शनाद् व्यभिचारः। न चैवं रसेनार्थान्तरम्; रसोत्कर्षेण पतनोत्कर्षाभावात्। कि. प्र. व॥

२ **कार्यलिङ्गकमिति**—नोदनाभिधानजन्यं द्वितीयं कर्मासमवायिकारणम्, कर्मत्वाद्, आद्यकर्मवत्। न च कर्मणाऽर्थान्तरम्, कर्मवति कर्मान्तराऽनुत्पत्तेरित्यर्थः। कि. प्र. व।

---

1 प्रमाणं दर्शितम्—क 2 'मीमांसक' इति 'क' पुस्तके नास्ति। 3 प्रकारकं-कि। 4 स्पर्शोऽस्या-दे। 5 पृथिवीत्वव्यवस्थाहेतु—पा. २. पु। 6 परावृत्तौ—पा. ३. पु। 7 स्य च—जे; क। 8 त्यभिप्रायवान् आह—जे।

रूपमनेकप्रकारं शुक्लादि । क्षितावेवेत्यनुवर्तते । यद्यपि शुक्लादिरूपं [1]समुच्चयेन न सम्भवति । स हि जातिसमुच्चयो विरोधादेवानुपपन्नः । व्यक्तिसमुच्चयोऽपि न व्याप्त्या, अनुपलम्भबाधितत्वात् । नाव्याप्त्या, अव्याप्यवृत्तिजातीयताविरोधात् । किमेतत् [2]तर्हि चित्रं रूपमिति ? यथा [3]शुक्लमिति शुक्लजातीयं तथा चित्रमपि चित्रजातीयं व्याप्यवृत्त्येव; प्रत्येकं च न क्षितिव्य[4]वस्थाहेतुः भागासिद्धत्वात् । तथापि क्रमेण शुक्लाद्यनेकरूपसमवायलक्षणः समुच्चयः क्षितावेव । किञ्च शुक्लशुक्लतरशुक्लतमाद्यवान्तरानन्तजातिमद्रूपं क्षितावेव नान्यत्र । जलस्य हि शुक्लत्वेऽपि नावान्तरतारतम्यमस्ति, [5]पार्थिवसंयोगात्तु तथा प्रतिभासः । एवं तेजसोऽपि शुक्लभास्वरैकस्व[6]भावत्वे स्वाभाविकविशेषाभावः ।

ये पुनराहुः—शुक्लत्वादिकमेव सामान्यं नास्ति कुतस्तदवान्तरतारतम्यमिति । एकैका एव हि शुक्लारुणादिरूपव्यक्तयो नित्या अपि अनित्याभिर्द्रव्यव्यक्तिभिर्व्यज्यन्ते । तारतम्यं त्वमूषामाश्रयमिश्रतया यथायथा हि धवले कृष्णद्रव्यानुप्रवेशस्तथा तथा तारतम्यावभास इति; [7]तदयुक्तम्; तेषामाश्रयस्थितावपि पावकसंयोगात् पूर्वरूपनिवृत्तिरुत्तररूपोत्पादश्च न स्यात् । [8]अनेकव्यक्तिसमवेतस्य निरतिशयस्य नित्यस्य सामान्यादन्यत्वं च नोपपद्यते । अस्तु शुक्लत्वादिकं सा[9]मान्यमेव, इति चेत्, न; गोत्वादिना परापरभावानुपपत्तौ जातिसङ्करप्रसङ्गादिति ॥

रसः षड्विधो मधुरादिरिति । अस्यापि [10]वृत्तिर्मण्यादिषु गन्धवत् पाकजरूपेणानुमानात् । अत्राप्यवान्तरानेकसामान्यविशेषवान् रसः पृथिव्यामेवेति वाक्यार्थः । अपामव्यक्तमधुर एव हि रसः स्वभावतः । अवान्तरभेदास्तु नारिकेलादिजलगताः पार्थिवद्रव्योपाधिकाः । तेन गन्धवती पृथिवी, अवान्तरानेकसामान्यविशेषवद्रूपवती अवान्तराऽनेकसामान्यविशेषवद्रसवती चेति लक्षणार्थः ।

स्यादेतत् । यथा रूपवत्त्वाविशेषेऽपि त्रयाणामनेकविधरूपवती पृथिवी । स्वच्छधवलरूपवज्जलम् । शुक्लभास्वररूपवत्तेजः । तथा गन्धाऽवान्तरप्रकारभेदमाश्रित्य [11]द्रव्यभेदः स्याद् इत्यत आह—'**गन्धो द्विविधः सुरभिरसुरभिश्चे**ति । क्षितावेवेत्यनुवर्तते ।

---

1 समुच्चयेन सम्भवति–क । 2 तर्हि रूपमिति–क । 3 शुभ्रमिति–जे । 4 व्यवच्छेदहेतुः–पा. २, ३. पु, अवच्छेदहेतुः –क । 5 पार्थिवद्रव्यसंसर्गात्–क । 6 स्वभावान्न–पा. ३. पु । 7 यत्तदसत्–पा. ३ पु । 8 अनन्त–जे । 9 शुक्लादिकं द्रव्यवृत्तिसामान्य–पा. १. पु., क । 10 व्याप्तिर्मण्यादिषु–कि; क । 11 द्रव्यभेदहेतुः–क ।

न द्रव्यान्तरे। पाकजः खल्वयमेकस्मिन्नेव द्रव्ये कालभेदेन वर्तमानः प्रकारभेदवानपि न[1] द्रव्यान्तरव्यवस्थाहेतुरिति भावः।

स्पर्शोऽस्याः पाकजो विलक्षण इत्याह—**स्पर्श** इति। →[2]यद्यपि नभस्वतोऽनुष्णाशीतस्पर्श उक्तस्तथापि न पाकजः←। पाकजस्पर्शवती पृथिवीति लक्षणार्थः। अत्र हि स्पर्शवतीत्युच्यमाने→जला[3]दावतिव्याप्तिः स्यात्। पाकजवतीत्युच्यमाने←तेजसा पाकजद्रववत्ववतातिव्याप्तिः, अतः पाकजस्पर्शवती। अत्र च गन्धरूपरसानां पाकजत्वं सदपि स्फुटत्वान्नोक्तम्; स्पर्शस्य तु तथात्वे विप्रतिपत्तिः। न हि गन्धादिवद्विशेषतः स्पर्शः पाकजस्यान्वयव्यतिरेकावनुविधत्ते। पार्थिवगुणत्वमात्रेण तत्परिकल्पने परिमाणादिष्वपि तथा[4] कल्पनाप्रसङ्गात्। तदेतद् विप्रतिपत्तिबीजमपनिनीषन्नेवोक्तवान् पाकजः स्पर्श इति। यदि हि पाकजो न स्यात् सङ्ख्यापरिमाणादिवदविशिष्टः स्यात्। तथा चाशीविषवृश्चिककीटादिदंशेषु शूकशिम्बिवृश्चिकपत्रिकादिषु संस्पृष्टेषु दृष्टो दुःखविशेषो नोपपद्येत। मणिमूलादिविशेषेषु[5] च स्पृष्टेषु तदुपशमो न स्यात्। गवादिचाण्डालादिस्पर्शविधिनिषेधौ च न स्याताम्। न च द्रव्य[6]मात्रे तावुपपद्येते; दर्शनस्पर्शनघ्राणास्वादनभेदेन मातङ्गमदिरादिषु प्रायश्चितभेदानुपपत्तिप्रसङ्गात्। तस्मात्पार्थिवस्पर्शोऽपि पाकजः पार्थिवविशेषगुणत्वात् गन्धवदि[7]त्यवधेयम्।

ये तु मन्यन्ते पृथिव्यां स्पर्शो नास्त्येव, औष्ण्यशैत्ये विहाय स्पर्शान्तरस्यानुपलम्भबाधितत्वात्। शैत्यमेव हि तेजः स्पर्शेनाभिभूतमौष्ण्यं चोदकस्पर्शेनाभिभूतमनुष्णाशीतत्वे[8] नानुभूयत इति; तान् प्रत्याह—**अनुष्णाशीतत्वे सती**ति। बलवत्सजातीयग्रहणकृतमग्रहणं खल्वभिभवः। तथा चाभिभावकमन्यतरदवश्यमुपलभ्येत। न चैवं प्रकृते, किन्तु शैत्योष्णत्वानुपलम्भेऽपि तद्विलक्षणः स्पर्श उपलभ्यत एव। [9]तथाविधे तमसि शुष्क[10]पार्थिवद्रव्यस्येति भावः।

(३०) सा [11]तु द्विविधा। नित्या चानित्या च। परमाणुलक्षणा नित्या। कार्यलक्षणा त्वनित्या। सा च स्थैर्याद्यवयव-

---

1 द्रव्यभेद–पा. र. पु। 2 →←। 3 →← →एतच्चिह्नान्तर्गतौ पाठौ 'क' पुस्तके न स्तः। 4 तथाप्रसङ्गात्–क। 5 विशेषेषु स्पृष्टेषु–कि। 6 द्रव्यमाश्रित्यैवोपपद्येते–पा. २. पु। 7 °त्यवधातव्यम्–पा. ३. पु। 8 नाभिधीयते–क। 9 तथाविधेऽप्यन्धे तमसि–पा. ३. पु। 10 शुक्ल–जे; शुष्क पार्थिवस्येति–कि। 11 च–कि।

सन्निवेशविशिष्टाऽपरजातिबहुत्वोपेता शयनासनाद्यनेकोपकारकरी च। त्रिविधं चास्याः कार्यम्। शरीरेन्द्रियविषयसञ्ज्ञकम् ॥

सेयं पृथिवी यद्यनित्यैव स्यात्तदाऽवयवानवस्था स्यात् एकस्यापि कस्यचिदवयवस्य निवृत्तौ निराश्रयं च कार्यमापद्येत, अथ नित्यैव, निःप्रामाणिका तर्हि स्यात्। कार्यं च गन्धवदपि द्रव्यान्तरमापद्येतेत्यत आह—**सा [1]तु द्विविधा नित्या चानित्या चे**ति। चकारौ मिथः समुच्चयार्थौ नियमनिराकरणपरौ; तेन नोक्तदोषावकाश इत्यभिप्रायः।

का पुनर्नित्या? महतीहि मही महत्त्वादेव कार्यत्वादनित्या। अणुपरिमाणा तु नोपलभ्यत एवेत्यत आह—**परमाणुलक्षणा नित्ये**ति। लक्षणं स्वभावः। कार्यमेवात्र प्रमाणं भविष्यतीत्यभिप्रायवता नेह प्रमाणान्तरमादर्शितम्। तथाहि स्थूलकार्यस्य लोष्टादेरवयवक्रियाविभागादिन्यायेन विभज्यमानस्याल्पतरतमादिभावाद् यतो नाल्पीयस्तं परमाणुमाचक्ष्महे। एष ह्यवयवावयविप्रसङ्गो न तावन्निरवधिरेव; अनन्तावयवारब्धत्वाविशेषेण मेरुसर्षपादीनां परिमाणभेदानुपपत्तेः। न च कारणसङ्ख्याया अविशेषेऽपि [2]परिमाणप्रचयविशेषाद्विशेष इति युक्तम्; तयोरपि सङ्ख्याविशेषाभावेऽनुपपत्तेः। नापि प्रलयावधिः, कस्यचिदन्त्यस्य निरवयवत्वेन [3]प्रलयानुपपत्तेः। द्रव्यस्यावयवविभागविनाशाभ्यां विना विनाशाभावात्। नापि विभागावधिः, तस्य विभज्यमानाश्रयतया तदभावेऽनुपपत्तेः। न चैकाश्रय एव विभाग इति युक्तम्, किञ्चिद्धि कुतश्चिद् विभज्यते न तु तदेव तस्मात्। तस्मान्निरवयवावधिरयमवयवावयविप्रसङ्ग इति विज्ञायते।

---

१ नित्यानित्यभेदकथनस्यार्थन्तरत्वमपाकरोति—**सेयमिति**। **अवयवानवस्थेति**—यद्यप्यनवस्थामात्रं बीजाङ्कुरसाधारणेन न दूषणं तथापि सर्वकार्यद्रव्यनाशात् प्रलयानन्तरं सृष्टिरिति व्यवस्थाविरह एवानवस्थेत्येके। द्व्यणुकावयवस्यानेकद्रव्यारब्धत्वे महत्त्वं स्यादित्यन्ये। **एकस्येति**—सर्गादौ सर्वानित्यद्रव्यनिवृत्तौ द्व्यणुकनिराश्रयतापत्तिरित्यर्थः। **निःप्रमाणके**ति—नित्यपृथिव्या अनुपलम्भात् पृथिवीत्वस्य अनित्यपृथिवीवृत्तित्वेनैवोपलम्भादित्यर्थः। कि. प्र. व ॥

२ **अनन्ते**ति। नत्वनन्तावयवारब्धत्वाविशेषेऽपि कश्चित्तादृग्बहुतरावयवारब्धः, कश्चित्तादृक् तदवयवापेक्षयाऽल्पावयवारब्धः इत्यवान्तरसङ्ख्याभेदादेव परिमाणभेदः स्यात्। अत्राहुः—सर्षपो यदि साक्षात्परम्परासाधारणमेवारम्भकन्यूनावयवारब्धः स्यात्, एतावत्परिमाणाधिकपरिमाणः स्यात्। न ह्यवयवानां निबिडत्वेऽप्येतावानपकर्षः सम्भवति। यद्वा मेरुपदं स्थूलपरम्, सर्षपपदं च द्व्यणुकपरम्, तेन यदि द्व्यणुकं सावयवारब्धं स्यात्, महत् स्याद्, इति महत्त्वापत्तिरेव तुल्यपरिमाणत्वापत्तिः। यद्वा द्व्यणुकत्रसरेण्वोः सावयवारब्धत्वेन तुल्यपरिमाणापादने तात्पर्यम् ॥ कि. प्र. व ॥

---

1 च–कि। 2 परिमाणप्रचयाभ्यां–क। 3 तदनुपपत्तेः–क।

[1]तर्कितमेतन्न तु प्र[2]मितमिति चेत्; अत्र कश्चिदाह—किमत्र प्रमाणगवेषणया, त्रसरेणोः [3]प्रत्यक्षप्रमाणसिद्धत्वात्। तस्य चावयवकल्पनायां [4]प्रमाणभावेन निरवयवत्वादिति। तदसत्; तस्य चाक्षुषद्रव्यत्वेन महत्त्वादनेक[5]द्रव्यवत्त्वाच्चेति। यदि हि [6]द्रव्यस्य चाक्षुषता महत्त्वमन्तरेण स्यात्, दूरदूरतरादौ न महत्परिमाणप्रकर्षमनुविदध्यात्। यदि च साऽनेकद्रव्यवत्तां नाद्रियेत महत्त्वमपि नाद्रियेत। तद्व्यावृत्तौ तस्यापि व्यावृत्तेस्तस्य तत्कारणत्वात्। अन्यथा तत्प्रकर्षं महत्त्वप्रकर्षो नानुविदध्यात्। तस्माद् विवादाध्यासितस्त्रसरेणुर्महान् अनेकद्रव्यवांश्च, अस्मादादिचाक्षुषद्रव्यत्वाद् घटवद् इति।

अपर आह—अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तम्, परिमाणतारतम्यत्वात्, महत्परिमाणतारतम्यवदिति। तदप्यसत्; [१]परस्पराश्रयदोषप्रसङ्गात्। यदि नाऽसौ परमाणुः, सन्तु तर्हि तदवयवा एव कार्यानुमिताः परमाणवः; न हि तेऽपि महान्तः, रूपविशेषवतां महतां चाक्षुषत्वप्रसङ्गात्। तथा च [7]तेषां च कार्यत्वे प्रमाणानवक्लृप्तौ तदवयवाननुमानात्। यद्यपि चाणुत्वान्निरवयवत्वाच्च तेषां महत्परिमाणारम्भे न कारणं महत्त्वप्रचयौ स्तः; तथापि बहुत्वसङ्ख्याऽस्तीति सर्वं समञ्जसम्। न; उक्तोत्तरत्वात्। अवश्यं हि त्रसरेणोरवयवैरनेकद्रव्यैर्भवितव्यम् →[8]तस्य महत्त्वात्, कार्य←महत्त्वं प्रति चावयवगतस्यानेकद्रव्यत्वस्यापि कारणत्वात्। अन्यथा महत्त्वस्य तत्प्रकर्षानुविधानानुपपत्तेः। तस्मात् त्रसरेणोरवयवाः सावयवाः महद्द्रव्यारम्भकत्वात् तन्तुवत्। [२]बहवश्च ते, परिमाणप्रचयानुपपत्तौ महदारम्भकत्वात्, तुल्यपरिमाणप्रचयतन्त्वपेक्षयाधिकसङ्ख्य[9]पटारम्भकतन्तुवत्। ते च विभज्यन्ते, सावयवत्वात्, घटवत्। विपक्षे बाधकमुक्तम्। तदवयवानां त्ववयवकल्पनानवकाशः, प्रमाणाभावाद् बाधकाच्च। द्रव्यारम्भकत्वमूर्तत्वादीनामनुकूलतर्काभावात्; अनवस्थाप्रसङ्गस्य च प्रतिकूलस्य स्फुटत्वादिति परमाणुसिद्धिः।

---

१ **परस्परेति**—परमाणुसिद्धौ महत्त्वविरुद्धाणुपरमाणुसिद्धिः, तत्सिद्धौ परमाणुसिद्धिरित्यर्थः। न च महत्त्वापकर्ष इत्थं व्यपदिश्यते तस्य त्रुटावेव विश्रामात्। कि. प्र. व॥

२ **बहवश्चेति**— परिमाणारम्भकबहुत्ववन्तः परिमाणप्रचयाजन्यमहत्त्वपरिमाणाश्रयद्रव्यजनकत्वादित्यर्थः॥ कि. प्र. व।

---

1 तर्कितमेव-क। 2 नत्वनुमितिमूले, न प्रमाणमिति च टिप्पण्याम्—पा. ३. पु। 3 प्रत्यक्षसिद्धत्वात्–क। 4 प्रमाणाभावान्निरवयवत्वमिति–पा. ३. पु। 5 द्रवत्वात्–पा ३. ३। 6 स्वस्य-क। 7 तत्कार्यत्वे-क। 8 → ←एतच्चिह्नान्तर्गतः पाठः 'क' पुस्तके नास्ति। 9 पटारम्भक इति कि; जे पुस्तकयोर्नास्ति।

तस्माद्यत्का[1]र्यद्रव्यं तत्सावयवम्, इति समनियमसिद्धौ कार्यद्रव्यत्वेन सावयवत्वं प्रसाध्य यत एवावयवात् कार्यद्रव्यत्वं व्यावर्तते तं निरवयवं परमाणुमुपपादयिष्याम इत्यभिप्रायवानाह—**कार्यलक्षणा त्वि**ति । 'तु' शब्दः [2]परमाणोर्व्यवच्छिनत्ति । किमत्र प्रमाणम्, अत आह—**सा चे**ति । येयमुक्तरूपा दृश्यते सा प्रत्यक्षसिद्धेत्यर्थः । स्थैर्ये स्थिरता चिरकालावस्थायित्वमिति यावत् । आदिग्रहणाद् विष्टम्भकत्वं जलादिव्यूहविरोधित्वं च । अवयवसन्निवेशास्तत्तत्सामान्यविशेषाभिव्यञ्जकसंस्थानविशेषाः । स्थैर्यादीनि चावयवसन्निवेशाश्च तैर्विशिष्टा । [3]न ह्येतद् द्रव्यान्तरे सम्भवति, जलादीनां [4]यत्किञ्चित्स्पर्शवद्वेगवद्द्रव्योपनिपातमात्रेणैव भङ्गुरत्वात् । न च पार्थिववदम्भो द्रव्यान्तरं गच्छद्विष्टभ्नाति, पूर्वव्यूहं वा विरुणद्धि । न च पार्थिवद्रव्यवद् द्रव्यान्तरं तत्तज्जात्यभिव्यञ्जकसंस्थानभेदवदिति । यतस्तत्संस्थानविशेषवती अत एवापरजातिबहुत्वोपेता । ननु सर्वस्य चेतनादन्यस्य परार्थत्वात् किमनया चेतनप्रयोजनं साध्यत इत्यत आह—**शयने**ति । शयनं शय्या, आसनमवस्थितिः । आदिग्रहणाद् [5]गृहकरणकृषिकर्मादि । चकारादभिधीताद्यनेकोपकारकरी चेति ॥

तदिदं पा[6]रार्थ्यमस्याः किं विषयतयैव ? न इत्युच्यते । किन्तु त्रैविध्येनेत्याह—**त्रिविधं चे**ति । शरीरमिन्द्रियं विषय इति सञ्ज्ञा यस्य तदिदं तथोक्तम् । एतेन न शरीरत्वमिन्द्रियत्वं विषयत्वं वा जातिरस्ति; प्रथमद्वितीययोः पृथिवीत्वादिना परापरभावानुपपत्तेः । तृतीयेऽपि निःसामान्योरपि सामान्यभावयोर्विषयत्वात् । तस्माद्यदवच्छिन्ने आत्मनि भोगस्तदन्त्यावयवि शरीरम् । [३]शरीरसंयुक्तमतीन्द्रियं साक्षात्प्रतीतिसाधनमिन्द्रियम् ।

---

१ **चिरकालेति**—यद्यप्येतज्जलादावप्यस्ति तथापि निबिडसंयोगविशेषवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमभिप्रेतम् । विष्टम्भकत्वं स्वाभाविकगुरुत्वाश्रयद्रव्यान्तरगतिप्रतिबन्धकत्वम् । व्यूहविरोधित्वं च स्वाभाविकगुरुत्ववत् पतनप्रतिबन्धकत्वम् ॥ कि. प्र. व ।

२ **यदवच्छिन्न** इति—' पादे मे सुखम् ', ' शिरसि मे वेदना ', इत्याद्यनुभवबलादात्मभिन्नेऽपि सुखस्यावच्छेद्यावच्छेदकभावः सम्बन्ध इत्यर्थः । न च मृतशरीरादावव्याप्तिः, आत्मविशेषगुणकारणमनःसंयोगवदन्त्यावयविमात्रवृत्तिजातिमत्त्वस्य विवक्षितत्वात् तत्रापि मनुष्यत्वादिजातिसत्त्वात् ॥ कि. प्र. व ॥

३ **शरीरसंयुक्त**मिति—यद्यप्येतद्दिक्कालप्राणाद्यतिव्यापकं तथापि स्मृत्यजनकज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम् । त्वगिन्द्रियस्यस्य सर्वज्ञानाजनकत्वान्न तत्राव्याप्तिः । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानहेतुमनःसंयोगाश्रयत्वं वा । **प्रतीयमानत**येति—न चाग्रे वायोर्विषयत्वाभिधाने विरोधः, साक्षात्क्रियमाणत्वस्याविवक्षितत्वात् । वायवीयस्पर्शस्य विषयत्वात्तदाधारत्वेन वायोर्विषयत्वोपचाराद्वा । शरीरादेश्च विषयत्वेऽप्यज्ञायमानस्यापि भोगसाधनत्वात् पृथगुपादानम् । नायं विभागः किन्तु पृथिवीजातीयस्य येन रूपेण पारार्थ्यं तद्रूपोपदर्शनमित्यप्याहुः कि. प्र. व ॥

---

1 कार्य । 2 परमाणु–जे । 3 न चैतद्–पा. ३. पु । 4 यत्तदुपनिपातं–क । 5 भ्रमणकृषिकर्मादि–कि; जे; क । 6 परार्थत्वमस्याः पा. १. पु ।

प्रतीयमानतया भोगसाधनं विषय इति। लक्षणरूपोपाधिनिबन्धना एताः सञ्ज्ञा इति। चस्त्वर्थो वाय्वादिभ्यो भिनत्ति। वायोर्हि चतुर्विधं कार्यं नभःप्रभृतीनां चैकविधमेवेति॥

(३१) [1]**शरीरं द्विविधं, योनिजमयोनिजं च। तत्रायोनिज[2]मनपेक्ष्य शुक्रशोणितं देवर्षीणां धर्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजन्तूनां यातनाशरीराण्यधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते। शुक्रशोणितसन्निपातजं योनिजम्। तद्द्विविधं जरायुजमण्डजं च। मानुषपशुमृगाणां जरायुजम्। पक्षिसरीसृपाणामण्डजम्॥**

अनेकावान्तरप्रकारवच्छरीरारम्भिका पृथिव्येव, न द्रव्यान्तरमित्यभिप्रायवांस्तद्भेदं दर्शयति—**शरीरं द्विविधं योनिजमयोनिजं चेति**। ननु योनिजवत्रायोनिजमपि शरीरमुपलभामहे इत्यत आह—**तत्रेति**। [3]देवानामृषीणामपि श्रूयते हि 'ब्रह्मणो मानसा मन्वादय' इति। ननु कारण[4]मतिपत्य यदि कार्यं भवेत् कार्यमेव न स्यात्, स्याच्च मृदादिव्यतिरेकेण घटादिरिति। न; शरीरत्वस्योष्मजकृमिमशकादिभिर्व्यभिचारात्, संस्थानविशेषवत्त्वस्य चासिद्धेः। त्रिदशाः खल्वेतेऽनेकमन्वन्तरायुषोऽनिमिषचक्षुषो नभश्चारिणः कामगास्त्रिनयनचतुर्भु[5]जादयः। अस्मादादयस्तु दशदशाः शतवर्षपरमायुषः परिभ्रमच्चक्षुषो भूचराः प्रतिहतगतयो द्विभुजनयनाः किञ्चित् [6]संस्थानसाम्येऽपि गोगवयातिवज्ज्ञादिभेदोपपत्तेः। न च संस्थानमपि योनिजत्वे नियामकं [7]मनुष्यगोगवयगजतुरगादीनां तदभावेऽपि योनिजत्वात्। तस्मात् सर्वेषां स्वकर्मनिबन्धनो भोगः; तच्च तन्त्रान्तरीकृतया जन्मायुषी आक्षिपति।

---

१ **कारणमिति**—शरीरं प्रति शुक्रशोणितसन्निपातस्य कारणत्वात्तमतिपत्य शरीरं न स्यादित्यर्थः। कि. प्र. व।

२ न वा संस्थानविशेषे योनिः कारणम्, अपि तु कर्मविशेष एव इत्याह—**न चेति**। कि. प्र. व॥

---

1 तत्र शरीरं–दे। 2 मनपेक्ष–कि; व्यो। 3 देवानामृषीणामिति–पा. १. पु; देवानामृषीणां चेति–३. पु.। 4 परित्यज्य–पा. १.२ पु। 5 मुखादयः–क। 6 अवयवसंस्थान–पा. २. पु। 7 गोगजोरगादीनां–कि; गोगजभुजगादीनां–क; मनुष्यगोगजभुजगादीनां–पा. २. ३ पु।

तत्र[१] येन कर्मणा गर्भवासादिदुःखमपि भोजयितव्यमस्ति तेन योनिजमुत्पाद्यते तदन्येन त्वन्यथेति युक्तमुत्पश्यामः। तदेतदाह—**धर्मविशेषसहितेभ्योऽणुभ्य** इति। अणुभ्य इति मूलकारणनिर्देशोऽयम्, न त्वणुभिरेवाहत्य शरीरमारभ्यते, तदेतदग्रे व्यक्तीकरिष्यति **द्व्यणुकादिप्रक्रमेणे**ति। क्षुद्रजन्तूनां मशकादीनां यातनाशरीराणि। यातना नरकपीडा तस्यैव श[1]रीराणीत्यत्र नारकिणामिति शेषः। क्षुद्रजन्तूनां शरीराणीति संस्थानानि, संस्थानभेदविवक्षया [2]भोक्तृभोगायतनभेदविवक्षया वा षष्ठी। अधर्मविशेषः प्रकृष्टोऽधर्मः, तत्सहितेभ्यः। न हि योनिजं शरीरमाकल्पमयःकुम्भीपाकक्रकचदारणादि-दुःखसहनक्षमम्, नापि नरकयातनासु योनिस्पर्शसुखमानुषङ्गिकमपि श्रूयते। न च [3]नरकाण्येव न सन्ति, [4]स्वर्गेऽप्यनाश्वासप्रसङ्गादिति।

इह 'योनि' शब्देन यदि [5]कारणमात्रमुच्यते, द्विविधत्वं नोपपद्यत इत्यत आह —**शुक्रे**ति। सन्निपातः परस्परमेलनं तज्जं योनिजम्। पशवो ग्राम्याश्चतुष्पदाः, आरण्या मृगाः। गर्भवेष्टनचर्मपुटकं जरायुः। पक्षिणो विहङ्गमाः। सरिसृपाः परितः प्रसरण-शीलाः सर्पकीटमत्स्यादयः। यद्यपि चोद्भिदोऽपि वृक्षादयः शरीरभेदतयाऽत्रैव व्याख्यातुमुचिताः तथाप्यतिमन्दान्तःसञ्ज्ञतया [6]लौकिकापेक्षया सुखदुःख[7]भोक्त्रधिष्ठा-नत्वममीषामविवक्षन् प्रायेण जङ्गमोपकारकतया तदधीनतया च विषयतां विवक्षन् तेष्वेवान्तर्भाव्य व्याख्यास्यन्ते। कयाचिद्विवक्षया ह्यन्तर्भूतमपि पृथग्व्याख्यायते। यथा-ऽयथार्थत्वेन विपर्ययत्वे सति स्वप्नसंशयज्ञाने लोकप्रसिद्धिमाश्रित्य; कयाचिद्विवक्षया पृथग्भूतमप्यन्तर्भाव्य व्युत्पाद्यते, यथा प्रमितेरन्यत्वेनाऽविद्यापि, यथार्थत्वेन स्मृतिर्विद्यायाम्। कयाचिद्विवक्षया सदपि किञ्चिद्रूपमनभिधाय रूपान्तरमुच्यते; यथाऽत्रैवरूपसगन्धानां पाकज-त्वमनुक्त्वा सौरभाद्युक्तम्। शरीरेन्द्रिययोर्द्व्यणुकादिप्रक्रममुपेक्ष्ययोनिजत्वाद्युक्तमित्याचार्य-शैलीयम्। कथं पुनरेतत्? इत्थम्; 'वृक्षादयः प्रतिनियतभोक्त्रधिष्ठिताः[२], जीवनमरणस्वप्न-

१ क्व तर्हि शरीरे योनिः कारणमित्यत आह—तत्रेति। अयोनिजदेवादिशरीरे चागमः प्रमाणम्। योनिं विना च शरीरमित्यत्र चागमे 'योनि'पदं कारणमात्रपरं मनुष्यदेहपरं वा। 'चैत्रः तदीययोनिजशरीरान्यपार्थिवशरीरवान्, शरीरित्वान्मैत्रवद्' इत्यनुमानमप्याहुः॥ कि. प्र. व॥

२ प्रतिनियतेति—भोगजनकमनःसंयोगवन्त इत्यर्थः। आत्मविशेषगुणजनकमनःसंयोगो जीवनम्। ज्ञानजनकमनःसंयोगाजनकस्यन्दनजन्यविभागजन्यज्ञानजनकमनःसंयोगध्वंसो मरणम्। स्वप्नवहनाडीमनः-संयोगजन्यं ज्ञानं स्वप्नः। तदसंयुक्तमनःसंयोगजन्यज्ञानं जागरणम्। रोगो धातुवैषम्यम्। चिकित्सा भेषजप्रयोगः। कि. प्र. व। रोगचिकित्सा इति प्रकाशसम्मतः पाठः।

1 शरीराणीति–कि; यातनाशरीराणीत्यत्र–पा. ३. पु। 2 मोक्ष–क। 3 नरकाएव –मु. कि; जे। 4 नरके–क। 5 कारणत्वमात्रमुच्यते तद्द्वैविध्यं–पा. २. पु। 6 लोकाप्रसिद्ध्या जे; लैकिकापेक्षसुखःदुःख–क। 7 भोगाधिष्ठानत्व–पा. ३. पु।

प्रजागरणरोगभेषजप्रयोगबीजसजातीयानुबन्धानुकूलोपगमप्रतिकूलापगमादिभ्यः, प्रसिद्ध-शरीरवत्'। न चैते सन्दिग्धासिद्धाः, आध्यात्मिकवायुसम्बन्धात्, सोऽपि मूले निषिक्तानामपां दोहदस्य च पार्थिवस्य धातोरभ्यादानात्। तदपि वृद्धिभग्नक्षतसंरोहणाभ्यामिति। अन्यथा कारणं विना कार्यानुत्पत्तिप्रसङ्गे सर्वमि[1]दमामूलविशीर्णमापद्येतेति संक्षेपः। आगमश्चात्रार्थे बहुतरोऽनु[2]सन्धेय इति।

कथं पुनर्मानुषादिशरीरं पार्थिवम्? गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकमिति हि प्रसिद्धिः; सत्यम्, सा पञ्चानां कारणत्वमात्रेण न तु समवायितया। अथ तथैव किं न स्यात्? इत्थम्; द्व्यणुकादिप्रक्रमेण तावदयमारम्भ इति वक्ष्यते। तत्र यदि विजातीयपरमाणुभ्यामे[4]कमारभ्येत, अगन्धमरसमित्याद्यापद्येत; एकस्य गन्धादेरनारम्भकत्वात्। आरम्भकत्वे वा सततोत्पत्तिप्रसङ्गादपेक्षणीयाभावात्। अथानेकस्यापि कु[5]त एतन्न प्रसज्यते, समवायिकारणस्यापेक्षणीयत्वात्। नह्यनपेक्षितसमवायिकारणमारभत इति चेत्; तदेतदेकत्रापि तुल्यम्। न च तन्त्वादिगतानां रूपादीनामनेकेषामेवारम्भकत्वदर्शनादन्यत्रापि तथा कल्पयितुं युक्तम्; कारणानां सजातीयतया तत्र तथोपपत्तेः। विजातीयानामारम्भकत्वे त्वन्यथापि भविष्यति। विपक्षे बाधकाभावात्। तेन 'उष्णं जलम्', 'सुरभिः समीरणः' इत्याद्युपपद्यते। न; एकेन गुणेन गुणारम्भे जातिसङ्करप्रसङ्गात्। तथा हि गन्धवत्त्वादेव तद्द्व्यणुकं पृथिवीजातीयम्, सांसिद्धिकद्रवत्वाच्छीतत्वाच्च जलं स्यात्। एवं शुक्लभास्वररूपवत्त्वादुष्णत्वात्तेजः

---

१ सजातीयानुबन्धः—सजातीयस्नेहः, स च ज्ञानरूपतया यद्यपि न शरीरधर्मस्तथापि तेन तद्व्यञ्जकचेष्टोपलभ्यते। कि. प्र. व।

२ ननु वृद्ध्यादेर्गिरिपाषाणेन व्यभिचारोऽभ्यादानहेतुवायोः प्राणत्वेमानाभावश्चेत्यत आह—आगमश्चेति।

नर्मदातीरसञ्जाताः सरलार्जुनपादपाः।
नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिम्॥
श्मशाने जायते वृक्षः [3]काकगृध्रोपसेवितः॥

इत्याद्यागम इत्यर्थः। न च तस्याधिकानिष्टपरत्वम्, बाधकं विना मुख्यान्यपरत्वाभावादिति भावः। कि. प्र. व।

३ क्लेदः क्षरणम्। पाक औष्ण्यम्। व्यूहः क्रिया। अवकाशो मुखादावन्नादिगत्यप्रतिबन्धः। कि. प्र. व॥

---

1 मालूनं– कि। 2 प्रतिसन्धेय इति–पा. ३. पु। 3 कङ्कगृध्रोपसेवितः इति वा पाठः। 4 मेकजातीयक°–जे; विजातीयपरमाणुभ्य एकं द्रव्यमारभेत–क। 5 कुत एतत्प्रसज्यते–क।

स्यात्। अपाकजानुष्णाशीतस्पर्शवत्त्वाद्वायुः स्यात्। तदयं प्रमाणार्थः। 'गन्धवन्ति द्व्यणुकानि गन्धवद्भिरेव परमाणुभिरारभ्यन्ते, कार्यत्वे सति गन्धवत्त्वात्, पार्थिवपरमाणुद्वयारब्धद्व्यणुकवत्'। 'विवादाध्यासिताः परमाणवः, गन्धवन्त्येव द्व्यणुकान्यारभन्ते, गन्धवत्त्वात्'। 'ये पुनर्निर्गन्धान्यारभन्ते न ते गन्धवन्तः; यथा निर्गन्धजलाद्यारम्भकाः परमाणवः'। न च न ते गन्धवन्तः तस्माद् गन्धवन्त्येव द्व्यणुकान्यारभन्ते। न च दृष्टान्तासिद्धिः, अनियमारम्भे सजातीयाभ्यामप्यारम्भाभ्युपगमात्। अन्यथा निर्गन्धस्य जलादेर्नीरसस्यानलादेर्नीरूपस्य च पवनस्यानुपलम्भप्रसङ्गः। एवं 'सांसिद्धिकद्रवत्ववन्ति द्व्यणुकानि तथाभूतैरेव परमाणुभिरारभ्यन्ते, कार्यत्वे सति सांसिद्धिकद्रवत्ववत्त्वात्, आप्यपरमाणुद्वयारब्धद्व्यणुकवत्। जलपरमाणवः, शीतान्येव द्व्यणुकान्यारभन्ते, शीतत्वात्। ये पुनरशीतान्यारभन्ते ते न शीताः, यथाऽशीततेजोद्व्यणुकारम्भका इत्यादि स्वयमूहनीयम्॥

तस्मात् सजातीयानामेवारम्भकत्वं न विजातीयानामिति स्थितम्। तथापि शरीरस्य कथं पार्थिवत्वनिश्चयः? इत्थम्; क्लेदादीनां परावृत्तावपि शरीरस्य प्रत्यभिज्ञानात्[१]। गन्धस्य च यावद्द्रव्यभावित्वाद् घटवत्। यथाहि घटादौ पार्थिवे क्लेदशोषद[1]शायामपि गन्धोऽनुवर्तते शैत्यादयस्तु कुसुमादिवासितजलादिगन्धवन्निवर्तन्ते तथा शरीरमपीति; तद्वत्पार्थिवत्वमवधार्यत इति॥

(३२) इन्द्रियं [2]गन्धव्यञ्जकं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम्॥

इन्द्रियमाह **इन्द्रियमिति**—गन्धव्यञ्जकं यदिन्द्रियं [3]तत्पार्थिवं घ्राणमिति व्यवहर्तव्यम्, रूपाद्यव्यञ्जकत्वे सति [4]गन्धस्य व्यञ्जकत्वादित्यर्थः। गन्धोपलब्ध्या[२] तावत्करण-

१ प्रत्यभिज्ञानादिति मूलम्। न च भुक्ते परिमाणान्यत्वादन्यदेव तच्छरीरमिति तत्रापि प्रत्यभिज्ञानमनुपपन्नमिति। वाच्यम्; जात्यभेदावगाहमानेनापि तदुपपत्तेः। कि. प्र. व्या. भ।

२ पार्थिवे घ्राणे मानमाह—**गन्धोपलब्ध्येत्यादि**। *गन्धोपलब्धिः रसाद्युपलब्धिजनकशरीरसंयोगिकरणजन्या, तदन्यसाक्षात्कारत्वात्, रूपप्रत्यक्षवत्। न च दृष्टान्तासिद्धिः, 'अन्धकारस्थं †गोलकं घटसाक्षात्कारकारणघटसंयोगाधिकरणतेजोवृत्तिसाक्षात्कारकारणसंयोगाधिकरणम्, रूपवत्त्वे सति ‡घटसाक्षात्कारकारणत्वाद्, घटवत्' इति संयोगिसंयोगिव्यावृत्तकरणसिद्धेः। 'तत्पार्थिवम्, रसाद्यव्यञ्जकत्वे सति गन्धव्यञ्जकद्रव्यत्वात्, चम्पकाद्यधिवासाद्यधिकरणविततद्रव्यवत्'। कुङ्कुमगन्धाभिव्यञ्जककुकुटोच्चारो न दृष्टान्तः, तस्य साक्षात्कारविषयत्वेन रूपादिव्यञ्जकत्वात्। अत एव नवशरावगन्धव्यञ्जकस्थले न

1 दशयोरपि–पा. ३. पु. क। 2 सर्वप्राणिनां गन्धव्यञ्जकं–दे। 3 तद्घ्राणं–क। 4 गन्धस्यैव व्यञ्जकम्–क।

मात्रं सिद्धम्। क्रियायाः [1]करणमात्रनिष्पाद्यत्वनियमात्। तच्च प्राप्यकारि जनकत्वे सति तदप्राप्तावजनकत्वात्। द्रव्यं च संयोगाश्रयत्वात्, पार्थिवं च गन्धवत्त्वात्, गन्धवत्त्वं च रूपाद्यव्यञ्जकत्वे सति [2]गन्धाभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जक तैलवत् इति। **सर्वप्राणिनाम्**मितिप्राणिभेदेनेन्द्रियप्रकृतिवैचित्र्यं निवारयति। यदि [3]गन्धाभिव्यक्तौ शक्तिरस्ति पृथिव्याः, किं न सर्वैव पृथिव्येवमित्यत आह—**जलाद्यनभिभूतैरि**ति। अत एव श्लेष्माद्यभिभवे सति गन्धो न गृह्यते इति भावः। **घ्राणमि**ति—लोकप्रसिद्धमित्यर्थः।

(३३) **विषयस्तु द्व्यणुकादि[4]प्रक्रमेणारब्धस्त्रिविधो मृत्पाषाणस्थावरलक्षणः। तत्र भूप्रदेशाः [5]प्राकारेष्टिकादयः मृत्प्रकाराः। पाषाणा उपलमणिवज्रादयः स्थावराः [6]तृणौषधिवृक्षगुल्मलतावतानवनस्पतय इति॥**

तृतीयं च पृथिवीकार्यमाह—**विषयस्त्वि**ति यद्यपि। शरीरमपि विषयः, तथापि शरीरत्वेनैव तदसाधारणं पुरुषार्थसाधनमिति दर्शयितुं तदेव रूपं तस्य दर्शितम्। वक्ष्यमाणे तु विषयत्वमेवासाधारणमतस्तदुच्यते। [7]**द्व्यणुकादिप्रक्रमेणे**ति—द्व्यणुकमादिर्यस्य प्रक्रमस्य तथोक्तस्तेनारब्धो निष्पादितः। मृत्त्वं मृत्तिकात्वम्। पाषाणत्वं प्रस्तरत्वम्। स्थावरत्वम् उद्भित्वं सामान्यविशेषाः। तत् मृत्तिकात्वं केषु वर्तत इत्यत आह—**तत्रे**ति। [8]मृद्विकारा मृत्तिकारूपा विकाराः। के पाषाणा इत्यत आह—**उपले**ति। उपलाः ग्रावाणः। मणयो मणिक्यादयः। वज्रं हीरकम्। आदिग्रहणाद् गौरिकादयः। **स्थावरा**

व्यभिचारः, तेन स्वीयरसस्याप्यभिव्यक्तेः। यद्वा 'गन्धसाक्षात्कारासाधारणकारणतावच्छेदकद्रव्यत्वव्याप्य-(व्याप्य)जातिमत्त्वाद्' इति हेतुः। जलस्य गन्धव्यञ्जकत्वं जलत्वेनैव न तु तद्व्याप्यजातिन्तरेण॥ कि. प्र. व॥

* गन्धोपलब्धिरिति—लौकिकगन्धसाक्षात्कार इत्यर्थः। साध्ये 'आदि' पदं स्पर्शाव्यञ्जकत्वगर्भसाध्यान्तरसूचनाय, अन्यथा व्यर्थविशेषणतापत्तेः। रूपाव्यञ्जकत्वगर्भं च न साध्यम्, तैलदृष्टान्तानुपपत्तेः। परकीयविशेषणे च गौरवात्। कि. प्र. व्या. भ।

† मानुषेति च गोलकविशेषणम्, अतो न मार्जारनयनस्थिततेजसाऽर्थान्तरम्। कि. प्र. व्या. भ।

‡ घटेति—घटसाक्षात्कारकारणं घटसंयोगः, तदधिकरणं यत्तेजः, तद्वृत्तिर्यो घटसाक्षात्कारकारणं संयोगः, तदधिकरणमित्यर्थः। कि. प्र. व्या. भ।

---

1 कारणनिष्पाद्यत्व–कि। 2 गन्धस्य व्यञ्जकत्वात्–कि। 3 गन्धाभिव्यक्तिसामर्थ्यमस्ति–पा. ३. पु; क। 4 क्रमेण–कं। 5 प्राकारेष्टकादयः–कं। 6 वृक्षतृणौषधि°–कि; जे। 7 प्रतीकमिदं 'क' पुस्तके नास्ति। 8 मृत्तिकाकारा विकारा मृद्विकाराः–पा. ३. पु।

इति—वृक्षाः पुष्पफलवन्तः स्कन्धशाखिनः। तृणान्युलपादीनि। ओषधयः फलपाकान्ताः [1]यवादयः। गुल्मा झाटाः[2]। लताः [3]कुष्माडीप्रभृतयः। अवतानाः केतक्यादयः। वनस्पतयो विना पुष्पं फलिनः। अत्र च शरीरग्रहणेनैव तदवयवा मांसास्थ्यादयस्तद्विकाराश्च क्षीरघृतादयः संगृहीताः। इन्द्रियग्रहणेनैव तदवयवाः। विषयग्रहणेनैव द्व्यणुकादयः। पाषाणग्रहणेनैव हरितालादयः। स्थावरग्रहणेनैव पत्रपुष्पादयः। वृक्षग्रहणेनैव काष्ठादयः। तृणग्रहणेनैव तालादयः। ओषधिग्रहणेनैव तद्विकारास्तन्दुलतैलादय इति।

ननु कोऽयं द्व्यणुकादिप्रक्रमः? द्व्यणुक एव माना[4]भावात्। त्रसरेणवस्तावत्प्रत्यक्षसिद्धाः। ते च [5]चाक्षुषद्रव्यत्वादेव महान्तः, द्र[6]व्यस्य चाक्षुषतां प्रति रूपविशेषवन्महत्त्वस्यापि कारणत्वात्। अन्यथा दूरदूरतरादौ तत्प्रकर्षानुविधानानुपपत्तेः। महत्त्वे सति रूपवत्त्वात् क[7]र्मवत्त्वाच्च ते सावयवाः कार्याश्च। अन्यथाऽव[8]यवगतसङ्ख्याद्यनुपपत्तौ [9]महत्त्वानुपपत्तेः। नित्यत्वे प्रकृष्टकाष्ठाप्राप्तालपभावस्य महत्त्वविरोधात्। न च त्रसरेण्वयवा अपि सावयवाः, तदवयवकल्पनायां प्रमाणाभावात्। नहि त्रसरेणुवत् तेऽपि महन्तः, रूपविशेषवतां महतां चाक्षुषत्वप्रसङ्गात्। यद्यपि च तेऽपि महत्त्वव्यावृत्तेरणुपरिमाणाः, निरवयवत्त्वाच्च प्र[10]चयवञ्चिताः, तथापि ब[11]हुत्वान्महान्ति कार्यद्रव्याण्यारप्स्यन्ते। तथा च परमाणव एव त्रसरेण्ववयवा इति, तत्कुतो द्वणुकम्?।

उच्यते; महतः [12]कार्यद्रव्यस्य कार्यद्रव्यारभ्यत्वनियमात् द्व्यणुकसिद्धिः। अन्यथा परमाणुभिरेव बहुत्वसङ्ख्योपेतैर्महद्द्रव्यारम्भे गोघटादेरपि तैरेवार[13]म्भादान्तरालिकाल्पाल्पतरादि कार्योपलम्भविरोधात्। [14]तथा च द्वणुकवदनुपलक्षितरेखोपरे[15]खादिर्गोघटादिरपि स्यात्। तथा च संस्थानभेदानुपलम्भे तदभिव्यङ्ग्यं घटत्वादिकमपि नोपलभ्येत। न चारभ्याप्यारभन्त इति तदुपलम्भोपपत्तिर्भूतानां [16]समानदेशताऽविधानात्। न्यूनाधिकदेशतया समानदेशत्वेऽप्यविरोध इत्यपि नास्ति। न्यूनदेशतया हि यत्र नास्ति तत्र

---

१ आन्तरालिकेति—घटे नष्टे कपालशर्कराचूर्णादिकार्यं नोपलभ्येतेत्यर्थः। कि. प्र. व॥

---

1 कदल्यादयश्च इत्यधिकम्–२. पु; कलमादयः–क। 2 राटाः–कि; भाटाः–क। 3 कुश्माण्डी–पा. ३. पु। 4 प्रमाणाभावात् –पा. ३. पु; क। 5 चाक्षुषद्रव्यतया–पा. ३. पु। 6 रूपवद्द्रव्यस्य–पा. ३. पु। 7 क्रियावत्त्वाच्च–क। 8 सावयव–क। 9 अवयविमहत्त्वानुपपत्तेः –पा. ३. पु। 10 प्रशिथिलप्रचय–पा. ३. पु। 11 बहुत्वसङ्ख्यास्तीति महत्कार्यद्रव्याणि–पा. ३. पु; बहुत्वान्महत्कार्यद्रव्याणि–क। 12 कार्यनियमाद्द्व्यणुकसिद्धिः–क। 13 रम्भसम्भवा°–क। 14 तथा हि–पा. ३. पु। 15 रेखादिर्घटादिरपि–कि। 16 समानदेशत्वानुपपत्तिः–कि।

अधिकदेशस्य स्थितिं मा विरौत्सीत्, स्वदेशो तु विरुन्ध्यादेव। तत्राप्यविरोधे मूर्तत्वं जह्यात्। अवयवरूपादिवत् संयोगिन्यपि वा देशे न्यूनाधिकदेशतया समानदेशत्वाविरोधः स्यात्। न चो[1]दञ्चनावच्छिन्ने देशे घटादिः संयोगेन वर्तते। कथं तर्हि चरमादितन्त्वपकर्षणेऽल्पतरतमादिपटोपलम्भः, इति चेत्; प्रतिबन्धकविगमेऽवस्थितेभ्यः संयोगेभ्यः खण्डपटोत्पत्तेः। आद्यादितन्त्वपकर्षणे त्वयाप्येषैव रीतिर[2]नुमन्तव्या। अ[3]न्यथा द्वितन्तुकादिपर्यन्तसमस्तकार्यविनाशे खण्डपटानुत्पत्तौ च तन्त्वतिरिक्तं न किञ्चिद् लभ्येत। नन्वेष विचारो द्व्यणुकेष्वपि समानः, तैरपि हि यदि बहुभिः कार्यद्रव्यमारभ्यते, घटादयोऽप्यारभ्येरन्; तथा चान्तरालिककार्यपरम्परानुपपत्तौ तदनुपलम्भप्रसङ्गः। अ[4]थ तैस्त्रसरेणुरेवारभ्यत इति नियमः। परमाणुभिरपि स एवारभ्यत इति तुल्यम्। [5]हातव्योऽयं पक्षो विशेषो वा वक्तव्यः।

उच्यते। यथा ह्यवयवावयविप्रसङ्गः परमाणुषु विश्राम्यति तथाऽयमवयवसङ्ख्यापकर्षः क्वचिद्विश्राम्येत्। न च त्रित्वमपकर्षकाष्ठा द्वित्वैकत्वयोः सम्भवात्। तत्रैकम् अनारम्भकम्, अवयवसंयोगानुपपत्तावसमवायिकारणाभावात्। अनेकसङ्ख्याभावे वाऽवयविनोऽवयवापेक्षयाऽधिकपरिमाणानुपपत्तेः। अवयवापेक्षया चावयविनोऽधिकपरिमाणत्वनियमात्। एकस्य चावयवस्य विभागानुपपत्तौ तत्कार्यस्य विनाशासम्भवे नित्यत्वप्रसङ्गादिति। तथा च द्वित्वमपकर्षपर्यन्तस्तदादिरयमारम्भः। तच्च द्वाभ्यां-परमाणुभ्यामारब्धं कार्यं [6]न महत् स्यात्। तथात्वे तस्य कारणाभावात् तदपि च द्व्यणुकं यदि नारभेत्; यदि हि द्वित्वसङ्ख्यायुक्तमेवारभेत। उभयथाऽपि तदुत्पादनवैयर्थ्यं स्यात्। तस्मात्तेन महद्द्रव्यमारभ्यमाणं बहुत्वसङ्ख्यायोगिनैवेति नियमः। न च द्व्यणुकवत्परमाणवोऽपि बहुत्वसङ्ख्यामाश्रित्य महत्कार्यमारप्स्यन्त इति युक्तम्; अ[२]नियमारम्भस्य निषिद्धत्वात्। कारणकारणस्य च

१ उदञ्चनं * शरावः। कि. प्र. व। (कुंभो?)

* यद्यपि घटशरावोदञ्चनादिभेदेनेति चतुर्थटीकादर्शनाद् उदञ्चनशरावयोर्भेदस्तथापि 'शराव'-पदेनात्र शराव उक्तः। टीकायामपि सामान्यविशेषभेदेनैव पौनरुक्त्यम्। यद्वा, उदञ्चनं शराव एव, टीकायां 'तूदञ्चन'पदेन ऊर्ध्वमञ्चनतमस्येति व्युत्पत्त्या ऊर्ध्वगमनशीलं वस्त्वन्तरमेवोक्तम्। कि. प्र. व. भ।

२ **अनियमारम्भस्येति**—त्रसरेणोः कस्यचिद्द्व्यणुकेन कस्यचिच्च परमाणुभिरारम्भे नियतहेतुत्वं न स्यादित्यर्थः। नन्वणुपरिमाणाश्रयत्वेन कारणानुगमः स्यादित्यत आह—**कारणकारणस्येति**। त्र्यणुककारणद्व्यणुककारणपरमाणोः स्वकार्यद्व्यणुकस्य यत्कार्यजातीयं त्रसरेणुजातीयं तदारम्भकत्वं नास्तीत्यर्थः। यद्वा, आरम्भकवादनिषेधाभिधायक एवायं ग्रन्थः। कि. प्र. व॥

1 चोदञ्चनादिच्छिन्ने—जे; क। 2 रनुसरणीया—क। 3 तथाहि—पा. २. पु; तदाहि—क। 4 अपरैः—क। 5 विशेषो वक्तव्यः—एतावानेन 'कं' पुस्तके। 6 न स्यात्—कि; न महत्—क।

कार्यकार्यजातीयानारम्भकत्वात् । न हि तन्तवः पटमारभन्ते, तत्कारणं चांशव इति । तस्माद्[1] विवादाध्यासितास्त्रसरेणवो न निरवयवद्रव्यारब्धाः सावयवद्रव्यारब्धा इति वा महत्त्वे सति कार्यत्वात् उभयवादिसिद्धद्व्यणुकारब्धत्रसरेणुवत् घटवद्वेति । एवं तर्हि 'द्व्यणुकमपि न निरवयवद्रव्यारब्धं सावयवद्रव्यारब्धं वा, कार्यद्रव्यत्वात् →[1]त्रसरेणुवद् घटवद्वेति स्यात् । न स्यात् ← अनवस्थाप्रतिहतत्वादिति द्व्यणुकादिप्रक्रमसिद्धिः । प[2]र्यवसिता पृथिवी' इति ॥

(३४) अप्त्वाभिसम्बन्धादापः । रूपरसस्पर्शद्रवत्वस्नेहसङ्ख्यापरिमाणपृथक्त्वसंयोगविभाग[3]परत्वापरत्वगुरुत्व[4]संस्कारवत्यः ॥

अथेदानीमपो निरूपयति—**अप्त्वाभिसम्बन्धा**दिति । अप्त्वं नाम सामान्यविशेषः; तेनाभिस[5]म्बन्धादिति पूर्ववद् व्याख्येयम् । तासां द्रव्यत्वसिद्धये गुणानाह **रूपरसेत्या**दि ।

(३५) [6]एते च पूर्ववत्सिद्धाः ।

तत्र प्रमाणं सूचयति—[7]एते चेति । पूर्ववदिति यथा पृथिव्यां सूत्रकारवचनाद् गन्धादयः सिद्धास्तथाऽप्सु रूपादयः सिद्धा इत्यर्थः । तथा च सूत्रम् 'रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च' (वै. सू. २-१-२) इति । यथा च चाक्षुषवचनात् सप्तसङ्ख्यादयः पृथिव्यां तथा अप्स्वपि । यथा पतनोपदेशाद् गुरुत्वं पृथिव्यां तथा तोयेऽपि । यथा चोत्तरकर्मवचनात् पृथिव्यां संस्कारस्तथा पाथःस्वपीति ।

(३६) शुक्लमधुरशीता एव रूपरसस्पर्शाः । स्नेहोऽम्भस्यैव सांसिद्धिकं च[8] द्रवत्वम् ॥

---

१ **तस्मादिति**—ननु साधनावच्छिन्नसाध्यव्यापकं महावयवारभ्यत्वमुपाधिः । तथा 'त्रसरेणुर्नित्यद्रव्यारभ्यः, द्रव्यारभ्यत्वे सति महदनारभ्यत्वात्, परमाणुगन्धवद्', इति प्रतिरोधः । अत्राहुः —'अस्ति तावन्महत्त्वात्मकं कार्यम्, तत्प्रति कारणत्वं कार्यद्रव्यत्वेनैव गृहीतम् । न च महत्त्वविशेष एव तत्त्वेन जनकत्वम्, त्रसरेणौ व्यभिचाराद् इत्यकारणकार्योत्पत्त्या विपक्षबाधकेन साधनस्य साध्यव्याप्यतया तदव्यापकत्वेन, उपाधेः साध्याव्यापकत्वात्, द्व्यणुकारब्धत्रसरेणावेव साध्याव्यापकत्वात् । यद्वा 'त्रसरेणुर्नित्यद्रव्यसमवेतः, शब्दाजन्यत्वे सति अस्मदादिबहिरिन्द्रियग्राह्यत्वाद्, घटवत्' । न च प्रत्यक्षसमवेतत्वमुपाधिः, अप्रत्यक्षव्यक्तिप्रत्यक्षगन्धादौ साध्याव्यापकत्वादित्यत्र तात्पर्यम् । कि. प्र. व ॥

---

1 → ← एतच्चिह्नान्तर्गतः पाठः 'क' पुस्तके नास्ति । 2 इति पृथिवी समाप्ता–क । 3 परत्वगुरुत्व–दे । 4 संस्कारवत्यश्च–कि । 5 सम्बन्धादित्यादि–पा. १ पु । 6, 7 पूर्ववदेषां सिद्धिः–क । 8 द्रवत्वं च–कि ।

एवं गुणवत्त्वेन द्रव्यत्वे सिद्धे पृथिव्या[1]दिभ्यो व्यवच्छेदहेतोरप्त्वस्य व्यवस्थाहेतून् गुणविशेषानाह—**शुक्लमधुरशीता एव रूपरसस्पर्शाः** इति । सहस्रशोऽग्निसंयोगेनाप्यपरावर्तमानमभास्वरशुक्लमेव रूपम[2]प्सु । नहि पार्थिवपटस्फटिकादौ वर्तमानं शुक्लमपि रूपमग्निसंयोगान्न परावर्तते । [3]अपरावृत्तमपि वा ते[4]जसि भास्वरम् । तस्मादनेन विशेषेण रूपमप्त्वव्यवस्थाहेतुः । [5]एष च विशेषः पृथिवीरूपस्य पाकजत्वप्रदर्शनेन तेजोरूपस्य भास्वरत्वख्यापनेन सूचितः । उक्तयुक्तेरेव जलादिरूपस्यापाकजत्वम् । पार्थिवा हि सं[6]सृष्टभागास्तत्र क्वाथेन पच्यन्ते एतेन रसोऽपि व्याख्यातः । नहि पार्थिवे क्षीरशर्करादौ वर्तमानमपि माधुर्यं पाकेन [न] व्यावर्तते । इह तु सहस्रशः पच्यमानमपि माधुर्यमेव; ईषत्स्वाभावं तु तत्तदपि तथैव । यत्पुनरम्बुसिन्धुभेदेन क्षारादिरपि रसः [7]पाथसि उपलभ्यते स दशमूलकषायस्यैव पार्थिवद्रव्योपाधिकः । कथमन्यथा तस्यैव घनपीतमुक्तस्य रसो मधुर एव । एवमपां स्पर्शोऽपि शीत एव । क्वचित्तु सन्नपि तेजोभिभवान्नोपलभ्यते, तदपगमे पुनरुपलब्धेरिति । तदेभिर्विशेषै रूपरसस्पर्शा आप्त्वव्यवस्थापका इत्युक्तम् ।

स्नेहस्तु स्वरूपत एवेत्याह—स्नेहोऽम्भस्यैव । अत्र केचिदाहुः 'न स्नेहो जलधर्मः, तैलादिवज्जलेऽनुपलब्धेः; नापि पृथिव्या विशेषगुणः, सर्वपृथिव्यव्यापकत्वात् । तस्मात् पार्थिवविशेषेषु घृततैलवसादिषूपलभ्यमानः सामान्यविशेषोऽयम्, गव्यमाहिषादिषु दधित्ववद्' इति । तदसत्; स्निग्ध[8]स्निग्धतरादिभेदेन सातिशयत्वात् । न च गोमहिष्यादिषु गुणमनाश्रित्य तारतम्यमस्ति । नहि इषन्मधुरादिवद् गौरतिशयेन गौरिति भवति । तस्मादतिशयस्य गुणैकनिमित्तत्वात् सामान्यविशेषतया च स्नेहस्य सामान्येऽसम्भवाद् गुण एव स्नेहः । किञ्च स्निग्धद्रव्यावयवपरम्पराया अपि स्निग्धत्वादापरमाणुं स्नेहः स्यात् । न च परमाणुषु पृथिवीत्वादेरन्या अपरा जातिरस्ति; व्यवस्थापकाऽभावात् । क्षीरत्वादिवद्भविष्यतीति चेत्; न; तस्यापि परमाणुष्वभावात् । पाकजरूपरसस्पर्शविशेषव्यङ्ग्यं हि क्षीरत्वादि । तथा च पाकान्तरेण तन्निवृत्तौ क्षीरत्वादेर्निवृत्तिप्रसङ्गात् । न च सत्यां व्यक्तौ सामान्यनिवृत्तिरिष्यते न चाविवक्षितसत्ताकाः सम्भवमात्रेण [9]तेऽस्याभिव्यञ्जकाः, सर्वपार्थिवपरमाणूनां क्षीरत्वापत्तौ तदारब्धसर्वकार्यस्य पृथिवीत्ववत् क्षीरत्वापत्तेः; द्व्यणुकादौ क्षीरत्ववद् भविष्यतीति चेत्, न; तदारम्भकेषु परमाणुषु तद्व्यवस्थाहेतोः क्षीरत्ववद् गुणविशेषस्याभावात्;

---

1 पृथिव्यादिव्यवच्छेदहेतून् विशेषानाह—क । 2 मप्सु व्यवस्थाहेतुः—क । 3 अपरावर्तमानमपि—पा. १. पु; क । 4 तेजसो—पा. २. पु; क । 5 एष एव—पा. २ पु । 6 द्रव्यभागास्तत्र—पा. २. पु; दृष्टभागाः—क । 7 पयसि—पा. २ पु; पाथस—कि । 8 स्निग्धतरस्निग्धतमादि—क । तस्याभिव्यञ्जकाः—मु. कि ।

भावे वा स एव स्नेहः, न ह्यत्र रू[1]पादयो व्यवस्थाहेतवः, [2]नापि तद्विशेषाः, तेषां घृतत्वादिव्यवस्थापकत्वात् । न च[3] व्यवस्थाकारणं कारणसामान्यमस्ति, तैलघृतवसानां बीजक्षीरमांसयोनित्वात् । अत एव [4]नारिकेलस्नेहस्यापि तैलत्वम्, रसादिसारूप्यादपि तु घृ[5]तमिति व्यपदेशः । तस्मात् परमाणुषु वर्तमानकारणगु[6]णपूर्वक्रमेणान्त्यावयविपर्यन्तमायातो गुणविशेषः स्नेह इति युक्तम् ॥

न च घृतादिष्वेव स्नेहोपलब्धिः, [7]सातिशयो हि स्नेहस्तत्रोपलभ्यते, गुरुत्वमिव सुवर्णे । वस्तुतस्तु स[8]र्वजलसाधारणी स्निग्धता, अन्यथा जलावसेकेन सक्तुसिक्तादीनां सङ्ग्रहो न स्यात् । स हि स्नेहद्रवत्वकारितः संयोगविशेषो धारणाकर्षणहेतुः । न चा[9]सौ केवलद्रवत्वहेतुकः, काचकाञ्चनादिभिरति[10]द्रवीभूतैरपि वालुकाद्यसङ्ग्रहात् । नापि स्नेहमा[11]त्रकारितः, स्त्यानैर्घृतादिभिरप्यसङ्ग्रहात् । तस्मात् सकलजलहेतुकः सङ्ग्रहो भवंस्तत्र द्रवत्वमिव स्नेहमपि [12]सांसिद्धिकमवस्थापयति । तथापि नैमित्तिकद्रवत्वमिव नैमित्तिकः पृथिव्यामयं भविष्यति, पार्थिवेष्वपि घृतादिषूपलब्धेः, इति चेत्; तदन्वयव्यतिरेकाननुविधानात् । नहि यथा जतुघृतादिष्वद्रवेषु पावकसम्पर्काद् द्रवत्वमुत्पद्यते तद्विरोधिसलिलावसेकाच्च निवर्तते तथा स्नेहः । तस्मात् पाकजतथाविधगन्धरसरूपादिमद्भिः परमाणुभिर्द्व्यणुकादिक्रमेण घृतादिद्रव्यमारभ्यते । तत्र चोपष्टम्भकतया निमित्ततामापन्नाः पानीयावयवास्तेषां संयुक्तसमवायेन स्नेहस्तत्रोपलभ्यत इति स्थितम् ।

सांसिद्धिकं च द्रवत्वमम्भस्येवेत्यनुकर्षणार्थश्चकारः । [13]तैलघृतादिषु [14]पार्थिवत्वसिद्धेः संयुक्तसमवायात्तदुपलब्धिः । शैत्यस्नेहवतां तेषां पार्थिवत्वमेव कथम्? इति चेत्, तैलस्य भौमानलेन्धनत्वाद् घृतवत् । [15]जतुक्षीरस्य च पिण्डीभावेऽपि प्रत्यभिज्ञानाद् घृतवदेवेत्यादि स्वयमूहनीयम् ।

(३७) ता[16]स्तु पूर्ववद्द्विविधाः, नित्यानित्यभावात् । तासां कार्यं च त्रिविधम् । शरीरेन्द्रियविषयसञ्ज्ञकम् ॥

---

1 रूपरसगन्धादयो–पा. २. पु । 2 न च–पा. २. पु; क । 3 न च कारणसामान्यमस्ति –क । 4 नारिकेलफलस्यापि–पा. २. पु । 5 घृतमिति व्यपदेशः–कि । 6 °गुणक्रमेण–कि; गुणक्रमेण–क । 7 सातिशयः स्नेहः–कि । 8 सर्वजलधारिणि–कि; जलसाधारणी–क । 9 न वासौ–कि; जे । 10 रभिद्रवीभूतै–पा. ३. पु । 11 स्नेहमात्रहेतुकः स्नेहवद्भिरभि पिण्डीभूतैर्घृतादिभिः–पा. २. पु । 12 तस्मादुभयमपि व्यवस्थापयति–पा. २. पु । 13 तैलक्षीरादिषु–कि; क । 14 पार्थिवत्वसिद्धिः–कि । 15 क्षीरस्य च–क । 16 ताश्च–कं ।

तास्तु पूर्ववदेव द्विविधाः; नित्यानित्यभावात्। 'तु' शब्दोऽप्यर्थः। पृथिवी तावद्द्विविधा, आपोऽपि[1] तथैव। पूर्ववदिति कार्यतया परमाणुतया चेति। यथा पृथिवी नित्याऽनित्या च आपोऽपि तथेत्यर्थः। 'ता' इत्यत्र [2]विभक्तिविपरिणामेन **तासां कार्यं त्रिविधम्, शरीरेन्द्रियविषयसञ्ज्ञकम्**। तदेतन्निगदव्याख्यानं पृथिव्यामिवात्रापि तात्पर्यमूहनीयम्।

(३८) [3]तत्र शरीरमयोनिजमेव वरुणलोके, पार्थिवावयवोपष्टम्भा[4]च्चोपभोगसमर्थम् ॥

आपः [5]क्वचिच्छरीरारम्भिकाः, द्रव्यारम्भकत्वात्, पृथिवीवत्। द्रव्यस्य हि द्रव्यारम्भणयोग्यता शरीरेन्द्रियविषयभावेन व्याप्ता यदेतेष्वेकमप्यारभते तदन्यदपि, यन्नैकं नैतदन्यदपि, इत्यन्वयव्यतिरेकाभ्यामुपलम्भात्। ततो यद्यापः शरीरं[6] नारभेरन्निन्द्रियविषयावपि नारभेरन्। न चैवम्; तस्मात् क्वचिच्छरीरमप्यारभन्ते, इति स्थिते कीदृक् शरीरमित्यपेक्षायामाह—**शरीरमयोनिजमेवे**ति। शुक्रशोणितयोर्नियमेन पार्थिवत्वात्। पार्थिवेन च पाथसीयानामनारम्भात् तदयोनिजमेव। नन्वनुपलब्धिबाधितमेतद्? इत्यत आह—**वरुणलोके** इति। व्यवहितविप्रकृष्टत्वान्नोपलभ्यते; न त्वभावात्। आगमादुपलब्धेरिति भावः। ननु स्व[7]भावद्रवत्वादपां तदारब्धं कथमुपभोगायतनं तद्? इत्यत आह—**पार्थिवे**ति। यथा कठिनत्वात् पृथिव्यास्तदारब्धमप्यवयवयोपष्टम्भा[8]दुपभोगसमर्थम्। तथाऽप्यत्वाद्द्रवमपि पार्थिवाद्यवयवोपष्टम्भात् तदप्युपभोगसमर्थम्। विजातीयारम्भकत्वमात्रं हि प्रतिषिद्धं न तु परस्परानुग्रहोऽपीत्यर्थः।

(३९) इन्द्रियं [9]रसव्यञ्जकं वि[10]जात्यनभिभूतैर्जलावयवैरारब्धं र[11]सनम् ॥

इन्द्रियमिति—यद् रसोपलब्धिसाधनमिन्द्रियं तदाप्यम्। [12]अत्रापि **रसो**पलब्ध्या स्वरूपसिद्धिः। आप्यत्वं च रूपाद्यव्यञ्जकत्वे सति रसाभिव्यञ्जकत्वात्, सक्तुरसाभिव्य[13]ञ्जकोदकवत्। प्राणिभेदेनेन्द्रियप्रकृतिवैचित्र्यनिवारणाय **सर्वप्राणिना**मिति।

---

1 द्विविधाः–पा. २. पु। 2 परिणामेन–पा. १. पु। 3 'तत्र'–दे पुस्तके नास्ति। 4 'च' 'कि' पुस्तके नास्ति। 5 कुत्रचित्–कि; जे। 6 न्नेन्द्रिय–कि, क; जे–अशुद्धमिदम्–न्निन्द्रिय इति शुद्धमर्थदृष्ट्या। 7 भङ्गुरस्वभावत्वाद्–कि; जे। 8 पष्टाम्भाच्चोपभोग–पा. ३. पु। 9 रसोपलम्भकं–कि; जे; सर्वप्राणिनां रसोपलम्भकं–दे। 10 अन्त्यावयवानभिभूतैः–कि; व्यो. (२४६) जे. दे। 12 रसनेन्द्रियम्–दे। 13 तत्रापि–कि; जे। 14 व्यञ्जकदन्तोकवत्–पा. ३. पु।

अन्या**वयवानभिभूतै**रिति—वाताद्यभिभवे जडजिह्वत्वादिति भावः । किं नामधेयं तद् ? इत्यत आह—**रसनमि**ति ।

(४०) विषयस्तु सरित्समुद्रहि[1]मकरकादिरिति ॥

तृतीयां विधामाह—**विषयस्**त्वति । आप्यत्वे हिमकरकयोः शिलीभावोपपत्तिं द्रवत्वे वक्ष्यतीति ॥

(४१) तेजस्त्वाभिसम्बन्धात्तेजः । रूपस्पर्शसङ्ख्यापरिमाण-पृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् ॥

तेजसो लक्षणमाह—**तेजस्त्वाभिसम्बन्धा**दिति । व्याख्यानं पूर्ववत् । तस्य द्रव्यत्वव्यवस्थितये गुणानाह—रूपस्पर्शेत्यादि ।

(४२) पूर्ववदेषां सिद्धिः ॥

अत्र प्रमाणं सूचयति—**पूर्ववदेषां सिद्धि**रिति । 'तेजो रूपस्पर्शवद्' (वै. सू. २-१-३) इति सूत्रकारवचनाद् रूपस्पर्शौ । चाक्षुषवचनात् सप्त सङ्ख्यादयः । अद्भिः सामान्यवचनाद् द्रवत्वम् । उत्तरकर्मवचनात् संस्कार इति । पृथिवीवदेते सिद्धाः, प्रसिद्धा इत्यर्थः ।

(४३) [2]शुक्लं भास्वरं च रूपम् । [3]उष्ण एव स्पर्शः ॥

तेजस्त्वव्यवस्थापकान् विशेषानाह—**शुक्लं भास्वरं च रूप**मिति । चत्वर्थः पृथिव्यादिरूपाद् व्यवच्छिनत्ति । भास्वरत्वं च सामान्यविशेषः । स च रूपान्तरप्रकाशकत्वेन व्यज्यते । तद्रूपं तेजस एव; तेन भास्व[4]ररूपं तेज इति लक्षणार्थः । शुक्लमिति स्वरूप-कथनम् । पच्यमानेन्धनसन्निधिकृतस्तु लोहिताद्युपलम्भः । तद्विरहे चन्द्रतारकादिमहसि शुक्लस्यैवोपलम्भादिति प्रतिपादनार्थम् । न च तत्राप्यबिन्धनतया तोयरूपसङ्क्रान्त्या धावल्यप्रतीतिरिति वाच्यम्; अपां रूपेण विजातीयानभिभवात् । नहि जलप्लाविता नीलादयः श्वेतन्त इति । **उष्ण एव स्पर्श** इति—एवकारश्चन्द्रचामीकरचक्षुरादिषु अनुपलम्भहेतुकां विप्रतिपत्तिमपनेतुम् । तेषां तैजसत्वेनोष्णत्वानुमानात् । अनुद्भूतत्वेनानु-पलम्भः, न स्वभावात् ।

---

1 करकादिः-दे । 2 तत्र शुक्लं-कं । 3 'नैमित्तिकं द्रवत्वं च' इत्यधिकं कि. पुस्तके व्योमवत्यां च (२५५), उष्ण स्पर्शः-दे । 4 भास्वरं रूपं तैजस-जे ।

(४४) **तदपि द्विविधमणुकार्यभावात्। [1]कार्यं च शरीरादित्रयम्।**

तदपि द्विविधमिति। पूर्ववत्तात्पर्यम्। कार्यभेदमाह—**शरीरादित्रय**मिति शरीरमादिर्यस्य त्रयस्य तत्तथा।

(४५) **शरीरमयोनिजमादित्यलोके, पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्॥**

न पार्थिववत्तैजसं शरीरमुपलभ्यत इत्यत आह—**शरीर**मिति। तेजसोऽपि शरीरारम्भकत्वं तोयवत् साधनीयम्। ज्वलदनलकल्पेन कस्तेनोपभोग इत्यत आह—**पार्थिवे**ति।

(४६) **इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकमन्यावयवानभिभूतैस्तेजोऽवयवैरारब्धं चक्षुः॥**

इन्द्रियमाह—**इन्द्रिय**मिति यद्गन्धाद्यव्यञ्जकत्वे सति रूपस्य व्यञ्जकमिन्द्रियं तत् तैजसम्। **सर्वप्राणिनामि**ति—प्राणिभेदेनेन्द्रियप्रकृतेर्वैचित्र्यशङ्कानिवारणार्थम्। तत्सद्भावेरूपलब्धिः प्रमाणम्। तैजसत्वे च [2]रसाद्यव्यञ्जकत्वे सति [3]रूपाभिव्यञ्जकत्वात्, प्रदीपवत्।

इह केचिदाहुः, अप्राप्यकारि चक्षुः, अधिष्ठानासम्बद्धार्थ[4]ग्राहित्वात्। यत्पुनः प्राप्यकारि, न तदधिष्ठानासम्बद्धार्थग्राहि यथा रसनादि। पृथुतरग्रहणाच्च। यदि च प्राप्यकारि, चक्षुः स्यात् स्वतोऽधिकपरिमाणं न गृह्णीयात्। न खलु [5]नखरञ्जनिका परशुच्छेद्यं छिनत्ति। शाखाचन्द्रमसोस्तुल्यकालग्रहणाच्च। यदि हि गत्वा गृह्णीयात् निकटस्थमाशु प्राप्नुयात् द[6]वीयस्तु चिरेणेति। न तुल्यकालमुपलम्भयेत्। अनुभवती तून्मीलन्नेव नयने शाखां शीतमयूखं चेति। काचाभ्रपटलस्फटिकाद्यन्तरितोपलब्धेश्च। यदि हि प्राप्य गृह्णीयात् प्रतिघातिना स्फटिकादिद्रव्येण विष्टम्भादप्राप्तं प्रस[7]र्पत्तृणादिकं नाददीत। तस्मादप्राप्यकारि; ततो न तैजसमिति।

---

१ शाखेति—गतिक्रमे प्राप्यग्रहणे हि क्रमिकं ग्रहणं स्यात्तथावाऽनुभवविरोध इत्यर्थः। कि. भा. प।

---

1 कार्यं शरीरेन्द्रियविषयसञ्ज्ञकम् इत्यधिकं कि. पुस्तके; शरीरेन्द्रियविषयसञ्ज्ञकम्–दे। 2 रसाद्यव्यञ्जकत्वे–कि। 3 रूपाभिव्यञ्जकम्–कि; जे। 4 ग्राहकत्वात्–कि; जे। 5 नखरः–क। 6 दवीयांस्तु–पा. ३. पु। 7 पसार्यतृणादिकं–पा. ३. पु।

तदसत्; अधिष्ठानासम्बद्धार्थग्राहित्वस्य प्रदीपेनानैकान्तिकत्वात्। पृथुतरग्रहणस्यापि पृथ्वग्रतया तद्वदेवोपपत्तेः। तुल्यकालग्रहणं त्वसिद्धमेव। तदभिमानस्य कालसन्निकर्षेणोपपत्तेः। अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयो यत्प्राचीनाचल[1]चूडावलम्बिन्येव भगवति मयूखमालिनि 'भवनोदरेषु आलोक' इत्यभिमानो लौकिकानाम्।

[१]केचित्तु संसर्गिद्रव्यतया निःसरदेव नायनं तेजो बाह्यालोकेनैकतां गतं युगपदेव तावदर्थेन संसृष्टमिन्द्रियमुत्पादितवदिति शाखाचन्द्रमसोस्तुल्यकालग्रहणमुपपद्यत एवेति [2]समाधानमाहुः। तदसत्; पृष्ठभाग[3]व्यवहितार्थोपलम्भप्रसङ्गात्। इन्द्रियप्राप्तये ह्यार्जवस्थानमुपयुज्यत इति। स्फटिकाद्यन्तरितोपलब्धिरपि प्रसादस्वभावतया स्फटिकादीनां तेजोगतेरप्रतिबन्धकतया प्रदीपप्रभावदेवोप[4]पन्नेति।

येषां त्वप्राप्यकारि चक्षुस्तेषामप्राप्तत्वाविशेषादव्यवहितवत्। कुड्यादिव्यवहितमपि किं न गृह्णीयात्? न हि व्यवधायकं प्राप्तिविघातादन्यत्र सत्तयैव कार्यविरोधि; तथात्वे तस्मिन् सति न क्वचित्कार्यं भवेत्, योग्यं योग्येन गृह्येत। तत्त्वयोग्यत्वान्न गृह्यते, न तु व्यवहितत्वाद्, इत्यपि वार्तम्, स्थैर्ये स्वरूपयोग्यतास्तदानीमप्यपरावृत्तेः। क्षणिकत्वेऽपि प्रत्यासीदतां सहकारिणामतिशयजनकत्वात्। नह्यप्रत्यासीदन्तः सहकारिणि प्रत्ययाः समाः सहस्रेणापि भावानतिशाययन्ति। प्रत्यासत्तिश्च बौद्धनये निरन्तरोत्पादः। अस्माकं च द्रव्ययोः संयोग एव[5] स्यात्। न च कृष्णसारस्यार्थेन निरन्तरोत्पादः। नापि संयोगः; ततस्तदाश्रयस्यातीन्द्रियस्य गतिक्रमेण निरन्तरोत्पादेन वा संयोगेन वेत्यवशिष्यते तदेतदग्रे निरू[6]पयिष्यत इति दिक्।

कथमेतदेव तथा नान्यदूष्मादीत्यत आह—**अन्येति**। अन्येन्युपलक्षणम्; समानजातीयेन बलवता दुर्बलमभिभूयते। कथमन्यथा सौरेण तेजसा नयनमभिभूतं रूपग्रहणासमर्थं भवति। **चक्षुरिति**—लोकप्रसिद्धमित्यर्थः।

(४७) विषयसञ्ज्ञकं चतुर्विधम्-भौमं दिव्यमुदर्यमाकरजं च। तत्र भौमं काष्ठेन्धनप्रभवमूर्ध्वज्वलनस्वभावं पचनदहन[7]स्वेदनादिसमर्थं च दिव्यमबिन्धनं [8]सौरविद्यु-

१ चक्षुर्बाह्यालोकाभ्यामारब्धेन चक्षुषा तावदर्थसंसृष्टेन युगपत् तावदर्थग्रहणमिति केषाञ्चिन्मतमाह—केचित्त्विति। कि भा. प.।

1 चूला-जे। 2 समादधुः-कि; जे। 3 व्यवस्थितार्थोपलम्भ-पा. ३. पु। 4 वोपपत्तिरिति पा. १. पु; उपपत्तेरिति-कं। 5 इति स्यात् जे। 6 निराकरिष्यतीत्येषा दिक्-पा. ३. पु। 7 पचनदहनस्वेदनादि-कं। 8 सौरं-दे।

दादि। भुक्तस्याहारस्य र[1]सादिपरिणामार्थमुदर्यम्। आकरजं सुवर्णादि। तत्र संयुक्तसमवायाद्रसाद्युपलब्धिरिति ॥

विषयविभागमाह—**विषयसञ्ज्ञ**मिति। विषय इति सञ्ज्ञा यस्य, तच्चतुर्विधम्। भौमं भूमौ भवम्। दिव्यं दिवि भवम्। उदर्यमुदरे भवम्। आकरजं खनिराकरस्तस्माज्जातम्। काष्ठेनोद्भिद्विकारान् पार्थिवानुपलक्ष्यति, तदेवेन्धनं दीपनं यस्य तत्तथोक्तम्। [2]**ऊर्ध्वज्वलनस्वभावकम्**—ऊर्ध्वज्वलनमेव स्वभावो यस्य तत्तथा। जातिनिब[3]न्धनो धर्मः स्वभाव इत्युच्यते। परार्थतामाह—**पचने**ति। पाको विक्लेदनं रूपपरावृत्तिर्वा। स्वेदनं वातश्लेष्मणोरपगमः। 'आदि' ग्रहणाच्छीतदुःखोपशमो दाहदुःखोत्पादनं च। **दिव्यमबिन्धनं**—आप एवेन्धनं यस्य तत्। किं [4]तदित्यत आह—**सौरम्**। सूरस्येदं सौरम्। विद्युदचिरप्रभा। आदिग्रहणाद्वडवानल इत्येतदपि दिव्यम्। **भुक्तस्याहारस्येति**—आह्रियत इत्याहार ओदनादिः, तस्य रसादिपरिणामनिमित्तमुदर्यम्। भुक्त एवाहारोऽस्य पार्थिवाप्यरूपमिन्धनं कार्यो रसः। आदिग्रहणान्मलधातुस्तद्विकारास्तएव परिणामास्तेषां निमित्तम्। **आकरजं सुवर्णादि**—आदिग्रहणाद् रजतताम्रकांस्याद्यष्टकम्।

कथं पुनरेतत् तैजसम्? यद्यपि गुरूत्वादयः संयुक्तसमवायेनाप्युपपद्यन्ते तथापि नैमित्तिकद्रवत्वादेव पार्थिवत्वमस्य सिद्ध्यति घृतादिवत्। न च घृतादिद्रवत्ववदेवात्यन्ताग्निसंयोगादेत[5]द्द्रवत्वं सुवर्णस्य क्षीयेत तथा [6]तददर्शनात्। विशेषविरोधस्य चादूषणत्वात्। तथा च वक्ष्यामः। न चाक्षीयमाणेन द्रवत्वेन सत्प्रतिपक्षत्वम्, असाधारणत्वात्। किं च योपि तैजसमिच्छति सुवर्णं तेनाऽप्यत्र पार्थिवो भाग उपष्टम्भक एष्टव्यः। न चाऽसौ द्र[7]वत्वदशायामद्रव एवास्ते। तथा चाक्षीयमाणद्रवत्वं तत्राप्यस्तीति विपक्षैकदेशवृत्तित्वाद्विरुद्धो हेतुः। तस्मात् परिभावनीयमेतत्सुरिभिः।

उच्यते। रूपवत्तया तावदेतत्त्रितयान्तर्भूतमिति स्थितम्। तत्र सांसिद्धिकद्रवत्वशैत्ययोरभावात् स्नेहाविनाभूतद्रव्यान्तरसङ्ग्रहानुपपत्तेश्च न जलम्। न च नैमित्तिकद्रवत्व-

---

1 रसादिभावेन परिणामसमर्थम्–कि; रसादिपरिणामकारणमौदर्यं–जे। 2 'ऊर्ध्वज्वलनस्वभावकम्' इत्यन्येषु पुस्तकेषु नास्ति केवलं 'जे' पुस्तके एव—तथाप्यावश्यकमिति स्थापितम्। 3 निबद्धो–पा. ३; १. पु। 4 तदत आह–पा. ३. पु। 5 द्रवत्वं क्षीयेत–कि। 6 तथा प्रदर्शनात्–कि. क। 7 तद्द्रवदशाया–पा. ३. पु।

वत्त्वात् पार्थिवम्, विपक्षे बाधकाभावात्। नहि निमित्ताद् द्रव्यान्तरे द्र[1]वत्वोपपत्तिं किञ्चिद्विरुणद्धि। न चोर्ध्वज्वलनतिर्यक्पवनवज्जातिनियतमेतत्, एकदेशवृत्तित्वात्। 'न च तद्विशेष'नियतं सर्पिरादीनां भिन्नजातीयत्वात्। तस्मात्तत्तद्भोगहेतुनियतादृष्टसहकार्यग्निसंयोगनिबन्धनं द्रवत्वमुत्पद्यमानं कम्पवन्न पार्थिवत्वादिव्यवस्थाहेतुः [2]किन्तु पार्थिवं रूपमग्निसंयोगादसति विरोध्यन्तरे परावर्तते, सति तु नेति नियमः। दह्यमानेषु घटादिषु दर्शनेन जलसम्बन्धाच्च तेष्वेवादर्शनेन कार्यकारणभावव्यवस्थितेः। तदिदं सुवर्णादि निरन्तरं ध्मायमानपि न पूर्वरूपं जहाति; न च रूपान्तरमापद्यते। तेन जलपार्थिवत्वमवधार्यते। तेनैव च द्रव्यान्तरेण प्रतिबद्धत्वादुपष्टम्भकोऽपि पार्थिवभागः सदृशरूपे एवानुवर्तते। यत्तु पुटपाकादिना रक्तसारता दृश्यते तन्मिश्रिभूताभिभावकतत्तद्द्रव्योपगमादिति युक्तमुत्पश्यामः।

तदयं प्रयोगः—'सुवर्णादि न पार्थिवम्; अत्यन्तानलसंयोगेऽप्यपरावर्त्तमानरूपवत्त्वात् जलवत्। तैजसं चैतत् पार्थिवाप्याभ्यामन्यत्वे सति रूपवत्त्वात्; सूर्यालोकवत्। → ए[3]तेन पारदादि व्याख्यातम् ←। आप्यादन्यत्वस्य द्रव्यान्तरसङ्ग्रहाभावादेव सिद्धेः। सांसिद्धिकद्रवत्वस्याग्निसंयोगाज्जायमानत्वेन बाधितत्वात्। अबिन्धनतेजोवद् वैधर्म्योपपत्तिः। तैजसत्त्वे आगमसत्त्वादिति।

नन्वभास्वररूपत्वान्न तैजसमित्यपि स्यात्। न स्यात्, असिद्धेः। न हि मध्याह्ने प्रदीपो बहिर्भास्वरो नोपलभ्यत इति न भास्वरः। उपष्टम्भकद्रव्यरूपाभिभवेनैवानुपलम्भोपपत्तेः। अथ नयनरश्मिवदनुद्भवेनैवानुपलम्भः किं न स्यात्, न स्यात्, तद्वत्सुवर्णादिद्रव्यस्याप्यनुपलम्भप्रसङ्गात्। नह्यनुद्भूतरूपं द्रव्यमुपलभ्यते। ग्रीष्मोष्मणोऽपि निशि दर्शनप्रसङ्गात्। अभिभवेऽपि मध्यन्दिनोल्काप्रकाशानुपलम्भवदनुपलम्भप्रसङ्गस्तुल्य इति चेत्; न; नहि रूपस्याभिभवेन द्रव्यं नोपलभ्यते। महारजनरूपाभिभूते धवलिम्नि पटानुपलम्भप्रसङ्गात्। तस्मादभिभूतत्वाद्रूप[4]मेव तस्य न दृश्यते। स तु माषराशिप्रत्रीष्टमशीवन्महाप्रकाशसमाहारान्नेक्ष्यत इति सर्वमवदातम्। कथं तर्हि सुवर्णादौ रसाद्युपलब्धिरित्यत आह—तत्रेति॥

(४८) वायुत्वाभिसम्बन्धाद् वायुः। स्प[5]र्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व[6]संस्कारवान्॥

---

1 द्रवत्वोत्पत्तिः–जे। 2 किं च कि. क। 3 →← एतच्चिह्नान्तर्गतः पाठः जे पुस्तके नास्ति। 4 मेव न दृश्यते कि। 5 तस्य गुणाः स्पर्श–जे। 6 संस्कारस्तद्वान्–जे।

[1]प्रतिनियतेन्द्रियग्राह्यगुणाश्रयतया पृथिव्यादीनां सुप्रसिद्धत्वाद् गन्धादिह्रासक्रमेण च व्याख्यानात् तेजोऽनन्तरं वायुलक्षणमाह—**वायुत्वाभिस[2]म्बन्धा**दिति । लक्षणार्थः पूर्ववत् । तस्य द्रव्यत्वसिद्ध्यर्थं गुणानाह—**स्पर्शे**ति ।

(४९) **स्पर्शोऽस्याऽनुष्णाशीतत्वे सत्यपाकजः, गुणविनिवेशात् सि[3]द्धः । अरूपिष्वाचाक्षुवचनात् सप्त सङ्ख्यादयः । तृणकर्मवचनात् संस्कारः ॥**

एवं गुणवत्तया द्रव्यत्वे सिद्धे वायुत्वव्य[4]वस्थाहेतुविशेषमाह—**स्पर्शोऽस्ये**ति । अस्य वायोरनुष्णः स्पर्श इति तेजोव्यावृत्तिः, अशीत इति अद्भ्यः, अपाकज इति पृथिव्याः । अ[5]त्राऽनुष्णाशीतत्वमस्य प्रत्यक्षसिद्धम् । अपाकजत्वं त्वपार्थिवस्पर्शत्वात्तोयस्पर्शवत् । पाकजत्वं हि विशेषान्तरव्याप्तमुपलब्धम् । अन्यथा सर्वगुणानां पाकजत्वप्रसङ्गात् । तदितो व्यावर्तमानं स्वव्याप्यमुपादाय तद्विरहिणि पार्थिवे विश्राम्यतीति प्रतिबन्धसिद्धिः । सोऽस्ति वायावित्यत्र प्रमाणं सूचयति—**गुणविनिवेशे**ति । तथा च सूत्रम्—‘[6]वायुः स्पर्शवान्’ (वै. सू. २-१-४) इति सङ्ख्यादिषु सूत्रकारसम्मतिमाह—**अरूपिष्वि**ति । रूपरहितेषु वर्तमानानामेषामचाक्षुषत्वं वदता सूत्रकारेण रूपरहिते वायौ सद्भावः स्वीकृतः । प्रमाणं तु सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागवत्तायां वायोर्द्रव्या[7]रम्भकत्वम्; सङ्ख्यापरिमाणपृथक्त्व-संयोगैर्विना द्रव्यारम्भानुपपत्तेः । विभागेन विना संयोगविनाशानुपपत्तौ आरब्ध-द्रव्यस्य विनाशानुपपत्तेः । परत्वापरत्वाभ्यां विना [8]संयुक्तसंयोगल्पीयस्त्वभूयस्त्वासम्भवे मूर्तत्वानुपपत्तेरिति । संस्कारे सू[9]त्रकारानुमतिमाह—**तृणे**ति । ‘तृणे कर्म वायुसंयोगात्’ (वै. सू. ५-१-१४) इति वचनादित्यर्थः । तथा च प्रयोगः ‘एतद्द्रवद्द्रव्याभिघात-मन्तरेण तृणे स्पर्शवद्वेगवद्द्रव्याभिघातजम्, विशिष्टकर्मत्वात्; नदीपुराभिहतकाशादिवन-[10]कर्मवद्’ इति । तदेतत् कम्पलिङ्ग इत्यत्र स्फुटीभविष्यति । एतेन ‘अरूपस्पर्शवान् वायुः’ इति लक्षणमूहेत् । तथा च सति ‘अशीतानुष्णापाकजस्पर्शवान् वायुः’ इति सिद्ध्यति ।

(५०) **स चाऽयं द्विविधोऽणुकार्यभावात् ।**

---

1 प्रतिनियतेन्द्रियग्राह्य–पा. १. पु । 2 सम्बन्धाद्वायुः–जे । 3 सिद्धयेः–कि; जे । 4 व्यवस्थाविशेषमाह–कि; जे । 5 तत्रा°–पा. ३. पु । 6 ‘स्पर्शवान् वायुः’ इति सूत्रे पाठः । 7 द्रव्यत्वमेव–पा. १. पु । 8 विना संयोगाष्मीयस्त्वम्–मु. कि; क । 9 सूत्रकारसम्मति–पा. ३. पु : 10 कम्पवदिति–कि; क ।

सोऽयं यद्यनित्य एव, अवयवानवस्था स्यात्। कस्यचिन्नाशेऽनाश्रयं च कार्यमापद्येत। अथ नित्य एव तर्हि नि[1]ष्प्रामाणिकः स्यात्, परमाणुस्पर्शस्यातीन्द्रियत्वात्। स्थूलानां शब्दधृतिकम्पानां च परमसूक्ष्मद्रव्याभिघाताद्यहेतुकत्वादित्यत आह— **स चायमिति**। द्विविधो नित्यश्चानित्यश्चेति। यथासङ्ख्यमणुकार्यभावादिति।

(५१) **तत्र कार्यलक्षणश्चतुर्विधः--शरीरमिन्द्रियं विषयः प्राण इति ॥**

तत्र तयोरणुकार्ययोर्मध्ये कार्यलक्षणश्चतुर्विधः। चतस्रो विधामाह— **शरीरमिति**।

(५२) **तत्रायोनिजमेव शरीरं मरुतां लोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम् ॥**

तत्र तेषु मध्ये शरीरमयोनिजमेव न तु पार्थिववद्योनिजमपि। वायोर्द्रव्यारम्भकत्वेन तेजोवच्छरीराम्भकत्वे स्थिते क्व तदित्यपेक्षायामाह— **मरुतां लोक** इति। ननु तस्य ताल्वाद्यभावे वाग्व्यापाराभावात्, करचरणाद्यभावे [2]चाहारविहरणाद्यभावात्, संस्थानविशेषाभावे चेन्द्रियाश्रयत्वानुपपत्तिः, कथं [3]भोगायतनमित्यत आह— पार्थिवेति। उपलक्षणं चैतद्, भूतान्तरानुग्रहस्यापि सम्भवात्।

(५३) **इन्द्रियं सर्वप्राणिनां स्पर्शोपलम्भकं पृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धं [4]शरीरव्यापि त्वगिन्द्रियम् ॥**

इन्द्रियमिति— रूपादिषु मध्ये स्पर्शस्यैवोपलम्भकं यदिन्द्रियं तद्वायवीयम्। **सर्वप्राणिना**मिति— पूर्ववदत्रापि स्पर्शोपलब्ध्या करणमात्रे सिद्धे, संयोगाश्रयतया च द्रव्यत्वे, रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वाद्वायवीयत्वम्। अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवद् इत्यूहनीयम्। कस्यचिदेव वायोरिन्द्रियारम्भकत्वं न सर्वस्येति नियमे हेतुमाह— **पृथिव्यादी**ति। अत एव कु[5]ष्ठाद्युपहतायां त्वचि न स्पर्शोपलम्भ इत्यभिसन्धिः। तस्याधिष्ठानमाह— **सर्वशरीरव्यापी**ति। सर्वशरीरव्याप्तस्य स्पर्शोपलम्भादि[6]त्यवधातव्यम्। तदवसानं शरीरं नखलोमकेशदशनानां संयोगिद्रव्यमात्रत्वं [7]त्वगिन्द्रियानाश्रयत्वादित्यभिप्रायः। लोक[8]प्रसिद्धां तस्य सञ्ज्ञामाह— **त्वगिति**। ननु वृद्धिक्षय-

---

1 निष्प्रमाणकः–जे। 2 चाहरण–पा. ३. पु.। 3 भोगायतनत्व–पा, ३. पु। 4 सर्वव्यापि–दे। 5 कुष्ठापहतायां–कि; क। कुष्ठापहतायां–पा. ३. पु। 6 त्यवदातव्यम् –पा. ३. पु। 7 अतीन्द्रियानाश्रयत्वाद्–जे; संयोगित्वमात्रमिन्द्रियानाश्रयत्वाद्–पा. ३. पु। 8 लोकप्रसिद्धां सञ्ज्ञामाह–कि, क।

वद्देह[1]सहजावरणमात्रं त्वगित्युच्यते । तच्च पार्थिवं प्रत्यक्षसिद्धं नेन्द्रियं न च वायवीयमित्यत आह—**इन्द्रियमिति** । न त्वगेव मुख्यतो वायवीयमिन्द्रियं त्वगित्युच्यते किन्तु लक्षणया तत्रस्थमिन्द्रियं त्वगिति व्यवह्रियते लौकैरित्यर्थः ।

(५४) विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः स्पर्शशब्दधृतिकम्पलिङ्गस्तिर्यग्गमनस्वभावो मेघादिप्रेरणधारणादिसमर्थः ॥

विषयस्त्विति—'तु'शब्देनो[2]पलभ्यमानात् पृथिव्यादित्रयाद् व्यावर्तयति । उ[3]पलभ्यमानस्य स्पर्शस्याधिष्ठानभूतो न तूपलभ्यते इत्यर्थः । नन्वनुपपन्नमेतत्, स्पार्शनप्रत्यक्षत्वाद् वायोः त्वगिन्द्रियव्यापारानन्तरं वायुर्वातीति प्रतीतेः । न च स्पर्शमात्रमेव तत्र प्रतीयते वायुस्त्वनुमीयत इति युक्तम्; शीतो वायुरुष्णो वायुरिति तदीयस्पर्शाभिभवेऽपि वायुप्रत्ययात् । न च शीतोष्णद्रव्योपनायकत्वेनानुमितस्य पवनस्य तथा प्रतीतिरिति युक्तम्; बाधकाभावात् । [4]अस्त्यचाक्षुषत्वं बाधकम्, द्रव्यस्य हि स्पार्शनत्वं चाक्षुषत्वेन व्याप्तम् । तदितो व्यावर्तमानम् स्पार्शनत्वमपि व्यावर्तयतीति चेत्; न; विपक्षे बाधकाभावात् । न हि चक्षुरूपाभ्यां त्वचः स्पर्शस्य च किञ्चिदुपकर्तव्यम्, येन मिथोऽपेक्षा स्यात् । तथात्वे वा जात्यन्धेन घटादयोऽपि त्वचा नोपलभ्येरन् । रू[5]पाभावेन द्रव्यवत् स्पर्शोऽपि वा नोपलभ्येत । 'उष्णं जलम्' शीतलं शिलातलमित्यत उष्णशीतस्पर्शाधिष्ठानयोस्तेजः पयसोश्चक्षुषानुपलम्भेऽपि स्पर्शस्योपलब्धेः । द्रव्यस्य चक्षुषाऽनुपलभ्यमानस्य स्पर्शनेन क्वचिदनुपलम्भान्नैवमिति चेत्; न; अपार्थिवे स[6]र्वत्र तर्हि त्वचा स्प[7]र्शमात्रोपलब्धिरस्तु, द्रव्योपलब्धिस्तु चक्षुषैव क्वचिदनुमानेन वा भविष्यति । वायुवत् प्रत्यभिज्ञानमपि तद्वदेवोपपत्स्यते । अथ भ्रान्तौ यथा तथाऽस्तु; प्रमाणचिन्तायां तु 'उपलभ्यमानः स्पर्शः आश्रयसहित एवोपलभ्यते; अनुभवस्य दुरपह्नवत्त्वात् । अतस्तोयतेजसोः त्वचोपलम्भ इष्यते; गुणयोग्यतामाश्रित्य त्वक्चक्षुषोर्द्रव्यावगाहनादिति ; यदि वायावपि समानमेतत् । तथा च प्रयोगः; वायुः प्रत्यक्षः, उपलभ्यमानस्पर्शाधिष्ठानत्वाद् घटवदिति ।

अत्रोच्यते । द्रव्यग्रहणयोग्यतान्तर्भूतयोग्यताकानि खलु सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानि कर्माणि एव ह्यमीषां द्वीन्द्रियग्राह्यता [8]निर्वहति । तद्यदि त्वचा

---

1 द्रव्य–जे । 2 उपलभ्यत्वात्–कि; जे । 3 उपलभ्यमानस्पर्शाधिष्ठानभूतो–कि. क । 4 अस्ति चाक्षुषत्वं–जे । 5 रूपापायेन–पा. ३. पु. । 6 सर्वत्रत्वचा–कि. क । 7 स्पर्शोपलब्धिरस्तु– कि; जे. । 8 भवति–कि; जे ।

वायुरुपलभ्येत, सङ्ख्यादयोऽप्युपलभ्येरन्। न चैतद् द्रव्यमपि नोपलभ्येत, तुल्योपलम्भनयोग्यत्वात्। न च त्वचा वायोरेकत्वादिका सङ्ख्या वा, हस्तस्तवितस्त्यादि परिमाणं वा, पृथिव्यादिभ्यः सजातीयतो वा, पृथक्त्वं संयोगविभागौ वा, परत्वापरत्वे च कर्म चोपलभ्यते। न तुल्योपलम्भनयोग्यतैवासिद्धा, दूरात् सङ्ख्यादीनामनुपलम्भेऽपि शा[1]लताल-तमालादीनामुपलम्भादिति चेत्; न; दूरादिदोषेण सङ्ख्यादयो मोपल[2]म्भिषत, तथापि योग्यताया अनिवृत्तेर्दोषनिवृत्तावु[3]पलम्भात्। तस्माद् द्रव्योपलम्भसहचरोपलम्भयोग्य[4]ताकानां सङ्ख्यादीनामनुपलम्भादवगच्छामो न स्पार्शनः पवन इति। तदेतत्तस्याप्रत्यक्षस्यापि नानात्वं संमूर्च्छनेनानुमीयत इत्यत्र स्फुटीभविष्यति। अत एवानुपलभ्यमानसङ्ख्यादिके तोयतेजसी अपि त्वचा नोपलभ्येते इति विनिश्चयः। तथा चोपलभ्यमानस्पर्शाधिष्ठानत्वमप्यनैकान्तिकमिति सिद्धम्।

कुतस्तर्हि प्रत्येतव्य इत्यत आह — **स्पर्शेति**। स्पर्शः, शब्दो, धृतिः, कम्पश्च लिङ्गानि यस्य स तथोक्तः। तथाहि योऽयं रूपवद्द्रव्यासमवेतः स्पर्शः, स क्वचिदाश्रितः, स्पर्शत्वात्, पृथिवीस्पर्शवत्। न चाऽयं ज[5]लानलयोः, अनुष्णाशीतत्वात्। न च पार्थिवः, रूपेणासमानाधिकरणत्वात्। यस्तु पार्थिवो नासावेवं यथा घटादिस्पर्शः। न च रूपेणासमानाधिकरणत्वमसिद्धम्, योग्यानुपलब्धेः। न चायोग्यरूपमिह भविष्यतीति [6]वाच्यम्; अभिभावकरूपान्तरस्यानुपलब्धेरभिभवानुपपत्तेः। पाकजत्वेन पार्थिवरूपस्पर्शयोः तुल्ययोगक्षेमत्वेन स्पर्शस्योद्भवे रूपस्यानुद्भवायोगात्। अन्यथा पृथिव्यां रूपोद्भवेऽपि स्पर्शानुद्भवप्रसङ्गात्। किञ्च अनुपलभ्यमानरूपस्य स्पर्शाधिष्ठानस्य पृथिवीत्वे गुरुत्वमपि स्यात्। न च पवनापूरितस्य चर्मपुटकादेरपूरणदशातोधिकमवनमनमुन्नीयमानस्य धूमापूरितेनेदमनैकान्तिकमिति चेत्; न; अलं धूमदशायां तत्रापि गरिमविशेषहेतोरवनतिविशेषस्य प्रतीतेः। तस्माद्विवादाध्यासितं द्रव्यं न पृथिवी, रूपरहितत्वात्, आकाशवत्; गुरुत्वरहितत्वात् तेजोवद्; इति स्थिते[7] स्पर्शाश्रयतया चतुर्थं द्रव्यं सिद्ध्यति [8]इति। एव[9]मसति रूपवद्द्रव्याभिघाते योऽयं पर्णादिषु शब्दसन्तानः, स्पर्शवद्वेगवद्द्र[10]व्यसंयोगप्रभवः, अविभज्यमानावयवद्रव्यसम्बन्धित्वे सति शब्दसन्तानत्वात्, दण्डाभिहतभेरीशब्दसन्तानवदिति।

---

1 चलत् शाल°–क। 2 नोप–कि; जे। 3 वुपलभ्यते–पा. ३. पु। 4 योग्यतानां–जे। 5 जलाद्याश्रयः–कि; जे। 6 युक्तम्–कि; जे। 7 सिद्धे–पा. ३. पु। 8 इति–कि; पुस्तके नास्ति। 9 मसति द्रव्याभिघाते–क। 10 द्रव्याभिघातजः–पा. ३. पु; वेगवत्संयोगजन्यः–क।

एवं गुरुणोद्रव्यस्यायतनं धृतिः। ततोऽप्यनुमीयते वायुः। तथा च[1] प्रयोगः—'नभसि तृणतूलास्तनयित्नुविमानादीनां धृतिः स्पर्शवद्द्रव्यसंयोगहेतुका, अस्मदाद्यनधिष्ठित-द्रव्यधृतित्वात्, नौकादिधृतिवत्। कम्पस्य लिङ्गत्वमुक्तम्। [1a]एवं चतुर्णामपि कार्यत्वान्निस्तरङ्गः प्रतिबन्धः।

तिर्यग्गमनस्वभावकः—तिर्यग्गमनं स्वभावो यस्य स तथोक्तः। अदृष्ट-वदात्मसंयोगनिबन्धनमस्य तिर्यग्गमनम्। तेन कः पुरुषार्थ इत्यत आह—**मेघादीति**। आदिग्रहणाद्वैहायसानां विमानादीनां भौमादीनां च यानपात्रपांसुपटलादीनां जलानलयोश्च परिग्रहः। धारणादीत्यादिशब्दात् स्पर्शाभिव्य[2]क्तिदीपनिर्वापणादि परिग्रहः, तेषु समर्थः।

(५९) **तस्याप्रत्यक्षस्यापि नानात्वं सम्मूर्च्छनेनानुमीयते। सम्मूर्च्छनं पुनः [3]समानजवयोर्वाय्वोर्विरुद्धदिक्क्रिययोः सन्निपातः। सोऽपि [4]सावयविनोर्वाय्वोरूर्ध्वगमनेनानुमीयते; तदपि तृणादिगमनेन॥**

तस्याप्रत्यक्षस्यापीति—यद्यपि परमाणुगुणानामतीन्द्रियत्वात् स्पर्शस्य प्रत्यक्षसिद्धत्वादर्थादवयविवृत्तित्वे सिद्धे, अवयविनश्च स्थूलस्य द्व्य[5]णुकादिक्रमेणारम्भात् पवन-जातीयस्य नानात्वं धर्मिग्राहकप्रमाणादेव सिद्धम्। शक्यते च स्पर्शवत्तयाऽनुमातुम्। तथापि शिष्यव्युत्पादनाय [6]बोधाभासनिराकरणाय च नानात्वानुमानप्रपञ्चमाह—तस्येति।

अथ किमिदं स[7]म्मूर्च्छनं नामेत्यत आह—सम्मूर्छनमिति। समानजवयोस्तुल्य-वेगयोः, विरुद्धदिक्क्रिययोर्विरुद्धयोर्दिशोः क्रियेययोस्तौ विरुद्धदिक्क्रियौ, तयोः सन्निपातः, परस्परमेलनं संयोगविशेष इति यावत्। वाय्वोरिति तु प्रकृतित्वेन स्पर्शवतोरिति तु विवक्षितम्। नन्वतीन्द्रियस्य नानात्ववद् वेगसंयोगावप्यतीन्द्रियौ इत्यत आह—**सोऽपीति**। सन्निपातोऽपीत्यर्थः; ऊर्ध्वगमनेनानुमीयते।

नन्वतीन्द्रियस्य गमनमप्यतीन्द्रियं तत्कथं तेन सन्निपातोऽनुमीयत इत्यत आह—**अनुमितेनेति**। अथ केन लिङ्गेन तदनुमेयमित्यत आह तृणादिगमनेति। अत्राप्यूर्ध्वेत्य-

---

1 तथा हि—जे। 1a एतेषां—जे। 2 दीपनयोः परिग्रहः—पा. ३. पु; क। 3 समान-जवयोर्विरुद्धदिक्क्रिययोर्वाय्वोः—कि। 4 तृणादिगमनेनानुमितेन सावयविनोरूर्ध्वगमनेनानुमीयते—कि. दे; सावयविनोरूर्ध्वगमनेनानुमीयते तृणादीनां चोर्ध्वगमनेन—जे; सावयविनोरूर्ध्वगमनेनानुमीयते तदपि तृणा-दीनामूर्ध्वगमनेन व्यो. (२०६); तृणादिगमनेन—कं। 5 द्व्यणुकादिप्रक्रमेण—पा. ३. पु। 6 चोद्या-भास—पा. ३. पु; क। 7 मूर्च्छनमित्यत—पा. ३. पु।

नुषञ्जनीयम् । ते[1]नानेन तृणादीनामूर्ध्वगमनेन कार्येण प्रत्यक्षसिद्धेन कारणमूर्ध्वगमनं पवनस्यानुमेयम् । न चैतद् [2]द्व्यणुकादिरूपस्य त्रसरेणुरूपस्य वा वायोस्तृणादिन्यूर्ध्वं [3]नेतुं सामर्थ्यमित्यत आह—सावयविनोरिति । अवयवानामवयवित्वेन तृणादीप्रेरणौपयिकं महत्त्वमभिप्रैति ।

एवमियता प्रबन्धेन सङ्ख्यादीनां कर्मपर्यन्तानां वायावतीन्द्रियत्वमुक्तम् । तिर्यग्गमनस्वभावस्य कथमूर्ध्वगमनमित्यत्रोपपत्तिर्दर्शिता । तथा च वायुतोऽप्यधिकमूर्ध्वगमनशीलं द्रव्यान्तरमिति नाशङ्कनीयमिति सूचितम् । निम्नाभिसर्पणस्वभावानामप्यपां यथा द्रव्यान्तरसम्मूर्च्छनादूर्ध्वगमनं तथैव पवनस्याप्युर्ध्वगमनोपपत्तिरिति । अत्रैवं प्रयोगः '[4]प्रतिहन्याद् वायोः प्रतिहन्ता वायुरन्यः, तत्प्रतिहन्तृत्वात्; देवदत्ताद् यज्ञदत्तवत्' । अभेदे तु प्रतिघातानुपपत्तिः; संयोगस्य द्विनिष्ठत्वात् । प्रतिहन्यते चायं वायुः, 'तिर्यग्गमनस्वभावस्य प्रयत्नाद्यसम्भवे सति ऊर्ध्वगमनवत्त्वात्, परस्पराहतनदीपयःपुरवत्' । अन्यथा निमित्तान्तरासम्भवे कारणं विना कार्योत्पत्तिप्रसङ्गः । 'ऊर्ध्वगतिमानयम्, तृणादीनामूर्ध्वगमनासमवायिकारणसंयोगाश्रयत्वात्' 'तृणाद्यूर्ध्वगमनासमवायिकारणसंयोगाश्रयज्वलदनलवत्' । पूर्वक[१] एव तर्कः तृणादीनामूर्ध्वगमनम्, स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यम्, अनूर्ध्वगमनशीलस्य प्रयत्नासम्भवे सत्यूर्ध्वगमनत्वात्, 'ज्वलत्पावकप्रेरित [5]तूलाद्यूर्ध्वगमनवद् इति नानुपपत्तिरिति ।

(५६) प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदा[6]दपानादिसञ्ज्ञां लभते ॥

चतुर्थीं विधामाह—**प्राणोन्तः शरीर** इति । शरीराभ्यन्तरसञ्चारी वायुः [7]प्राण इत्युच्यत इत्यर्थः । तत्किमयं स्थानभेदादेव विषयादिभ्यो भिद्यत इत्यत आह—**रसे**ति । अशीतपीतस्याहारस्य सारो विकारो रसः । मलाः मूत्रपुरीषस्वेददूषिकादयः । धातवो रुधिरादयः शुक्रान्ताः । उपलक्षणं चैतत् । दोषौ च पित्तकफौ । उदर्यश्चाग्निस्तेषां प्रेरणमितस्ततो नयनम् । 'आदि'ग्रहणाद्धारणं विकारश्चैतेषां हेतुः । एतेन विषयाद[8]साधारणक्रियाभेदाद्भेदो दर्शितः । [9]मूर्तयोः समानदेशत्वविरोधभिया 'शरीराः पञ्च वायवः'

---

१ **पूर्वक** इति । कारणं विना कार्योत्पत्त्य इति सम्भव इत्यर्थः । कि. प्र. व. ।

---

1 तेन तृणादीनाम्—कि. । 2 द्व्यणुकरूपस्य वा वायो°—क; । 3 नेतुमुत्सहत इत्यत-आह—पा. ३. पु । 4 प्रतिघाताद्° कि; जे । 5 तृणा-°क । 6 दपानादिपञ्चसञ्ज्ञां—जे; प्राणापानादिपञ्चसञ्ज्ञां—कि । 7 प्राण इत्यर्थः—कि. । 8 °साधारणार्थक्रियाभेदो—क । 9 मूर्तत्वसमानदेशत्वयोः—जे ।

इत्यागमप्रसिद्धिमन्यथा समर्थयति—**एकः सन् क्रियाभेदाद्** इति। एक एव प्राणस्तेषां मलादीनां कार्यभेदात् पञ्च सञ्ज्ञाः लभते। न तु सञ्ज्ञाभेदात् सञ्ज्ञी भिद्यत इत्यर्थः। मुखनासिकाभ्यां निष्क्रमणप्रवेशनात् प्राणः। तेषामेव मलादीनामधोनयनादपानः। [1]समं नयनात् समानः। ऊर्ध्वं नयनादुदानः। नाडीमुखेषु वितननाद् व्यान इति।

(८७) **च[2]तुर्णां महाभूतानां सृष्टिसंहारविधिरुच्यते। ब्राह्मेण मानेन [3]वर्षशतान्ते वर्तमानस्य ब्रह्मणोऽपवर्गकाले [4]संसारे खिन्नानां [5]प्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य सञ्जिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मग[6]तानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छाऽऽ[7]त्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामा[8]परमाण्वन्तो विनाशः। तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मि[9]न्नुत्तरस्मिन् सति पू[10]र्वस्य पूर्वस्य विनाशः। ततः [11]प्रविभक्ताः परमाणवोऽवतिष्ठन्ते, धर्माधर्मसंस्कारानु[12]विधाश्चात्मानस्तावन्तमेव कालम्॥**

तेऽमी पृथिव्यादयः शरीरेन्द्रियविषयानारभमाणाः किम् अविच्छेदेन [13]आरभन्ते आहोस्विद्वि[14]च्छेदोऽप्यस्ति? यदापि विच्छेदेनारभन्ते तदापि किमत एव किं वाऽदृष्टमपेक्षन्ते? यदाप्यदृष्टमपेक्षन्ते तदापि किमनधिष्ठिताः किं वा केनाप्यधिष्ठिताः इति? कश्चात्र विशेषः? अविच्छेदे 'तद्वचना[15]दाम्नायस्य प्रामाण्यम्' (वै. सू. १-१-३) इति व्याकुप्येत; लोकसन्तत्यविच्छेदे वेदसम्प्रदायस्याप्यविच्छेदात्। विच्छेदे वा [16]आद्यव्यवहारे व्युत्पत्त्यनुपपत्तौ सर्वलोकव्यवहारविलोपप्रसङ्गः, मूलाभावात्। एत एवेति पक्षे वैचित्र्यानुपपत्तिः, तेषां साधारण्यात्। अदृष्टापेक्षायां [17]सर्वादृष्टवृत्तिनिरोधे कार्यानुत्पत्तिप्रसङ्गः,

1 समान्तान्नयनात्—पा. ३. पु। 2 इहेदानीं चतुर्णां—मु. भा। 3 वर्षशतस्यान्ते—कि। 4 संसार—कं; संसारेऽति—दे। 5 सर्वप्राणिनां—मु. भा। 6 गतादृष्टानां—दे। 7 ऽऽत्माणुसंयोगकर्मभ्यः—दे। 8 मापरमाणु तो—दे। 9 न्नुतरस्मिंश्च—कि. जे। 10 पूर्वपूर्वस्य—कि। 11 प्रविभक्ता एव—दे। 12 संस्कारानुविधा आत्मानः—कं। 13 'आरभन्ते' कि, जे पुस्तकयोर्नास्ति। 14 विच्छेदेनेति—पा. ३. पु। 15 आम्नायप्रामाण्यम्—पा. ३. पु। 16 आद्यव्यवहारानुपपत्तौ—पा. ३. पु। 17 सर्ववृत्तिनिरोधे—क।

अदृष्टानां प्रथमं वृत्तिलाभे कारणाभावात् । अनधिष्ठितानामेव प्रवृत्तावचैतन्यानुपपत्तिः प्रवृत्त्यनुपपत्तिर्वा, अचेतनप्रवृत्तेः पराधिष्ठानकार्यत्वनियमात् । अधिष्ठातृत्वं च नास्मदादीनाम्, उपादानाद्यनभिज्ञत्वात् । नेतरस्य, प्रयोजनाभावादिति समाकुलितान्तेवासिन समाश्वासयन्नाह—**चतुर्णा**मिति । सृष्टिसंहारयोः सर्गप्रलययो[1]र्विधिः प्रकारः । द्व्यणुकादिक्रमेण सृष्टिः, क्रियाविभागादिन्यायेनापरमाण्वन्तः प्रलय इति कथ्यते । सृष्टिसंहारयोरनिदं प्रथमतां प्रतिपादयितुं सृष्टिक्रममुपक्रम्य [2]संहारप्रक्रमेण प्रतिपादयति—**ब्राह्मेण माने**नेति ।

क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम् ।
[3]अष्टादश [4]निमेषास्तु काष्ठास्त्रिंशत्तु ताः कलाः ॥
त्रिंशत्कलो मुहूर्त्तः स्यात् त्रिंशद् रात्र्यहनी च ते ।
अहोरात्राः पञ्चदश, पक्षो मासस्तु तावुभौ ॥
ऋतुर्मासद्वयं प्रोक्तमयनं तु ऋतुत्रयम् ।
अयनद्वितीयं वर्षो मानुषोऽयमुदाहृतः ॥
एष दैवस्त्वहोरात्रस्तैः पक्षादि च पूर्ववत् ।
देववर्षसहस्राणि द्वादशैव चतुर्युगम् ॥
चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते ।
रात्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना ॥

तथा च वर्षशतान्ते वर्तमानस्य ब्रह्मणोऽपवर्गकाले मोक्षकाले ये ह्यसङ्कल्पितफलकर्मकर्तारः साकारोपास[5]नापरिवासितचेतसो यतयोऽतस्ते हिरण्यगर्भपदवीमनुप्राप्यापवृज्यन्त इत्यागमात् । यदा त्वीश्वर एव कार्यवशाद् गृहीतदिव्यदेहो ब्रह्माद्यवस्थामापद्यत इति पक्षः, तदा ब्रह्मणोऽपवर्गकाले दे[6]हावसर्जनकाले इति व्याख्येयम्; तस्यात्यन्तदुःखाभाववतो नित्यमुक्तत्वादिति ।

संसारे जन्ममरणप्रबन्धान्धकारे खिन्नानां नानाविधैर्दुःखैर्निःसहीभूतानां निशीव निशि प्रलये विश्रामार्था कियत्कालं दुःखोपशमार्थं सकलभुवनपतेः कालाग्निरुद्रादिपरमेश्वरपर्यन्तानां भुवनानां पत्युः स्वामिनो यथेष्टं विनियोक्तुरिति यावत् । अत एव [7]महेश्वरस्य । अन्ये हीश्वरा जगदेकदेशपतय इन्द्रवरुणयमादयः । स पुनः कृत्स्नस्यैव जगतः । अतो

---

1 विधः–जे । 2 संहारक्रमं व्युत्पादयति–पा. ३. पु । 3 पञ्चदश–जे । 4 निमेषाः स्युः–जे । 5 पासनावासित°–'क' । 6 देहापवर्गकाले–कि. क । 7 महेश्वरः–कि. क ।

महानीश्वरः, तस्य सञ्जिहीर्षासमकालं संहरणेच्छासमनन्तरकालम् । यद्यपि भगवत इच्छा 'अस्ति' इत्येवमाकारा एकैव, तथाप्युपाधिभेदात् सञ्जिहीर्षा चि[1]कीर्षेत्यादिरुच्यते । उत्पत्तिरपि तस्या उपाध्युत्पत्तिरेव । स च कालविशेषो वर्षशतान्तादिशब्दवाच्यः ।

शरीरेन्द्रियमहाभूतोपनिबन्धकानाम्—उत्पत्तिस्थितिहेतूनाम् । परमाणुभ्योऽधिकपरिमाणतयोपचाराद् द्व्यणुकमपि महाभूतमुक्तम् । **सर्वात्मगतानामदृष्टानाम्**—सर्वेष्वात्मसु समवेतानामदृष्टानाम् । सर्गहेतूनामिति शेषः । **वृत्तिनिरोधे सति**—प्रलयहेतुनाऽदृष्टेन प्रतिबन्धे सति । **महेश्वरेच्छात्माणुसंयोगजकर्मभ्य** इति—महेश्वरेच्छया सहिता ये आत्माणुसंयोगाः—आत्मपरमाणुसंयोगास्तेभ्यो जातानि यानि कर्माणि तेभ्यः । शरीरेन्द्रियकारणाणुविभागास्तेभ्यस्तत्संयोगनिवृत्तौ शरीरेन्द्रियमूलपरमाणुसंयोगनिवृत्तौ तेषां शरीरेन्द्रियाणामापरमाण्वन्तो विनाशः । यद्यपि परमाण्वन्त इति वक्तुमुचितं तथाप्यन्तशब्दस्यावयववचनत्वभ्रमनिरासेन परमाणूनामवधित्वमाविष्कर्तुमापरमाण्वन्त इत्युक्तम् । तेनैतदुक्तं भवति; तावदयं विनाशो यावत्परमाणवोऽवसानमिति; न तु यथा दशान्तः पट इति । तथा तेनैव प्रकारेण महेश्वरेच्छादिना पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेण क्रियाविभागादिनोत्तरस्मिन् सति पूर्वस्य पूर्वस्य विनाशः । जलादौ सति पार्थिवस्य महाभूतस्य, ज्वलनादौ सति [2]जलादेः । अयं च क्रमविशेषनिश्चय आगमादनुसर्तव्यः ।

एवमापरमाण्वन्तो विनाश इति वचनादेव परमाणूनामेवावस्थाने प्रतिपादिते साङ्ख्यादिमतनिराकरणाय पुनस्तदवस्थानमाह—**तत** इति । तदेत्यर्थः । प्रविभक्ताः कार्यद्रव्यरहिताः प्रचयाख्यसंयोगरहिताश्चेत्यर्थः । तत्किमेत एवावतिष्ठन्ते ? न इत्युच्यते । किं तर्हि ? धर्मश्चाधर्मश्च संस्कारश्च भावनाख्यः, तैरनुविद्धाः सम्बद्धाश्चात्मानः । उपलक्षणं चैतत्, अन्योऽपि नित्यवर्गः । अनित्येष्वपि पाकजा रूपादयो गुणाः कालावच्छेदोपाधितया वर्तमानानि च महाभूतसंक्षोभप्रभववेगजानि च कर्माणि सन्तन्यमानान्यवतिष्ठन्ते । अन्यथा कालावच्छेदानुपपत्तौ पुनः सर्गानुपपत्तेः तदिदमुक्तं '**तावन्तमेव कालम्**' इति । ब्राह्मेण मानेन वर्षशतान्तं यावदित्यर्थः ।

(५८) **ततः पुनः प्राणिनां भोगभूतये [3]महेश्वरस्य सिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः**

1 चिकीर्षेत्युच्यते–कि । 2 जलस्येत्यादि–'क' । 3 महेश्वरसिसृक्षा–कं ।

पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति। तदनन्तरं [1]तस्मिन्नेव वायावाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेव [2]जलनिधौ पार्थिवेभ्यः परमाणुभ्यो महापृथिवी [3]समुत्पन्ना संहताऽवतिष्ठते। [4]तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्यो [5]णुभ्यो द्व्यणुकादिप्रक्रमेणोत्पन्नो महाँस्ते[6]जोराशिर्देदीप्यमानस्तिष्ठति॥

एवं संहारक्रमं प्रतिपाद्य सृष्टिक्रमं प्रतिपादयन्नाह—**ततः** तदनन्तरम्, **पुन**रिति अभ्यासमाह। तेन सर्गप्रलययोरनादित्वमभिव्यनक्ति। अथ किमर्थं पुनर्भगवान् [7]स्रक्ष्यतीत्यत आह—**प्राणिनां भोगभूतय** इति। प्राणिनां प्राणसम्बन्धयोग्यानां संसारिणामिति यावत्। भोगस्य [8]स्वसमवेतसुखदुःखानुभवस्य भूतये निष्पत्तये; महेश्वरस्य सिसृक्षायाः सर्जनेच्छाया अनन्तरं सर्वेष्वात्मसु संसारिषु गताः समवेताश्च ते वृत्तिलब्धाः लब्धवृत्तयश्च ये अदृष्टविशेषाः; तदपेक्षेभ्यस्तत् संयोगेभ्य आत्माणुसंयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ सत्याम्, तेषां परमाणूनां परस्परसंयोगेभ्यो द्व्यणुकमादिर्यस्य प्रक्रमस्य तेन महान् वायुः समुत्पन्नो नभस्याकाशे दोधूयमानो भृशं कम्पमानः, द्रव्यान्तरानुत्पत्तेरप्रतिहतवेगत्वात् पवनजातिनियतत्वाच्च तिर्यग्गमनस्वभावत्वमस्य।

तदनन्तरं पवनोत्पत्तेरनन्तरं तस्मिन्नेव पवने स्पर्शवद्वेगवत्तया गुरुत्वप्रतिबन्धकत्वादाधारभूत इत्यर्थः। आप्येभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिक्रमेण महान् सलिलनिधिरुत्पन्नो भृशं प्लवमानस्तिष्ठति पवनवेगात्। तदनन्तरं सलिलनिधेरुत्पत्तेरनन्तरं तस्मिन्नेव

---

१ पूर्वप्रयोगानुरोधेनाह—**लब्धवृत्तय** इति। भाष्यं त्वार्षमिति भावः। कि. भा. प।

---

1 तस्मिन्नेवाप्येभ्यः–कं. दे; तस्मिन् पार्थिवेभ्योऽणुभ्यः—जे। 2 जलधौ–कं; महोदधौ–कि. टी; तस्मिन्सलिलनिधौ व्यो (३००)। 3 महापृथिवी संहतां–कं। 4 ततः–जे। 5 परमाणुभ्यो–व्यो. (३००)। 6 'तेजोराशिः नचिदभिभूतत्वात्' इति. मु. कन्दल्यां दृश्यते, अयमेव पाठः भाष्ये प्रमादेनागतो भाति। कन्दलीकारेण तु 'देदीप्यमान' इत्यस्य स्पष्टीकरणार्थं व्याख्यानं कृतम्। पाठोऽयमन्यासु टीकासु क्वचिदपि भाष्यप्रतीकरूपेण नोपात्तः। 7 सृजतीत्यत आह—पा. ३. पु। 8 स्वसमवेतस्य साक्षात् सुखःदुःखानुभवस्य निष्पत्तये–पा. ३. पु।

महोदधौ पार्थिवेभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिक्रमेण महापृथिवी—महती प्राथम्यात् सम्पूर्णतया संहता निबिडावयवा अविशीर्णतया। तदनन्तरं पृथिव्युत्पत्तेरनन्तरं तेजःपरमाणुभ्यः → [1]तेनैव द्व्यणुकादिक्रमेण महांस्तेजोराशिः समुत्पन्नस्तिष्ठति ← अनभिभवादतिशयेन देदीप्यमानः।

(५२) **एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् तैजसेभ्योऽ[2]णुभ्यः पार्थिवपरमाणुसहितेभ्यो महद[3]ण्डमारभ्यते। तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं [4]सकलभुवनसहितमुत्पाद्य प्रजासर्गे वि[5]नियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्माऽतिशयज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् मुखबाहूरुपादतश्चतुरो वर्णान्, [6]अन्यानि चोच्चावचानि [7]भूतानि सृष्ट्वा आशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः [8]संयोजयति इति ॥**

एवमनेन क्रमेणाभिध्यानं सङ्कल्पस्तन्मात्रात्। न तु कुलालादिव[9]त्कायव्यापारादित्यर्थः। तैजसानां परमाणूनां पार्थिवाणुसाहित्येनाण्डस्य हिरण्मयत्वं विवक्षितम्। तस्मिन्नण्डे चत्वारि वदनानि कमलानीव यस्य, तं सर्वेषां लोकानां पितामहं शरीरिणामाद्यं ब्रह्माणं सकलभुवनसहितं सकलैरधस्तनैर्भूतलादिभिरुपरितनैर्भूर्भुवादिलोकैः सहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते 'त्वमेव कुरु' इति।

स चेति—'च'शब्दः समुच्चये, द्विकर्तृकेषु कार्येषु महेश्वरस्यापि कर्तृत्वात्। न च महेश्वरे कर्तरि किं ब्रह्मणेति वाच्यम्, शरीरान्वयव्यतिरेकानुविधायिकार्येण तस्याकृष्यमाणत्वात्। अतिशयेनज्ञानवैराग्यैश्वर्यैः सम्पन्नः। यद्यज्ञः स्यात् समर्थोऽपि न कुर्यात्। यदि विरा[10]गी न भवेत्, न कर्माण्यनुरुन्ध्यात्। तथा च प्राणिनां कृतहानमकृताभ्यागमश्च स्यात्। यद्यनीश्वरो भवेत् जानतोऽप्यस्यापेक्षितं न सिद्ध्येत्। यतस्तु त्रितयसम्पन्नः, अतः प्राणिनां यानि कर्माणि तेषां विविधं पाकं विदित्वा। '**सुतान्**'

---

1 → ← एतच्चिह्नान्तर्गतः पाठः जे पुस्तके नास्ति। 2 परमाणुभ्यो—भ्यो. (३००)। 3 मुत्पद्यते—कि। 4 सर्व—दे। 5 नियुङ्क्ते—दे। 6 अन्यान्यप्योच्चा°—दे। 7 भूतानि—कं। 8 संयोजयति—जे। 9 कार्य—पा. ३. पु। 10 विरागवान्—पा. ३. पु; रागवान्—जे।

इति प्रत्येकमभिसम्बद्धयते '**मानसान्**' इति चायोनिजान्। **प्रजापतीन्**—दक्षादीन्, मनून् स्वायम्भुवप्रभृतीन्। देवान् आदित्यादीन् ऋषीन् गोतमभरद्वाजादीन्। पितृन् क[1]व्यबालादीन्। गणान् कूष्माण्डादीन्; 'गण' शब्दः प्रत्येकं वाऽभिसम्बद्धयते। अत्र प्रजापतयस्तत्तत् प्रतिनियतप्रजास्रष्टारः। मनवो राजधर्मप्रवर्तयितारः। देवा हविर्भोक्तारः। ऋषयः प्रथमं वेदाध्येतारः। पितरः स्व[2]धाभागाधिकारिणः। गणा बलिभागिनः।

मुखेति—मुखाद् ब्राह्मणम्, बाहुभ्यां राजन्यम्, ऊरुभ्यां वैश्यम्, पद्भ्यां शूद्रम्। अन्यान्यपि तिर्यङ्नारकिप्रभृतीनि। **उच्चावचानि**—उत्कृष्टापकृष्टानीति। **आशयानुरूपैरिति**—फलज्ञाननपर्यन्तमाशेरत इत्याशयाः कर्म ज्ञानवासनाः, तदनुरूपैस्तत्सदृशैर्धर्मज्ञानवैराग्यैश्वर्यैरित्युपलक्षणम्। अधर्माज्ञानावैराग्यानैश्वर्यैस्तत्फलैश्च सुखादिभिः सम्यग्योजयति। यदा त्वीश्वर एव कार्यवशाद् ब्रह्मादिशरीमुपादत्तं इति पक्षस्तदा नियोगः कायवाङ्मनोव्यापारसिद्धये तत्प्रेरणं प्रयत्नवदात्मसंयोगलक्षणम्। मुखेत्यादिना ब्राह्मणत्वाद्यभिव्यञ्जकव्यक्तिविशेषनिमित्ततदृष्टोपनिबद्धभूतभेदप्रतिपादनम्। तदेवमियता प्रबन्धेन प्रलयविच्छिन्नादृष्टापेक्षैः परार्थप्रवृत्तेन परमेश्वरेणाधिष्ठितैः पृथिव्यादिभिर्विश्वमारभ्यत इति वदता सर्वे पूर्वाक्षेपाः परिहृता बोद्धव्याः। तथाहि विच्छेदे तद्वचनादाम्नायस्य प्रामाण्यमप्रत्यूहमूहेत। मानसमन्वादिसृष्ट्या चाद्यव्यवहारमुपपादयेत्। अदृष्टापेक्षया वैचित्र्यं समर्थयेत्। परार्थप्रवृत्त्या च [3]निष्प्रयोजनशङ्कामुत्सारयेत्। परमेश्वराधिष्ठानेनाचैतन्यप्रवृत्तिचैतन्यप्रवृत्तिनियमौ च [4]समञ्जसयेदिति।

स्यादेतत् सर्वमेतदीश्वरसद्भावसिद्धौ सम्भवेत्; तत्सिद्धावेव किं प्रमाणम्? इति चेत्; तद् बहुत्वेऽपि किञ्चिद् उच्यते। 'शरीरानपेक्षोत्पत्तिकम्, बुद्धिमत्पूर्वकम्, कारणवत्त्वात्; यत्कारणवत् तद्बुद्धिमत्पूर्वकम्, यथा रथः। तथा चैतत्, त[5]स्मात्तद् बुद्धिमत्पूर्वकमिति। नन्वनुपलब्धपूर्वकोटिकेषु पर्वतादिषु कारणवत्त्वस्याप्रतीतेर्भागासिद्धमिति चेत्, न; द्रव्येषु सावयवत्वेन सह दृष्टान्ते घटादौ दर्शनात्, तद्विपरीतस्य पक्षे विवक्षितत्वात्। विरुद्धमिदमिति चेत्; न; साहचर्यमात्रेणाविरोधात्। कार्यत्वेनानित्यत्वानुमाने रूपसाहचर्यवदरूपस्याविनाभावाभ्युपगमे त्वसर्वज्ञत्वाद्युपेतकर्तृकत्वमुपस्थापयति। हेतौ कस्तद्विपरीतमभिप्रेयात्, यतो विरोधश्चोद्येत। असर्वज्ञस्य शरीरिणः प्रमाणनिरस्तत्वात् त्वमेव तद्विपरीतमभिप्रैषीति चेत्; नन्वेवमसर्वज्ञेन शरीरिणा हेतोरव्यापनात् कुतस्तद्विपरीतेन

1 वाहनादीन्–क्रिं। 2 स्वधाधिकारिणः–कि; जे। 3 निष्प्रयोजनत्वात् शङ्का पा. ३. पु निष्प्रयोजकत्वशङ्का 'क'। 4 सम्पादयेत्–पा. ३. पु। 5 तस्माद् बुद्धिमत् पूर्वकमिति कि; क।

विरोधः, तथाविधस्यानुपलब्धेरिति चेत् सुतरां तर्हि विरोधसिद्धेरसम्भवो जात्यन्धेन रूपस्पर्शयोरिव परस्परधर्मिपरिहारेणाप्रतीतेः। प्रतीतौ वा एकत्र धर्मिणि सहोपलम्भेन विरोधस्य बाधितत्वात्। दर्शनस्पर्शनाभ्यां वायावनुपलम्भेऽपि पृथिव्यादौ रूपसहचरस्पर्शवत्।

स्यादेतत्; न हेतुसाध्यविशेषयोर्विरोधं विशेषविरोधमाचक्ष्महे। किं नाम व्याप्तिपक्षधर्मताभ्यामानीयमानयोर्विशेषयोरेव विरोधः; तथा हि, व्याप्तिस्ताव[1]द्दर्शनबलप्रवृत्ता यथादृष्टं विशेष[2]मुपस्थापयति, नालौकिकमशरीरित्वादि। पक्षधर्मताऽपि शरीरिणा किञ्चिज्ज्ञेनानित्यज्ञानादिमता नोपपद्यत इति तद्विपरीतमुपस्थापयति। न चानयोर्विरोधे किञ्चित्सिध्यति। सोऽयं विशेषविरोध इति। तदपि नास्ति; स्वरूपेणानयोरविरोधात्। [3]परस्परानपेक्षाभ्यां विशेषानुपस्थापनात्। न हि यो धूमवान् स वह्निमानिति केवलया व्याप्त्या किञ्चिदुपनीयते; तथा सति पक्षधर्मतावैयर्थ्यात्। नाप्ययं धूमवानित्यनया पक्षधर्मतया नियमानपेक्षया किञ्चिदुपस्थाप्यते, तथा सति व्याप्तिवैयर्थ्यादिति। किन्तु परम्परसहकारितया। तथा च निरपेक्षतादशायां विशेषानुपस्थापनादेव विरोधासिद्धिः। [4]सापेक्षतादशायां सहोपलम्भादेवेति। नन्वलौकिकं विशेषमुपस्थापयति पक्षधर्मता। न[5] चासौ लौकिकं [6]व्याप्त्यानुस्मारितं[१] सहत इति ब्रूमः। ततः किम्? स[२] न सिद्ध्येदिति चेत्; को नु तं साधयितुमुद्यतः। अनेनैव[३] विरोधेनान्योऽपि न सिद्ध्येदिति चेत्; तदिदमायातं द्व्यणुकगतं कार्यत्वं कार्यसमवायिकारणत्वं न सहत इत्यकार्यमपि न [7]सिद्ध्यतीति।

स्यादेतत्; साध्यांशवि[8]शेषयोर्विरोधं विशेष[9]विरोधमाचक्ष्महे। तथा हि नित्यत्वमाकाशादौ ज्ञानत्वपरिहारेण सिद्धम्, ज्ञानत्वं च नित्यत्वपरिहारेणास्मदादिज्ञाने; तथा कर्तुः शरीरित्वं कुविन्दादेः, अशरीरस्याकर्तृत्वं मुक्तस्य। तदनयोर्ज्ञानत्वनित्यत्वयोः कर्तृत्वा-

---

१ व्याप्त्यनुस्मरणविषयीकृतमित्यर्थः। कि. प्र. व।

२ स इति। लौकिको विशेष इत्यर्थः। कि. प्र. व।

३ अनेनैवेति—लौकिकविशेषविरोधेनालौकिकोऽपि विशेषोऽशरीरित्वादिर्न सिद्ध्येदित्यर्थः। कि. प्र. व।

---

1 दर्शनवशात् प्रवृत्ता–पा ३. ५। 2 मुपनयति–पा. ३. पु। 3 परस्परानपेक्षायां–कि। 4 धूमवानित्यनया पक्षधर्मतया विशेषस्योपस्थापितत्वात् क्व विरोध–इत्यधिकं पा. ३. पु; सापेक्षदशायां तूभयापेक्षतयार्थसमर्थकत्वादेव न विरोधः–पा. २. ५. सापेक्षतादशायां सहोपलम्भादेः–जे। 5 सर्वलौकिकं। 6 व्याप्त्यनुस्मारितमिति प्रकाशसम्मतः पाठः। 7 भविष्यतीति–कि। 8 विशेषयोरिव–क। 9 विशेष्यभाव–क।

शरीरित्वयोश्चैकधर्मिसंसर्गो विरुध्यत इति । एतदपि नास्ति; उपसंहारस्थानस्यैकस्य धर्मिणोऽप्रतीतेः । नह्युष्णत्वशीतत्वे पयःपावकयोरेव विरुद्धे किन्त्वेकत्र पयसि तेजसि वा पृथिव्यां वा, एकत्रोपसंह्रियमाणे । तदेतेऽपि नित्यत्वज्ञानत्वे धर्मिभेदेनाविरुद्धेऽपि, अस्मदादिबुद्धौ गगने चोपसंहाराद्विरुद्धे इति विवक्षितमायुष्मतः । अशरीरित्वकर्तृत्वे वा कुलालादौ [1]मुक्तात्मादौ चोपसंहाराविरुद्धे इत्यभिमतं चिरजीविनो न नः किञ्चिदनिष्टमापद्यते । न हि नित्यत्वमूर्तत्वे नभसि घटादौ वा विरुद्धे इति परमाणुसाधनस्य किञ्चिदपि हीयते । अथेश्वरात्मनि तज्ज्ञाने चोपसंहारादनयोर्विरोधोऽभिधातुमभिलषितः स तर्हि मूर्तत्वनित्यत्वयोः परमाणाविव धर्मिसाधकेनैव बाधित इति बुद्ध्यस्व; इति नास्ति विरोधगन्धोऽपि । ²विशेष[2]विरुद्धोदाहरणं तु 'चन्दनदहनवानयम्, सुरभिधूमवत्त्वाद्' इति द्रष्टव्यम् ।

स्यादेतत्; ³व्यापकानुपलब्धिबाध एव विशेषविरोध इत्युच्यते । तथा हि; कर्तृत्वव्यापकं शरीरादि; तच्चातो व्यावर्तमानं कर्तारमपि व्यावर्तयति । तृणादिविकारकारित्वेन हिमस्य वह्निमत्त्वसाधने तद्व्यापकमौष्ण्यमिव व्यावर्तमानमग्निमत्त्वमिति चेत्; नैतदपि साधीयः । कस्य हि किमत्र व्यापकम्? किं कर्तुः शरीरित्वादिकम्? आहोस्वित्कार्यस्य शरीरादिमत्कर्तृपूर्वकत्वम्? प्रथमे नेश्वरः कर्ता, शरीरादिरहितत्वादिति प्रमाणार्थः स्यात् । तथा चाश्रयासिद्धिः, धर्मिग्राहकप्रमाणबाधो वा; 'सावयवाः परमाणवो मूर्तत्वाद्' इतिवत् । द्वितीयस्तु नियमः प्रत्यग्रजायमानाङ्कुरादावेव शरीरिणः कर्तुरनुपलम्भेन निरस्तः । दृष्टान्तस्तु सर्वथै[3]वानुपपन्नः । तृणादिविकारो हि यदि रूपादिपरावृत्तिमात्रहेतुः स नूनमौष्ण्यापेक्षेण तेजसा कर्तव्यः । तादृशे च पाकेऽनिमित्तं हिममिति न किञ्चिदनिष्टमापद्यते । नहि सौरस्य तेजसस्त्रैलोक्यपाकहेतोर्हिमादपगमः [4]क्षमते । अथ विकारो भस्मादिरूपो विवक्षितः सोऽसिद्ध एव । हिमहतेषु तृणादिषु क्व विरोधो बाधो वा? अथ रूपादिपरावृत्तिमात्रेणैवाग्निः साध्यते तदशक्यम् । तस्य दर्शनस्पर्शनग्राह्यस्य योग्यानुपलम्भबाधितत्वात्, अतादृशस्य

---

१ **उपसंहारस्थानस्येति**—ननु न व्याप्तिपक्षधर्मतोपस्थाप्यमानेन विरोधे क्रमः, किन्तु ज्ञानमनित्यमिति व्याप्तिग्राहकमानेन । एतेन व्याप्त्योर्न विरोधः । कार्यं सकर्तृकमिति व्याप्तिपक्षधर्मतासाचिव्यात् बलीयसी, कर्ता शरीर्येवेत्यत्र व्याप्तौ तदभावान्न सा तथेति तुल्यबलत्वाभावादिति निरस्तम् । कि. प्र. व.

२ **विशेषविरुद्धेति**—यत्र साध्यसाधनविशेषणयोर्विरोध इत्यर्थः । कि. प्र. व.

३ **व्यापकेति**—कर्तृव्यापकशरीरस्य याऽनुपलब्धिस्ततो बाध इत्यर्थः । कि. प्र. व.

---

1 शुकादौ–कि; क । 2 विशेषविरोधोदाहरणं कि; क । 3 °वासन्नतः–जे । 4 क्रियते–पा. २. ६ ।

तेजोमात्रस्य निवृत्तेरशक्यत्वादनिष्टत्वाच्च। तस्माद् व्यापकानुपलब्ध्याऽनुमानं बाध्यत इति रिक्तं वचः। सत्प्रतिपक्षस्तु कथञ्चित् स्यात्; 'अग्निमद्धिमं तृणादिविकारहेतुत्वात्'। निरग्निकं हिमं तथाविधौष्ण्यरहितत्वादिति। अस्तु तर्हि तदेव प्रकृते। शरीरानपेक्षोत्पत्तिकम् अकर्तृपूर्वकम्, शरीरानपेक्षोत्पत्तिकत्वात्, गगनवद्' इति। नैतदेवम्, शरीरानपेक्षाया उत्पत्तेरसाधरणत्वात् सकर्तृकाद् घटादेरिवाकर्तृकादाकाशादेरपि[१] व्यावृत्तत्वात्; उत्पत्तिव्यावृत्तिमात्रस्य चासिद्धेः। शरीरादनुत्पत्तेश्चासमर्थविशेषणत्वात्। सपक्षे गगनादौ अनुत्पत्तिमात्रस्यैव व्याप्यत्वनिश्चयात्, निश्चितव्याप्तेश्च पक्षोपनयनात्, अन्यथाऽतिप्रसङ्गात् [1]इति।

स्यादेतत्; यथा ज्ञानस्य नित्यत्वे शरीरापेक्षा नास्ति, ज्ञानगतकार्यत्वप्रयुक्तत्वाच्छरीरसम्बन्धस्य। तथा प्रयत्नस्य नि[2]त्यत्वे ज्ञानापेक्षाऽपि न स्यात्, प्रयत्नगतकार्यत्वप्रयुक्तत्वात् ज्ञानसम्बन्धस्येति। तर्कापरिशुद्धिरस्तु दूषणमिति चेत्, तदप्यसारम्। ईश्वरमधिकृत्य तर्काणामाश्रयासिद्ध्यसिद्धिभ्यामनवसरदुःस्थत्वात्। 'यदीश्वरः कर्ता स्यात्, शरीरी स्यात्, अनित्यज्ञानवांश्च भवेत्'। 'यदीश्वरस्य प्रयत्नः स्यादनित्यः स्यात्'। 'यदीश्वरप्रयत्नो नित्यः स्यात्, ज्ञानानपेक्षः स्यात्'। 'यदीश्वरस्य बुद्धिः स्यात्, असर्वविषया भवेद्' इत्यादयो हि ते क्षित्यादिकमधिकृत्य विपर्ययापर्यवसानात्। यदि विवादाध्यासितं बुद्धिमद्धेतुकमभविष्यत्, अनित्यप्रयत्नहेतुकतामापत्स्येत। शरीरजन्यं वाऽभविष्यत्, असर्वज्ञकार्यं च इत्यादयो हि ते तद्विपर्ययाश्च[२] असमर्थविशेषणत्वेन प्रागेव [3]निरस्ताः। न च प्रयत्नेन बुद्धिरिह साध्यते, बुद्ध्या वा प्रयत्नः इतरव्यावृत्त्या वाऽन्यतरव्यावृत्तिः, येनैतत्सम्बन्धौपाधिकत्वं [4]चोद्यमवकाशमासादयेत्। किन्तु धूमवत्त्वेनार्द्रेन्धनप्रभवदहनवत्त्वमिव कार्यत्वेन परिदृष्टसामर्थ्यकारकचक्रप्रयोक्तृमत्त्वम्। तथा च [5]साध्यांशयोर्ज्ञानप्रयत्नयोर्दहनार्द्रेन्धनयोरिव सोपाधिरपि सम्बन्धो हेतुं न दूषयति, तस्य साध्यसम्बन्धे निरूपाधिकत्वादिति।

---

१ आकाशादेरिति—तत्रोत्पत्तिरेव न कुत्र शरीरानपेक्षेत्यर्थः ननु शरीरापेक्षोत्पत्तिरहितत्वं हेतुः, स चाकाशादावस्त्येवेत्यत आह—शरीरादिनुत्पदश्चेति। कि. प्र. व।

२ तद्विपर्ययांश्चेति—'क्षित्यादिकं न बुद्धिमद्धेतुकम्' 'अनित्यप्रयत्नाजन्यत्वात्' इत्यादौ व्यर्थविशेषणत्वमजन्यत्वस्यैव साध्यव्याप्यत्वादित्यर्थः। न चेति—यदि प्रयत्नेन बुद्धिं बुद्धिनिवृत्त्या वा प्रयत्ननिवृत्तिं साधयेत् तदा ज्ञानसम्बन्धे प्रयत्नगतं कार्यत्वमुपाधिःस्यात्। न चैवमपि तु यथा धूमेनैकदैवार्द्रेन्धनप्रभववह्निमत्त्वं साध्यते तथा कार्यत्वेनैकदैव प्रयत्नबुद्धिसाधनमित्यर्थः। कि. प्र. व।

---

1 'इति' कि, क. पुस्तकयोर्नास्ति। 2 'नित्यत्वे' क पुस्तके नास्ति। 3 दूषिता इति–जे। 4 देश्य–क। 5 व्यापकयोः–जे।

ननु कारणविशेषादवश्यं कार्ये विशेषेण भवितव्यम्। अस्ति च केषुचिच्छरीरादिकारणं ततोऽपि विशेषः स्यात्। अवश्यं चैतदभ्युपगन्तव्यम्, अन्यथा शरीरिकर्तृत्वानुमानं न स्यात्। स च [1]विशेषो यद् दृष्टेरक्रियादर्शिनोऽपि कृतबुद्धिरुत्पद्यते। तदित्यदूरविप्रकर्षेणोच्यते। ततः स एव कर्तारं प्रयोजयति। कार्यत्वसामान्यं तु तत्प्रयुक्तां व्याप्तिमुपजीवतीति, न; विशेषस्य विशेषं प्रत्येव प्रयोजकत्वे सामान्यं प्रत्यनुपाधित्वात्। अन्यथा घटादित्ववान्तरविशेषेषु सत्सु यद्दृष्टेरित्याद्युपलक्षितोऽपि विशेषस्तु तत्प्रयुक्तां व्याप्तिमुपजीवतीत्यप्रयोजकः स्यादिति यत्किञ्चिदेतत्। तर्कस्तु यदि कार्यं कर्तारमतिपतेत्, तत् कारणान्त[2]रमप्यतिपतेत्। तथा च [3]कार्यत्वादेव हीयत इति संक्षेपः। विस्तरस्तु **न्यायकुसुमाञ्जलावात्मतत्त्वविवेके** चाध्यवसेय इति।

अस्तु तावदेवम्, विशेषस्य तु कुतः सिद्धिः? यथा ह्यप्रतीतेन विरोधादि प्रत्येतुमशक्यम्, तथा तस्य साधनमप्यशक्यम्। लब्धरूपं हि क्वचित् किञ्चिद्विधीयत इति चेत्, न; साधनसामान्यसम्बन्धबलेन साध्यसामान्यविधावुपक्रान्ते तत्सहकारिपक्षधर्मता[4]-बलेनाप्रतीते [5]च विशेषे पर्यवसानात्। सामान्यसङ्गतिबलप्रवृत्तानां पदानामाकाङ्क्षादिसहकारिलब्धेऽलौकिकवाक्यार्थे इति प्रमाणवृत्तम्। अन्यथा न किञ्चित् क्वचिदप्रतीतं प्रतीयेतेति।

अत्र कश्चिदाह; कृतं तर्हि केवलव्यतिरेकिणा. अन्वयिन एवादृष्टद्रव्यातिरेकादेरपि सिद्धेः। तदसत्; आकाङ्क्षानुपपत्तिभ्यां विशेषव्यवस्थापनात्। शाब्दो ह्यर्थो यावता विना नान्वयमुपैति तावन्तमनालम्ब्य प्रतीतेरपर्यवसानमत्राकाङ्क्षेत्युच्यते। तावानवधिरन्वयि-

---

१ अवश्यमिति—कार्ये विशेषस्याकस्मिकत्वापत्तेरित्यर्थः। कि. प्र. व।

२ तर्कस्त्विति। विवादपदं कर्तृजन्यं यदि न स्यात् जन्यं न स्याद् व्योमवदित्यर्थः। कि. प्र. व।

३ ननु शरीरजन्यत्वमुपाधिरस्तु। न च पक्षमात्रव्यावर्तकविशेषणकत्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वाच्च तत्रोपाधिः। प्रकृते तादृशानुपाधिताबीजस्य साध्यव्यापकताग्राहकमानाभावस्य भावात्। शरीरसहकृतस्यैव कर्तुः कार्यजनकतया कार्यकारणभावस्य साध्यव्यापकाग्राहकत्वात्। अत एव बाधोन्नीतः पक्षेतरवह्निमत्त्वे आर्द्रेन्धनप्रभववह्निमत्त्वेन जलस्य गन्धवत्त्वे पृथिवीत्वमुपाधिर्भवति, तेषां साध्यव्यापकताग्राहकतामानसत्त्वादित्यत आह—विस्तरस्त्विति। शरीरजन्यं नोपाधिः हस्तादिजन्यकार्ये साध्याव्यापकत्वात्। साक्षात्प्रयत्नाधिष्ठेयजन्यत्वस्य च साधनव्यापकत्वात्। अदृष्टपरमाण्वादीनामीश्वरेण साक्षात्प्रयत्नाधिष्ठानाद् इत्याद्यन्यत्र विस्तर इत्यर्थः। कि. प्र. व॥

---

1 विशेषोपदृष्टे- कि। 2 मप्यतिक्रामेत्-पा. ४. पु. क। 3 कार्यत्वं-क। 4 °वशादेवाप्रतीते-जे। 5 'च' कि. पुस्तके नास्ति।

नस्तत्प्रतीतौ पर्यवसितायां क्वचिद्विशेषे प्रमाणान्तरबाधोऽनुपपत्तिश्च । तावती सीमा व्यतिरेकिणः । तदत्र नगादिद्व्यणुकपर्यन्तपक्षीकरणे तत्कारणपरमाण्वादिविषयं ज्ञानं यदि न स्यात् कः शब्दार्थो 'नगसागरादि सकर्तृकम्' इति? परिदृष्टसामर्थ्यकारकचक्रप्रयोक्तुः कर्तृशब्दवाच्यत्वात् । एवं सर्गादिकार्यपक्षीकरणे तत्काले यदि न शरीराद्यनपेक्षं ज्ञानं कोऽर्थः 'सर्गादि कार्यं बुद्धिमत्पूर्वकम्' इति? सर्गसन्निहितो हि शरीरेन्द्रियविषयग्रामविरहोपलक्षितः कालः सर्गादिरित्युच्यते । तस्माद्विशेषप्रतीत्या सामान्यप्रतीत्यपर्यवसानादिह पक्षधर्मतासहायात् कार्यत्वादेव नित्यसर्वज्ञकर्तृत्वसिद्धिः । 'इच्छादयः क्वचिदाश्रिताः कार्यत्वाद् गुणत्वाद् वा' इत्यत्र त्वष्टद्रव्यातिरिक्तद्रव्यपारतन्त्र्यमप्रतीत्य शब्दार्थो न प्रतीयत इति नास्ति । न ह्याश्रयादिशब्दाः [1]क्षित्यादिव्यतिरिक्तार्थाः क्षित्यादिविरुद्धार्था वा, येन तत्प्रतिक्षेपनियमेनेच्छादिपदार्थानामन्वयः । प्रमाणान्तरबाध[2]पर्यालोचनादनुपपत्तिरित्यन्यदेतत् ॥

(६०) **आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रो सञ्ज्ञा भवन्ति । [3]आकाशः कालो दिगिति ॥**

आकाशनिरूपण[4]प्रसङ्गेन कालदिशोरुपन्यासः । **आकाशकालदिशा**मिति— पारिभाषिक्यो निमित्तमन्तरेण शृङ्गग्राहिकतया तिस्रः सञ्ज्ञा भवन्ति, 'आकाशं कालो दिगिति । कुतो हेतोरित्यत आह—**अपरजात्यभावे सतीति** । अपरजातीनामाकाशत्वादीनामभावादित्यर्थः । तदेव कुत इत्याह—एकैकत्वाद् व्यक्तिभेदाभावात् । 'नित्यमे[5]कमनेकव्यक्तिवृत्तिसामान्यम्' इति लक्षणव्याघातेन स्वरूपव्याघातप्रसङ्गाद् इति भावः । तथापि पारिभाषिकत्वमनुपपन्नम्, अतीन्द्रियत्वेन स्वरूपनिर्देशानुपपत्तेः । यः शब्दाश्रयस्तदाकाशम्, इत्येवं तु शब्दाश्रयत्वमेवोपाधिः स्यात् । न; शब्दाश्रयत्वस्योपलक्षणतया तटस्थत्वात् 'अयमसौ देवदत्तः' इत्यत्र इदन्तावत् । अन्यथा 'शब्द गुणमाकाशम्' इति सह प्रयोगो न स्यात् । यद्येवमाकाशादिशब्देभ्यः परस्य त्वतलादेर्निरर्थकत्वमापद्येत इति चेत्; न; आकाशस्य स्वरूपमितिवदौपचारिकत्वाद् व्यावृत्तिपरत्वाद् वेति ।

(६१) **त[6]त्राकाशस्य गुणाः शब्दसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः ॥**

---

1 क्षित्याद्यतिरिक्तार्था– कि. जे । 2 पर्यालोचनयाऽनुपपत्ति–पा. ४. पु । 3 आकाशं– कि; व्यो । 4 प्रसङ्गात्–पा. ४. पु । 5 °मनेकवृत्ति–पा. ३. पु । 6 तत्राकाशगुणाः–कि; तस्य-गुणाः–व्यो. (३२१)

तस्य [1]स्वरूपस्थितये [2]द्रव्यत्वव्यवस्थितये च गुणानाह—**तत्रे**ति। तास्वाकाशकालदिक्षुमध्ये तत्राकाशस्य शब्देन स्वरूपं सङ्ख्यादिना च द्रव्यत्वं व्यवस्थाप्यते। अरूपतया [3]चक्षुषस्तत्राप्रवृत्तेः तस्य रूपयोग्यतामुपादायैव द्रव्यग्राहकत्वात्। अन्यथाऽऽत्मनोऽपि चाक्षुषत्वप्रसङ्गात्। कथं तर्हि इह पक्षी नेह पक्षीति प्रत्यय? इति चेत्, आलोकमण्डलमाश्रित्येति ब्रूमः। तथापि 'इहालोको नेहालोक' इति कथमिति चेत्; तदवयवानाश्रित्येति य[4]त्किञ्चिदेतत्।

(६२) **श[5]ब्दः प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वाद्, अयावद्द्रव्यभावित्वाद्, आश्रयादन्यत्रोपलब्धेश्च न [6]स्पर्शवद्विशेषगुणः। बाह्येन्द्रियप्रत्यक्षत्वाद्, आत्मान्तरग्राह्यत्वाद्, आत्मन्यसमवायाद्, अहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः॥**

कथं पुनः शब्दस्तत्स्वरूपव्यवस्थापक इत्यत आह—**शब्द** इति। 'शब्दो न स्पर्शवद्विशेषगुणः, प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वात्'। योऽपि स्पर्शवद्विशेषगुणं शब्दमिच्छति सोऽपि [7]स्थूलवीणाशङ्खाद्याश्रयमिच्छेत् [8]न तु परमाण्वाद्याश्रयम्, अप्रत्यक्षत्वप्रसङ्गात्; परमाणुगुणानामतीन्द्रियत्वात्। तथा च स्थूलाश्रयस्य सामान्यवतः कार्यत्वेन सामान्यादित्रयव्यवच्छेदे स्पर्शरहिततया च [9]कार्यद्रव्यत्वव्यावृत्तौ प्रतिनियतेन्द्रियग्राह्यतया च सामान्यगुणत्वकर्मत्वानुपपत्तौ विशेषगुणत्वमुभयवादिसिद्धम्। स्पर्शवद्द्रव्यं प्रति शब्दस्य तत्प्रतिषेधः प्रतिज्ञायते [10]शब्दो **न स्पर्शवद्विशेषगुण** इति। अत्र हेतुः 'अकारणगुणपूर्वकत्वाद्' इति। स्पर्शवतां शङ्खादीनां यानि समवायिकारणानि तेषां ये गुणास्तदनपेक्षत्वात्। 'ये पुनः स्पर्शवद्विशेषगुणा न ते तदनपेक्षाः, यथा रूपादयः' इति केवलव्यतिरेकी। अत्र च पिठरपाकानभ्युपगमात् न तद्विशेषगुणैर्विरोधः, परमाणुगुणैस्तु स्यात्। तन्निषेधार्थमाह—**प्रत्यक्षत्वे सती**ति। हेत्वन्तरमाह—'अयावद्द्रव्यभावित्वाद्' इति। सत्स्वेव [11]शङ्खादिषु तन्निवृत्तेः। ये पुनस्तेषां विशेषगुणाः, न ते तेषु सत्सु

1 द्रव्यत्वव्यवस्थितये स्वरूपस्थितये– कि; क। 2 द्रव्यत्वसिद्धये–पा. ४. पु। 3 अचाक्षुषस्तत्राप्रतीतेः–पा. ४. पु। 4 किञ्चिदिदम्–पा. ४. पु; ब्रूमः यत्किञ्चिदेतत्–क। 5 तत्र शब्दः–कि। 6 स्पर्शवतां–दे। 7 वीणाद्याश्रय–जे। 8 न च–पा. ४. पु। 9 बहिरिन्द्रियप्रथमद्रव्यत्वव्यावृत्तौ–पा. ४. पु; द्रव्यत्वव्यावृत्तौ–क। 10 'शब्दो' इति कि; जे पुस्तकयोर्नास्ति। 11 वंशशङ्खादिषु तन्निवृत्तेः–कि; सत्स्वेवं शङ्खादिषु तन्निवृत्तेः–क; शङ्खादिषु निवृत्तेः–पा. ४. पु; जे।

निवर्तन्ते, यथा रूपादयः। अत्रापि पूर्ववत् 'प्रत्यक्षत्वे सति' इत्यनुषञ्जनीयम्, अन्यथा परमाणुगुणैरेव विरोधः स्यात्। सुखादीनामात्मगुणत्वसिद्धावन्वयोऽपि द्रष्टव्यः। अनयोस्तर्कं सूचयति—**आश्रयादन्यत्रोपलब्धे**रिति। आश्रयाभिमताच्छङ्खादेरन्यत्र कर्णशष्कुल्यवच्छिन्ने नभस्युपलब्धेः। यदि हि शङ्खाद्याश्रयः शब्दः स्यात्, तत् पिधाने नोपलभ्येत, कर्णविवरपिधान इव सर्वदैवाप्राप्तेः। अप्राप्तस्य च ग्रहणे सर्वत्र सर्वदैव सर्वैः सर्वशब्दोपलम्भप्रसङ्गः। न च शङ्खश्रवसोः प्राप्तिरस्ति। न चाश्रयापेक्षा एव गुणाः परेण प्राप्यन्ते। तस्माच्छङ्खादीनि निमित्तान्यपहाय द्रव्यान्तरे वर्तमानो वीचीतरङ्गन्यायेन [1]कदम्बमुकलन्यायेन वा [2]कर्णशष्कुल्यवच्छिन्नमाकाशादिदेशं [3]प्रत्यासन्न उपलभ्यते; अन्यथा त्वनुपलब्धिप्रसङ्गः।

ननु वायुगुणोऽपि भविष्यतीति। अन्यथाऽपि भेर्यादिषु ताडितेषु यावद्वेगमप्रतिष्ठमानः पवनो निमित्ती[4]भविष्यतीत्यभ्युपगमः। वदन्ति च केचिद् वायुरापद्यते शब्दतामिति। न; श्रोत्रस्य प्रतिनियतार्थग्राहकत्वेन बहिरिन्द्रियत्वात्। बहिरिन्द्रियस्य च प्रतिनियतग्राह्यजातीयविशेषगुणवत्त्वनियमात्। अन्यथा सर्वस्य सर्वार्थत्वेऽन्धबधिराद्यभावप्रसङ्गात्। एकस्य सर्वार्थत्वे तद्व्यावृत्तौ गुणान्तरानुपलम्भप्रसङ्गात्। तथा च शब्दस्य वायवीयत्वे श्रोत्रस्यापि वायवीयत्वप्रसङ्गः। ततः किमिति चेत्; एकस्य स्पर्शशब्दग्राहकत्वेऽनेकार्थतया बाह्यत्व[5]व्याघातः। बाह्यत्वे चानेकार्थत्वाऽनुपपत्तिः। वायवीयत्वाविशेषेऽपि त्वक्श्रोत्रयोर्व्यक्तिभेदात् प्रतिनियतार्थत्वाविरोध इति चेत्; न; प्रतिशरीरं घ्राणादीनां व्यक्तिभेदेऽपि विषयवैचित्र्यादर्शनात्। अदृष्टवैचित्र्यादेवमपि स्यात् को विरोधः, इति चेत्; तर्हि पार्थिवैकप्रकृतीनामेवादृष्टवैचित्र्यादुत्पादकवैचित्र्यं विषयव्यवस्थायै भविष्यतीति कृतं रसनादीनां प्रकृत्यन्तरकल्पनया। बाह्यानुसारेण तत्र तथेति चेत् समः समाधिः। तस्माद्यथोक्तहेतुभ्यां शब्दो न स्पर्शवद्विशेषगुण इति।

आत्मगुणो भविष्यतीत्यत आह—**नात्मगुणः**। कुतः, इत्यत आह—**बाह्येन्द्रियप्रत्यक्षत्वात्**। मनसोऽन्यदिन्द्रियं बाह्येन्द्रियम्, तत्प्रत्यक्षत्वाद् गन्धादिवदित्यन्वयः। बाह्येन्द्रियत्वं श्रोत्रस्य प्रति[6]यतार्थग्राह्यत्वात् सिद्धम्। आत्मगुणानां बाह्येन्द्रियेण ग्रहीतुमयोग्यत्वात्। अन्यथा बुद्ध्यादीनामपि तथात्वप्रसङ्गः। हेत्वन्तर-

---

1 पाठोऽयं कि. पुस्तके नास्ति। 2 कर्णशष्कुलीमन्तं–क। 3 आपन्न–पा. ४. पु., आसन्न–क। 4 भविष्यतीत्युपरमः–पा. ४६ पु। 5 व्याघातप्रसङ्गात्–पा. ४. पु; बाह्यत्वानुपपत्तिः–क। 6 प्रतिनियतविषयत्वाच्चक्षुर्वत्– कि. जे; प्रतिनियतेन्द्रियत्वाच्चक्षुर्वत्–क।

माह—**आत्मान्तरग्राह्यत्वा**दिति। यत्रस्थः शब्दस्ततोऽन्य आत्मा आत्मान्तरम्, तद्ग्राह्यत्वादित्यर्थः। [1]वीणाद्याश्रयतया हि शब्दः प्रतीयते तत्सन्तानन्या[2]येन श्रोत्रस्थो वा। तस्मादन्यश्चास्य ग्राहकः। ये त्वात्मगुणा गृह्यन्ते [3]ते च ग्राहकस्था एव गृह्यन्ते; यथा सुखादयः। गृह्यमाणस्तु शब्दो न ग्राहकस्थ इति। तदेव कुत इति चेदत आह—आत्मन्यसमवायात् → ग्रा[4]हकाऽसमवायात् ←। इदमप्यसिद्धमत आह—अहङ्कारेण विभक्तस्य व्यधिकरणस्य ग्रहणात्। वीणा वाद्यते, वेणुः पूर्यते, न त्वहं वाद्ये, अहं पूर्ये वेति कस्यचित्प्रत्ययः। अहङ्कारेण व्यधिकरणस्याप्यात्मसमवायेन गन्धादीनामपि तथात्वप्रसङ्गः।

अ[5]न्ये तु 'आत्मान्तरग्राह्यत्वाद्' इत्यनेकप्रतिपत्तृसाधारणत्वाद् इति हेत्वन्तरं वर्णयन्ति; स तु सन्दिग्धासिद्धः। सन्तानानुमानेन मूलप्रत्यभिज्ञानान्नैष दोष इति चेत्, तर्हि सुखादीनामप्यनुमानेनानेकप्रतिपत्तृसाधारणप्रत्यभिज्ञानविषयत्वादनैकान्तिको हेतुः स्यात्। आत्मसमवेतस्यैव वीचीतरङ्गन्यायेन मूलप्रत्यभिज्ञानोपपत्तौ विपक्षे बाधकाभावाच्च। तस्माद्यथाव्याख्यातमेवास्तु।

न दिक्कालमनसाम्, विशेषगुण इति शेषः। तत्र हेतुः **श्रोत्रग्राह्यत्वाद्** इति। अत्र श्रोत्रेति स्वरूपकथनमात्रम्, ग्राह्यत्वात् प्रत्यक्षत्वाद् इत्येव हेतुः, गन्धादिवदिति। आत्मगुणत्वे शब्दस्य मनसः श्रोत्रस्य साङ्कर्यप्रसङ्गः। दिक्कालमनोगुणत्वे च शब्दस्य विशेषगुणत्वव्याघातः। हेत्वन्तरमाह—**वैशेषिक[6]गुणभावाच्च**ेति। दिक्कालमनसामिति वाक्यशेषः। प्रयोगस्त्वयम् 'शब्दो न दिक्कालमनसां गुणः, विशेषगुणत्वाद्, गन्धादिवद्' इति। तद्गुणत्वे शब्दस्य तेषां तत्त्वव्याघातः। धर्मिग्राहकेण प्रमाणेन तेषां विशेषगुणप्रतिक्षेपादिति।

ननु यदि नाम शब्दः पृथिव्यादीनामष्टानां गुणो न भवति मा भूत्, आकाशं तु नवममस्तीति किं प्रमाणम्? अत आह—**पारिशेष्याद् गुणो भूत्वा आकाशस्याधिगमे लिङ्गमि**ति। अयमर्थः; शब्दस्तावद् द्रव्याश्रितो गुणत्वाद्रूपवदिति सामान्यतो द्रव्यत्वसिद्धौ शब्दाश्रयत्वेनाकाशसञ्ज्ञायां विनिवेशितायां तदाकाशं पृथिव्यादिभ्यो

---

1 वीणाद्याश्रयो–कि.। 2 द्वारेण–कि। 3 ते च आत्मस्था ग्राहकस्था—पा० ४. पु.। 4 ग्राहकेऽसमवायात्–पा. ४. पु. क, → ← 'जे' पुस्तके एतच्चिह्नान्तर्गतः पाठो नास्ति। 5 इदं मतं न्यायकन्दल्यां दृश्यते। 6 वैशेषिकगुणभावात्–पा. ३. पु, विशेषगुणभावाच्च–कि, विशेषगुणाभावाच्च–जे।

[1]भिद्यते शब्दाश्रयत्वात्। 'यः पुनर्न पृथिव्यादिभ्यो भिद्यते नासौ शब्दाश्रयो यथा पृथिव्यादय एव। न च नायं शब्दाश्रयः, तस्मादितरेभ्यो भिद्यते। यथा च पृथिव्यादिषु शब्दो न समवैति तथोक्तमधस्ताद् इति निरवद्यम्। सोऽयं परिशेषो व्यतिरेकः, तदिदमुक्तं **गुणो भूत्वेति**।

(६३) शब्दलिङ्गाविशेषादेकत्वं सिद्धम्। तदनुविधानादे[2]क-पृथक्त्वम्। विभववचनात्परममहत्परिमाणम्। शब्द-[3]कारणवचनात् संयोगविभागाविति।

एवमाकाशस्य स्वरूपे सिद्धे शब्दगुणत्वे च गुणान्तराण्यस्यैवाह—**शब्दलिङ्गाविशेषादिति**। यद्यपि द्रव्यत्वादेव सामान्यतः सङ्ख्यायां सिद्धायामेकत्वमपि सिद्धम्। नह्येकत्वमन्तरेणासमवायिकारण[4]निरपेक्षं द्वित्वादिकमपि सिध्यति। भवितव्यं च तत्र द्वित्वादिना, पृथिव्यादीनां नवानां पञ्चानां त्रयाणामि[5]त्यादिर्व्यवहारस्य बाधकं विना सङ्ख्यादि[6]निमित्तकत्वात्। अन्यथा पृथिव्यादिष्वपि सा न स्यात्। तथापि शब्दाश्रयस्य द्रव्यस्यानेकत्वव्यवच्छेदेन [7]नियतमेकत्वं साधयितुमयमारम्भः। तच्च वैभवे सति शब्दलिङ्गमविशिष्टं सत् साधयति। सर्वेषामेव शब्दानां तदे[8]काश्रयतयैवोपपत्तौ आश्रयान्तरकल्पनायां कल्पनागौरवप्रसङ्गात्। श्रोत्रव्यवस्थाप्यदृष्टव्यवस्थयैवोपपद्यत इति वक्ष्यमाणत्वादिति। **तदनुविधानात् पृथक्त्व**मिति। एतदपि पूर्ववत्। द्रव्यत्वेन सामान्यतः परिमाणसिद्धौ सत्यामाह—**विभववचनादिति**। 'विभवान्महानाकाशस्तथा चात्मा (वै. सू. ७-१-२२) इति सूत्रकारवचनात्। विभवो विभुत्वं सर्वैर्मूर्तिमद्भिः सह संयोगः; तस्मात् परममहत्परिमाणम्। [9]परिमितस्य सर्वसंयोगानुपपत्तेः। 'परममहद्' इति भावप्रधानो निर्देशः। अथवा परमहतो द्रव्यस्य परिमाणं [10]षष्ठीतत्पुरुषः। सामानाधिकरण्ये हि परममहापरिमाणमिति स्यात्। अथ विभुत्वस्य कुतः सिद्धिः? स्पर्शशून्यत्वे सति प्रत्यक्षगुणाश्रयत्वाद् आत्मवत्। अन्यथा परमाणुत्वे प्रत्यक्षगुणाश्रयत्वविरोधात्, अवयवित्वे स्पर्शशून्यत्वविरोधात्। शब्दकरणवचनात् संयोगविभागौ। 'संयोगाद्विभागा[11]च्छब्दाद्वा

1 व्यावर्त्यते–कि। 2 पृथक्त्वम्–कि, जे; दे। 3 कारणत्व–मु. भा। 4 कारणानपेक्षं–पा. ४. पु। 5 मित्यादि–पा. ४. पु। 6 निमित्तत्वात्–पा. ४. पु। 7 नियमेनैकत्वं–पा. ४. पु। 8 अभिन्नाश्रय–पा. ४. पु। 9 अपरिमितस्य संयोगानुपपत्तेः–पा. ४. पु। 10 षष्ठीसमासः–कि। 11 शब्दाच्च–सू. पा. शब्दाच्च तस्य निष्पत्तिरिति–पा. ४. पु।

शब्दनिष्पत्तिः' (वै. सू. २-२-३१) इति सूत्रकारवचनात् संयोगविभागौ। यद्यपि द्रव्यत्वेनैव संयोगविभागयोः सिद्धिः तथापि विपक्षे बाधकं वक्तव्यमिति तदुच्यते। यदि संयोगविभागौ नभसि न स्याताम्, असमवायिकारणभावाच्छब्दो [1]नोत्पद्येत।

(६४) अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यम्। समानासमानजातीयभावाच्च नित्यम्॥

यद्यपि धर्मिग्राहकादेव प्रमाणाद् द्रव्यत्वमस्यसिद्धम्, तथापि [2]सङ्ख्यादिना गुणेनापि तत्साधयितुं शक्यमिति तदप्याह—**अत** इति। गुणवतोप्यद्रव्यत्वे तल्लक्षणव्याघातादिति। **अनाश्रितत्वाद्** इति। [3]आश्रयैकस्वभावत्वादित्यर्थः, अन्यथा समवायेन व्यभिचारः स्यादिति। आश्रयैकस्वभावस्याप्यद्रव्यत्वे गुणत्वाद्यापत्तौ स्वरूपव्याघातादिति। यद्यप्येकत्वादेव नित्यत्वाकार्यत्वेसिद्धे; अनित्यत्वे कार्यत्वे च ततः पूर्वं पश्चाजायमानाः शब्दा आकाशान्तरे वर्त्तेरन्; तस्मादेकत्वादेव पूर्वापरकोटिविकलं नभः, तथापि प्रपञ्चार्थमाह—समानेति। तथा हि नास्यारम्भकं नभ एव तेनैव तस्यानारम्भात्। नापि नभोऽन्तरम्, असत्त्वात्। नापि विजातीयं पृथिव्यादि कारणगुणपूर्वक्रमेण, कार्ये रूपादिमत्त्वप्रसङ्गात्। नाप्यात्मदिक्कालमनांसि स्पर्शशून्यतया तेषामनारम्भकत्वाद्, इति शब्दाश्रयतया परार्थत्वमस्योक्तम्।

(६५) [4]सर्वप्राणिनां शब्दोपलब्धौ निमित्तं श्रोत्रभावेन॥

सम्प्रति तदुपलम्भकतया परार्थतामाह—**सर्वप्राणिना**मिति। तर्हि सर्वेषां सर्वशब्दोपलब्धिः स्यात्, तस्य सर्वसाधारणत्वाद् व्यापकत्वाच्च इत्यत आह— **श्रोत्रभावेने**ति।

(६६) श्रोत्रं पुनः [5]श्रवणविवरसञ्ज्ञको नभोदेशः शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धः। तस्य [6]च नित्यत्वे सत्युपनिबन्धवै[7]कल्याद् बाधिर्यम्॥

ननु किमिदं श्रोत्रम्? नहि पृथिव्यादेर्घ्राणादिवदाकाशस्यापि किञ्चित्कार्यमस्तीत्यत आह—**श्रोत्रं पुन**रिति। अत्र 'पुनः' शब्देन पृथिव्यादिकार्येभ्यो घ्राणादिभ्यो व्यवच्छिनत्ति। श्रवणे कर्णशष्कुल्यौ तयोर्विवरं तत्सञ्ज्ञको नभोदेशः। अव्याप्यवृत्ति संयोगोपचारात् देशव्यपदेशः। ननु[8] स बधिरस्याप्यस्तीत्यत आह—**शब्दे**ति। शब्देन निमित्तेन

---

1 नोपपद्येत–पा. ४. पु। 2 सङ्ख्यादिगुणत्वेनापि–क। 3 आश्रयैकस्वभावात्–पा. ४. पु। 4 सर्वप्राणिनां च दे, कं, कि। 5 श्रवणको–दे। 6 तस्य नित्यत्वे–जे। 7 वैकल्ये-दे। 8 ननु बधिरस्यास्ती°–कि।

विषयतया य उपभोगः सुखदुःखानुभवः तत् प्रापकाभ्यां तत्सम्पादकाभ्यां धर्माधर्माभ्यामुपनिबद्धो विशिष्ट इत्यर्थः। एवं सति च विशेष्यस्य सद्भावेऽपि विशेषणांशस्य वैकल्यात् कस्यचिद् बाधिर्यम्। यथा शरीरसद्भावेऽप्युपभोगहेत्वदृष्टवैकल्यात् सुखज्ञानाद्यनुपपत्तिरित्यत आह—**तस्य चेति**। उपलक्षणं चैतत्, कर्णमलादिना [1]शुषिरव्याघातादपि बाधिर्यं भवति; अन्यथा भेषजादिप्रयोगवैयर्थ्यापत्ति[2]रिति ॥

(६७) **कालः परापरव्यतिकरयौग[3]पद्यायौगपद्यचिरक्षिप्रप्रत्ययलि[4]ङ्गः। तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावन्यनिमि[5]त्ताभावाद् यदत्र निमित्तं स [6]कालः।**

काललक्षणमाह—**काल** इति। अत्र परापरेति भावप्रधानो निर्देशः। परत्वापरत्वयोर्व्यतिकरः परापरव्यतिकरः। दिक्कृताभ्यां परत्वापरत्वाभ्यां विपरीते परत्वापरत्वे इत्यर्थः। [7]परापरव्यतिकरश्च यौगपद्यादिप्रत्ययाश्चेति समासः, ते लिङ्गानि यस्य स तथोक्तः। परत्वापरत्वयोरुत्पत्तिर्गुणे वक्ष्यते। ते युवस्थविरयोर्वर्तमाने कालमनुमापयतः। कथम्? 'बहुतरतपनपरिस्पन्दान्तरितजन्मनि हि स्थविरे युवानवधिं कृत्वा परत्वमुत्पद्यमानमसमवायिकारणवत्' कार्यत्वाद् इति स्थिते च रूपादीनां च व्यभिचारे तपनपरिस्पन्दानां च वैयधिकरण्ये तदवच्छिन्नद्रव्यसंयोगोऽसमवायिकारणमिति विज्ञायते। न [8]चाविभुनो द्रव्यस्य संयोगस्तथा भवितुमर्हति व्यभिचाराद् इति तद्द्रव्यं विभु स्यात्। न चात्माकाशौ तथा भवितुमर्हतो विशेषगुणवत्वात् पृथिव्यादिवदि[9]त्याचार्याः।

अत्रैवमालोचनीयम्; पृथिव्यादीनां संयोगस्यातद्धेतुत्वे विशेषगुणवत्वमप्रयोजकं सूर्या[10]दिगतिप्राप्तिविरहस्योपाधेः सत्त्वात्। अन्यथा मनसस्तथाभावप्रसङ्गात्। विशेषगुणविरहिणस्तस्याकारणत्वेऽप्राप्तेरन्यस्य कारणस्याभावात्। तस्माद्विशेषगुणवत्त्वाविशेषे पृथिव्यादीनामव्यापकत्वात् परत्वाद्यकारणत्वं व्यापकत्वाच्चात्माकाशयोस्तत्कारणत्वं भविष्यतीति को विरोधः? विप्रकृष्टबुद्धिमपेक्ष्योत्पद्यमानं विप्रकृष्टबुद्धिं निमित्तीकरोति। अल्पतरसूरसञ्चरणापेक्षया बहुतपनपरिस्पन्दान्तरितत्वं विप्रकर्षः। न चैष स्थविर[11]शरीरे स्वरूपतः सम्भवति,

---

1 शुषिरव्याघातात्तैरेव–पा. ४. पु। 2 रिति खं समाप्तमिति–४. पु। 3 यौगपद्यचिर… जे। 4 लिङ्गम्–मु. भा; जे। 5 निमित्तासम्भवाद्–व्यो (३४४) कि। 6 काल इति–दे। 7 परत्वापरत्व–पा. ४. पु। 8 न चाविभुद्रव्यसंयोग पा. ४ पु। 9 आचार्या **व्योमशिवाचार्या** इति **किरणावलीप्रकाशे वर्धमानोपाध्यायाः**। 10 गतिविरहस्योपाधेः सत्त्वात्–पा. ४. पु। 11 शरीरस्य स्वरूपतः–पा. ४. पु, क।

तपनसमवेतेन कर्मणाऽस्य सम्बन्धाभावात्। अतो यद्द्वारेण संयुक्तसंयुक्तसमवायलक्षणया प्रत्यासत्त्या आदित्यगतिः स्थविरमुपावर्तते तद्द्रव्यमस्ति। न च तत् पृथिव्यादि तथा भवितुमर्हति, अप्राप्तेर्व्यभिचाराच्च। अतः सकलमूर्तद्रव्यसंयुक्तेन तेन भवितव्यम्। → [1]न चाकाशात्मानौ तथा भवतः, विशेषगुणवत्त्वात् पृथिव्यादिवदित्याचार्याः ←। न[2]न्वप्रयोजकमेतत्, अप्राप्त्युपाधिकत्वात्। → अ[3]न्यथा मनसस्तथाभावप्रसङ्गात्; विशेषगुणरहितस्य तस्याकारणत्वेऽप्राप्तेरन्यस्य कारणस्याभावात्। तस्माद्विशेषगुणत्त्वाविशेषेऽपि पृथिव्यादीनामव्यापकत्वात् परत्वाद्यकारणत्वम्; व्यापतत्वाच्चात्माकाशयोस्तत्कारणत्वं भविष्यतीति को विरोधः ←। न चाकाशस्य स्वप्रत्यासत्तिमात्रेण संयुक्तसमवायिनं धर्ममन्यत्र सङ्क्रामयितुमसमर्थत्वात्। तथात्वे चैकत्र भेर्यामभिहतायां सर्वभेरीषु शब्दोत्पत्तिप्रसङ्गात् सूर्यक्रियावद् भेरीसंयोगस्यापि संयुक्तसंयुक्तसमवायाविशेषात्, कालस्य तु [4]तत्स्वभावत्वाद् अयमदोषः। असिद्धिदशायां प्रसङ्गस्याश्रयासिद्धेः, सिद्धिदशायां च बाधितत्वादात्मनोऽपि द्रव्यान्तरधर्मेषु द्रव्यान्तरावच्छेदाय स्वप्रत्यासत्त्यतिरिक्तसन्निकर्षापेक्ष[5]त्वात्। अन्यथा **वाराणसी**स्थितेन नीलेन **पाटलिपुत्र**स्थितस्य स्फटिकमणेरूपरञ्जनप्रसङ्गात्। कालस्य तु विप्रकृष्टक्रियोपसङ्क्रमण[6]शक्ततयैव सिद्धेर्नाऽयं प्रसङ्ग [7]इति सर्वमवदातम्।

तदयं प्रमाणार्थः। 'स्थविरादौ परत्वं तपनपरिस्पन्दप्रकर्षबुद्धिजन्यम्, तदनुविधायित्वात् पटकुविन्दवत्'। 'ते च तपनपरिस्पन्दाः स्थविरशरीरप्रत्यासत्तिमपेक्षन्ते, स्वभावतोऽप्रत्यासन्नत्वे सति तदवच्छेदकत्वात् घटावच्छेदकमहारजनरागवत्'। 'सा च प्रत्यासत्तिर्द्रव्यकृता, प्रकारान्तरासम्भवे सति [8]प्रत्यासत्तित्वादेव → प[9]टे महारजनप्रत्यासत्तिवत्'। अन्यथा प्रत्यासत्त्यभावे सन्निकर्षविप्रकर्षयोरसम्भवादपेक्षणीयानुपपत्तौ परत्वाद्यनुत्पतिप्रसङ्गेन तद्व्यवहार[10]विलोपप्रसङ्गः ←। 'तच्च द्रव्यमितरेभ्यो भिद्यते, विशिष्टपरत्वाद्य[11]नुमेयत्वात्'। 'यत्पुनर्नेतरेभ्यो भिद्यते तन्नैवं यथा [12]पृथिव्यादि'। एतेनापरत्वं लिङ्गतया व्याख्यातम्।

यौगपद्यमेककालता, अयौगपद्यमनेककालता, चिरत्वं दीर्घकालता क्षिप्रत्वमल्पकालता। अत्र 'काल' शब्देन कालोपाधयः सूर्यगत्यादय उच्यन्ते, तेषां प्रत्ययैः कालोऽनुमीयते।

1, 3 → ← एतच्चिह्नान्तर्गतौ पाठौ आवृत्ताविव दृश्येते सर्वेष्वपि आदर्श पुस्तकेषु वर्तमानत्वादत्र स्थापितौ। 2 न चाप्रयोजकमिति पाठः सूचितः। 4 तत्स्वभावात्–पा. ४.। 5 पेक्षितत्त्वात्–कि.। 6 सङ्क्रमेण तथैव सिद्धेर्नायं—पा. २. पु। 7 इति सर्वमवदातव्यम्–पा. ४. कि। 8 प्रत्यासन्नत्वात्—पा. ४. पु। 9 → ← एतच्चिह्नान्तर्गतः पाठः ४. पु. नास्ति। 10 रलोपप्रसङ्गः कि। 11 °नुमेयत्वाच्च पा. ४. पु। 12 पृथिव्यादिरिति–जे।

ननु प्रत्ययाः कारणतया विषयतया वा कालं व्यवस्थापयेयुः ? न प्रथमः आत्मेन्द्रियादीनां तत्कारणत्वात् । न द्वितीयः, तस्यातीन्द्रियतया ऐन्द्रियकप्रत्ययविषयत्वविरोधात्, अत आह—**तेषा**मिति । विषयेषु घटादिषु युगपद्भवन्ति, युगपद्गच्छन्ति, युगपत्कुर्वन्ति, युगपद्वर्तन्ते इत्यादीनां पूर्वप्रत्ययविलक्षणानां द्रव्यगुणादिप्रत्ययविलक्षणानां द्रव्यादिप्रत्यय[1]-व्यावृत्तावप्यनुवृत्तेः, तदनुवृत्तावपि तेषां व्यावृत्तेर्विलक्षणत्वेन विनिश्चितानामुत्पत्तावन्यस्य निमित्तस्यासम्भवात् कालमन्तरेणेति शेषः ।

एते युगपज्जायन्ते कुर्वन्त्यवतिष्ठन्ते विनश्यन्ते इत्यादीनामेकस्मिन् काले एकस्यां सूर्यगतावेकसूर्यगत्यवच्छिन्ना इत्यर्थः । न चाप्राप्ताः सूर्यगतयो विषयान्तरमवच्छेत्तुमुत्सहन्ते । न च स्वरूपेण तासां प्राप्तिरस्ति; तस्माद् विशिष्टप्र[2]त्ययाद्यनुपपत्त्या विशेषणप्रापकं द्रव्यमुपकल्प्यते । अन्यथा निमित्तमन्तरेण [3]नैमित्तिकस्यापि प्रत्ययस्यासम्भवप्रसङ्गः । वाच्यं न च सम्बन्धस्य प्रतीतौ विशिष्टप्रत्ययो विशिष्टप्रत्ययेनैव च तत्प्रतीतावितरेतराश्रयत्वमिति । नहि सम्बन्धोऽत्र विशेषणमपि तु क्रिया, सा च प्रतीतैवेति [4]सर्वं सुस्थम् । विशेषणसम्बन्धो हि विशेष्यप्रतीतौ सत्तयैवोपयुज्यते, न तु स्वज्ञानेन । अन्यथा समवायस्यातीन्द्रियत्वाद् गुणकर्मसामान्यविशिष्ट[5]प्रतीति**वैशेषिक**नये दत्तजलाञ्जलिः स्यात् । परेषामप्यहं शरीरीत्यादेरदृष्टस्य नियामकस्याप्रतीतौ विशिष्टप्रत्ययो न स्यात् । तस्माद्विशिष्टप्रत्ययान्यथानुपपत्त्या विशेषणसम्बन्धः प्रतीयते, न तु सम्बन्धाप्रतीतौ विशिष्टप्रतीतिरेव न सिध्यतीति[7] स्थितिः ।

(६८) **सर्वका[8]र्याणां चोत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात् । क्षणलवनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रार्धमास[9]मासर्त्वयनसंवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्य[10]वहारहेतुश्च ।**

यत्तत्साधर्म्यमुक्तं सर्वोत्पत्तिमतां निमित्तकारणत्वमिति तदाह—**सर्वकार्याणा**मिति । उत्पत्तिरात्मलाभः; स्थितिराविनाशात् क्रमवत्सहकारिसम्बन्धः; विनाशः प्रध्वंसः, एतेषां हेतुः । अत्र प्रमाणमाह—**तद्व्यपदेशादि**ति । तेन कालेनोत्पत्त्यादीनां व्यपदेशात् 'अद्योत्पन्नः श्वः परश्वो वा' इति, 'इदानीमत्रास्ति अद्य नष्टः श्वः परश्वो वा'

1 द्रव्य व्यावृत्ता–पा० ४. पु. । 2 प्रत्ययानुपपत्त्या । विशिष्टप्रत्ययान्यथानुपपत्त्या 'क' । 3 नैमित्तिकस्य व्यवहारस्या–नुपपत्तेः 'क' । 4 प्रतीतेनवेति सुष्ठु–मु. कि । 5 प्रतिपत्तिर्वैशेषिकनये–पा. ४ पु । 6 विशेषसम्बन्धः मु. कि; जे । 7 नियमः–पा. ४ पु । 8 कार्याणामुत्पत्ति–दे । 9 मासायन–दे । 10 व्यवहार-हेतुः–कि ।

इति व्यपदेश्यते यथा चैतत् तथोक्तम् । [1]व्यवहारहेतुमाह—**क्षणे**ति । उत्पन्नं द्रव्यं यावद्गुणमुत्पद्यते, अन्त्यतन्तुसंयोगे यावन्न पटः, उत्पन्ने कर्मणि यावन्न विभागस्तावत्कालः क्षणः । अथवा सामग्री कार्यरहिता क्षण इति संक्षेपः । अक्षिपक्ष्मकर्मैकं निमेष इत्यादि गणितशास्त्रानुसारेण ग्राह्यम् ।

(६९) तस्य गुणाः सङ्ख्यापरिमाणपृथक्त्व[2]संयोगविभागाः ॥

यद्यपि धर्मिग्राहकादेव प्रमाणात् सङ्ख्यादयः सिद्धास्तथापि आकाशादिव्यवच्छेदार्थं विशे[3]षगुणविरहमाविष्कर्तुं सामान्यगुणानाह—**तस्य गुणा** इति ।

(७०) काललिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानात् पृथक्त्वम् । कारणे काल इति वचनात्परममहत्परिमाणम् । कारणपरत्वादिति वचनात् संयोगः । तद्विनाशकत्वाद्विभाग इति ।

अत्राप्येकत्वादिसमस्त[4]सङ्ख्यायोगे सिद्धे विशिष्टपरत्वाद्यनुमेयस्यानेक[5]त्वव्यवच्छेदेन निय[6]तमेकत्वं विवक्षन्नाह—**काललिङ्गाविशेषा**दिति । व्यापकतयैकस्यैव सर्वत्र सूर्यादिगत्युपनायकतया सन्निकृष्टविप्रकृष्टबुद्ध्युत्पादकद्वारेण विश्ववर्त्तिपरत्वापरत्वोत्पत्तिनिमित्तस्योपपत्तेरनेकत्वकल्पनायां कल्पनागौरवप्रसङ्गादित्यर्थः । **तदनुविधानात् पृथक्त्व**मित्येतदपि पूर्ववत् **कारणे काल इति वचनात्**—कारणे कालाख्या (वै. सू. २.२.९.) इति सूत्रकारवचनात् परममहत्परिमाणम् विशिष्टपरत्वाद्यसाधारणकारणद्रव्ये अविभोर्विश्ववर्तिमूर्तगतपरत्वाद्युत्पत्तौ सूर्यादिगत्युपाध्युपनयनशक्तेः परममहत्त्वाभावे च [7]वैभवानुपपत्तेः परममहत्त्वं कालस्य सिद्ध्यतीत्यर्थः ।

कारणपरत्वादिति वचनात् संयोग इति—'कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे' (वै. सू. ७. २. २२) इति सूत्रकारवचनात् इत्यर्थः । कारणं परत्वादेः कालः, तस्य परत्वापरत्वे तदुत्पादकौ मूर्तसंयोगावुपचारात् । **तद्विनाशकत्वाद्विभागः**—तस्य संयोगस्य उत्पन्नस्य सत्याश्रये विनाशको विभागस्तद्विनाशादेव सिद्ध इत्यर्थः । एतेन धर्मिग्राहकप्रमाणस्य द्रव्यत्वस्य वा सङ्ख्यादिपञ्चकसाधकस्य सहायास्तर्का

1 व्यवहारान्तरे हेतुत्वमाह—क । 2 संयोगविभागः पूर्ववदेते सिद्धाः—दे । 3 विशेषगुणमाविष्कर्तुं—पा. ४. पु । 4 सङ्ख्यायोगित्वे सति—पा. ४. पु । 5 °नुमेयस्य सतोऽनेकत्व—पा. ४. पु । 6 नियमेनैकत्वं—पा. ४. पु. । 7 विभवानुपपत्तेः—पा. ३. पु ।

दर्शिताः। तथाह्येकत्वाभावे द्वित्वाद्यसिद्धिरसमवायिकारणाभावात्, पृथक्त्वाभावे एकत्वानुपपत्तिर्व्यापकनिवृत्तेः द्विपृथक्त्वासिद्धिश्च। परममहत्परिमाणाभावे वैभवानुपपत्तिः, संयोगाद्यसिद्धौ परत्वाद्यसिद्धिरसमवायिनिमित्तयोरभावात्। विभागाभावे कार्यस्य संयोगस्य नित्यत्वप्रसङ्गः।

(७१) तस्याकाशवद् द्रव्यत्वनित्यत्वे सिद्धे ॥

तस्याकाशवदिति—यथाऽऽकाशस्य धर्मिग्राहकादेव द्रव्यत्वं [1]सिद्धं गुणवत्वादपि सिद्ध्यति तथा कालस्यापि। यथाऽऽकाशस्यैकत्वादेव नित्यत्वं सिद्धं समानासमानजातीयकारणाभावादकार्यतयापि सिद्ध्यति तथा कालस्यापीत्यर्थः।

(७२) काललिङ्गाविशेषादञ्जसै[2]कत्वेऽपि। [3]सर्वकार्याणां प्रारम्भक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदाद् मणिवत्पा[4]चकद्वानानात्वोपचार इति ॥

स्यादेतत्; यद्येकः कालः, कथमतीतानागतव[5]र्तमानभेदेन व्यवह्रियते? नहि क्षणलवादिवद् [6]वर्षादिवद्वा अतीतानागतादयोऽप्युपाधिभेदाः [7]सन्ति, किन्तु त एव भावाः; भावे वा त एव सन्तु [8]किमन्तर्गडुना कालेनेत्यत आह—**काललिङ्गे**ति। अञ्जसा मुख्यया वृत्त्या आरम्भ इति सन्निकृष्टं[१] प्रागभावमाह—**क्रिये**ति व्यापारः। [9]अभिनिर्वृत्तिरिति फलसिद्धिः। निरोध इति विनाशः। तेन प्रत्येकमनागतादित्रिकं धर्मधर्मिभेदात् त्रिविधमुक्तं भवति। तथाहि 'भविष्यति पटः' इति पटस्य धर्मिणः प्रागभावास्तिता भविष्यता, तदुपलक्षितः कालो भविष्यन्। 'पटं भावयिष्यति कुविन्दः' इत्यत्र धर्मिणो वर्तमानत्वेऽपि पटोत्पत्त्यनुगुणव्यापारप्रागभाववत्ता कुविन्दस्य भविष्यत्ता, तदुपलक्षितः कालोऽपि भविष्यन्। एवमुत्पद्यते पटः स्मारयति पूर्वानुभवोऽनुभूतमर्थमनुभावयति पूर्वकर्म स्वानुरूपं फलमिति धर्मिणोऽभावेऽपि व्यापारसत्ता वर्तमानता' [10]तदुपलक्षितः कालोऽपि वर्तमानः। 'अस्त्यात्मा', 'विद्यते व्योम' 'वर्तते पटः' इत्यादौ तु धर्मिसत्तयैव [11]वर्त्तमानता, तदुपलक्षितः कालोऽपि

१ **सन्निकृष्टमिति**—यद्यपि प्रागभावमात्रस्य भविष्यत्ताव्यवहारेतुत्वम्, तथाऽपि प्रतियोगिव्याप्तधर्मिग्रहं विना प्रागभावो न गृह्यत इति दर्शनार्थं सन्निकर्षोऽप्युक्तः। कि. प्र. व.।

1 सिद्धमिति नास्ति–४. पु। 2 कत्वे सति–जे। 3 सर्वकार्याणामारम्भ–कि। 4 पाचकवद्नानात्वोपचारः–पाठोऽयं लेखक दोषात् 'जे' पुस्तके वायुप्रकरणे प्रविष्टः तत्रापि 'वा' नास्ति। 5 वर्तमानतया–पा. ४. पु.। 6 'वर्षादिवद्वा' इति 'क' पुस्तके नास्ति। 7 स्युः–पा. ४. पु.। 8 कृतमन्तर्गडुना–क। 9 अभिनिर्वृत्तिरपि–पा. ३. पु.। 10 तदुपहितः–जे। 11 विद्यमानता।

वर्तमानः। 'एवमभूत्पटः,' 'अकार्षीत्पटम्' इत्यादौ धर्म्यवस्थानेऽपि फलसिद्धौ तदुत्पादानुगुणव्यापारप्रध्वंसस्थितिरतीतत्वम्, तदुपलक्षितः कालोऽप्यतीत उच्यते। 'नष्टो घटः' इत्यादौ धर्मिस्वरूपनिवृत्तिरेवातीतत्त्वम्, तदुपलक्षितः कालोऽप्यतीत इति न; चैषं व्यवहार उपाधिमात्रेण शक्यते; 'यदा भारतवर्षेषु मध्याह्नस्तदोत्तरेषु कुरुष्वर्द्धरात्रः' इत्यादौ सम्बन्धाभावात्। बौद्धः सम्बन्धो भविष्यतीति चेत्; सत्यम्; तदर्थमेव निमित्तमनुसराम इत्यलं विस्तरेण।

स एकोऽप्युपाधिभेदादनेकव्यवहारमातनोतीत्यत्र दृष्टान्तमाह—**मणिवदिति**। यथा स्फटिकादिरेकरूपोऽपि [1]उपाधिभेदान्नीलः पीत इत्यादि व्यवह्रियते तथा कालोऽपीत्यर्थः। ननु **किं** मणौ पीतादिव्यवहारवत् कालेऽनागतादिव्यवहारो भ्रान्तः, इत्यत आह—**पाचकवद्वे**ति। न चौपाधिक इत्येतावतैव भ्रान्तः। माभूत् पाचकादिव्यवहारोऽभ्रान्तः, किन्त्वतस्मिंस्तदिति ग्रहः। न चैवं प्रकृत [2]इत्यर्थः।

(७३) **दिक् पूर्वापरादिप्रत्ययलिङ्गा। मूर्तद्रव्यमवधिं कृत्वा मूर्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण, दक्षिणेन, पश्चिमेन, उत्तरेण, पूर्वदक्षिणेन, [3]दक्षिणापरेण, अ[4]परोत्तरेण, उत्तरपूर्वेण, चाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भवन्ति सा दिगिति; अन्यनिमित्तासम्भवात्॥**

गुणे परत्वापरत्वलिङ्गं दिशः स्फुटी-भविष्यतीत्यभिप्रायवांस्तदुपेक्ष्य पूर्वापरादिप्रत्ययलिङ्गतामाह—**दिगिति**। एतदेव स्फुटयति **मूर्तद्रव्ये**ति। अमूर्त्तद्रव्यस्यावधित्वं नास्ति व्यापकत्वाद् अत उक्तं **मूर्तद्रव्यमवधिं कृत्वे**ति। व्यापकत्वादेव तेषां पूर्वापरादि प्रत्ययविषयत्वं नास्तीन्यत आह **मूर्तेष्वे**वेति। पूर्वेण दक्षिणेनेत्यादौ तृतीया-

१ **न चेति**। यदेह मध्याह्नस्तदोत्तरकुरुष्वर्द्धरात्रमिति वर्तमानयोः सामानाधिकरण्यमसति कालेऽनुपपन्नमिति तद्घटकः कालो मन्तव्य इत्यर्थः। **बौद्ध इति**—विशिष्टधीजनकत्वसम्बन्धः। **तदर्थमेवेति**—सैव सम्बन्धं विना नेति तदर्थं कालमपेक्ष्यत इत्यर्थः॥ कि. प्र. व।

२ ननु **गुणे** कालकृतपरत्वापरत्वविजातीये परत्वापरत्वेऽपि दिशो लिङ्गे तत्कुतो नोक्ते इत्यत आह **गुण इति**। कि. प्र. व।

३ ननु पूर्वेणेति तृतीया न युक्ता कर्तृकरणयोस्तदर्थयोरभावादित्यत आह **तृतीयाविधानमिति**। कि. प्र. व।

1 नीलपीताद्यु–क। 2 इति समाप्तः कालः–इत्यधिकं ४. पु। 3 दक्षिणपश्चिमेन–दे। 4 पश्चिमोत्तरेण–दे।

विधाने ' प्रकृत्यादिभ्य उपसङ्ख्यान 'मिति तृतीया पूर्वं दक्षिणमित्याद्यर्थे। ननु [1]प्रत्ययान्निमित्तं सिद्ध्यति, दि[2]शस्तु कुतः सिद्धिरत आह—**अन्यनिमित्तासम्भवात्।** अन्येषां [3]गुणादीनां व्यभिचारात् प्रथमचरमादित्यसंयोगो ह्यत्र निमित्तम्। न च तेऽपि द्रव्यान्तरवर्तिनो द्रव्यान्तरेऽनु[4]पसङ्क्रान्ता विशिष्ट[5]प्रत्ययानुत्पादयितुमीशते; ततो भवितव्यं परमहता द्रव्यान्तरेण। न चाव्यापकस[6]म्बन्धमाश्रित्य सूर्यसंयोगा विशिष्टप्रत्ययानुत्पादयन्ति। न चाकाशात्मानौ तथा भवितुमर्हतः, पूर्वकादेव न्यायात्। कालो भविष्यतीति चेत्, न, कालस्य क्रियामात्रोपाधिनिबन्धनव्यवहारहेतुत्वात्। अन्यथा जगति वर्तमानैकत्ववत् प्राच्यादेरेकत्वप्रसङ्गात्। अस्माकं [7]प्राच्याऽन्येषां प्रतीचित्वात्। न चैवं कालेऽपि; कालोऽप्यन्यधर्मोपाधिकं व्यवहारमन्यत्र कुर्वाणः प्रमातृनियममपेक्षते। नन्वपेक्षत एव, योह्यत्र दिवसस्तस्यान्यत्र रात्रित्वात्। सत्यम्, दिक्व्यवहारमन्तर्भाव्या, न तु वर्तमानादिस्तथा, वर्तमानस्य सर्वत्र वर्तमानत्वात्।

ननु प्राच्याः सर्वान् प्रति प्राचीत्वं तस्माद्विलक्षणेन व्यवहारेण च विलक्षणमेव निमित्तमाकर्षणीयम्। उपाधिरेव तथास्तु, इति चेत्, न; सूर्यसंयोगस्य साधारणत्वात्। कथं तर्हि व्यवहारवैलक्षण्यं दिग्वादिनापि समर्थनीयमीति चेत्, न; उपनायकस्वभाववैलक्षण्येनैव तदुपपत्तेः। दिशो ह्ययं स्वभावभेदो यत्प्रमातृभेदमाश्रित्य प[8]क्षधर्मोपनायकत्वं न त्वन्यस्येति। कालस्यैवं स्वभावभेदः किं न कल्प्यत इति चेत्, न; क्रियां प्रत्यन्यथादर्शनात्। अपि च अन्यधर्ममात्रमन्यत्रोप[9]दध्यादिति कालस्य स्वभावः क्रियामात्रं वा? आद्ये सर्वधर्मान् सर्वत्रोपसङ्क्रामयेदिति अतिप्रसङ्गः द्वितीये संयोगो[10]पधायकमन्यत् कल्पनीयम्; अन्यथा प्राच्यादिव्यवहारानुपपत्तेः। न च तत्क्रियासंयोगयोरेकजातीयत्वमस्ति, यतोऽन्यन्नोपदधातीत्युपपद्यते तस्मात् क्रियोपसङ्क्रान्तिरिव रविसंयोगोपसङ्क्रान्तिरपि नियतस्वभावं द्रव्यमुपस्थापयतीति सा[11]धूक्तम्—अन्यनिमित्तासम्भवादिति। तत्सिद्धमेतद्; ' दिग्, इतरेभ्यो

---

१ **प्रथमचर**मेति—यदपेक्षया सूर्योदयाचलसंयोगसन्निहिता दिक् सा प्राची। यदपेक्षया सूर्यास्ताचलसंयोगसन्निहिता सा प्रतीची। सन्निधिस्तु सूर्यसंयुक्तसंयोगाल्पीयस्त्वमिति तत्संयोगघटकतया दिक् सिद्ध्यतीत्यर्थः। तेऽपिति—आदित्यसंयोगा अपि द्रव्यान्तरे घटादावनुपसङ्क्रान्ता असम्बद्धा इत्यर्थः। कि. प्र. व।

---

1 प्रत्ययेन—पा. ३. पु। 2 विशेषस्य—क। 3 द्रव्यगुणादीनां—पा. ४. पु 'क'। 4 द्रव्यान्तरमसङ्क्रान्ता—पा. ४. पु। 5 विशिष्टप्रत्ययानुत्पादयन्ति—कि। 6 संयोग 'क'। 7 प्राच्यैव क। 8 पर—क। 9 पदर्शयेदिति—क। 10 °गोपनायक—क। 11 साधु युक्तम्—पा. ४. पु।

भिद्यते, उपाध्युपनयनद्वारेण पूर्वापरादिप्रत्ययहेतुत्वात्'; यन्नैवं न तदिरेभ्यो भिद्यते यथा [1]पृथिव्यादि ।

(७४) तस्यास्तु गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः कालवदेते सिद्धाः ।

तद्गुणानाह—**तस्या**स्त्विति । अत्रापि सङ्ख्यादीनां धर्मिग्राहकप्रमाणात् सिद्धौ द्रव्यत्वाद्वा विशे[2]षगुणव्यवच्छेदे तात्पर्यम् । [3]तर्कान् सूचयति—**कालवदेते सिद्धा** इति । यथा काललिङ्गाविशेषादेकत्वं तथा दिग्लिङ्गाविशेषादेकत्वं [4]दिशि । यथा तदनुविधानात् पृथक्त्वं काले तथा दिश्यपि, यथा 'कारणे कालः' (वै. सू. ७–१–२५) इति वचनात् परममहत्त्वं तथा दिश्यपि । यथा 'कारणपरत्वाद्' (वै. सू. ७–२–२२) इति वचनात् काले संयोगस्तथा दिश्यपि । यथा तत्र तद्विनाशकत्वाद्विभागः तथा दिश्यपीत्यर्थः ।

(७५) [5]दिग्लिङ्गाविशेषादञ्जसैकत्वेऽपि दिशः प[6]रमर्षिभिः श्रुतिस्मृतिलोकसंव्यवहारार्थं मेरुं प्रदक्षिणमावर्तमानस्य भगवतः सवितुर्ये [7]संयोगविभागा लोकपाल परिगृहीतदिक्प्रदेशानामन्वर्थाः प्राच्यादिभेदेन दशविधाः सञ्ज्ञाः कृताः । [8]ततो भक्त्या दशदिशः सिद्धाः । तासामेव दे[9]वतापरिग्रहवशात् पुनर्दश सञ्ज्ञा भवन्ति । मा[10]हेन्द्री, वैश्वानरी, या[11]म्या, नैर्ऋती, वारुणी, वा[12]यव्या, चा[13]न्द्रमसी, ऐशानी ब्राह्मी नागी चेति ॥

यद्यैकेव दिक् कथं 'दशदिशः' इति प्रसिद्धिरित्यत आह—**दिग्लिङ्गे**ति । अञ्जसा मुख्यया वृत्त्येति परमर्षिभिः सर्गादिप्रभवैर्मरीच्यादिभिर्दशविधाः सञ्ज्ञाः कृताः । किमर्थम्? श्रुतिस्मृतिलोकसंव्यवहारार्थम् । '[14]प्राचीनप्रवणे वैश्वदेवेन

---

1 पृथिवीत्यादि–मु. कि । 2 विशेषव्यवहारोच्छेदे–पा. ४. पु । 3 तर्ककर्ता सूचयति–कि । 4 'दिशि' कि, जे पुस्तकयोर्नास्ति । 5 दिग्लिङ्गादञ्जसैकत्वेऽपि–दे । 6 परममहर्षिभिः–मु भा । 7 संयोगविशेषा–मु. भा; विभागस्तेषां–दे । विशिष्टसंयोगास्तद्वशाच्च प्राच्यादिव्यवहारः–व्यो । 8 अतो कः कि. व्यो (३५९) । 9 परिग्रहात्–मु. भा । 10 तद्यथा माहेन्द्री–जे; यथा माहेन्द्री दे । 11 यामी–५ पु । 12 वायवी–५ पु । 13 कौबेरी–मु. भा; दे । 14 प्राचीप्रवणेन–कि ।

यजेत,' न प्रतीची शिराः शयीत इति श्रौतो व्यवहारः। '[1]आयुष्मान् प्राङ्मुखो भुङ्क्ते इत्यादि स्मार्तः। 'दक्षिणेन याहि' इत्यादिर्लौकिकस्तदर्थम्। ताः किं पारिभाषिक्यः? न; इत्याह—**अन्वर्थाः** अनुगतार्थाः। केषाम्? भगवतः सवितुर्ये संयोगविशेषास्तेषाम्। किं भूतस्य? सवितुर्मेरुं प्रदक्षिणमावर्तमानस्य परितो भ्रमतः। पुनः केषामन्वर्था इत्यत आह—लोकपालपरिगृहीतानां दिक्प्रदेशानाम्। [2]लोकापालाः इन्द्रादयः। कथं ताः सवितृसंयोगविशेषार्थानुगमेन दशविधाः सञ्ज्ञा इत्यत आह—**प्राच्यादिभेदे**नेति। तथा हि [१]प्रथममस्यामञ्चति सवितेति प्राची, अवागस्यामञ्चतीत्यवाची, प्रतीपमस्यामञ्चतीति प्रतीची, उदगस्यामञ्चतीत्युदीची। एवं प्रागवाची, अवाक्प्रतीची, प्रत्युदीची, उदक्प्राची सूर्यापेक्षया; यतः पृथिवी साधस्तात् पृथिव्यपेक्षया; यतो नक्षत्राणि सोर्ध्वा ततो भक्त्योपचारेण दश दिशः सिद्धा इत्येकत्वाविरोध इत्यर्थः। ननु लोकपालपरिग्रहनिबन्धनादिभिर्दशभिः सह भक्त्याऽपि विंशतिर्दिशः स्युरित्यत आह—**तासामेवे**ति। या चास्माकं प्राची सैव माहेन्द्री। निमित्तमात्रं भिद्यते न तु नैमित्तिकमित्यर्थः; उपलक्षणं चैतत्, पूर्वापरादिसञ्ज्ञा अपि तत्समानार्था न तु भिन्नार्था इति भक्त्यापि दशैव दिश इ[3]ति।

(७६) आत्मत्वाभिसम्बन्धादात्मा। तस्य सौक्ष्म्यादप्रत्यक्ष[4]त्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते। वा[5]स्यादीनामिव करणानां कर्तृप्रयोज्यत्वदर्शनात् शब्दादिषु प्रसिद्ध्या च प्रसाधकोऽनुमीयते॥

---

१ **प्रथमस्या**मिति—ननु प्राथम्यं रविसंयोगस्य विभुना अविभुना वा? नाद्यः; सामान्यतोऽसम्भवात्। न च तद्दिने प्रथमः संयोगः, रात्रौ तद्व्यवहारापत्तेः। नान्त्यः; प्रतीच्यामपि प्राचीव्यवहारापत्तेः। अत्राहुः; सूर्योदयसन्निहिता दिक् प्राची। तद्व्यवहिता दिक् प्रतीची, प्राच्याभिमुखस्थितपुरुष वामदेशावच्छिन्ना दिगुदीची। तादृशपुरुषदक्षिणप्रदेशावच्छिन्ना दिग्दक्षिणा। वामत्वदक्षिणे च शरीरावयववृत्तिजातिविशेषौ। गुरुत्वासमवायिकारणक्रियाजन्यसंयोगाश्रया दिग् अधः। अदृष्टवदात्मसंयोगजान्निक्रियाजन्य संयोगाश्रया दिग् ऊर्ध्वमिति संक्षेपः *। कि. प्र. व॥

* **सूर्ये**ति—सूर्योदयाचलसंयुक्तसंयोगाल्पीयस्त्वं सन्निधनं तद्भूयस्त्वं व्यवधानमत्रेति द्रष्टव्यम्। **वाम**त्वेति—न च करत्वादिजातिभिः सङ्करभयेन वामत्वदक्षिणत्वयोर्नात्वे कथमनुगम इति वाच्यम्; दक्षिणत्वाभावकूटसमानाधिकरणशरीरावयववृत्तिजातित्वेन नानावामत्वानामनुगमात्। एवं वामत्वाभावकूटमादाय नानादक्षिणत्वानुगमनात् केचित्तु तदुत्तरत्वं तदवच्छिन्नत्वेन व्यवह्रियत इत्याहुः।

---

1 आयुष्मान्–क; आयुष्यं–कि। 2 दिक्पाला कि.। 3 इति समाप्ता दिशः–इत्यधिकम्–४. पु। 4 °क्षत्वेकरणैः–दे; क्षत्वेऽपिकरणैः पा. ५. पु। 5 वास्यादीनां–कं।

उद्देशक्रमानुसारेण दिग्लक्षणानन्तरमात्मलक्षणमाह—**आत्मत्वेति**। आत्मत्वं नाम सामान्यविशेषः, तदभिसम्बन्धादात्मा इतरेभ्यो भिद्यते इति पूर्ववद् व्याख्येयम्।

ननु शरीराद्यतिरिक्तमात्मानं नोपलभामहे। 'गौरोऽहम्', 'स्थूलोऽहम्' 'ब्राह्मणोऽहम्', 'मानुषोहम्', 'गच्छाम्यहम्', 'जातोऽहम्', 'पितुः पुत्रः', 'पुत्रस्य पिता', 'ज्येष्ठस्य कनीयान्', 'कनीयसो ज्यायान्', इति गुणकर्मसामान्यविशेषजन्माद्यधिकरणमात्मानं चक्षुरादिनैव सर्वः प्रत्येति। न त्वरूपं विभुमचलमनन्तमजमपूर्वमपरमात्मानं कश्चित् स्वप्नेऽप्यनुभवतीत्याश्रयासिद्धमात्मत्वम्। यथा प्रसिद्धाश्रयं च पृथिव्यादिना गतार्थम्, तथा 'अहं जाने यते भुञ्जे' इति ज्ञानाद्यधिकरणतया मनसाऽऽत्मानुभूयत एव। अहङ्कारस्य शरीरादिविषयत्वं चाग्रे निषेत्स्यते इत्यभिप्रायः।

तथाप्यात्मत्वं स्वरूपासिद्धम्, परात्मनोऽप्रतीतेः, व्यक्तिभेदासिद्धौ सामान्यविशेषासिद्धेरित्यत आह—**तस्येति**। सौक्ष्म्यं बाह्येन्द्रियग्रहणयोग्यताविरहः; तस्मादप्रत्यक्षत्वे तस्य करणैः श्रोत्रादिभिः समधिगमः क्रियते। ननु करणान्यप्यप्रत्यक्षाणीत्यत आह—**शब्दाद्युपलब्ध्यनुमितैः**। 'शब्दाद्युपलब्धयः करणसाध्याः, क्रियात्वात्, छिदादिवद्' इत्यनुमितैः। कथं पुनः [1]करणैरात्मा समधिगम्यत इत्यत आह **वास्यादीनामिवेति**[2] अनेन व्याप्तिर्दर्शिता। प्रयोगस्त्वेवम् 'श्रोत्रादीनि कर्तृव्यापार्याणि, करणत्वाद्, वासीवत्। करणत्वं चामीषां धर्मिग्राहकप्रमाणसिद्धम्।

ननु कस्यचित्करणस्य वास्यादेः पाण्यादिकरणप्रयोज्यत्वदर्शनेऽपि यथा न सर्वं करणं करणप्रयोज्यमनवस्थादर्शनात्, तथा कस्यचित् क[3]रणस्य कर्तृप्रयोज्यत्वेऽपि न सर्वं तथा भविष्यतीति को विरोधः? उच्यते; कारकेषु समानजातीयकारकापेक्षानियमो नेष्यते, अनवस्थाप्रसङ्गात्, विजातीयकारकापेक्षानियमस्तु इष्यत एव, अन्यथा लक्षणव्याघातात्। चक्षुरादीनां च कर्त्रनपेक्षत्वे तत्साध्यक्रियाप्रतिसन्धानानुपपत्तिप्रसङ्गात्। तस्माद्योऽसौ श्रोत्रादीनामेकोऽधिष्ठाता असावात्मेति। प्रमाणान्तरमाह—**शब्दादिष्विति**। प्रसिद्ध्या ज्ञानेन प्रसाधकः ज्ञाताऽनुमीयते। तथाहि '[4]शब्दज्ञानं क्वचिदाश्रितम्, कार्यत्वाद्,

---

अदृष्टेति—न च क्रियामात्रस्यादृष्टवदात्मसंयोगजन्यतया वातादिजन्याग्निक्रियामादाय तिर्यगादावतिव्याप्तिरिति वाच्यम्। जन्येत्यन्तेन स्वाभाविकत्वाभिधानात्। तज्जन्यत्वेन तदसमवायिकारणत्वस्योक्तत्वाद्वा। अग्निपदं तु वायुक्रियामादाय तिर्यगतिव्याप्तिवारणाय। ननु प्राच्यादेः सूर्येण निर्वचने रात्रौ नद्व्यवहारापत्तिरित्यत आह-संक्षेप इति। कि. प्र. व्या. भ.॥

---

1 and 3 कारण–कि. जे। 2 पूर्वं–क। 4 ज्ञानं 'क'।

ग[1]न्धवत्'। कार्यत्वमेषामभूत्वा भावित्वलक्षणं प्रत्यक्षसिद्धम्, कार्यस्याप्यनाश्रितत्वे समवायिकारणव्यावृत्तावितरयोरपि व्यावृत्तेरकारणत्वप्रसङ्गः।

(७१) **न शरीरेन्द्रियमनसामज्ञत्वात्। न शरीरस्य चैतन्यं घ[2]टादिवद् भूतकार्यत्वान्मृते चासम्भवात्। नेन्द्रियाणां करणत्वात्, उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात्। नापि मनसः, करणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात् स्वयंकरणभावाच्च। परिशेषादात्मकार्यत्वादात्मा समधिगम्यते॥**

तथापि शरीरेन्द्रियमनसामन्यतमस्मिन्नाश्रितं भविष्यतीत्यत आह—**न शरीरेन्द्रियमनसाम्**, चैत[3]न्यमग्रे वक्ष्यतीति। कुतः? अ[4]ज्ञत्वव्याप्ततयैव तेषां सिद्धत्वादित्यर्थः। एतदेव दर्शयति '**न शरीरस्य चैतन्यम्**, शरीरं न चैतन्याश्रयमित्यर्थः। '**घटादिवद् भूतकार्यत्वात्**' इति भूतत्वात्कार्यत्वाच्चेत्यर्थः। अन्यथा असमर्थविशेषणो हेतुः स्यात्। ननु चैतन्याश्रयत्वे कार्यत्वस्य भूतत्वस्य वा को विरोध इत्यत आह—**मृते चासम्भवा**दिति। यदि हि शरीरविशेषगुणश्चैतन्यं भवेद् रूपादिवद्यावद्द्रव्यभावि भवेत्। चकाराद्यावत् पृथिव्यादिव्यक्तिवृत्ति भवेत्, पृथिव्यादिविशेषगुणस्य यावद्द्रव्यभावित्वनियमात्। पृथिव्यादिचतुष्टयविशेषगुणस्य च यावत्पृथिव्यादिव्यक्तिभावित्वात्। अत्राप्यनियमे को विरोध इति चेत्, [5]न, शरीरस्य कार्यतया उत्पत्तेः प्रागनुभवाभावेन संस्काराभावात्। स्मृत्यनुसन्धानानुपपत्तिरित्येत[6]त्तर्कप्रदर्शनार्थमेव कार्यत्वस्योपादानमित्यवधातव्यम्।

नेन्द्रियाणामिति—चैतन्यमित्यनुवर्तते। तत्कुतः? करणभावात् कुठारवदिति शेषः। तर्कमाह—**उपहत्वेष्वि**ति। अनुभवानुविधायितया तावदनुभवकार्या स्मृतिः, सोऽपि य[7]द्यन्तरा किञ्चिदतिशयं नादध्यात्, चिरध्वस्तो न स्मृतिं जनयेत्। अनुत्पन्ननिरन्वयध्वस्तयोरविशेषात्, अतिशयमप्यादधानः स्वसमानाश्रयमेवादधीत, अन्यत्राधानेऽतिप्रसङ्गात्। तस्मात् स्मृतिसंस्कारानुभवाः समानाश्रया इति नियमः। तथा चेन्द्रियेषु चैतन्याश्रयेषु स्वीक्रियमाणेषु तेषामुपघातेऽन्धादिभिः पूर्वानुभूतानां रूपादीनामस्मरणप्रसङ्गात्

1 रूपवत् 'क'। 2 घटवत्–जे। 3 चैतन्यमित्यग्रे भविष्यति 'क'। 4 अज्ञत्वात् अज्ञत्वव्याप्ततयैव–क। 5 'न' कि. पुस्तके नास्ति। 6 कर्तृप्रदर्शनार्थ–'क'। 7 सोऽपि अन्तरा किञ्चिद्यदि विशेषं 'क'।

घटादीनां विषयाणां कुठारादीनां च करणानामचैतन्ये जीवनविरहो हेतुः। तत्राप्याध्यात्मिकवायुविरहः, तथाऽत्रापि [1]ब्राह्यधातूपग्रहाभावः। अत्रार्थे तर्कं सूचयति—**विषयासान्निध्ये चे**ति। यदि हि विषयाश्चेतयेरंस्तेषामसन्निधानेऽनु-स्मृतिर्नदध्यात्। असन्निधिश्च नाशहेतुको द्रष्टव्यः। न ह्यसत्यनुभवितरिस्मरणमुपपद्यते कारणाभावादिति भावः। अनुभवस्य पश्चाद्भावेन स्मृतिरेवानुस्मृतिरुच्यते।

अस्तु तर्हि नित्यत्वात् सर्वविषयत्वादभूतत्वाच्च मनसश्चैतन्यमत आह—**नापि मनस** इति। अयम[2]भिसन्धिः, ज्ञानाश्रयतया मनोऽनुमीयमानं कर्तृ स्यात् न तु तत्करणम्, तथा च युगपदनेकविषयसन्निधौ अनेकचक्षुरादिकरणाधिष्ठानेन युगपदनेकान्यालोचनान्यनेकाश्च स्मृतीरारभेत। न हि करणवत् कतृरयं धर्मो [3]यदेकदैकामेव क्रियामभिनिर्वर्तयते। तथात्वे वा व्यासङ्गो न स्यात्। करणान्तरापेक्षायां च सञ्ज्ञाभेदमात्रम्। अथ करणतयैव तदनुमाने ज्ञानाश्रयतया तदनुमास्यत इत्यत आह—स्वयं करणभावाच्च। सिद्धे हि चैतन्याश्रये कर्तरि करणं मनोऽनुमीयते, तथा च धर्मिग्राहकप्रमाणबाध इति भावः।

दिक्कालाकाशानां च प्रसक्तिरेव नास्ति, तेषां बुद्ध्याश्रयत्वप्रतिक्षेपेणैव शब्दादिभिरुपस्थापनात्। अतः पारिशेष्यात् प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गात् शिष्यमाणतयाऽऽत्मकार्यत्वात् पृथिव्याद्यसमवायित्वे सति कार्यत्वादित्यर्थः। तदयं प्रयोगः, 'ज्ञानं पृथि[4]व्याद्यतिरिक्तद्रव्याश्रितम्, तदनाश्रितत्वे सति कार्यत्वात्'; 'यत् पुनः पृथिव्याद्यतिरिक्तद्रव्याश्रितं न भवति तत्तदनाश्रितत्वे सति कार्यमपि न भवति यथा ग[5]न्धादिः', इति केवलव्यतिरेकीति।

(७८) **शरीरसमवायिनीभ्यां हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्मणा सा[6]रथिवत् प्रयत्नवान् विग्रहस्याधिष्ठाताऽनुमीयते। प्राणादिभिश्च[7]। कथम्? शरीरपरिगृहीते वायौ विकृनकर्मदर्शनात् भस्त्राध्मापयितेव, निमेषोन्मेषकर्मणा नियतेन दा[8]रुयन्त्रप्रयोक्तेव, देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वाद् गृहपतिरिव, अभिमतविषयग्राहकसम्बन्धनिमित्तेन मनः कर्मणा गृहकोणेषु पेलकप्रेरक इव दारकः, नयन-**

---

1 तत्रापि तृप्त्यादेरभावः तत्रापि पुष्टेरभावः इत्यधिकं 'क' पुस्तके। 2 मभिप्रायः 'क'। 3 यदेकामेव–कि. जे। 4 पृथिव्याद्यष्टकातिरिक्तं–क। 5 शब्दादिः 'क'। 6 सारथिरिव–दे। 7 श्चेति मु. भा। 8 दारुयन्त्रेण–दे।

विषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनादनेकगवाक्षान्तर्गतप्रेक्षकवदु[1]भयदर्शी [2]कश्चिदेको विज्ञायते ॥

स्यादेतत्; [3]आत्मत्वहेतुसिद्ध्यर्थं परात्मप्रसाधनार्थं चायमारम्भः। यथा च परात्मा परोक्षस्तथा [4]तद्बुद्धिरपि परोक्षैव। तथा च किं केन साध्यत इत्याशङ्क्याह—**शरीरसमवायिनीभ्या**मिति। विग्रहस्याधिष्ठाताऽनुमीयते। अधिष्ठातेत्यस्य विवरणं प्रयत्नवानिति संयोगीति शेषः। लिङ्गमाह—**प्रवृत्तिनिवृत्तिभ्यामिति**। प्रवृत्त्या निवृत्त्या चेत्यर्थः। अनयोः प्रत्येकमेव लिङ्गत्वात् क्रियामात्रस्य चानैकान्तिकत्वमित्याशङ्क्याह—**हिताहितप्राप्तिपरिहारयोग्याभ्या**मिति। हितं सुखसाधनम्, दुःखसाधनमहितम्। तयोर्यथासङ्ख्यं प्राप्तिपरिहारौ, तद्योग्याभ्यामिति। योग्यग्रहणं क्वचिदन्तरायसम्भवेन प्राप्तिपरिहारयोरसिद्धावपि चेष्टात्वस्य प्रयोजकत्वमादर्शयितुम्। [5]एवंभूते च प्रवृत्तिनिवृत्ती प्रायेण शरीरतदवयवसमवायिन्याविति शरीरसमवायिनीभ्यामिति स्वरूपमुक्तम्। यथा च लतादीनामपि शरीरित्वं तथोक्तमधस्ताद् वक्ष्यते च। अत्र दृष्टान्तो **रथकर्मणा सारथिव**दिति। [6]अत्र प्रयोगः, 'विवादाध्यासितं शरीरं प्रयत्नवदधिष्ठितम्, हितप्राप्तियोग्यक्रियावत्त्वात्, अहितपरिहारयोग्यक्रियावत्वाद्वा रथवत्' विपक्षे प्रयत्नवद्व्यतिरेकेण प्रवृत्त्यनुपपतिप्रसङ्गो बाधकम्, तत्कार्यत्वादिति।

प्राणादिभिश्चेति—अनेन 'प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि' (वै. सू. ३-२-४) इति **सूत्रं** स्मारयति। **कथमि**ति—केन प्रकारेणात्र व्याप्तिर्ग्राह्येत्यर्थः। उत्तरं **शरीरे**ति। लिङ्गत्वमभिव्यनक्ति—**विकृते**ति। शरीरपरिगृहीतः, शरीराभ्यन्तरचारी मनःसहचर इति यावत्। तस्मिन् विकृतं स्वभावसिद्धात् [7]तिर्यक्पवनादन्यादृशं कर्म ऊर्ध्वगतिलक्षणम्; तस्य दर्शनादिति व्याप्तिग्राहकं प्रमाणमुक्तम्। **भस्त्राध्मापयिते**ति दृष्टान्तः। प्रयोगस्त्वेवम् 'जीवच्छरीरं भोक्तृप्रयत्नवदधिष्ठितम्, [8]सम्मूर्च्छनाभावे सति विकृतक्रियपवनाश्रयत्वाद् भस्त्रादिवद्' इति। अथवा 'प्रा[9]णाख्यो वायुर्भोक्तृप्रयत्नवत्प्रेरितः, असति मूर्च्छने विकृतक्रियावायुत्वात्, भस्त्रावायुवत्'।

---

1 दुपदर्शी–दे। 2 पाठोऽयं 'जे' दे पुस्तकयोर्नास्ति। 3 आत्महेतु–क। 4 परबुद्धि–क। 5 एवं प्रवृत्तिनिवृत्ती–कि। 6 अस्य–जे। 7 तिर्यग्गमना°–कि, क। 8 सम्मूर्च्छनाद्यभावे–क। 9 पार्थिवो–जे; शारीरो–पा. ४. पु. क।

लिङ्गान्तरं विवृणोति—**निमेषे**ति । अक्षिपक्ष्मणोः संयोगहेतुः कर्म निमेषः, विभागहेतुरुन्मेषः, तेनापि प्रयत्नवाननुमीयते । नन्वेतद्वायुविकारजनितेन नयनस्पन्देनानैकान्तिकमत आह— **नियतेने**ति । [1]दृष्टनियमेन यादृङ्निमेषोन्मेषकर्म प्रयत्नवदन्वयव्यतिरेकानुविधायि दृष्टं दृष्टान्तेन तादृशेनेत्यर्थः । अत्र किमिदं तादृशत्वम्? इच्छापूर्वकत्वमिति चेत्; न, तस्या अप्यसिद्धतया साध्यत्वात् । हिताहितप्राप्तिपरिहारार्थत्वस्य विवक्षितत्वात्, इति चेत्, न, प्रवृत्तिनिवृत्तिभ्यामेव गतार्थत्वात्; सत्यम्, प्रपञ्चार्थमयमुपन्यासः । अत्रापि प्रयोगः, 'जीवच्छरीरं भोक्तृप्रयत्नवदधिष्ठितम्, विशिष्टनिमेषोन्मेषक्रियावत्त्वात् दारुयन्त्रवत्' । 'विशिष्टं वा निमेषोन्मेषकर्म प्रयत्नपूर्वकम्, विशिष्टनिमेषोन्मेषकर्मत्वात् दारुयन्त्रनिमेषोन्मेषकर्मवत् ।

जीवनलिङ्गकमनुमानमाह—**देहस्ये**ति । वृद्धिरवयवोपचयः, भग्नक्षतयोर्विघटितविश्लिष्टयोरस्थिच[2]र्ममांसभागयोः । संरोहणं पुनः सङ्घटनम्, तयोर्निमित्ततयाऽधिष्ठाताऽनुमीयते; 'शरीरावयववृद्धिक्षतभग्नसंरोहणे प्रयत्नवन्निमित्तके, वृद्धित्वात् संरोहणत्वाच्च, गृहकुड्यवृद्धिवत्तत्संरोहणवच्चेति' । सूत्रे च 'जीवन'शब्दो जीवनकार्ये वृद्धिसंरोहणे लक्षयति । मुख्यतया हि स्वकर्मोपार्जितशरीरावच्छिन्नेनात्मना मनः संयोगो जीवनमिति । क्वचित्संरोहणादि इत्यादिपदं श्रूयते, तेनाहारोपादानमलोत्सर्गौ गृह्येते । तथाहि 'जीवच्छरीरं भोक्तृप्रयत्नवदधिष्ठितम्, अभिमतानभिमतोपादानोत्सर्गवत्त्वात्, यन्त्रधारागृहवदिति' । न चैतद् वृक्षादिगतवृद्ध्यादिनाऽनैकान्तिकम्, तत्रापि भोक्तृवि[4]शेषाधिष्ठानस्येष्टत्वात् ।

लिङ्गान्तरमाह—**अभिमते**ति । अभिमतो विषयो रूपादिः, तद्ग्राहकं करणं चक्षुरादि, तेन संयोगः सम्बन्धः, तस्य निमित्तं कारणं यन्मनः कर्म, तेनाऽऽत्मानुमीयते । गृहकोणेषु व्यवस्थितो गृहकोणव्यवस्थितः, तमेव पेलकमुद्दिश्य, पेलकस्य जतुगुलकस्य प्रेरको दारको बालक इवेति । अयमाशयः, प्रयत्नज्ञानायौगपद्यान्मनस्तावत् प्रतिशरीरमेकमणु गतिमच्चेति सिद्धम्; तत्पक्षयित्वेदमुच्यते । 'मनः प्रयत्नवदधिष्ठितम्, गुरुत्वद्रवत्वादिकारणान्तराभावे सति गतिमत्त्वाद्, दारकप्रेरितपेलकवदिति' । अदृष्टोपग्रहादेव तत्र क्रिया स्याद् इति चेत्, [5]न, क्वचिदेवमपि । यद्यपि चैवमध्यात्मसिद्धिस्तथाऽपि 'अभिमतेत्यादिना इच्छानुविधायिनः कर्मणो लिङ्गत्वेन विवक्षितत्वात् प्रयत्नवदधिष्ठातृसिद्धिः । यद्यपि च ज्ञातमिच्छया विषयीक्रियते, इच्छाविषयश्च प्रयत्नस्य विषयः स्यात्, मनस्त्वतीन्द्रियं सद्ज्ञातं

---

1 'दृष्ट' इति 'क' पुस्तके नास्ति । 2 चर्म—कि । 3 वृक्षादिना—क । 4 विशेषनिष्ठ—क । 5 'न' कि पुस्तके नास्ति ।

कथमेवं भविष्यतीति; तथापि स्पर्शनेन्द्रियेण रसमलधातुदोषवहनाडीवत् मनोवहानां नाडीनामुपलम्भात् तद्गोचराविच्छाप्रयत्नावदूरविप्रकर्षेण तदपि [1]व्याप्नुत इत्युच्यते अदृष्टस्य नियामकत्वाच्चेति। तत्रैव तदा तत्प्रत्यक्षम्। न हि जलाद्यभ्यवहरणहेतवो मलाद्युत्सर्गनहेतवो वा नाड्यश्चक्षुषोपलभ्यन्ते। न वा तद्विषयेच्छा; न च प्रयत्नः; अनाद्यभ्यासवासनावशाददृष्टविशेषनियतं तु स्पार्शनप्रत्यक्षमेव तत्र कारणमेषितव्यम्, तथा प्रकृतेऽपीति।

इन्द्रियान्तरविकारं विवृणोति—**नयनेति**। नयनस्य चक्षुषो विषयश्चिरबिल्वा[2]दिरूपः, तस्यालोचनं ग्रहणम्, तदनन्तरं रसस्यानुस्मृतिः, तदनन्तरं व्याप्त्यनुस्मृतिः तदनन्तरं तथाविधरसानुमानम्, इत्यनेन क्रमेणेन्द्रियान्तरस्य रसनस्य विकारो दन्तोदकसम्प्लवलक्षणः, तस्य दर्शनादुभयदर्शी अनुमीयते। उभाभ्यामुभयं द्रष्टुं शीलमस्येत्युभयदर्शी; 'अनेकगवाक्षान्तर्गतप्रेक्षकवद्' इति दृष्टान्तः। प्रयोगस्तु 'नयनादीन्द्रियमचेतनम्, नियतविषयत्वात् गवाक्षवत्'। यद्वा 'चेतनो नियतविषयेभ्यो भिद्यते, प्रतिसन्धातृत्वात् प्राक् प्र[3]त्यग्गवाक्षदर्शी वद्' इति। अन्यथा अन्येन दृष्टस्यान्येनास्मरणात् प्रतिसन्धानानुपपत्ताविच्छानुपपत्तेर्विकारानुपपत्तिः कारणाभावादिति भावः।

ननु भस्त्रादिषु सर्वत्र प्रयत्नवानधिष्ठाता शरीरी उपलब्धः, तथा च यथा सिद्धदृष्टान्तबलेन विग्रहस्यापि तथाभूत एवाधिष्ठातानुमातुमुचितः। अनवस्थाभयान्नैवमिति चेत्, तर्हि विग्रह एव प्रयत्नवानस्तु, कृतं ततोऽप्यधिकेनाधिष्ठात्रेति; न, प्रतिसन्धातुस्तथाभावात्, शरीरस्य च भेदेन तथाभावानुपपत्तेः; भूतत्वकार्यत्वादिना च प्रागेव तस्य चैतन्यप्रतिषेधात्, प्रतिषेत्स्यमानत्वाच्चेति।

(७९) सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते। ते च न शरीरेन्द्रियगुणाः, कस्मात्? [4]अहङ्कारेणैकवा[5]क्यताभावात् प्रदेशवृत्तित्वादयावद्द्रव्यभावित्वाद् बाह्येन्द्रियप्रत्यक्षत्वाच्च। तथा 'अहम्' श[6]ब्देनापि पृथिव्यादिशब्दव्यतिरेकादिति॥

एवं कार्येण कारणमनुमाय गुणैर्गुणिनमनुमिनोति—सुखेति। तथाहि 'सुखादयो द्रव्याश्रिताः, गुणत्वाद् रूपवद्' इति प्रयोगः। अनाश्रितत्वे द्रव्यादन्यत्राश्रितत्वे वा

---

1 प्राप्नुत–पा. ३. पु। 2 बिल्वरूपः–कि। 3 प्रत्येकगवाक्ष–पा. ३. पु। 4 अहङ्कारेण सह–जे। 5 वाक्यत्वाभावात् व्यो. (४०६)। 6 शब्देन–जे।

गुणत्वव्याघातात् सिद्धं च गुणत्वमेषाम्; 'कार्यत्वे सत्यव्यापकत्वे सति वा एकेन्द्रिय-ग्राह्यत्वाद्रूपवत् शब्दश्च । कार्यस्य द्रव्यत्वे निरवयवत्वामूर्तत्वव्याघातात्, कर्मत्वे संयोगविभागानपेक्षकारणत्वप्रसङ्गात्, सामान्यादित्वे स्वलक्षणव्याघाताद्' इत्यादयस्तर्काः ऊहनीयाः ।

ननु भवत्वमीषां गुण[1]त्वाद्द्रव्याश्रितत्वम्, तथापि शरीराश्रितत्वमिन्द्रियाश्रितत्वं वा भविष्यतीत्याह—**ते चेति** । '**कस्माद्**' इति शिष्याकाङ्क्षायाम् । [2]हेतुमाह—**अहङ्कारेणैकवाक्यताभावादिति** । सामानाधिकरण्येना[3]वबोधादित्यर्थः । योऽहं सुखसाधनं स्रक्चन्दनादिकमुपलभ्य तदुपादित्सुः प्रयतमानस्तदुपात्तवान् सोऽहं सुखी, योऽहं दुःखसाधनमहिकण्टकादिकमुपलभ्यापि न परिहृतवान् सोऽहं दुःखी । योऽहं सुखं दुःखं वानुभूतवानस्मि सोऽहं त[4]त्साधनमिदानीमुपलभ्याऽऽदातुमिच्छामि द्वेष्मि, वा इत्यनेन क्रमेण प्रतिसन्धीयमानाः खल्विमे गुणाः दुःखसुखादयोऽ[5]नुमीयन्ते । इदं च प्रतिसन्धीयमानत्व-ममीषामनेकाश्रयतया विरुध्यते, चैत्रमैत्रादिसुखादिषु प्रतिसन्धानादर्शनात् । तथा च शरीरेन्द्रियाणामपि प्रत्यहं परिणतिभेदेन भिन्नत्वात् तद्गुणानाममीषामप्रतिसन्धानप्रसङ्गः; भिन्नाश्रयाणामपि च प्रतिसन्धाने चैत्रमैत्रादिगुणानामपि प्रतिसन्धानापत्तिः ।

ननु शरीरगुणा अपि प्रतिसन्धीयन्त एव, तद्यथा 'योऽहं गौरः स्थूलो ह्रस्व आसं सोऽहमिदानीं श्यामः कृशो दीर्घः' इति । न, तस्य भ्रान्तत्वात् । प्रकृतमपि प्रतिसन्धानं भ्रान्तमेव भविष्यति किं नश्छिन्नमिति चेत्; न, स्मर्तुरभ्रान्तेः, अन्येन दृष्टस्य चान्येना-स्मरणात् । अन्यथा अतिप्रसङ्गात् । तस्मात् प्रतिसन्धातुर्देहादिभ्योऽन्यत्वे सिद्धे तदधिकरणत्वे च सुखादीनामनुभूयमाने प्रयोगः । 'सुखादयो न शरीरेन्द्रियगुणाः, अहङ्कारेण समानाधि-करणत्वात् स्मृतिवद्' इति ।

स्यादेतत्, प्रतिसन्धानबलेन स्मृतिबुद्ध्योर्देहाद्यनधिकरणत्वं सिद्ध्यतु, देहादीनां भेदेन प्रतिसन्धातुं स्मर्तुं चासमर्थत्वात् । सुखादयस्तु गौरत्वादिवद् देहधर्मा एव भ्रान्तिवशा-दहङ्कारेण समानाधिकरणतया प्रतिसन्धास्यन्त इति चेत्; न, ज्ञानेनभिन्नाधिकरणानां कार्यकारणभावनियमानुपपत्तेः । नह्यन्यो जानात्यन्य इच्छति अन्यः प्रयतत इति सम्भवति, तथात्वे च चैत्रे द्रष्टरि मैत्रे चैषितरि जैत्रो यतते, तस्मा[6]दैकाधिकरण्येनैवामीषा कार्यकारण-भावनियमो नान्यथेति ।

---

1 द्रव्याश्रितत्वाद् गुणत्वम्–क । 2 हेतूनाह–पा. ३. पु । 3 नाविरोधादित्यर्थः–जे; क । 4 'तत्साधनमहिकण्टकाद्युपलभ्यापि न परिहृतवान्' इदानीम्–जे । 5 ऽनुभूयन्ते–जे, क । 6 तस्मादन्याधि–क ।

हेत्वन्तरमाह—**प्रदेशवृत्तित्वादिति** । देहाद्यव्यापकत्वादित्यर्थः । प्रयोगस्तु 'सु[1]खादयो न स्पर्शवद्विशेषगुणाः, तदव्यापकत्वात्' 'ये पुनस्तद्विशेषगुणास्ते तद्व्यापकाः, यथा रूपादयः' इति व्यतिरेकः । 'तत्संयोगवद्' इत्यन्वयः ।

हेत्वन्तरमाह—**अयावद्द्रव्यभावित्वादिति** । सत्येव स्पर्शवति द्रव्ये निवर्तमानत्वादित्यर्थः । ये पुनः स्प[2]र्शवद्विशेषगुणास्ते यावद्द्रव्यभाविनो भवन्ति, यथा रूपादय इति व्यतिरेकः । संयोगवदिति वा पूर्ववदन्वयः । अनयोस्तर्कः, 'यदि सुखादयः स्पर्शवद्विशेषगुणा भवेयुः, न नियतबुद्धिकार्या भवेयुः, नियामकाभावात्'; विषयविषयीभावस्य नियामकत्वे [3]चैत्रस्य बुद्ध्या मैत्रविषयिण्या मैत्रसमवेतस्य सुखादेरुत्पादनप्रसङ्गादिति ।

स्यादेतत्; तथापि ताभ्यां हेतुभ्यामिन्द्रियगुणत्वममीषां न निषिद्धम्, शब्देन व्यभिचारात् । न हि शब्दो [4]यावद्द्रव्यभावी, नापि श्रोत्रं व्याप्य वर्तते, निमित्ताभिमुख्येन तत्सन्निधिमपेक्ष्योत्पत्तेः । → या[5]वति गगने पवनसम्बन्धः, तावत्येव शब्दो जन्यते नान्यत्र ← । अन्यथा 'प्राच्यां शब्दः' 'प्रतीच्यां शब्दः' इति देशावच्छेदेन प्रत्यक्षा[6]नुपपत्तिरित्याशङ्क्य हेत्वन्तरमाह—**बाह्येन्द्रियाप्रत्यक्षत्वादिति** । मानसप्रत्यक्षत्वादित्यर्थः । 'न शरीरेन्द्रियगुणा इच्छादयः, मानसप्रत्यक्षत्वाद् बुद्धिवत्' ज्ञानवैयधिकरण्येऽमीषामप्रत्यक्षत्वप्रसङ्गः । [7]तथापि प्र[8]त्यक्षत्वे चैत्रेण मैत्रसमवेतानाममीषा[9]मिच्छादीनामुपलम्भापत्तिः गुणानाममीषां चक्षुरादिग्राह्यत्वेनान्धादिभिरनुपलम्भप्रसङ्गः । मनोग्राह्यत्वे च तद्धर्माणामन्धादिभिरपि रूपाद्युपलम्भापत्तिः; इन्द्रियसामर्थ्यनियमात् रूपरसादिवद् विषयनियमो भविष्यतीति चेत्; न; मनसः सर्वविषयत्वात्, नियतबाह्यविषयत्वे च मनस्त्वव्याघातादिति । 'अहं युवा, कामी, यते, सुखी, दुःखी वा', 'स्पर्शनसुखो वायुः', 'कर्णे कटु रटति', 'मनो मे दुःखितम्', 'मनसि मे हर्षः', 'पादे मे सुखम्', 'शिरसि मे वेदना' इत्यादिप्रत्ययात् । शरीरेन्द्रियगुणत्वममीषां शङ्कास्पदमिति तदेव प्रतिषिद्धम्, अन्यगुणत्वे तु शङ्कैव नास्तीत्युपेक्षितान् ।

सम्प्रति पूर्वहेतूनां चेष्टादीनां 'रथकर्मणा सारथिवद्' इत्यादि-दृष्टान्तेषु विशेषविरोधा[10]भासपरिहाराय 'प्रत्यक्षसिद्धं पृथिव्याद्यतिरिक्तं स्वात्मानमेव दर्शयिष्यामः'

---

1 बुद्ध्यादयो–कि । 2 पुनस्तद्विशेषगुणा–पा. ३. पु । 3 चैत्रमैत्रविषयिण्या–क । 4 यावद्द्रव्यं भवति–पा. ३; पा. ४. पु । 5 → ← एतच्चिह्नान्तर्गतः पाठो 'जे' पुस्तके नास्ति । 6 प्रत्ययानुपपत्तेः–पा. ३. पु । 7 तथात्वे–पा. ३. पु । 8 चाक्षुषत्वे–जे । 9 सुखादीनां 'क' 10 विरोधपरिहाराय–पा. ३. पु ।

इत्य[1]भिसन्धाय प्रत्यक्षमाह—**तथाहं शब्देनेति**। 'अहं 'शब्देन प्रत्यक्षमुपलक्षयति। यथा [2]परात्मानुऽमीयते तथा प्रत्यक्षतोप्यहं प्रत्ययेनात्मा विषयीक्रियत इत्यर्थः। नह्ययमहं प्रत्ययो लिङ्गजः शब्दजो वा, तदनुसन्धानमन्तरेणोपजायमानत्वात्। ननु च पृथिव्यादिविषय एवायमहं प्रत्ययो भविष्यतीत्याशङ्क्य तर्कमाह—**पृथिव्यादिशब्दव्यतिरेकादिति** पृथिव्यादिप्रत्ययवैयधिकरण्यादित्यर्थः। " यदि ह्ययमहं प्रत्ययः पृथिव्यादौ भवेत्, 'अहं पृथिवी' 'अहमापः' इत्याद्याकारो भवेत् द्रव्यप्रत्ययवत् " न चैवम्।

स्यादेतद् सामान्यतो माभूत् विशेषतस्तुभविष्यति तथा कश्चित्पार्थिवो गोघटादिर्नतु सर्वः, तथा कश्चित् पार्थिवो 'अहं मैत्रेयः' [3]इति को विरोधः? न; अहङ्कारस्य प्रतिसन्धातृविषयत्वात्, शरीरस्य च भेदेनाप्रतिस[4]न्धातृत्वादित्युक्तत्वात्। तन्मूलाः परमाणवः स्थिरत्वात् प्रतिसन्धातृत्वेनाहङ्कारविषया भविष्यन्तीति चेत्, न; तेषामतीन्द्रियत्वात्। अपि च शरीरगोचरत्वे तस्य बाह्येन्द्रियजन्यत्वमापद्येत। तथा च चक्षुरादिव्यापारोपरमे अहमिति प्रत्ययो न स्यात्। मानसत्वे वाऽस्य शरीरस्य तद्गुणानां च गौरत्वादीनामपि मानसत्वप्रसङ्गात्। न हि निर्गुणं द्रव्यमुपलभ्यते, तथा चान्धादीनां रूपादिवदहं प्रत्ययानुपपत्तिरिति। तस्मात्परमार्थतः सामान्यतो विशेषतश्च सकलपृथिव्यादिप्रत्ययव्यतिरेकादहंप्रत्ययस्तदतिरिक्तं द्रव्यमालम्भते। तथा चेष्टादीनां हेतूनामात्मकार्यत्वे सिद्धे, परत्रापि ततस्तत्सिद्धेः। रथवदित्यादौ मच्छरीरवदित्यादिविपरिणामेनोदाहरणस्य निरुपद्रवत्वादिति सर्वमवदातम्।

तदेतद्**द्वैनाशिकै**रुपहस्यते। बुद्धेर्हि कार्यस्य यद्युपादानकारणमात्मा। विवक्षितः, स एव नो बुद्ध्यन्तरम्। अथ सुखादीनां गुणानामाश्रयो द्रव्यम्, तदपि प्रक्रियामात्रम्, क्षणिकत्वसिद्धावस्य **षट्पदार्थी**काव्यस्य बाललालनार्थत्वात्।

तथा हि 'यत् सत् तत् क्षणिकम्, यथा घटः' संश्च विवादाध्यासितः शब्दादिरिति। सत्त्वं तावद्यत्किञ्चिदस्तु, [5]प्रकृते तावदर्थक्रियाकारित्वं **बौद्धस्य** विवक्षितम्, तच्च भावानां प्रत्यक्षसिद्धं व्याप्तं च क्रमयौगपद्याभ्याम्। न हि क्रमाक्रमाभ्यामन्यः प्रकारः शङ्कितुमपि शक्यते, व्याघातस्योत्कटत्वात्। न क्रम इति निषेधादेव क्रमाभ्युपगमात्, नाक्रम इति निषेधादेवाक्रमोपगमात्। [6]अनभ्युपगमे च प्रति[7]क्षेपो व्याहन्यत इति। तौ च क्रमाक्रमौ स्थिरे न सम्भवन्तौ अर्थक्रियामपि ततो व्यावर्त्तयतः। वर्तमानार्थक्रियाकरणकाले

---

1 दृष्टान्तयिष्याम इति प्रतिसन्धाय—पा. १. पु। 2 परमात्मा—पा. १. पु। 3 इह—कि। 4 सन्धातृत्वमुक्तक्रमेण तन्मूलपरमाणवः क। 5 प्रस्तुते सत्त्वं 'क'। 6 अभ्युपगमे—जे। 7 प्रतिषेधो—क।

हि अतीतानागतयोरप्यर्थक्रिययोः समर्थत्वे तयोरपि [1]करणत्वप्रसङ्गात्। असमर्थत्वे तु पूर्वापरकालयोरप्यकरणापत्तेः। समर्थोऽप्यपेक्षणीयासन्निधेर्नकरोति, तत्सन्निधेस्तु करोतीति चेत्; अथ किमर्थं सहकारिणामपेक्षा? किं स्वरूपलाभार्थम्? उतोपकारार्थम्? अथ कार्यार्थं वा? न प्रथमः, स्वरूपस्य स्वकारणाधीनस्य [2]नित्यस्य वाऽनित्यस्य पूर्वसिद्धत्वात्। न द्वितीयः, स्वयं सामर्थ्ये वा तस्यानुपयोगात्। सामर्थ्ये हि स्वयमेव कार्यं कुर्यात् किं तेन? असामर्थ्ये तूपकारसहस्रेणापि न कुर्यात् तथापि किं तेन? अत एव न तृतीयः, स्वयं सामर्थ्ये उपकारिवत् सहकारिणामप्यनुपयोगादिति। अनेकाधीनस्वभावतया कार्यमेवापेक्षत इति चेत्; न, तस्यास्वतन्त्रत्वात्। स्वातन्त्र्ये वा कार्यत्वव्याघातात्। तद्धि तत्साकल्येऽपि स्वातन्त्र्यादेव न भवेदिति।

अथ केयमपेक्षा नाम? किं तैः सहकरोतित्यन्वयः पर्यवसन्नः स्वभावभेदः? अथ तैर्विना न करोतीति व्यतिरेकनिष्ठं स्वरूपमेव? आहोश्वित् तैरुपकृतः करोतीत्युपकारभेदः? न प्रथमः, स्वभावस्य तादवस्थ्यात्; नह्यस्य सहकारिव्यावृत्तौ स्वभावव्यावृत्तिः। ननु यत एव सहकारिव्यावृत्तावस्य स्वभावो न व्यावर्तते, अत एव तैर्विना न करोति, कुर्वाणो हि तैः सहैव करोतीति स्वभावं जह्यात्। स तर्हि स्वभावभेदः सहकारिसाहित्ये सति कार्यकारणनियतः सहकारिणो न जह्यात्; प्रत्युत पलायमानानपि गले [3]पाशेन बध्वाऽऽकृष्याऽनयेत्, अन्यथा स्वभावहानिप्रसङ्गात्। अत एव न द्वितीयः, अकर्तृस्वभावापरावृत्तेः। अथ तद्विरहादकर्तृस्वभावः स्यात्, कालान्तरेऽपि स्वभावहेतुवशादुपसर्पतोऽपि सहकारिणः [4]पराणुद्य न कुर्यात्। तद्विरहाकर्तृशीलः खल्वयमिति। अथ सहकारिषु सत्सु कर्तृस्वभावः, तद्विरहे त्वकर्तृरूप इत्यभिप्रायः, विरुद्धधर्माध्यासस्तर्हि स्वभावं भिन्द्यात्; न चायं कालभेदेन परिहर्तव्यः, धर्मिणोऽनतिरेकात्; अतिरेके चास्यौदासीन्यापत्तेः। तथाहि सामर्थ्यासामर्थ्याभ्यामन्यो धर्मी स्वरूपेण न किञ्चिदेव स्यादिति। उपकारपक्षस्तु अनेक[5]मुख्यनवस्थादुःस्थतया नोपन्यासस्यापि योग्यः। तथाहि उपकारेऽपि कर्तव्ये सहकार्यान्तरापेक्षायामुपकारपरम्परापात इत्येका, उपकारेणाप्युकर्तव्यमित्यु[6]पकारपरम्परापात इत्यपरा; कर्तव्यस्य चोपकारस्य धर्म्यभेदे धर्म्येव क्रियेत, भिन्ने नु धर्मिणः किमायातम्? नह्यस्मिन् जाते नष्टे वाऽन्यस्य स्वरूपं किञ्चिद् भवति, अतिप्रसङ्गात्। अथ तेनापि [7]तस्य किञ्चिदुपकारान्तरमाधेयमिति तृतीयाऽ[8]नवस्था।

---

1 करणप्रसङ्गात्—कि। 2 अन्त्यस्य वा—क। 3 पाशादिनाऽऽकृष्य—क, बद्ध्वाऽनयेत् कि। 4 परमाणुवत्—क। 5 मुखा—क। 6 तत्परम्परा—क। 7, 8 तस्य...अनवस्था इति पदद्वयं ‘क’ पुस्तके नास्ति।

स्यादेतत्; क्षणिकोऽपि भावः किं निरपेक्षः सापेक्षो वा? न प्रथमः; केवलाद्ध[1]त्सरसहस्रेणापि कार्यस्यानुत्पत्तेः। न द्वितीयः; अनुपकारापेक्षायामतिप्रसङ्गात्। उ[2]पकारापेक्षायां च पूर्ववदनेकमुखानवस्थापातात्; तथा च पुञ्जात् पुञ्जोत्पत्तौ बीजमपि पवनपाथतेजोङ्कुरान् करोतीति पक्षे किं येनैव स्वभावेनाङ्कुरं क[3]रोति तेनैव पवनादीनन्येव वा? न प्रथमः; कार्याणामभेदप्रसङ्गात्। न द्वितीयः एकस्यापि क्षणिकस्य स्वभावभे[4]दापत्तेरिति।

तदिदमशिक्षितोत्त्रासनम्। साहित्यकरणलक्षणायां ह्यपेक्षायां क्षणिकस्य सापेक्षत्वादेव समर्थस्य सहकार्यव्यभिचारात्। अन्यथा तु निरपेक्षत्वमेव, तैर्विनाऽस्याऽसत्वात्, सहकार्यनुपकार्यत्वाच्च स्थिरस्वभावस्तैर्विनाप्यस्तीति समर्थः किं न कुर्यादिति विशेषः। एकस्यैवानेककार्यकारिस्वभावस्य स्वकारणादुत्पत्तेः। कार्यभेदेन स्वभावभेदापादनस्यापि दूरनिरसनात्। न च स्थैर्येऽप्येष न्यायः सम्भवति तदुत्पत्तेरनन्तरमेव कार्यकारणप्रसङ्गात्; तदैव तस्य तत्स्वभावत्वादिति। एतेनैकजातीयतैकदेशप्रसङ्गावपि निरस्तौ वेदितव्यौ।

तस्माच्च क्रमयौगपद्ययोर्व्यापिकयोर्व्यावृत्तेरक्षणिकाद् व्यावर्तमानाऽर्थक्रिया क्षणिके विश्राम्यतीति प्रतिबन्धसिद्धिः। अन्वयेन वा यद्विरूद्धधर्माध्यस्तं तन्नाना, यथा शीतोष्णे; कालभेदेन विरूद्धधर्माध्यस्तश्च विवादास्पदीभूतो भावः। न चायमसिद्धः, सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्ययसिद्धत्वात्। तथाहि यद्यदा यज्जननसमर्थं तत् तदा तत्करोत्येव, यथा सामग्री स्वकार्यम्। समर्थश्चाऽयं भावः; वर्तमानार्थक्रियाकरणकालेऽतीताऽनागतयोरप्यर्थक्रिययोरतिप्रसङ्गः। स्वभावहेतुः सामर्थ्यमात्रानुविधायित्वात् अर्थक्रियाकारित्वस्य। यद्यदा यन्न करोति तत्तदा तत्र न समर्थम्; यथा शिलाशकलमङ्कुरे। न चैष करोति, वर्तमानार्थक्रियाकरणकालेऽतीताऽनागते अप्यर्थक्रिये इति व्यापकाऽनुपलब्धिः प्रसङ्गविपर्यय इति॥

अत्र संङ्क्षेपतः किञ्चिदुच्यते। सत्त्वं तावदसिद्धव्याप्तिकतया [5]व्याप्यत्वासिद्धम्; असिद्धप्रभेदोऽस्माकम्। सन्दिग्धविपक्षव्यावृत्तिकतया सन्धिग्धानैकान्तिकप्रभेदो **बौद्धस्य**। नहि कुर्वद्रूपत्वाक्षेपकरणधर्मत्वोत्पत्त्यनन्तरकारित्वादिशब्दवाच्यादन्यादृशं सामर्थ्यमुपादाय प्रसङ्गाद्यवकाशः। तथाभूतं च सन्दिह्यते, न ह्येवंभूतत्वे भावस्य प्रत्यक्षमनुमानं वा सम्भवति। सहकारिषु सत्सु करोति तैर्विना न करोतीत्ययमस्य स्वभावो दर्शनानतिक्रमेणाभ्युपगम्यते, अविरोधादुभयवादिसिद्धत्वाच्च। [6]त्वयापि ह्येतदवश्यमभ्युपगमनीयम्। क्ष[7]णिकोऽपि हि

1 वर्षशतेनाऽपि–क। 2 पाठोऽयं मु. कि. पुस्तके नास्ति। 3 जनयति–क। 4 भेदोपपत्तेः–क। 5 व्याप्यत्वासिद्धप्रभेदोऽयम्–क। 6 त्वया ह्येत–कि। 7 क्षणिकोऽपि भाव–कि। क्षणिकत्वेऽपि–क।

भावः कुर्वद्रूपः सहकारिषु सत्स्वेव सह[1]कारिभिः सहैव करोतीति नियतस्वभावः, अन्यथा सहकारिणामसहकारित्वप्रसङ्गात्। ततोऽन्वयनियमे तैर्विना न करोतीति व्यतिरेकोऽप्य-वर्जनीयः। अन्वयव्यतिरेकयोरन्यतरनियमस्यान्तरसिद्धिनान्तरीयकत्वादिति **बौद्ध**-स्थितेः। तथा च तैर्विना कृतस्य करणमापाद्यमानमापादकमेव व्याहन्तीति।

नन्वत्रोक्तं तैः सहैव करोतीति स्वभावाभ्युपगमे सहकारिणो न जह्यात्; प्रत्युत पलायमानमपि गले पाशेन बद्ध्वावाऽऽकृष्यानयेदिति सत्यमुक्तम्। आत्मानमवीक्षमाणेन तत्प्रलपितम्, तवापि व्यतिरेकनियमे सहकारिणः स्वकारणादापततोऽपि निवार्य न कुर्यात्। तैर्विना न करोतीत्ययमस्य स्वभावः। अथ तैः सहैव करोतीत्ययमप्यस्य हि स्वभावः, एवं तर्हि विरोधः स्यात्।

स्यादेतत् स्वकारणाधीनसन्निधयः सहकारिणस्तेषामुपनयापनययोरयमनीश्वर एव, यद्युपनिबन्धनेनोच्यते। यदि सहकरिणो स्युः कुर्यादिति न[2] तु ते तदानीं न सन्तीति। तैर्विना तु समर्थो नास्त्येवभाव इति चेत्; नन्वस्माकमप्येवमस्तु। स्वकारणसन्निधीनां सहकारिणामुपनयापनययोरयमनीश्वर, एव, यद्युपनिबन्धनेन तूच्यते यदि सहकारिणः स्युः कुर्यात्, न तु ते तदानीं स[3]न्तीति। तैः सहैव करोति तैर्विना न करोतीत्येवायमस्य स्वभाव इत्यावयोः समोऽभ्युपगमः। किन्त्वयं विशेषः। तैः सहैव करोतीति योऽस्य स्वभावः स पश्चादस्ति नास्ति वा? प्रथमे पश्चादपि कुर्यात्। द्वितीये त्वस्मन्मतापात इति।

अथ तवापि मते तैः सहैव कुर्वतोऽस्य तैर्विना न करोतीति यः स्वभावः स यद्यस्ति तदा नु कुर्यादेव। नास्ति चेत्, व्यतिरेकव्यावृत्तावन्यव्यावृत्तिरिति स्वरूपहानि-प्रसङ्गः। स्वरूपमस्त्येव, तैर्विना भावमात्रं तु नास्तीति चेत्, ममाप्युत्तरकाले स्वरूपमस्ति, तत्साहित्यमात्रं तु नास्तीति समः समाधिः। तस्मात् सहकार्यन्वयव्यतिरेकोपलक्षित-मपेक्षितं च कार्येण स्वरूपमेव भावानां तादृशम्; तदेव सामर्थ्यपदार्थः; तदेव सहकार्य-न्वयमपेक्ष्य [4]कुर्वदित्युच्यते, तद्व्यतिरेकमपेक्ष्य न कु[5]र्वदिति युक्तमुत्पश्यामः॥

अथवाऽस्तु [6]समर्थोऽसमर्थश्च भावस्तथापि क्षणिकपक्ष इव कालभेदेनाविरोधादसिद्धो विरुद्धधर्माध्यासः। कथम्? यदा हि क्षणिको भावः स्वकालस्थ एव एकां कञ्चिदर्थक्रियां करोतीति तदा तामेवार्थक्रियां कालान्तरेऽपि किं न करोतीति परिभावय। असत्त्वादिति

1 सत्स्वेव सहैव–कि; कुर्वद्रूपः सहकारिभिः सहैव–क। 2 पाठोऽयं कि; जे पुस्तकयो-र्नास्ति। 3 सन्तीति स्यात्–कि। 4, 5 कुर्याद्–क। 6 समर्थः स्वभावः–क।

चेत्; किमत्रासत्त्वेन? नहि सत्त्वप्रयुक्तं [1]करणम्, तथा सति देशान्तरेऽपि कुर्यात्। तस्मात् तत्र काले देशे वाऽस्तु, मा भूत् यदि समर्थस्तदा कुर्यादेव। अत एव स्वप्नावसानिकं विज्ञानं प्रहराद्यन्तरितमपि प्रसुप्तस्य जागराद्यज्ञानमुत्पादयतीति **प्रज्ञाकरः**। असामर्थ्यादेव न करोतीति चेत्, तर्हि तामेवार्थक्रियां प्रति समर्थोऽसमर्थश्चेत्यापतितम्। को दोषः कालभेदादिति चेत्, स्थिरेऽप्येवमदोषोऽस्तु। असत्त्वमेवासामर्थ्यमिति चेत्, न; उक्तोत्तरत्वात्। सामर्थ्ये हि स्वकालस्थ एवान्यदा तामेवार्थक्रियां कुर्वाणो गीर्वाणशापेनापि नापह्नस्तयितुं शक्यते; किं पुनस्तवामुना मर्मपीडाजनित[2]विक्लवविक्रोशमात्रेण? असामर्थ्ये तदापि न कुर्यात्। किं च यस्य मते सत्त्वमधिकं नास्ति किन्तु स एव भावः, तदा कथं न विरूद्धधर्माध्यासः? एकस्य विधिनिषेधस्वभावानुपपत्तेः।

काऽनुपपत्तिः? साम्प्रतं यदयमस्ति कालान्तरे नास्तीति चेत्; सामर्थ्यासामर्थ्ययोरप्येवमस्तु। प्रथमं समर्थस्यासमर्थस्य वा पश्चात्स्वभावविपर्ययः कुत आगत इति चेत्; प्रथमं सतोऽसतो वा पश्चात् स्वभावविपर्ययः कुत इति च तुल्योऽनुयोगः। नाऽयं स्वभावविपर्ययः किन्तु स्वदेशकालस्थ एवान्यदेशकालयोरसद्व्यवहारकारी स्वकारणादेवायात इति चेत्; ममापि तामर्थक्रियां प्रति तदानीं समर्थ एवान्यदा न समर्थ इति स्वकारणादेवायात इति तुल्यम्। तस्मात् साऽर्थक्रिया तेन तदैव कर्तव्या नान्यदेति स्वभावनियमोऽप्युभयोर्दर्शनयोः समानः। अन्यदा तु न कर्तव्यैवेति क्षणिकपक्षे, अन्यदैव कर्तव्यैवेति स्थिरपक्ष इति विशेषः। न चान्यदाकरणतदातत्करणयोः कश्चिद्विरोधः, देशभेदेनार्थक्रियाभेदनियमवदुपपत्तेः। तस्माद्देशकालविषयभेदेन करणाकरणे सामर्थ्यासामर्थ्ये च विरूद्धे एव न भवत इत्यन्यो विरूद्धधर्मोऽनुसर्तव्यः। स यत्र नास्ति तत्र क्षणवदनवधेरपि गगनादेरभेदोऽध्यवसातव्य इति रहस्यम्। विस्तरस्तु **आत्मतत्त्वविवेके न्यायकुसुमाञ्जलौ** चानलसधियां सुलभ इति ॥

एवं स्थैर्यसिद्धौ न बुद्धिर्बुद्धेपरुपादानम्, गुणत्वात्। न च गुणगुणिनोरभेदो विरूद्धधर्माध्यासादिति संक्षेपतः सर्वं सुस्थम् ॥

(८०) **तस्य गुणा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः। आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः। धर्मा-**

1 कारणम्—क। 2 विरुद्ध—क।

धर्मावात्मान्तरगुणानाम[1]कारणत्ववचनात् । संस्कारः स्मृ[2]त्युत्पत्तौ कारणवचनात् । व्यवस्थावचनात् सङ्ख्या । पृथक्त्वमप्यत एव । [3]तथा चात्मेति वचनात् परममहत्परिमाणम् । सन्निकर्षजत्वात् सुखादीनां संयोगः । [4]तद्विनाशकत्वाद्विभाग इति ॥

स्यादेतत् किं सुखादय एवात्मनो गुणाः, [5]यदेतैरेव गुणैर्गुण्यनुमातव्यः ? न त्वेवम्, बुद्धयदृष्टादीनामगुणत्वेऽन्यगुणत्वे वा बहु विप्लवेत । सुखादीनामपि चात्मगुणत्वं न सिद्ध्येत्; संयोगाभावे तेषां तद्गुणानां कादाचित्कत्वानुपपत्तेरित्याशङ्क्याह—**तस्य गुणा** इति । तेषां प्रत्यक्षसिद्धत्वेऽपि गौरवात् **सूत्रकारा**नुमतिमाह **आत्मलिङ्गाधिकार** इति । प्राणादिसूत्रे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः । यद्यपि बुद्धिस्तत्र कण्ठरवेण नास्ति तथापि सुखादय एव स्वकारणतया तामाक्षिपन्ति । न ह्यन्यसमवेतया इष्टादिबुद्ध्याऽन्यस्य सुखादिकमुत्पाद्यते; तथात्वे देवदत्ते चन्दनस्पर्शमनुभवति यज्ञदत्तस्य सुखमुत्पद्येत । इन्द्रियान्तरविकाराच्चोभयदर्शित्वं विवक्षित्वा बुद्धिगुणत्वमात्मनो दर्शितमिति भावः ।

धर्माधर्मावात्मान्तरगुणानामकारणवचनादिति—विहितनिषिद्धाचरणेन धर्माधर्मौ जायेते । चिरध्वस्तस्य कर्मणः कालान्तरभाविफलहेतुत्वानुपपत्तेस्तौ कुत्र जायेतामित्यपेक्षायां सूत्रकारेणोक्तम् 'आत्मान्तरगुणानात्मान्तरगुणेष्वकारणत्वाद्' (वै. सू. ६-१-५) इति । अस्यार्थः—अन्यसमवेताभ्यां धर्माधर्माभ्यामन्यस्य सुखदुःखानुपपत्तेः । उत्पत्तौ च कृतहानाकृताभ्यागमप्रसङ्गात् । न चान्यसमवेतत्वेऽपि तत्कृतत्वेन नियमो भविष्यतीति वाच्यम्, ऋत्विगादिष्वपि प्रसङ्गात् । दृष्टप्रयोजनापेक्षित्वेऽपि तेषां कर्तृत्वात् । न हि दृष्टान्तापेक्षया तत्कर्तृत्वं कर्मणो निवर्तते । तदयं प्रमाणार्थः—'देवदत्तविशेषगुणप्रेरितभूतकार्यास्तदुपगृहीताश्च शरीरादयः, कार्यत्वे सति तद्भोगसाधनत्वाद् [6]गृहवद्' इति । जातेष्टिपितृयज्ञाभ्यामपि पुत्रपितृगामिफलसिद्धिः तदाश्रयापूर्वजननद्वारेणैवेत्यव्यभिचारः । अन्यकृतेन कर्मणाऽन्यत्रापूर्वोत्पत्तिरिति शास्त्रसिद्धमृत्विगादिवदिति तदेव धर्माधर्मावात्मगुणौ मुनेरनुमतौ ।

---

1 °मकारणवचनात्–जे; दे । 2 'स्मृत्युत्पत्तौ कारणवचनात्' इति दे पुस्तके नास्ति । 3 तथात्मवचनात् चात्मेति–त्वचात्मदे; वचनात् व्यो. (४१०) 4 तद्विनाशाद्–जे । 5 एभिरेव गुणी–क । 6 गृहादिवद्–जे ।

संस्कारे तदनुमतिमाह—**संस्कारः स्मृत्युत्पत्ताविति**। अनेन 'आत्ममनसोः [1]संयोगात् संस्काराच्च स्मृतिः' (वै. सू. ९-२-६) इति सूत्रं स्मारयति। न चान्यसंस्कारेणान्यत्रस्मृतिः, देवदत्तेनानुभूते यज्ञदत्तस्य स्मरणप्रसङ्गात्। अतोऽनुभवसमानाश्रयः संस्कारः सिद्ध इत्यर्थः।

व्यवस्थावचनात् सङ्ख्येति '[2]नानात्मानो व्यवस्थातः' (वै. सू. ३-२-२०) इति सूत्रं दर्शितम्। द्रव्यत्वेन सामान्यतः सङ्ख्यायां सिद्धायां किं पृथिव्यादिवद् बहुत्वमुताकाशादिवदेकत्वमेवेति नानात्वे दर्शिते तन्नातरीयकतया बहुत्वसङ्ख्या दर्शितेत्यर्थः।

अथ कोऽयं व्यवस्थानियमः? प्रथमस्तावत् कश्चित् संसरति कश्चिदप[3]वृक्त इति। यदि ह्येक एवाऽयमात्मा **शुकः प्रह्ला**दो वा मुक्त इति कोऽपरः संसरेत्। न चेयता कालेन [4]नापवृक्त एव कश्चित्, तथा सति नापवृज्येत च। नह्यनादौ संसारे यन्न वृत्तं तद्भत्स्यतीति सम्भवति, न च बन्धमोक्षावेकस्य सम्भवतः, विरोधात्।

अपरा च व्यवस्था, कश्चिदीश्वरः कश्चिदनीश्वर इति। न चेश्वरो नाम जगति नास्ति, तत्सद्भावे यत्नस्य कृतत्वात्। नाप्यस्मयादयः स्वात्मनि सार्वज्ञ्यं सर्वकर्तृत्वं वाऽवगच्छन्ति, उपदेशाद्यपेक्षत्वादिच्छाविघाताच्चेति।

अथान्या व्यवस्था, कश्चित्सुखी कश्चिद्दुःखीत्यादि। ननु 'पादे मे सुखम् पादान्तरे मे दुःखम्' 'शिरसि मे वेदना' इत्यादिवच्छारीरभेदेनैकस्यापि सुखदुःखे यदि स्याताम्, को दोषः? न ब्रूमः एकस्य सुखदुःखे न सम्भवतः, किन्तु 'योऽहं देवदत्तः सुखी' 'सोऽहं यज्ञदत्तः दुःखी' इति प्रतिसन्धानं [न] स्याद् इति ब्रूमः। अप्रतिसन्धानमपि शरीरभेदेनैवोपपत्स्यते, जन्मान्तरसुखादिवदिति चेत्, न, तत्र संस्कारस्यासत्त्वात्, अभिमवादनुद्भवाद्वा तदुपपत्तेः। न चैवमिहापि स्यात्, यज्ञदत्तवद् देवदत्तेनाप्यप्रतिसन्धानप्रसङ्गात्। अविद्यावशादात्मनोऽपि सुखादयो नात्मीयतया प्रतिसन्धीयन्त इति चेत्; न, यज्ञदत्तवद् देवदत्तेनाप्यात्मीयतया [5]तत् प्रतिपत्तिप्रसङ्गात्। परमविदुषेश्वरेणास्मदादिदुःखस्य स्वीयतया प्रतिसन्धानापत्तेश्च। एतेन जीवात्मनामियं व्यवस्था न तु परब्रह्मण इति निरस्तम्। यतो व्यवस्था तत एवात्मा तत्त्वतो भिन्न इति स्थितिः। परब्रह्मणि चेश्वरादन्यस्मिन् प्रमाणाभावात्। अनेकात्मत्वे ऐकात्म्यश्रुतिविरोध इत्यपि नास्ति; मुमुक्षुणा सर्वं विहा[6]य स्वात्मप्रतिष्ठेन भवितव्यम्; [7]स च एक एवेति तात्पर्यात् इति।

---

1 'संयोगविशेषात् संस्काराच्चानुस्मृति' इति कि. पुस्तके सूत्रपाठः। 2 'व्यवस्थातो नाना' इति सूत्रपाठः। 3 कश्चिदपवृज्यते कश्चिन्नेति–पा. ४. पु। 4 नापवृक्त इत्येव–जे। 5 °तयाऽप्रतिप्रसङ्गात्–कि। 6 विहायात्मप्रतिष्ठेन–पा. ४. पु। 7 न च–कि।

पृथक्त्वमप्यत एवेति—यतः सङ्ख्या तत्र सिद्धा, ततः पृथक्त्वमपि सङ्ख्यानुविधानात् तस्येत्यर्थः। द्रव्यत्वेन परिमा[1]णयोगे सिद्धे सत्याह—**तथा चात्मेति वचना**दिति। 'वि[2]भुत्वान्महानाकाशस्तथा चात्मा (वै. सू. ७-१-२२) इति सूत्रं स्मारयति विभुत्वाद् यथाकाशो महांस्तथा तत एव वैभवादात्माऽपि महानित्यर्थः। विभुत्वमेव तस्य कुत इति चेत्; न; तत्कार्यस्य ज्ञानसुखादेः सर्वत्र दर्शनात्। शरीरस्य गत्यैव तदुपपन्नमिति चेत्; न; अमूर्तत्वात्। एतदपि कुत इति चेत्, परमाणुत्वेऽप्रत्यक्षत्वप्रसङ्गात्, प्रत्यक्षगुणानधिकरणत्वप्रसङ्गाच्च। अवयवित्वेऽनित्यत्वप्रसङ्गात्, आदिमत्तया वीतराग[3]जन्मादर्शनानुपपत्तेश्चेति।

एवं सूत्रकारानुमतिप्रदर्शनच्छलेन बुद्ध्यादिषु परिमाणान्तेषु प्रमाणमादर्शितम्। सम्प्रति संयोगविभागवानात्मा द्रव्यत्वात् पृथिवीवदिति प्रमाणस्य तर्कमाह—**सन्निकर्षजत्वादिति**। सहकार्यान्तरनिरपेक्षस्यात्मनः सुखादिकारणत्वे तेषां सततोत्पत्तिप्रसङ्गात्। निमित्तमात्रापेक्षित्वेऽपि सर्वत्रोत्पत्तिप्रसङ्गात्। तथा च शरीरावच्छेदस्य च संयोगादन्यस्यानुपपत्तेः। एवं मनःसंयोगोऽसमवायिकारणत्वेन व्याख्यातः। अदृष्टवदात्मसंयोगश्च ज्वलनपवनादिक्रियाकरणत्वेन बोद्धव्यः। **तद्विनाशकत्वाद्विभाग** इति—यद्यात्मनि विभागो न स्यादुत्पन्नोऽपि संयोगो न विनश्येत, आश्रयनाशाभावादिति भावः॥

(८१) **म[4]नस्त्वयोगान्मनः। सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञा[5]नसुखादीनामभूत्वोत्पत्तिदर्शनात् करणान्तरमनुमीयते। श्रोत्राद्यव्या[6]पारे [7]स्मृत्युत्पत्तिदर्शनात् बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरभा[8]वात्॥**

मनस्त्वाभिसम्बन्धान्मन इति—मनस्त्वं नाम सामान्यविशेषः, तदभिसम्बन्धान्मन इतरेभ्यो भिद्यत इत्यर्थः। ननु मन एवासि[9]द्धं निमित्तं कुतो मनस्त्वमित्यत आह—**सत्यपि**ति। यद्यस्मिन् सति कार्यं कदाचिद्भवति तत् तस्मादतिरिक्तापेक्षम्, यथा सत्यपि तुर्यादिसन्निकर्षे कदाचिद्भवति परस्तदतिरिक्तकुविन्दाद्यपेक्षः; सत्यपि चात्मेन्द्रियार्थसन्निकर्षे कदाचिद् ज्ञानसुखादिकं भवति, तस्मात् तदतिरिक्तापेक्षम्, [10]यच्च

---

1 परिमाणयोगे सत्याह–कि। 2 'विभवात्' इति सूत्रे पाठः। 3 जन्मापत्तेश्च–क। 4 मनस्त्वाभिसम्बन्धान्मनः–कि; दे। 5 ज्ञानसुखदुःखानाम्–दे; जे, व्यो. (४२४)। 6 °व्यापारे च–जे। 7 स्मृतेरुत्पत्ति–दे। 8 भावाच्चान्तःकरणम्–कं कि; भावांचेति–दे। 9 एवासिद्धं कुतो–कि। 10 यश्च– कि।

तदपेक्षणीयं तदेव मन इत्यर्थः। अपेक्षणीयान्तराभावे सततं कार्योत्पादनप्रसङ्गात् व्यासङ्गेन चैतल्लक्षणीयम्। तथा च क्वचिद्यौगपद्याभिमानः शतपत्रस्य पत्रशतव्यतिभेदवदाशुभावादूहनीयः। अदृष्टमपेक्षणीयं भवतीति चेत्; न, तदितरकारणचक्रसाकल्ये तदसन्निधानानुपपत्तेः, तदसन्निधौ[1]तदितरसाकल्यानुपपत्तेरिति।

लिङ्गान्तरमाह—**श्रोत्राद्यी**ति। 'स्मृतिः शरीरावच्छिन्नात्मसंयुक्तद्रव्यसाध्या, कार्यत्वे सत्यात्मविशेषगुणत्वाद्, रूपादिज्ञानवत्', यत्तद्द्रव्यं तन्मनः; श्रोत्राद्यन्यतमं तद्भविष्यतीति चेत्; अत उक्तं श्रोत्राद्यव्यापार इति। अन्यथाऽसमवायिकारणाभावे तदनुत्पादप्रसङ्गात् विषयविप्रकर्षाच्च तद्व्यापारो परमो लक्षणीयः।

लिङ्गान्तरमाह—**बाह्ये**ति। 'सुखाद्युपलब्धिरिन्द्रियसाध्या, जन्यसाक्षात्कारत्वात् रूपाद्युपलब्धिवत्'। 'श्रोत्रादिकमेव तत्साधनं भविष्यतीत्याशङ्क्योक्तं बाह्येन्द्रियैः श्रोत्रादिभिरगृहीतेति। यदि बाह्येन्द्रियैः श्रोत्रादिभिः सुखादयो गृह्येरन्, अन्धबधिरादिभिर्नोपलभ्याः स्युरित्यर्थः। सुखादीनां बुद्धेरन्यत्वं बुद्धेरस्वयंवेद्यत्वं च वक्ष्यते।

(८२) **तस्य गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व[2]संस्काराः। प्रयत्नज्ञानायौगपद्यवचनात् प्रतिशरीरमेकत्वं सिद्धम्। पृथक्त्वमप्यत एव। तदभाववचनादणुपरिमाणम्। अपसर्पणोपसर्पणवचनात् संयोगविभागौ। मूर्तत्वात्परत्वापरत्वे संस्कारश्च। अस्पर्शवत्वाद् द्रव्यानारम्भकत्वम्। क्रियावत्त्वान्मू[3]र्तत्वम्। साधारणविग्रहवत्त्वप्रसङ्गाद[4]ज्ञम्। क[5]रणभावात् परार्थम्। गुणवत्त्वाद्द्रव्यम्। प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि चेति॥**

॥ [6]इति द्रव्यपदार्थः समाप्तः॥

एवं सिद्धे मनसि व्यतिभेदसिद्धौ सत्यां नियतकार्यतया मनस्त्वमपि भेत्स्यतीत्यभिप्रायवांस्तस्य गुणान् स्मारयति **त[7]स्ये**ति। यद्यपि द्रव्यत्वादेव सङ्ख्यादिपञ्चकं सिद्धं तथापि सूत्रकारानुमतिप्रदर्शनव्याजेन विशेषं विवक्षन्नाह—**प्रयत्ने**ति। अणुत्वे हि मनसो बहुत्वमर्थसिद्धम्, अन्यथैकस्मिन्नेकत्र वर्त्तमाने शरीरान्तरे तत्कार्यं ज्ञानादि न

1 प्रागपि–क। 2 संस्काराश्चेति–दे। 3 मूर्तम्–जे। 4 दज्ञत्वम्–मु. भा; व्यो (४२७)। 5 स्वयं करणभावात्–दे। 6 इति प्रशस्तपादभाष्ये द्रव्यपदार्थः–मु. भा; प्रशस्तकरीयभाष्ये–पा. ५. पु श्रीप्रशस्तदेवाचार्यविरचिते वैशेषिकभाष्ये–पा. ६. पु। 7 तस्य गुणानाह–तस्येति–पा. ३. पु; जे।

स्यात्। अतो बहुत्वे सत्येकस्मिन्नपि शरीरे तैर्बहुभिर्युगपद्ज्ञानोत्पत्तिप्रसङ्गस्तदवस्थः। तद्वरमेकमेव विभु तदस्तु इत्याशङ्क्य सूत्रकृतोक्तम् 'प्रयत्नज्ञानायौग[1]पद्यादेकं मनः' (वै. सू. ३-२-३) इति। एकैकस्मिन् शरीरे एकैकमेव मनः। प्रयत्नायौगपद्याद् ज्ञानायौगपद्याद्णुत्ववत् प्रतिशरीरमेकत्वमप्यनुमातव्यमित्यर्थः।

पृथक्त्वमप्यत एव—सङ्ख्यानुविधानादेवेत्यर्थः। तदभाववचनादणुपरिमाणम्, 'तदभावादणु मनः' (वै. सू. ७-१-२३) इति सूत्रकारवचनात्। तच्छब्देन पूर्वोक्तं वैभवं परामृशति, तेन विभवाभावादित्यर्थः। विभवाभावश्च ज्ञा[2]नाद्ययौगपद्यात्। विभवे ह्येकेन्द्रियग्राह्या इव नानेन्द्रियग्राह्या अपि रूपादयो विषयाः सकृदेव ज्ञायेरन् कारणयौगपद्यात्। एतेन स्पर्शशून्यत्वादयः परेषां विभुत्वे हेतवः कालात्ययापदिष्टा द्रष्टव्याः।

यद्येवमणु मनः कथं तर्हि द्वित्रिश्चिन्नानां गृहगोधादिशरीराणामुत्पतनापसर्पणादिचेष्टाविशेषाः? न ह्यविभुनैकेनानेकाधिष्ठानं सम्भवतीति चेत्; न; तत्क्षणमपूर्वोत्पन्नप्रयत्नवशात् कर्मोपगृहीतान्तःकरणान्तरवशाद्वेति [3]न किञ्चिदेतत्।

अपसर्पणोपसर्पणवचनात् संयोगविभागाविति—'अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि' (वै. सू. ५-२-१७) इति सूत्रकारवचनात्। अपसर्पणं पूर्वशरीरविभागहेतुर्मनःकर्म। उपसर्पणम् उत्तरशरीरप्राप्तिहेतुर्मनःकर्म। ततः संयोगविभागौ सिद्धौ। अन्यथा त[4]दनुपपत्तौ प्रेत्यभावानुपपत्तिरिति भावः।

स्यादेतत्; मनसोऽतीन्द्रियत्वात् परापरव्यवहारायोगात् प्रयत्नादृष्टोपग्रहाच्च क्रियोपपत्तौ परत्वापरत्ववे[5]गाभ्युपगमो निर्बीज इत्यत आह—**मूर्तत्वा**दिति। मूर्तस्य तैःसह स्वभावतः सम्बन्धात् तेन तेऽनुमातव्याः। न हि [6]प्रात्यक्षिक एव संव्यवहार इति नियमो धूमाद्यनुमिते वह्न्यादौ तद्व्यवहाराभावप्रसङ्गात्। नाप्यदृष्टोपग्रहेश्च क्रियोत्पत्तौ वेगो न स्यात् ज्वलनपवनादौ तद्भावप्रसङ्गादिति भावः।

स्यादेतत्; मूर्तत्वाद् द्रव्यारम्भकत्वं मनसः किं न स्यादित्यत आह—**अस्पर्शवत्त्वा**दिति। न हि मूर्तत्वस्य द्रव्यारम्भकत्वेन सह स्वभाविकः सम्बन्धः, विपक्षे बाधकाभावात्। स्पर्शवत्त्वं तु द्रव्यारम्भकत्वेनाऽप्रयोजकम्, द्रव्यानारम्भे स्पर्शवत्तायां

1 'प्रयत्नयौगपद्याज्ज्ञानयौगपद्याच्चैकम्' इति सूत्रपाठः। 2 ज्ञानायौगपद्यात्-कि।
3 यत्किञ्चिदेतत्-कि. क। 4 तदनुत्पत्तौ-जे। 5 वेगापगमौ-मु. कि। 6 प्रात्यक्षिक-क।

प्रमाणाभावादनुपलभ्यत्वप्रस[1]ङ्गाच्च, तदीयकार्यान्तरस्याभावादिति । न च मूर्तत्वेन स्पर्शोऽनुमातव्यः; तद्विरहेण वा अमूर्तत्वम्, मूर्तस्य स्पर्शविरहे विरोधाभावात्। विभवाभावस्य च परममहत्त्वेन सह विरोधादित्याह '**क्रियावत्त्वान्मूर्त्तं मनः**' इति प्रक्रमात् क्रियावत्त्वेनाविभुत्वमुपलक्षयति ।

स्यादेतत्; करणत्वेन मनसः पूर्वं ज्ञातृत्वं प्रतिषिद्धम्, तदनुपपन्नम्, ज्ञानकरणत्वज्ञानकर्तृत्वयोर्विरोधाभावात्। प्रयोक्तृप्रयोज्ययोः कथमेकत्वमिति चेत्; तथापि भेदोऽस्तु। कुतस्त्वज्ञत्वमत आह—**साधारणे**ति। तथा चैकाभिप्रायेण प्रवृत्तिनिवृत्ती न स्याताम्; प्रत्युताभिप्रायविरोधात् न प्रवृत्तिर्ननिवृत्तिश्च स्यादिति भावः। यद्येवमज्ञं मनस्तर्हि स्वार्थं न गुणतः स्वरूपतश्च, न परार्थमतीन्द्रियत्वाद् अत आह—**करणभावादिति**। तथापि मूर्तस्य विशेषगुणयोगः स्यात्; अन्यथा द्रव्यत्वमपि न स्यात्। मूर्तत्वसमानाधिकरणस्य द्रव्यत्वस्य विशेषगुणवत्त्वव्याप्यत्वादत आह—**गुणवत्त्वाद्द्रव्यम्**। अवैभवान्मूर्तत्वेऽपि गुणवत्त्वाद् विशेषगुणरहितस्यापि द्रव्यत्वाविरोध इत्यर्थः। तथापि गुरुत्वद्रवत्वस्थितिस्थापकाभावे कथं क्रियावत्त्वम्? वेगस्योत्तरक्रियोत्तरकालीनत्वात्; नहि मूर्तत्वमात्रेण क्रियेत्यत आह—**प्रयत्नादृष्टपरिग्रहादिति**। क्वचित्प्रयत्नपरिग्रहात् क्वचिददृष्टपरिग्रहादित्यर्थः। इति शब्दो द्र[2]व्यसमाप्तौ ॥

1 प्रसङ्गात्– कि । 2 द्रव्यसमाप्तौ तदनन्तरं 'इति श्रीमदाचार्योदयनविरचितायां किरणावल्यां द्रव्यपदार्थः समाप्तः' इत्यधिकं कि. क पुस्तकयोः; इत्युदयनाचार्यविरचितायां इति पाठान्तरं–पा. ३ पुस्तकेऽस्याः पुष्पिकायाः अतःपरं पूर्वसम्पादकेन प्राप्ते तृतीयादर्शपुस्तके पद्यद्वयमधिकं दृश्यते । तथा हि

* 'वन्दे शिवं शिवमिवोदयनं निदानमेकं गभीरनयनत्वविवेकसिन्धोः
दोषाकरादपि विविच्य कलां भजन्तमः[न्तः]कृताक्षतपदं सुमनः सहस्रैः ।'

शाकाब्दे रसपूर्णपञ्चदशके (१५०६) ह्यानन्दके वत्सरे
पञ्चम्यां रविवासरे च वि(व्य)लिखत् कृष्णे तपे शुक्रके (?) ।

ऋक्षे श्रावणिके विनायकसुतो दत्तात्रयः सत्वर—
स्वाकूतोपकनामशोभनकरे शैवे गिरौ त्वोदये (?) ॥

'जे' पुस्तके तु "इति पण्डितश्री उदयनकृतौ किरणावल्यां निबन्धिका **श्रीरहसदत्त** सङ्गृहीतायां द्रव्यपदार्थः समाप्तः । तदनन्तरं 'वन्दे शिवम्' इत्येकं पद्यमपि ।

[अथ प्रशस्तपादभाष्ये गुणपदार्थनिरूपणम्]

(८३) **रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं नि[1]र्गुणत्वं निष्क्रियत्वम् ॥**

तुष्टेर्मोचयतो बद्धानतुष्टेर्बध्नतः पुनः ।
कारागारमिदं विश्वं यस्य नौमि तमीश्वरम् ॥

साधर्म्यवैधर्म्याभ्यां निरूपितानि द्रव्याणि । सम्प्रति ताभ्यामेव गुणान्निरूपयति **रूपादीनामि**ति । ' गुण 'शब्देनाप्रधानमप्युच्यते, यथा ' वयमिह गुणीभूताः ' इति । न चाप्रधानमात्रस्य गुणत्वसमान्येन योग इत्याशङ्कामपनेतुमुक्तं **रूपादीनामि**ति । तथापि कियताम् ? अत उक्तम् **सर्वेषामि**ति । गुणत्वं नाम सामान्यविशेषः, तेनाभिमतः सम्बन्धः समवायलक्षणः । तेन गुण इतरेभ्यो भिद्यते गुण इति वा व्यवहर्तव्यः गुणत्वाभिसम्बन्धात् । यस्तु न तथा नासौ गुणत्वाभिसम्बन्धः यथा द्रव्यादिः इति लक्षणमुक्तं वेदितव्यम् ।

गुणत्वमसिद्धं गोत्वादिवदप्रतीतेर्व्यवस्थापकाभावाच्च । तथाहि ' सामान्यवानगुणो गुणः ' इति गुणव्यावृत्तिरितरेतराश्रयप्रसङ्गदूषिता, गुणरहितत्वे हि तत्सिद्धिः तत्सिद्धौ च तद्रहितत्वसिद्धिरिति । ' सामान्यवान् स्पर्शरहितो द्रव्याश्रितो गुणः ' ' सामान्यवान् कार्यानाश्रयो गुणः ' इति चातिव्यापकं कर्मण्यपि गतत्वात् । कर्मान्यत्वे सतीति तु प्रक्रियामात्रम् , [2]अनपेक्षितव्यावृत्तेरतिप्रसञ्जकत्वात् , रूपान्यत्वे रसान्यत्वे सति चेत्यादेरपि सुवचत्वात् । किमत्र व्यवस्थापकेन रत्नतत्त्वमिव गुणत्वमुपदेशापेक्षेण चक्षुरादिना प्रत्यक्षत एव प्रतीयत इति तु स्वशिष्य[3]व्यामोहनमात्रम् , निमित्तमन्तरेणोपदेशस्यागममात्रत्वात् । तस्माद्वरं [4]**भूषणः** कर्मापि गुणस्तल्लक्षणयोगादिति ।

न; कर्मणश्चलनात्मकतया प्रतीयमानस्य तावद् रूपादिव्यावृत्तमुत्क्षेपणाद्यनुवृत्तमेकजातीयत्वमनुभवसिद्धम् , परस्परविरुद्धसंयोगविभागलक्षणकार्योत्पादकत्वं च तस्य व्यवस्थापकमप्यनुभवसिद्धमेव । तद्विपरीतं च कार्यं रूपादीनां चतुर्विंशतेरुपलभ्यते । ततस्तैः कर्मविपरीतजातीयैर्भवितव्यम् । न ह्येकजातीयत्वे कार्यभेदनियम नोपपद्यते न चा

---

1 निष्क्रियत्वमगुणत्वं च–कि; निष्क्रियत्वमगुणवत्त्वं–जे; व्यो. (४३०); पा. ५, ६. पु ।
2 अपेक्षित–जे । 3 व्यामोहतम्–कि । 4 **भूषणो न्यायभूषणाख्यः** न्यायसूत्रवृत्तिकारः **तार्किकरक्षा**यामपि सुस्पष्टतया समुद्धृतोऽयम्–कि. सं ।

कर्मत्वेनैतद् भविष्यतीति वाच्यम्, अकर्मतया द्रव्यस्याप्यविरुद्धकार्यकारित्वप्रसङ्गात्। तथा च रूपादिवत् नैकं द्रव्यं संयोगविभागावारभेत। तस्माद्यथा विरुद्धकार्यकारित्वाविशेषेऽपि सापेक्षत्वानपेक्षत्वाभ्यां द्रव्यकर्मणोर्विजातीयत्वं, तथा सामान्यवत्त्वकार्यानाश्रयत्वाद्यविशेषेऽपि विरुद्धाविरुद्धकार्यत्वाभ्यां गुणकर्मणोरपि विजातीयत्वमित्यवदातम्। सोऽयं 'सं[1]योगविभागयोरनपेक्षं कारणं कर्म' (वै. सू. १-१-१७) इत्यस्य सूत्रस्यार्थः।

द्रव्याश्रितत्वमिति—'अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः' (प्र. भा. १६) इति वदता अर्थादाश्रितत्वानित्यत्वे चान्यत्र नि[2]रवयव-द्रव्येभ्य इत्युक्तम्। '**नित्यद्रव्यवृत्तयोऽन्त्या विशेषा**' इति चोक्तम्। वक्ष्यते च '**मूर्तद्रव्यवृत्तित्वम्**' इति च कर्मसु। लक्ष्यते सामान्यमपि सामान्यरूपेण पदार्थत्रयवृत्ति। समवायस्त्ववृत्तिरेवेति। गुणास्तु गुणरूपेण सर्वत्र द्रव्य एव वर्त्तन्ते। न न वर्त्तन्ते एव समवायवत्। न क्वचिद् द्रव्ये वर्त्तन्ते कर्मवच्च। न न वर्त्तन्तेऽपि द्रव्यवत्। नाऽद्रव्येऽपि वर्त्तन्ते सामान्यवदिति। तदेतेषां द्रव्याश्रितत्वमित्यस्यार्थः।

तदेतद् द्रव्यलक्षणव्यावृत्त्या सिद्ध्यति। न हि तस्मिन् सति गुणत्वाभिसम्बन्धो भवितुमर्हति जातिसङ्करप्रसङ्गात्। नाप्यभिव्याप्त्या द्रव्याश्रितत्वम्, एकजात्युपग्रहाभावाद् इत्यभिप्रायवानाह—'**निष्क्रियत्वमगुणवत्त्वं च**' इति। चलनात्मिकायाः क्रियाया निष्क्रान्ता निष्क्रिया रूपादयः, तेषां भावस्तत्त्वम्। मूर्तिविरहेणैतदवसेयम्। क्रियायास्तदनुविधायित्वात्। मूर्त्यभावश्च रूपादीनां समानदेशत्वादध्यवसेयः, मूर्तत्वसमानदेशत्वयोः सहजविरोधात्। गुणा येषु वर्त्तन्ते ते गुणवन्तो, न गुणवन्तोऽगुणवन्तस्तेषां भावस्तत्त्वम्। समानजातीय[3]गुणाभावस्तावदनवस्थाप्रसङ्गात्। रूपादौ रसादिवेगा[4]न्तानां सद्भावे मूर्तत्वप्रसङ्गात्। बुद्ध्यादीनां तु प्रतिसन्धातृगुणत्वव्यवस्थितेरप्रसक्तिरेव। शब्दस्य नभो नियमात्। गुणेषु गुणयोगे च समवायिकारणत्वप्रसक्तौ द्रव्यत्वापत्तेर्गुणत्वव्याघात एव। रूपावयवी च रूपेष्वेव वर्त्तेत इति घटादेर्नीरूपत्वप्रसङ्ग इत्यादि।

एवं निर्गुणत्वनिष्क्रियत्वे च 'रूपादयो गच्छन्ति' 'चतुर्विंशति गुणाः' 'महांश्छब्दः' इत्यादयो व्यवहाराः तदेकार्थसमवायादिना साधर्म्येण गौणाः समर्थनीयाः। चकारात् समवायिकारणताविरहः। यदा हि गुणकर्मणी गुणेषु न स्तस्तदा द्रव्ये का कथा?

---

1 एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्। वै. सूत्रपाठे १-१-१७। अयं तु भिन्न एव पाठः। 2 नित्यद्रव्येभ्य- कि। 3 गुणसद्भाव- कि। 4 रसाद्यो-जे. पा. ६. पु।

नहि निर्गुणं द्रव्यमाश्रयते, कारणगुणाभावे तस्यापि निर्गुणत्वप्रसङ्गात्। न च निर्गुणे द्रव्ये किञ्चित् प्रमाणमस्तीति ॥

(८४) **रूपरसगन्धस्पर्शप[1]रत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगा मूर्तगुणाः ॥**

सम्प्रति गुणानामेवान्योन्यं वैधर्म्यमाह—**रूपेति**। एते मूर्तिं न व्यभिचरन्तीत्यर्थः। वेगः संस्कारविशेषः। उपलक्षणमेतत्, [2]स्थितिस्थापकोऽपि द्रष्टव्यः ॥

(८५) **बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा अमूर्तगुणाः ॥**

बुद्धित्यादि—एते मूर्तिविरोधिन इत्यर्थः। भावना संस्कारविशेषः ॥

(८६) **सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागा उभयगुणाः ॥**

सङ्ख्येति—द्रव्यमात्रस्य व्याप्यव्यापकभूता इत्यर्थः।

(८७) **संयोगविभागद्वित्वद्विपृथक्त्वादयोऽनेकाश्रिताः ॥**

संयोगेति—एका संयोगव्यक्तिर्द्वयोर्द्रव्यव्यक्त्योर्वर्तते। तथा विभागद्वित्वद्विपृथक्त्वव्यक्तय एकैकाः। आदिग्रहणात् त्रित्वत्रिपृथक्त्वादयः। अनेकशब्दस्यैकपर्युदासवृत्तित्वात् त्रिचतुःपञ्चादिद्रव्यव्यक्तिष्वपि वर्त्तन्त इति ॥

(८८) **शेषास्त्वेकैकद्रव्यवृत्तयः ॥**

शेषास्त्विति—रूपरसगन्धस्पर्शैकत्वैकपृथक्त्वपरिमाणपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारबुद्ध्यादिशब्दान्ता एकैकस्यामेव व्यक्तौ वर्तन्त इत्यर्थः ॥

(८९) **रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा वैशेषिकगुणाः ॥**

रूपेति विशेषा एव वैशेषिकं, तस्य गुणाः स्वाश्रयव्यवच्छेदोचितावान्तरसामान्यविशेषवन्त इत्यर्थः। नैमित्तिकद्रवत्वं पृथिवीतेजसोः सामान्यगुण इत्यत उक्तं **सांसिद्धिके**ति। तथाहि रूपं भास्वरत्वादिना, रसो मधुरत्वादिना, गन्धो गन्धत्वेनैव, स्पर्शो उष्णत्वादिना, स्नेहः स्नेहत्वेन, यथोक्तं द्रवत्वं ताद्रूप्येण, बुद्ध्यादयो बुद्धित्वादिना स्वाश्रयमितरेभ्यो व्यवच्छिन्दन्ति ॥

---

1 परत्वद्रवत्व—दे। 2 स्थितिस्थापक—जे।

(९०) सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-गुरुत्वनैमित्तिकद्रवत्ववेगाः सामान्यगुणाः ॥

सङ्ख्येति—वेगेति भावनातिरिक्तसंस्कारोपलक्षणम् → [1]तेन स्थितिस्थापकोऽपि गृह्यते ←। सामान्यं साधर्म्यं तद्रूपा गुणाः सामान्यगुणाः, न स्वाश्रयव्यवच्छेदाय प्रभवन्तीत्यर्थः ॥

(९१) शब्दस्पर्शरूपरसगन्धा बाह्यैकैकेन्द्रियग्राह्याः ॥

शब्देति—बाह्येन चक्षुरादिना एकैकेनैवेन्द्रियेण ग्रहीतुं योग्या इत्यर्थः ॥

(९२) स[2]ङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रव-त्वस्नेहवेगा द्वीन्द्रियग्राह्याः ॥

सङ्ख्येति—बाह्येत्यनुवर्त्तते। सङ्ख्यादयो वेगान्ताश्चक्षुस्पर्शनग्रहणयोग्या इत्यर्थः ॥

(९३) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्त्वन्तःकरणग्राह्याः ॥

बुद्धीति—बुद्ध्यादयः प्रयत्नान्ताः अन्तःकरणेनैव ग्रहीतुं योग्या इत्यर्थः ॥

(९४) गुरुत्वधर्माधर्मभावना ह्यतीन्द्रियाः ॥

गु[3]रुत्वधर्माधर्मभावना ह्यतीन्द्रियाः—भावनेति वेगमात्रव्यवच्छेदाय। तेन स्थितिस्थापकोऽपि गृह्यते। इन्द्रियमतीत्य वर्त्तन्त इत्यतीन्द्रियाः, न केनचिदिन्द्रियेण गृह्यन्ते इत्यर्थः। 'हि'शब्दः 'तु'अर्थः।

(९५) अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्व-द्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः ॥

अपाकजेति—स्वाश्रयस्य यत्समवायिकारणं तस्य ये सजातीया गुणाः तत्पूर्वकाः। तथाहि तन्त्वादिरूपादिभिः पटादि[4]रूपादय आरभ्यन्ते। वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः। पार्थिवपरमाणुरूपादयो नैमित्तिकं च द्रवत्वं नैवमित्याशङ्क्याह—**अपाकजेति**। द्रवत्वमित्यत्राप्यपाकजेत्यनुषञ्जनीयम्। कारणपदस्यानन्तरं मात्रपदमप्यध्याहार्यम्; अन्यथा संयोगविभागावपि क्वचिदेवमित्यतिव्याप्तिः स्यात्। एष्वेवैतत्सम्भाव्यत इत्यन्ययोगव्यवच्छेदेनैतत्साधर्म्यं, तेन क्वापि कर्मजत्वेऽपि वेगस्य न दोषः।

---

1 →← एतच्चिह्नान्तर्गतः पाठः 'जे' पुस्तके नास्ति। 2 अयं पाठः सम्पूर्णतया 'दे' पुस्तके भ्रष्टः। 3 अत्र मूलं पुनरुक्तमिवाभाति। 4 रूपाश्च– कि।

(९६) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभा[1]वनाशब्दा अकारणगुणपूर्वकाः ॥

बुद्धीति—बुद्ध्यादयः शब्दान्ता अकारणगुणपूर्वकाः। एतेषामाश्रयस्य नित्यतया कारणाभावादिति भावः। एते अकारणगुणपूर्वका एवेत्यर्थः। तथा च संयोगविभागवेगनैमित्तिकद्रवत्वैरकारणगुणपूर्वकैरपि नातिव्याप्तिः। नह्येवंजातीया अकारणगुणपूर्वका एव, क्वचित्कारणगुणपूर्वकाणामपि दर्शनादिति ॥

(९७) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्द[2]तुलपरिमाणोत्तरसंयोगनैमित्तिकद्रवत्वपरत्वापरत्व[3]पाकजाः संयोगजाः।

बुद्धीति—बुद्ध्यादयः पाकजान्ताः संयोगजाः, संयोगासमवायिकारणका इत्यर्थः। बुद्ध्यादयो भावनान्ता आत्ममनःसंयोगजाः। 'शब्द'शब्देन शब्दविशेषो ग्राह्यः, स च भेर्याकाशसंयोगजन्यः। तुलेत्युपलक्षणम्, द्रव्यान्तराण्यपि समानसङ्ख्यापरिमाणैरवयवैरारब्धानि सातिशयपरिमाणानि ग्राह्याणि। तत्परिमाणं प्रचयाख्यसंयोगजम्। उत्तरः संयोगस्तन्तुतुर्यादिसंयोगात् पटतुर्यादिसंयोगः। नैमत्तिकं द्रवत्वमग्निसंयोगात्। परत्वापरत्वे दिक्कालपिण्डसंयोगात्। पाकजाः पार्थिवपरमाणुरूपादयोऽग्निसंयोगादिति ॥

(९८) संयोगविभागवेगाः कर्मजाः ॥

[4]**संयोगविभागवेगाः कर्मजाः**। संयोगविशेषविभागविशेषवेगविशेषा इत्यर्थः। तत्र संयोगविभागावाद्यौ। वेगोऽवेगवद्द्रव्यारब्धे वर्तमान इति।

(९९) शब्दोत्तरविभागौ विभागजौ ॥

[5]**शब्दोत्तरविभागौ विभागजा**विति। 'शब्द'शब्दः शब्दविशेषे वर्त्तते।

(१००) परत्वापरत्व[6]द्वित्वद्विपृथक्त्वादयो बुद्ध्यपेक्षाः ॥

परत्वेति—बुद्ध्यपेक्षाः—अपेक्षाबुद्धिजन्या इत्यर्थः। आदिग्रहणात् त्रित्वत्रिपृथक्त्वादयो ग्राह्याः, तदितरे च तद्विपरीता इत्यर्थात् ॥

---

1 भावनास्त्वकारणगुणपूर्वकाः—दे। 2 स्थूल—जे। 3 'परत्वापाकजाः' इति सर्वत्र मु. भाष्ये किन्तु पाठोऽयमर्थदृष्ट्याऽशुद्धः अतः 'परत्वापरत्वपाकजाः' इति शुद्धः पाठः स्थापितः। 4, 5 अत्र मूलभाष्यं पुनरुक्तमिवाभाति। 6 द्वित्वपृथक्त्वादयो—जे; व्यो (४३५)।

(१०१) रूपरसगन्धानुष्णस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहाः समानजात्यारम्भकाः ॥

रूपेति—रूपादयः स्नेहान्ताः समानजात्यारम्भका इति । इह आरम्भकत्वमसमवायिकारणत्वं यदि विवक्षितं तर्हि 'अनुष्ण'पदोपादानमनुपपन्नम् । नह्युष्णस्पर्शो विजातीयासमवायिकारणम् । अथ कारणत्वमात्रमारम्भकत्वं स्नेहोपादानमनुपपन्नम्, स हि विजातीयस्यापि सङ्ग्रहस्य कारणमिति वक्ष्यते । तत्कथमेतत्? इत्थमेतत्; कारणत्वमात्रे विवक्षिते द्वयस्यापि वर्जनम् । असमवायिकारणत्वे विवक्षिते [1]द्वयस्याप्यवर्जनम् । समाना एका जातिर्येषां ते समानजातयः । तदारम्भका रूपरसगन्धस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहा असमवायिकारणतामाप्नुवन्तः समानजातीयेष्वेव एत एवोष्णस्पर्शस्नेहौ विहायात्मधर्मेतरकारणं भवन्तः समानजातीयोष्वेत्यर्थः ॥

(१०२) सुखदुःखेच्छाद्वेषप्रयत्नाश्चासमानजात्यारम्भकाः ॥

सुखेति—एते विजातीयमेवारभन्ते । सुखमिच्छाम्, दुःखं द्वेषम्, तौ प्रयत्नम्, प्रयत्नः क्रियामिति । 'तु'शब्दः पूर्वापरान् व्यवच्छिन्दन्नवधारणं द्योतयति । पुत्रस्य सुखदुःखाभ्यां पितुः सुखदुःखे समानजातीये अपि भवत इति चेन्न, विषयमात्रत्वात् । [2]विषयत्वेऽपि [3]ज्ञानद्वारा तत्कारणमिति चेत् न, भविष्यतोरपि पुत्रस्य सुखदुःखयोर्ज्ञाने पितुः सुखदुःखाद्युत्पत्तिदर्शनात् । न चानागतमपि साम्प्रतिकस्य कारणम्, पूर्वभावनियमस्य तत्त्वादिति । साक्षात् कारणत्वं वा विवक्षितम् ॥

(१०३) संयोगविभागसङ्ख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्काराः समानासमानजात्यारम्भकाः ॥

संयोगेति—अत्र स्नेहोऽपि ग्राह्यः । संयोगाद्विजातीयं द्रव्यादि, विभागाच्छब्दः, सङ्ख्यातः परिमाणम्, गुरुत्वात्पतनम्, द्रवत्वात् स्यन्दनम्, स्नेहात् सङ्ग्रहः, [4]उष्णस्पर्शात् पाकजाः, ज्ञानादिच्छा, धर्मात्सुखम्, अधर्माद् दुःखम्, संस्कारात् क्रियास्मृती इति विजातीयवर्गः । सजातीया प्रसिद्धाः ।

(१०४) बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः स्वाश्रयसमवेतारम्भकाः ॥

---

1 उष्णस्याप्यवर्जनम्–जे । 2 विषयतया–जे । 3 विज्ञानद्वारा–जे ।
4 औष्ण्यात्–पा. ७. पु जे ।

[1]**बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः स्वाश्रयसमवेतारम्भकाः ।** यद्यपि बुद्धिर्द्वित्वादिकमन्यत्राप्यारभत इति उभयत्रारम्भकेषु पठितुमुचिता तथापि स्वाश्रयसमवेतविशेषगुणेष्विति द्रष्टव्यमित्यदोषः ।

(१०५) **रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः परत्रारम्भकाः ॥**

रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः परत्रारम्भका इति । अवयवरूपादयः स्नेहान्ता अवयविनि रूपादिकमारभन्ते । प्रयत्नश्चात्मनि वर्तमानः शरीरे चेष्टाम् । यद्यपि स्नेहः सङ्ग्रहं स्वाश्रयेऽप्यारभमाणः, प्रयत्नश्च विहितनिषिद्धप्रवृत्तिरूपः स्वाश्रये धर्माधर्मावुत्पादयन् संयोगादिषु पठितुमुचितः, तथापि परिमाणान्ताः परत्रैव, स्नेहान्ताः सजातीयं परत्रैव, प्रयत्नान्ता एकाश्रितमन्यत्रैव । 'प्रयत्न'शब्दे[2]नात्र प्रयत्नविशेषो विहितनिषिद्धविषयो ग्राह्यः इत्यदोषः ।

(१०६) **संयोगविभागसङ्ख्यैकपृथक्त्वगुरुत्वद्रवत्ववेगधर्माधर्मास्तूभयत्रारम्भकाः ॥**

संयोगेति—संयोगो द्रव्यं स्वाश्रये, भेरीदण्डादिसंयोगो नभसि शब्दम् , वंशदलयोर्विभागो विभागं स्वाश्रये, शब्दमन्यत्र, सङ्ख्या कारणगता कार्ये सङ्ख्यां परिमाणं च, स्वाश्रये द्वित्वादिकम् । एकपृथक्त्वं स्वाश्रये द्विपृथक्त्वादि अन्यत्रैकपृथक्त्वमेव । एकग्रहणं द्विपृथक्त्वादीनामकारणत्वप्रतिपादनार्थम् । गुरुत्वं स्वाश्रये पतनम् , अन्यत्र गुरुत्वमेव, द्रवत्वं स्वाश्रये स्यन्दनमन्यत्र द्रवत्वमेव, वेगः स्वाश्रये गमनमन्यत्र वेगवदवयवारब्धे द्रव्ये वेगमेव । 'वेग'शब्देनात्र स्थितिस्थापकोऽपि ग्राह्यः । धर्मश्च स्वाश्रये सुखमन्यत्र [3]ज्वलनादौ क्रियामिति । अधर्मः स्वाश्रये दुःखमन्यत्र पवनादौ क्रियामिति । सामान्यतश्चात्र स्नेहः प्रयत्नश्च विहितनिषिद्धगोचर उपादेयः, संयोगविशेषेण सङ्ग्रहेण स्नेहकार्येण कारणस्य स्नेहस्य धर्माधर्माभ्यां च कार्याभ्यां विहितनिषिद्धगोचरस्य प्रयत्नस्य कारणस्योपलक्षणादिति ॥

(१०७) **गुरुत्वद्रवत्ववेगप्रयत्नधर्माधर्मसंयोगविशेषाः क्रियाहेतवः ॥**

---

1 मूलं पुनरुक्तमिवाभाति । 2 न चात्र—जे । 3 पवनादौ– कि; क. ज्वलनादिक्रियाम्

गुरुत्वेति—गुरुत्वात् पतनम्, द्रवत्वात् स्यन्दनम्, वेगाद्[1]भ्रमणम्, प्रयत्नाच्चेष्टा, धर्माधर्माभ्यां भूकम्पादि, संयोगविशेषान्नोदनाभिघातलक्षणादिष्वादिकर्म। अत्रापि वेगेत्युपलक्षणम्; स्थितिस्थापकोऽपि ग्राह्यः।

(१०८) रूपरसगन्धानुष्णस्पर्शसङ्ख्यापरिमाणैकपृथक्त्वस्नेहशब्दानाम[2]समवायिकारणत्वम्॥

रूपादिशब्दान्तानामसमवायित्वम्— असमवायिकारणत्वम्। तल्लक्षणमग्रे वक्ष्यते। सावधारणं चैतत्, तेनोष्णस्पर्शस्य पाकजोत्पत्तिं प्रति निमित्तत्वमप्यस्तीति तद्व्यवच्छेदार्थमुक्तम् अनुष्णेति। यद्यपि च रूपादीनां धर्माद्युत्पत्तौ निमित्तत्वमप्यस्ति 'अरुणयेत्यादि श्वेतं छात्रमित्यादिदर्शनात्, तथापि बुद्धिनिमित्तत्ववत् द्रव्यादिसाधारणत्वात् तस्य तदतिरिक्तं प्रति निमित्तत्वमिह व्यवच्छेद्यम्। यद्यपि च रसस्य जीवनपुष्टिबलारोग्येषु निमित्तत्वमनुपदमेव वक्ष्यति तथापि विशे[3]षतः शास्त्रैकसमधिगम्यत्वात् अदृष्टनिमित्तत्ववत् तदुपेक्ष्य तदितरप्रमाणगम्यनिमित्तत्वमिह व्यवच्छेद्यम्; यद्यपि च स्पर्शवेगावपेक्ष्य क्रियाऽभिघातमुत्पादयतीति स्पर्शस्याभिघाते निमित्तत्वमस्ति तथा स्नेहस्य सङ्ग्रहे, तथाप्येकाश्रितकार्यापेक्षया एतद्द्रष्टव्यमित्यदोषः॥

(१०९) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां निमित्तकारणत्वम्॥

बुद्ध्यादीनां भावनान्तानां निमित्तत्वम्, निमित्तकारणत्वमेव। यथा च प्रत्यासत्तिविशेषेपि नैषामसमवायिकारणत्वं तथा वक्ष्यते॥

(११०) संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथा कारणत्वम्॥

संयोगादीनां वेगान्तानामुभयथा कारणत्वम्, असमवायितया निमित्ततया च। तथा हि भेरीदण्डादिसंयोगः शब्दे निमित्तम्, भेर्याकाशसंयोगोऽसमवायिकारणम्। वंशदलविभागो निमित्तम्, वंशदलाकाशविभागोऽसमवायिकारणं शब्दस्य। उष्णस्पर्शः पाकजे निमित्तम्, उष्णस्पर्शोऽसमवायी। गुरुत्वमभिघातादिक्रियायां निमित्तं पतनगुरुत्वयोरसमवायि। द्रवत्वं सङ्ग्रहादौ निमित्तम्, द्रवत्वस्यन्दनयोरसमवायि। वेगो वेगगमनयोरसमवायी अभिघाते निमित्तमिति॥

---

1 गमनम्—जे। विशेषज्ञ—मु. कि। 2 मसमवायित्वम्—कि; °नां समवायित्वं—दे।
3 विशेषज्ञ—मु. कि।

(१११) परत्वापरत्वद्वि[1]पृथक्त्वादीनामकारणत्वम् ।

परत्वादीनामकारणत्वम्—न निमित्तत्वं नाप्यसमवायित्वमित्यर्थः । आदिग्रहणेन-त्रित्वत्रिपृथक्त्वादीनां ग्रहणम् ॥

(११२) संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तित्वम् ॥

संयोगादीनां प्रदेशवृत्तित्वम् । अत्र प्रत्यक्षाणां युगपदुपलम्भानुपलम्भप्रमाणक-मेतत् । धर्माधर्मभावनानां तु व्यापककार्यविशेषगुणत्वेनानुमेयम् । अन्यथाऽसमवायिकारण-प्रादेशिकत्वानुरोधेन सुखादीनामपि प्रदेशनियमानुपपत्तिप्रसङ्गात् । न च भावाभावावेकत्र विरुद्धौ, प्रकारभेदेनाविरोधात् । अवयवान्तरदिगन्तरावच्छेदेन हि तावविरुद्धौ तथैव दर्शनात् । न चैवं व्यवच्छेदकाश्रयावेव भावाभावौ, अविरोधार्थमुपाधिभेदो न तूपाधिभेद एव तदाश्रयः । नहि कार्यभेदेन शक्त्यशक्ती कार्यभेदमेवाश्रयेते इति देशभेदेन वा शक्त्यशक्ती देशभेदमेवाश्रयेते इति ॥

(११३) शेषाणामाश्रयव्यापित्वम् ॥

[2]**शेषाणामाश्रयव्यापित्वम् ।** पूर्वोक्तेभ्यः संयोगादिभ्यो येऽन्ये ते शेषाः, तेषां रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगस्थितिस्थापकपरत्वापरत्वाना-मित्यर्थः ॥

(११४) अपाकजरूपरस[3]गन्धस्पर्शपरिमाणैकपृ[4]थक्त्वसांसिद्धिकद्रवत्वगुरुत्वस्नेहानां यावद्द्रव्यभावित्वम् ॥

अ[5]पाकजादीनां स्नेहान्तानां यावद्द्रव्यभावित्वम्, यावदाश्रयमेतेषां स्थितिर-विनाशः । आश्रयविनाशादेव परमेते विनश्यन्ति न त्वन्यथेत्यर्थः । पाकजानि रूपरसगन्ध-स्पर्शद्रवत्वानि सत्येवाश्रये विनश्यन्तीत्यत उक्तमपाकजेति । स्थितिस्थापकोऽप्यत्र ग्राह्यः ॥

(११५) शेषाणामयावद्[6]द्रव्यभावित्वम् ॥

---

1 द्वित्वद्विपृथक्त्वादीनां–कं, वैशेषिकनये द्वित्वस्य द्व्यणुकपरिमाणेऽसमवायिकारणत्वात् तथैव भाष्ये पूर्वं सङ्ख्याया असमवायिकारणत्वेनोक्तत्वाच्च 'द्वित्व' इति कं. दे पुस्तकयोः पाठोऽसमीचीनोऽतो-न स्वीकृतः । विस्तरस्तु व्योमवत्यां (४३९) द्रष्टव्यः । 2 भाष्यमत्र पुनरुक्तमिवाभाति । 3 गन्धा-नुष्णस्पर्श–जे । 4 पृथक्त्वगुरुत्व–जे । 5 अपाकजानां– कि; क । 6 भावित्वमिति–दे; भावित्वं चेति–मु. भा ।

शेषाणामिति । पाकजानां [1]पार्थिवपरमाणुरूपादीनां पाकजस्य च पृथिवीतेजसोर्द्रवत्वस्य बुद्धिजानां च परत्वापरत्वद्वित्वद्विपृथक्त्वादीनां शब्दबुद्ध्यादीनां च व्यापकजन्यविशेषगुणानां संयोगविभागयोश्चायावद्द्रव्यभावित्वम् , सत्यपि द्रव्ये विनाश इत्यर्थः ॥

तदेतदुद्देशमात्रमाचार्येणोक्तम् । एवमन्यदपि स्वयमूहनीयम् । तद्यथा रूपाद्येकैकत्यागेनारूपत्वारसत्वादीनि । सांसिद्धिकद्रवत्वरूपरसगन्धस्पर्शस्नेहानां मूर्तविशेषगुणत्वम् । रूपरसगन्धस्नेहगुरुत्वद्रवत्वस्थितिस्थापकानां स्पर्शव्याप्यत्वम् । स्नेहशैत्यसांसिद्धिकद्रवत्वानां जलमात्रवृत्तित्वम् । औष्ण्यभास्वरत्वयोस्तेजोमात्रवृत्तित्वम् । रसगुरुत्वयोर्जलावनिगुणत्वम् । गन्धमाधुर्येतररसशुक्लेतररूपाणां पृथिवीमात्रवृत्तित्वम् । बुद्ध्यादीनां भावनान्तानामात्मविशेषगुणत्वम् , रूपद्रवत्वयोः पृथिव्यप्तेजोमात्रवृ[2]त्तित्वम् । → [3]नैमित्तिकद्रवत्वस्य क्षितितेजोमात्र वृत्तित्वम् ← । नैमित्तिकद्रवत्वपार्थिवपरमाणुरूपादीनां पाकजत्वम् । सङ्ख्यापरिमाणप्रचयानामेव परिमाणकारणत्वम् । संयोगविभागशब्दानामेव शब्दकारणत्वम् । स्पर्शगुरुत्वप्रयत्नवेगानामेवाभिघातहेतुत्वम् । एकत्वैकपृथक्त्वसंयोगविभागानामेवानेकाश्रितगुणारम्भकत्वम् । परत्वापरत्वयोरेव दिक्कालपिण्डसंयोगजत्वम् । परत्वापरत्वचरमज्ञानद्वित्वद्विपृथक्त्वादीनामेव निमित्तविनाशविनाश्यत्वम् । एतदन्येषामेव गुणान्तरविनाश्यत्वम् । कार्यगुणानामेवाश्रयविनाशविनाश्यत्वम् । अपार्थिवपरमाणुरूपरसस्पर्शसांसिद्धिकद्रवत्वस्नेहगुरुत्वस्थितिस्थापकनित्यद्रव्यैकत्वैकपृथक्त्वपरिमाणेश्वरबुद्धीच्छाप्रयत्नानां नित्यत्वाकार्यत्वे । इतरेषां गुणानामनित्यत्वकार्यत्वे इत्यादि ॥

(११६) रू[4]पादीनां सर्वेषां गुणानां प्रत्येकमपरसामान्यसम्बन्धाद् रूपादिसञ्ज्ञा भवन्ति ॥

सम्प्रति प्रत्येकं रूपादीनां वैधर्म्यं सङ्क्षेपार्थमेकग्रन्थेनाह—**रूपादीनामि**त्यादि । सर्वेषां चतुर्विंशतेरपीत्यर्थः । रूपं रसो गन्ध इत्याधिकाः सञ्ज्ञाः, ताः किं परिभाषिक्य औपाधिकी वा ? न इत्याह—**अपरसामान्यसम्बन्धात्** । रूपत्वरसत्वगन्धत्वादिसमवायात्–निमित्तादित्यर्थः ।

तदसिद्धम्, चक्षुर्मात्रग्राह्यत्वाद्युपाधिनिबन्धत्वाद्रूपादिसञ्ज्ञानामिति चेत्; न अननुसंहितोपाधेरुपहितप्रत्ययायोगात् । न च रूपत्वादिसामान्यविशेषविशिष्टरूपाद्युपलब्धिमन्तरेण परस्परव्यावृत्तेषु चक्षुरादिषु [5]प्रमाणमस्ति, विशिष्टोपलब्धेरेव प्रमाणत्वे परस्परा-

---

1 पार्थिवरूपादीनां–जे । 2 गुणत्वम्–जे । 3 →← एतच्चिह्नान्तर्गतः पाठो 'जे' पुस्तके नास्ति । 4 रूपादीनां प्रत्येक–दे । 5 मानमस्ति– कि; क ।

श्रयत्वम् । चक्षुराद्यवगमे विशिष्टोपलब्धिः, विशिष्टोपलब्ध्या च चक्षुराद्युपलब्धिरिति । न चाविशिष्टोपलब्धिमात्रोपनीतमविशिष्टमिन्द्रियमात्रमुपाधिर्विशिष्टव्यपदेशे, रसादिष्वपि रूपादिव्यवहारप्रसङ्गादिति । तस्मात् रूपत्वादिसामान्यविशेषक्रोडीकृततत्तदर्थग्रहणनियमेन चक्षुरादीन्यप्युन्नेयानि । तथा चोच्यते रसादिषु मध्ये चक्षुर्मात्रग्राह्यस्यैव व्यञ्जकत्वादित्यर्थः स्यात् । तथा चासिद्धमसिद्धेन साधयतो महानैयायिकत्वमित्यलमनुकम्पनीयेष्वतिनिर्बन्धेन । एतेन रसत्वादयो व्याख्याताः ॥

(११७) तत्र रूपं चक्षुर्ग्राह्यम् । पृथिव्युदकज्वलनवृत्ति, द्रव्याद्युपलम्भकं नयनसहकारि शुक्लाद्यनेकप्रकारम् ॥

तत्रेति—गुणेषु मध्ये; गुणत्वे सति चक्षुषैव यद् ग्राह्यं तद्रूपमिति लक्षणार्थः । गुणत्वे सतीति रूपत्वादिव्यवच्छेदाय । एतेन प्रमाणमाप्युक्तम् । आश्रयमाह—**पृथिव्युदकज्वलनवृत्ती**ति । 'ज्वलन'शब्देनेह तेजोमात्रं विवक्षितम् । [1]त्रिष्वेव वर्तते नान्यत्रेत्यर्थः । विषयस्यार्थक्रियामाह—द्रव्याद्युपलम्भकम् । 'द्रव्य'शब्देनात्र बाह्यद्रव्यमभिमतम् । तद्रूपसम्बन्धाद् गृह्यते न त्वन्यथा । 'आदि'शब्देन गुणकर्मसामान्यानि । तत्र गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगाः । कर्माणि च रूपिद्रव्यसमवायात् । सामान्यानि तु कानिचित् रूपैकार्थसमवायात्, कानिचित् रूपैकार्थसमवेतसमवायात्, कानिचिद्रूपसमवायादिति सर्वत्र रूपस्य कारणत्वम् । यद्यपि चैतन्महत्त्वस्याप्यस्ति तथापि विशेषगुणत्वे सतीति द्रष्टव्यमित्यदोषः । कारणोपकारितामाह—**नयनसहकारी**ति । बाह्यालोकाप्यायितं हि चक्षुः स्वविषयग्रहणे क्षमम् । स चोद्भूतरूपः चक्षुषः सहकारी न त्वन्यथेति रूपं नयनसहकारीत्युच्यते । न तु स्वीयमेव रूपमस्य सहकारि सगुणानामिन्द्रियभावादिति न्यायेन तस्येन्द्रियशरीरत्वात् । [2]विधामाह—**शुक्लाद्यनेकप्रकारम्** । शुक्लत्वादयोऽनेके प्रकारा अवान्तरविशेषा तस्य तत्तथोक्तम् ।

(११८) सलिलादिपरमाणुषु नित्यं पार्थिवपरमाणुष्वग्निसंयोगविरोधि, स[3]र्वकार्येषु का[4]रणगुणपूर्वकम्, आश्रयविनाशादेव विनश्यतीति ।

यद्यपि नित्यत्वादिकं गुणान्तरसाधारणं तथापि पार्थिवपरमाणुषु पाकजत्ववैधर्म्यचिन्तायामुपयोक्ष्यत इत्यभिप्रायवान् कारणविरोधिनावभिधातुं नित्यं तावन्निर्धारयति—

1 एतेष्वेव–जे । 2 विभाग–जे । 3 सर्वकार्यद्रव्येषु–मु. भा । 4 कारणपूर्वकम्–दे ।

सलिलादिपरमाणुषु नित्यमिति। आदिशब्देन तेजः परमाणुपरिग्रहः। अनित्यता हि कार्यतया व्याप्ता, सा च रूपादीनां कार्यद्रव्येषु विचित्रतया व्याप्ता, सा च सलिलादि-परमाणुरूपाद् व्यावर्तमाना स्वव्याप्त्या कार्यतामुपादाय विनाशितामपि निवर्तयतीति। **पार्थिवपरमाणुष्वग्निसंयोगविरोधि**—अग्निसंयोगो विरोधी यस्य तत्तथा। उपलक्षणं चैतत्, उत्पादकोप्यस्याग्निसंयोग एव। **सर्वकार्येषु कारणगुणपूर्वकम्**—अवयविषु यद्रूपं तदवयवरूपपूर्वकमित्यर्थः। **आश्रयविनाशादेव विनश्यती**ति—न तु पिठरपाकवादिनामिवाग्निसंयोगादपीत्येवकारार्थः।

एतेन गुणगुणिनोरभेदवादो निरस्तः, फलतो विरुद्धधर्माध्यासस्य दर्शितत्वात्। तथाहि रूपत्वनिमित्ता रूपसञ्ज्ञेति दर्शिते, पृथिवीत्वनिमित्ते च पृथिवीव्यवहारे एतयोस्तादात्म्ये पर्यायता स्यात्। न च 'रूप'शब्दात् 'शुक्ल'शब्दाद् वा कश्चित् [1]पटादिकं प्रत्येति [2]पटादिशब्दाद्वा शुक्लादिकम्। न चाभेदे सामान्यविशेषभावोऽप्युपपद्यते। न च सामान्य-विशेषभावेऽप्यभेदादेव सामान्यं विशेषश्चेति सम्भवति, विरोधात्। अनुवृत्तो हि धर्मः सामान्यं व्यावृत्तो विशेषः; न च तदेवानुवृत्तं व्यावृत्तं चेति सम्भवति। किञ्च रूपं चक्षुर्मात्रग्राह्यम्, तदेव चेद् द्रव्यं रूपवद्द्रव्यमप्यन्धेन नोपलभ्येत घटादिद्रव्यवद्वा शुक्लादिरूपमप्यन्धेनोपलभ्येत। यदि च पृथिव्येव रूपं न तोये तेजसि वा वर्त्तेत। यदि वा पृथिवी, पयःपावकावपि पृथिव्येव स्यातां सामान्यविशेषभावे वा तादात्म्यं विरुध्येत। न चैवं द्रव्यस्यैव सामान्यविशेषो रूपमस्तु कृतं गुणेनेति वाच्यम्, तस्य प्रकाराभावात्। नहि गोत्वं प्रकारवत्। रूपं तु शुक्लाद्यनेकप्रकारकम्। न च गोत्वविशिष्टस्य शाबलेयादिभेदवत् रूपविशिष्टस्य शुक्लादिभेदो भविष्यतीति युक्तम्, तत्रापि शुक्लतरशुक्लतमादिप्रकारवत्त्वात्। न च तारतम्यं सामान्यस्य सम्भवति। नहि सम्भवति गोतरो गोतम इति। किञ्च पिठरपाकोऽप्यस्तु, परमाणुपाको वा, शुक्लादिरूपं तावद्धर्मिणि सत्येव निवर्तते प्रवर्तते चेति सुप्रसिद्धम्। न चैतत् सम्भवति तस्य नित्यैकरूपत्वात्; अन्यथा तत्त्वविरोधात्।

एतेन रूपवदेव द्रव्यमुत्पद्यते रूपवदेव विनश्यतीति नास्त्यनयोः पूर्वापरभाव इति, नापि द्रव्यविनाशरूपविनाशयोरिति निरस्तम् एकत्र दर्शनेनान्यत्र तदनुमानात्। तथा हि अवयविरूपं समवायिकारणवत् कार्यत्वाद् घटवत्। अन्यथा कारणमात्रानपेक्षतया कादाचित्कत्वानुपपत्तेः। कार्यं च तत् कार्यगुणत्वात् पार्थिवरूपत्वाद्वा सामान्यवत्त्वे सति अवयव-

1 घटादिकं– कि; क। 2 घटशब्दाद्वा– कि; क।

-विधर्मत्वाद्वा सामान्यवत्त्वेऽसति अस्मदादिबाह्यकरणप्रत्यक्षाद्वा अस्मादादिप्रत्यक्षविशेषगुणत्वाद्वेति संयोगवत्, पार्थिवपरमाणुरूपवत्, कर्मवत्, घटवत् बुद्धिवद्वेति। अन्यथाऽवयविनाशेप्यविनाशात् तदुपलम्भापत्तिः। आश्रयस्य व्यञ्जकस्याभावादनुपलम्भे सत्याश्रये परमाणौ तन्निवृत्तेरनुपपत्तिरिति। तस्मादवयविनो रूपस्य चोपादानोपादेयभावात् पूर्वापरभावनियम एवेति स्थितम्। विनाशस्यापि सहेतुकत्वस्थितौ यावद्द्रव्यभावस्य [1]च कार्यरूपादीनामुपलम्भात् द्रव्याभावे चानुपलम्भनियमात् द्रव्यविनाशकार्यत्वमवसीयते। यौगपद्याभिमानस्तु कालसन्निकर्षाच्चक्षुरुन्मेषरूपोपलब्धिवदिति सर्वमवदातम्॥

(११९) रसो रसनग्राह्यः। पृथिव्युदकवृत्तिः, जीवनपुष्टिबलारोग्यनिमित्तम्, रसनसहकारी, मधुराम्ललवणतिक्तकटुकषायभेदभिन्नः॥

रसत्वाभिसम्बन्धाद्रस इति स्थिते सत्याह—**रसो रसनग्राह्य** इति। रसनेनैव गृह्यते यो गुणः स रस इति [2]प्रमाणं लक्षणं च। आश्रयमाह—**पृथिव्युदकवृत्तीरि**ति। यद्यपि गुरुत्वमप्येवं तथापि प्रत्यक्षत्वे सतीत्यदोषः। अर्थक्रियामाह—जीवनपुष्टिबलारोग्यनिमित्तम्। जीवनं मनसः शरीरेऽवस्थानम्, पुष्टिः शरीरोपचयः, बलमायासक्षमता, आरोग्यं सुस्थता दोषधातुमलाग्नीनां समतेति यावत्। उपलक्षणं चैतत्; मरणकृशत्वदौर्बल्य[3]रोगकारणान्यपि द्रष्टव्यानि। तेषां निमित्तम्। यद्यपि गन्धादयोऽप्येवम्भूतास्तथा संयोग[4]स्पर्शभेदाश्च तथापि रसं प्रधानीकृत्य न तु स्वातन्त्र्येणेति विवक्षितम्। बाह्यस्यार्थक्रियामाह—**रसनसहकारी**। बाह्येनोदकरसेन स्तिमितस्य द्रव्यस्य रसो रसनेन गृह्यते न तु शुष्कस्य। विभागमाह—**मधुरे**ति। मधुरादिभिस्तद्भेदैश्च मधुरतरमधुरतमादिभिर्भिन्नो नानेत्यर्थः॥

(१२०) अस्यापि नित्यानित्यत्वनिष्पत्तयो रूपवत्॥

अस्यापीति—नित्येति भावप्रधानो निर्देशः। यथा रूपं सलिलपरमाणुषु नित्यं तथा रसोऽपि। यथा रूपं पार्थिवपरमाणुष्वग्निसंयोगविरोधि तदुत्पाद्यं च तथा रसोऽपि। यथा रूपं कार्यद्रव्येषु कारणगुणपूर्वकमाश्रयविनाशाद्विनश्यति तथा रसोऽपीत्यर्थः। तथैव चैतत्सर्वमुपपादनीयमित्यर्थः। एतेन कारणविरोधिनावुक्तौ वेदितव्यौ॥

---

1 'च' कि पुस्तके नास्ति। 2 प्रमाणलक्षणे- कि। 3 रोगरोगकारणान्यपि-जे।
4 संयोगभेदाश्च- कि. क।

(१२१) **गन्धो घ्राणग्राह्यः, पृथिवीवृत्तिः, घ्राणसहकारी सु[1]रभिरसुरभिश्च ॥**

गन्धत्वाभिसम्बन्धाद् गन्ध इति स्थिते सत्याह—**गन्धो घ्राणग्राह्यः**। गुणेषु मध्ये यो घ्राणेनैव गृह्यते स गन्ध इत्यर्थः। एतेन लक्षणप्रमाणे दर्शिते। **पृथिवीवृत्तिः**—पृथिव्यामेव वर्तते नान्यत्रेत्याश्रय उक्तः। **घ्राणसहकारी**त्यर्थक्रिया। घृतादिगन्धसहकृतेन घ्राणेन मृगमदादिगन्धग्रहणादेतदुन्नेयम्। **सुरभिसुरभिश्चे**त्यवान्तरभेदः। असुरभिरिति [2]सौरभविपरीतं सामान्यविशेषमाह न तु तदभावमात्रमधर्मवत्। **अस्यापीति**—अस्य नित्यत्वं नास्तीत्यतस्तद्विहायोत्पत्त्यादय इत्युक्तम्। उत्पत्तिरादिर्येषाम्, उत्पत्तितद्धेतुविनाशतद्धेतूनां ते तथोक्ताः। तेनोत्पत्तिर्द्वयी परमाणौ कार्ये च। कारणमपि द्वयम्, अग्निसंयोगोऽवयवगुणश्चेति। विनाशोऽपि द्विविधः परमाणौ कार्येच। तत्कारणमपि द्विविधम्, अग्निसंयोगो द्रव्यविनाशश्चेति बहुवचनोपपत्तिः। **पूर्ववदिति**—रसवदित्यर्थः॥

(१२२) **स्पर्शस्त्वगिन्द्रियग्राह्यः। क्षि[3]त्युदकज्वलनपवनवृत्तिः, त्वक्सहकारी रूपानुविधायी, शीतोष्णानुष्णाशीतभेदात्त्रिविधः॥**

स्पर्शत्वाभिसम्बन्धात् स्पर्श इति स्थिते सत्याह—**स्पर्शस्त्वगिन्द्रियग्राह्यः**। त्वगिन्द्रियेणैव गृह्यते यो गुणः सस्पर्श इत्यर्थः। [4]→ आश्रयमाह ← —**क्षित्युदकज्वलनपवनवृत्तिः**। यद्यपि स्थितिस्थापकोऽप्येवं तथापि विशेषगुणत्वे सतीत्यदोषः। **त्वक्सहकारी**—व्यजनादिवातस्पर्शसहकृतेन त्वगिन्द्रियेण उदकस्पर्शस्योपलम्भादेतदवसेयम्। तदेतद्रूपादिचतुष्टयं विषयसंस्कारकतया नयनादिसहकारि। **रूपानुविधायी**—रूपमनुविधातुं शीलमस्येति रूपानुविधायी। यत्र रूपं तत्रावश्यं स्पर्शो भवति। रूपव्यापक इति यावत्। अथवा रूपमनुविधायि यस्य स तथोक्तः। रूपं स्पर्शमनुविधत्ते स्पर्शपरतन्त्रं स्पर्शेन विना न भवतीत्यर्थः। अत्रापि रूपव्यापकत्वं स्पर्शस्य लभ्यत इति फलतो न कश्चिद्विशेषः। यद्यपि सङ्ख्यापरिमाणादयोऽपि रूपव्यापकास्तथापि विशेषगुणत्वे सतीत्यदोषः। अवान्तरविभागमाह–शीतेति।

(१२३) **अ[5]स्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववत्॥**

---

1 स द्विविधः सुरभिरसुरभिश्च–जे। 2 सुरभिविपरीतं–मु. कि; क। 3 पृथिव्युदक–जे. व्यो. (४४४)। 4 →← एतच्चिह्नान्तर्गतः–पाठः ‘जे’ पुस्तके नास्ति। 5 तस्यापि–जे।

कारणविरोधिनावतिदेशेन दर्शयति **अस्यापीति**। अत्रापि नित्येति भावप्रधानो निर्देशः। **पूर्ववदिति**—रसवदित्यर्थः। गन्धे नित्यत्वाभावाद् यथा रसः सलिलपरमाणुषु नित्यस्तथास्पर्शोऽप्यपार्थिवपरमाणुषु। यथा रसः पार्थिवपरमाणुष्वग्निसंयोगविरोधी तदुत्पाद्यश्च, अवयवविष्ववयवगुणपूर्वकः आश्रयविनाशादेव विनश्यति तथा स्पर्शोऽपीत्यर्थः॥

(१२४) पार्थिव परमाणुरूपादीनां पाकजोत्पत्तिविधानम्॥

अथेदानीं पाकजेषु परीक्षाशेषं वर्तयिष्यन्नाह—**पार्थिवेति**। पृथिव्याः कार्यभूताया इमे कारणभूताः परमाणवः पार्थिवाः। अथवा पृथिव्याः पृथिवीत्वस्याश्रयभूता इमे इति पार्थिवाः। तेषां ये रूपादयो रूपरसगन्धस्पर्शाः, तेषां पाकजत्वेन रू[1]पेण यदु[2]त्पत्तेर्विधानं प्रकारः स कथ्यते। तत्र विप्रतिपत्तौ संशयः; केचिदाहुः कार्यकारणसमुदाये पच्यमाने तस्मिन्नवस्थित एव रूपादयो विनश्यन्ति जायन्ते चेति। केचित्तु परमाणव एव स्वतन्त्राः पच्यन्ते, कार्यं तु पूर्वं निवर्तते, अपूर्वं प्रवर्तते। तत्र कारणगुणपूर्वक्रमेण रूपादयो जायन्तइति। प्रयोजनन्तु धर्मधर्मिणोः साधर्म्यवैधर्म्याभ्यां स्फुटं तत्त्वविवेकः, स च सम्यगात्मविवेके उपयोक्ष्यत इति।

(१२५) घटादेरामद्रव्यस्या[3]ग्निना सम्बद्धस्याग्न्यभिघातान्नोदनाद्वा तदारम्भकेष्व[4]णुषु कर्माण्युत्पद्यन्ते। तेभ्यो विभागाः, विभागेभ्यः संयोगविनाशाः, संयोगविना[5]शेभ्यश्च कार्यद्रव्यं विनश्यति॥

तत्र परमाणव एव स्वतन्त्राः पच्यन्त इति पक्षमुपादाय व्युत्पादयति **घटादेरित्यादि**। आदिग्रहणेन सर्वपार्थिवोपादानम्। **आमेति**—प्रकृतपाकापेक्षया न तु पार्थिवमपक्वं नामास्ति। अग्निना सम्बद्धस्य संयुक्तस्य तदारम्भकेषु घटाद्यारम्भकेषु परम्परायाऽणुषु कर्माण्युत्पद्यन्ते। **आरम्भकेष्विति** कार्यविनाशादिप्रक्रियासिद्ध्यर्थम्। कुतः? **अग्न्यभिघातान्नोदनाद्वा**—अग्निनेव नोदनाभिघातौ संयोगविशेषौ कर्माधिकारे वक्ष्येते। तेभ्यः—कर्मभ्यो विभागाः, विभागेभ्यः संयोगविनाशाः—द्रव्यारम्भकसंयोगविनाशाः, तेभ्यः कार्यद्रव्यं विनश्यति द्व्यणुकलक्षणम्। जात्यभिप्रायेणैकवचनम्।

---

1 रूपेण इति- कि. क. पुस्तकयोर्नास्ति। 2 यदुत्पत्तिविधानं- कि. क।
3 °स्याग्निसंयुक्तस्य–दे। 4 परमाणुषु–दे। 5 विनाशेभ्यः कार्यद्रव्यं–दे।

अत्र नोदनाद्युत्पत्तौ कर्मोत्पत्तिः प्रमाणम् । कर्मसु विभागाः, तेषु पूर्वसंयोगनिवृत्तिः, तत्र कार्यद्रव्यविनाश इत्यस्तु । एषां कार्यकारणभावावधारणात् कारणं विना च कार्यानुत्पत्तेः ।

(१२६) **तस्मिन् विनष्टे स्व[1]तन्त्रेषु परमाणुष्वग्निसंयोगादौष्ण्यापेक्षाच्छ्यामादीनां विनाशः । पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते ॥**

कार्यद्रव्यं [2]तु विनश्यतीत्यत्र किं प्रमाणम्? न हि सति द्रव्ये रूपादीनां विनाशोत्पत्ती नोपपद्येते परमाणुष्विव कार्यद्रव्येऽपि तयोरविरोधादित्यत आह **तस्मिन्निति** । न हि चन्द्रचक्षुषोस्तेजस्तथा पावकं यथा सौरमित्युक्त**मौष्ण्यापेक्षादिति** । पृथिव्याः श्यामं रूपमनादीति केचिदविचारितागम-श्रद्धालवो लपन्ति, तान् प्रत्युक्तं **पुनरिति** । तेन जन्मनोऽभ्यासं वदन् श्यामादीनामुत्पत्तिमत्त्वं [3]दर्शयति, अन्यथा [4]विनाशानुपपत्तेः ।

यद्यप्येकस्योत्पादविनाशहेतुत्वमेकजातीयत्वेऽपि कार्यस्य व्यक्तिभेदेन मध्यमशब्दवत् कालभेदेन चोपान्त्यशब्दवदुपपद्यते, तथापि पाकजेषु नायं विधिः, कार्यविनाशविशिष्टं कालमपेक्ष्य रूपादिविनाशात्, रूपादिविनाशविशिष्टं च कालमपेक्ष्य रूपाद्युत्पाददर्शनात् । सति च कार्यावष्टम्भद्रव्यस्यैव प्रतिबन्धकत्वात् । सति च रूपादौ रूपाद्यन्तरानुत्पत्तेः । न चैतावन्तं कालमेकोऽग्निसंयोगोनुवर्त्तितुमीष्टे, तेजसोऽविलम्बेन गमनशीलत्वात्, तेजोन्तरेणाभिहन्यमानत्वान्नुद्यमानत्वाच्च । अपि चोत्पादकस्यैव विनाशकत्वेऽग्निसन्तानव्यावृत्तौ रूपादिसन्तान[5]व्यावृत्तिप्रसङ्गः । विनाशकस्यैवोत्पादकत्वेऽग्निसंयोगस्यैकत्वादविशेषेण पाकतारतम्यस्यानुपपत्तिः । पुनस्तेनैव रूपादिविनाशात् पुनरुत्पादकस्य विनाशकत्वे पूर्वदोषननिवृत्तिः । तस्मात् परमाणुषु रूपादीनां विनाशोत्पादौ नैकाग्निसंयोगकारणकौ रूपाद्युत्पत्तिविनाशत्वात् श्यामाद्युत्पत्तिविनाशवदिति ।

तदिदमुक्त**मन्यस्मादिति** । एतेन पाकेन पूर्वरूपादिपरावृत्तिरेवावयविनाशे प्रमाणम् । अवयविरूपादिविनाशस्याश्रयविनाशहेतुत्वावधारणात्, कारणं च विना कार्यानुत्पत्तेः । ननु सत्यप्यवयविन्यग्निसंयोगादपि रूपादिविनाशः स्यादित्युक्तम्; न; कतिपयावयवपाके कार्ये कारणरूपानुकारानुपपत्तेः । नहि श्यामा अवयवाः, अवयवी च रक्त इति सम्भवति । निःशेषःपाके तु आपरमाणुतेजःसम्बन्धे तेजसश्च [6]गत्वरतया वेगवत्तया च

---

1 'स्वतन्त्रेषु' इति जे, व्यो, दे पुस्तकेषु नास्ति । 2 °द्रव्यं विन°– कि । 3 वदति–जे । 4 अत्र 'विनाशानुपपत्तेः' इत्यनन्तरं 'पाकजा इति रूपरसगन्धस्पर्शाः संक्षेपेण उक्ताः" इत्यधिकः पाठः कि. क पुस्तकयोः; अत्रानेन पाठेन न भाव्यमतो न स्थापितः–सं । 5 °व्यावृत्तौ घटादेर्नीरूपत्वप्रसङ्गः ।

I स्पर्शवत्तया-- कि. क ।

नोदनाभिघातयोरन्यतरः संयोगोऽवयवविश्लेषहेतुक्रियाजनक इति कथं न कार्यद्रव्यविनाशः ? किञ्च रूपाद्यन्तरोत्पत्तिरप्यवयव्यन्तरोपादे प्रमाणम्। तद्रूपादेः कारणगुणपूर्वकत्वनियमात्। अग्निसंयोगान्नष्टे रूपादौ तत्रावयविनि कारणगुणप्रक्रमेण रूपादिर्भविष्यतीति अदोष इति चेत्; न; यत्राग्निसंयोगो रूपादीनां नोत्पादकस्तत्र विनाशकोऽपि न स्यात् जलादिवदिति नियमात्। अग्निसंयोगस्यैव तदुत्पादकत्वे कारणगुणपूर्वकत्वव्याघातात्। व्याहन्यतामिति चेत्, न; आमदशायां श्यामादीनामनुत्पादप्रसङ्गात्। → [1]पाकजा इति रूपरसगन्धस्पर्शाः संक्षेपेण उक्ताः ← ।

तस्मात् परमाणुषु पाकादेव रूपादीनां विनाशोत्पत्ती अवयविनि च कारणगुणेभ्य एवोत्पादः, आश्रयविनाशादेव विनाश इति परमुपपद्यते। तदमी प्रयोगाः; पार्थिवावयवव-रूपादि, आश्रयविनाशादेव विनश्यति, अवयविरूपादित्वात् दग्धपटरूपादिवत्। तत् कारणगुणेभ्य एवोत्पद्यते, [2]तत एव तद्वदेव। घटादिपरमाणुष्वग्निसंयोगाः नियमेन द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियाहेतवः, अग्निसंयोगत्वात् [3]तुषाग्निसंयोगवदिति।

(१२७) **तदनन्तरं भोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्पन्न-पाकजेष्वणुषु कर्मोत्पत्तौ तेषां परस्पर[4]संयोगाद् द्व्यणुकादि[5]क्रमेण कार्यद्रव्यमुत्पद्यते। तत्र च कारण-गु[6]णपूर्वप्रक्रमेण रूपाद्युत्पत्तिः॥**

स्यादेतत्; यद्येवमापरमाण्वन्तो विनाशः स्वतन्त्राश्च परमाणवः पच्यन्ते, कुलाला-दिव्यापारमन्तरेण घटादीनां पुनरावृत्तौ लोकव्यवहारोच्छेदः। व्यर्थश्चैषां प्राच्यः प्रयास इत्यत आह—**तदनन्तरमिति**। रूपाद्युत्पत्त्यनन्तरं भोगिनामुदकाद्याहरणद्वारेण तत्साध्य-सुखदुःखाद्यनुभवभागिनाम्। **अदृष्टापेक्षात्**—धर्माधर्मापेक्षात्। **आत्माणुसंयोगा**-दित्यत्र 'आत्म'ग्रहणं स्पष्टार्थम्; भोगिनामित्यनेनैवात्मोपादानात्। **अणुष्विति**—परमाणुष्वित्यर्थः। कर्मणामुत्पत्तौ सत्याम्, **तेषां**—परमाणूनाम्, परस्परमन्योन्यम्। **संयोगादिति**—जात्यभिप्रायमेकवचनम्। द्व्यणुकमादिर्यस्य प्रक्रमस्य। तेन कार्यद्रव्यं घटादिलक्षणमुत्पद्यते। तत्र च कारणगुणप्रक्रमेण रूपाद्युत्पत्तिः। परमाणुरूपादेर्द्व्यणुकेषु रूपादिकम्, द्व्यणुकरूपादेस्त्र्यणुकेषु रूपादिकमित्यनेन क्रमेणेति।

---

1 →← एतच्चिह्नान्तर्गतः पाठः कि. क. पुस्तकयोर्नास्ति। लेखकप्रमादात् पूर्वत्रायोग्यस्थल एव स्थापित आसीत् किन्त्वत्रानेन पाठेन भाव्यम्–सं। 2 अत एव तदेव– कि। 3 मुषाग्नि-संयोगवदिति–मु. कि। 4 संयोगेभ्यो–दे। 5 प्रक्रमेण–जे। 6 गुणप्रक्रमेण–मु. भा; व्यो. (४४८)।

अत्र च कारणचतुष्टयस्यापि भावाद्रूपादेव रूपमुत्पद्यते न स्पर्शात्, वायावपि तदुत्पत्तिप्रसङ्गात्। रसादेस्तदुत्पत्तौ तदुद्भवाद्यनु[1]विधानानुपपत्तेः। एवं रूपाद्रसोत्पत्तौ तेजसि रसोत्पत्तिप्रसङ्गात्। गन्धात्तदुत्पत्तौ तदनुकारापत्तेः, अवयवकटुत्वाद्यनुप्रसङ्गाच्चेत्यादि स्वयमूहनीयम्। तदेवं रूपाद्यन्तरोत्पत्तिः स्थूलद्रव्योत्पत्तौ प्रमाणम्, सा तदवयवपरम्परायाम्, सा द्व्यणुके; तदुत्पत्तिः परमाणुसंयोगे [2]परमाणुसंयोगश्च तत् क्रियायाम्, साऽदृष्टवदात्मसंयोगे रूपादिमत्तायां चेति द्रव्यारम्भानुगुणावयवक्रियाया रूपस्पर्शादिमत्युत्पत्तिनियमात् रूपादिविरहिणो द्रव्यस्य क्षणमात्रस्थितेः कर्मणश्च कारणान्तरापेक्षत्वादिति।

(१२८) **न च [3]कार्यद्रव्ये रूपादिविनाश उत्पत्तिर्वा सम्भवति, सर्वावयवेष्वन्तर्बहिश्च वर्तमानस्याग्निना व्याप्त्यभावात्। अणुप्रवेशादपि व्याप्तिर्नसम्भवति, कार्यद्रव्यविनाशादिति ॥**

अथ पूर्वं रूपादिनिवृत्तिरुत्तररूपान्तराद्युत्पत्तिश्च कार्यद्रव्य एव यदि स्यातां को दोष इत्यत्र तर्क[4]विशेषमाह—**न चेति**। किमिति न सम्भवतीत्यत आह—**सर्वावयवेष्विति**। अवयविनः प्राप्तावप्यन्तर्वर्तिनामवयवानां बाह्यावयवावष्टम्भेनाग्निप्राप्तेरसम्भवात् पाको न स्यादित्यर्थः। सान्तराण्येवावयविद्रव्याणि, कथमन्यथा मध्यस्थानामपां स्यन्दनप्रस्रवणे, तथा चाणुप्रवेशो न विरुद्ध्यत इत्यत आह—**अणुप्रवेशादपी**ति। कुतः? **कार्यद्रव्यविनाशादि**ति।

अयमाशयः। ईदृशो हि तेजसो लाघवातिशयेन वेगातिशयः स्पर्शातिशयश्च यत् तज्जन्यं कर्म, कार्यद्रव्यं पूर्वव्यूहात् प्रच्यावयति। तदवयवाँश्च व्यूहान्तरं प्रापयति। अन्यथा सान्तरत्वेऽन्तरालेन प्रविशति पावके क्वथ्यमानाः क्षीरनीरादयो नोर्ध्वं [5]ध्मापयेरन्। मृदुसंयोगात्तथेति चेत्; न; तन्दुलादीनामपि तथा दर्शनात्। अतिदृढानामप्युपलमणिवज्रादीनामग्निदग्धानां स्फुटनात्। सातिशयोऽग्निसंयोगस्तथेति चेत्, कोऽतिशयार्थः? बह्वभ्यास इति चेत्, न; प्रथमस्याकिञ्चित्करत्वेऽभ्यासानुपयोगात्। न ह्याशुविनाशिनां क्रमभाविनां स्वरूपतः समुच्चयः सम्भाति। तस्माद्यथा शरीरादौ प्रत्यहमनुपलक्षणीयः कालान्तरे स्फुटीभूतो विशेषः प्रतीयते तथा घटादिपाकेऽपीति युक्तमुत्पश्यामः।

---

1 विधानापत्तेः–कि। 2 स च कि; क। 3 कार्यद्रव्य एव रूपाद्युत्पत्तिर्विनाशो वा–मु. भा। 4 तर्कशेषमाह–पा. ७. पु। 5 तापयेरन्–जे।

एतेन प्रत्यभिज्ञानं सर्वावस्थादर्शनमुपरिनिहितमूर्त्तान्तरधारणमावरणसंस्थानसङ्ख्यापरिमाण[1]रेखोपरेखादिचिह्नाद्यविपर्ययः पूर्वद्रव्याविनाशे प्रमाणमिति निरस्तम्। सूचिव्यतिभेदेन विदलितत्रिचतुरत्रसरेणुघटादिवदुपपत्तेः। तथापि न नश्यन्त्येव घटादय इति **मीमांसक**दुर्दुरूढाः, तेऽनुकम्पनीयाः। तथा हि परमाण्वपगमे द्व्यणुकमवश्यं नश्यतीति; अन्यथा कार्यनित्यताप्रसङ्गात्। तन्नाशे तु त्रसरेणवोऽवश्यं विनश्यन्ति। तन्नाशे तत्कार्यमीत्यनेनैव क्रमेणान्त्यावयविपर्यन्तः प्रलयः, अन्यथा निराश्रयकार्यावस्थानप्रसङ्गात्। कतिपयावयवनाशेप्यवस्थितावयवाश्रयं कार्यं स्यात्। न स्यात्, तावदवयवव्याप्तियोग्यपरिमाणवन्तो [2]न्यूनेष्वसंमितेः। संवृतपटवत् परिमाणसङ्कोचो भविष्यतीति चेत्, न भवेत्; स हि न तयोर्भेदोऽभेदस्य द्रव्यधर्मत्वात्। न विनाशः, परिमाणस्य यावद्द्रव्यभावित्वात्स्वाश्रयविनाशैकविनाश्यत्वाच्चेति। स्वाश्रयावयवविश्लेषविनाशाभ्यां विनाश्यमपि भविष्यतीति चेत्, न, अवयवविश्लेषविनाशाभ्यामवयवी न विनश्यति तत् परिमाणं तु विनश्यतीति महती प्रत्याशा। अवयविनः प्रत्यभिज्ञानादिति चेत्, क्षुद्रावयवविश्लेषे परिमाणं किं न प्रत्यभिज्ञायते? इत्यलमतिपीडया।

अथ द्व्यणुकनाशमारभ्य कतिभिः क्षणैः पुनरन्यद्द्व्यणुकमुत्पद्य रूपादिमद्भवतीति शिष्यजिज्ञासायां शिष्यबुद्धिवैशद्याय प्रक्रिया। तद्यथा नोदनादिक्रमेण द्व्यणुकनाशः (१), नष्टे द्व्यणुके परमाणावग्निसंयोगात् श्यामादीनां निवृत्तिः (२), निवृत्तेषु श्यामादिषु पुनरन्यस्मादग्निसंयोगाद् रक्तादीनामुत्पत्तिः (३), उत्पन्नेषु रक्तादिषु → उत्त[3]रसंयोगात् पूर्वक्रियानिवृत्तिः (४), ततो ← ऽदृष्टवदात्माणुसंयोगात् परमाणौ [4]द्व्यणुकारम्भणाय क्रिया क्रियया पूर्वदेशात् विभागः (५), विभागेन च [5]पूर्वदेशसंयोगनाशः (६) तन्नाशे परमाण्वन्तरेण संयोगोत्पत्तिः (७), संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकारम्भः (८), आरब्धे द्व्यणुके [6]कारणगुणेभ्यः कार्यगुणानां रूपादीनामुत्पत्तिः (९) इति यथाक्रमं [7]नवक्षणाः।

सेयं प्रक्रिया यदा क्रियातो विभागो → द्र[8]व्यारम्भसंयोगप्रतिद्वन्द्यप्रतिद्वन्द्वी चेति पक्षस्तदा ←। यदा विभागात् पूर्वसंयोगनाशस्ततो द्रव्यविनाशविभागजविभागौ चेति पक्षस्तदा → [9]दशमे क्षणे। तथा हि द्व्यणुकनाशविभागजविभागोत्पत्ती (१), पूर्वसंयोग-

---

1 परिमाणरेखादि–कि। 2 अल्पेषु–पा. ७. पु। 3, 8, 9 → ← एतच्चिह्नान्तर्गताः सर्वेऽपीमे पाठाः 'जे' पुस्तके न सन्ति। 4 द्रव्यारम्भणाय–पा. ७. पु, जे। 5 संयोगनिवृत्तिस्तस्मिन्निवृत्ते–पा. ७. पु., जे। 6 कारणरूपादिभ्यः–कि.। 7 दश क्षणाः–पा. ७. पु।

नाशश्यामादिनिवृत्ती (२), उत्तरसंयोगरक्ताद्युत्पत्ती (३), विभागजविभागक्रिययोर्निवृत्तिः (४), द्रव्यारम्भणाय परमाणौ क्रिया (५), क्रियया विभागः (६), तेन पूर्वसंयोगनिवृत्तिः (७), परमाण्वन्तरसंयोगः (८), द्रव्योत्पत्तिः (९), गुणोत्पत्तिरिति (१०), ← ।

यदा तु द्रव्यविनाशोत्तरकालं विभागजविभागश्यामाविनिवृत्ती, ततः पूर्वसंयोगनिवृत्तिरक्ताद्युत्पत्ती, तत उत्तरसंयोगोत्पत्तिः, ततो विभागजविभागकर्मणोर्निवृत्तिः ततो द्रव्यारम्भणाय परमाणौ क्रियेति पक्षस्त[1]दैकादशे क्षणे । तथा हि द्व्यणुकविनाशः (१), → [2]विभागजविभाग ← श्यामादिनिवृत्ती (२), → [3]पूर्वसंयोगनिवृत्ति ← रक्ताद्युत्पत्ती (३), उत्तरसंयोगः (४), → वि[4]भागजविभागकर्मणोर्निवृत्तिः (५), द्रव्यारम्भणाय परमाणौ क्रिया ← (६), क्रियया विभागः (७), संयोगविनाशः (८), परमाण्वन्तरसंयोगः (९), द्रव्योत्पत्तिः (१०), गुणोत्पत्तिरिति (११), कथम्? द्रव्यविनाशे सति तद्विशिष्टं कालमपेक्ष्य विभागेनोत्तरकालं विभागजविभागजननात् । विभागजविभागे सति → पूर्व[5]संयोगनिवृत्तौ उत्तरसंयोगजननात् । तस्मिन् सति च पूर्वक्रियानिवृत्तिः, तन्निवृत्तौ च क्रियान्तरारम्भावकाशादिति । कथं तर्हि पूर्वप्रक्रिया? [6]कारणसंयोगनाशमपेक्ष्यैव । विभागेनोत्तरविभागारम्भणाविति पक्षात् किमत्र तत्त्वमिति विभागे विवेचयिष्यामः ॥

सेयमेकस्मिन्नेव परमाणौ पूर्वद्व्यणुकविनाशोत्तरद्व्यणुकोत्पादकक्रियाद्वयमधिकृत्य क्षणगणना । यदा त्वेकत्र द्व्यणुकविनाशिकाऽन्यत्र द्व्यणुकान्तरोत्पादिका क्रिया तदा द्व्यणुकविनाशमारभ्य पञ्चमे षष्ठे सप्तमेऽष्टमे → न[7]वमे वा क्षणे ← गुणोत्पत्तिः । कथम्? यदा द्रव्यारम्भकः संयोगो विनश्यति तदैव परमाण्वन्तरे कर्म (१), तत एकत्र क्रमेण द्रव्यविनाशश्यामादिविनाशरक्ताद्युत्पादाः (२), अन्यत्र विभागपूर्वसंयोगनाशोत्तरसंयोगाः (३), क्षणान्तरे द्रव्योत्पत्तिः (४), पञ्चमे क्षणे गुणोत्पत्ति[8]श्चेति । एवं द्रव्यनाशसमकालं परमाण्वन्तरे क्रियाचिन्तनात् षष्ठे, श्यामादिनाशसमकालं क्रियाचिन्तायां सप्तमे, रक्ताद्युत्पत्तिसमकालं कर्मप्रक्रमेऽष्टमे क्षणे → रक्ता[9]द्युत्पत्तेरग्रिमक्षणे परमाण्वन्तरे कर्मचिन्तायां नवमे क्षण ← इति । द्वित्रिचतुःक्षणा च प्रक्रिया न [10]सम्भवत्येव । उत्पन्ने रक्तादौ सगुणेनैव द्रव्येण द्रव्यान्तरारम्भणादिति संक्षेप ।

एवमेव पक्वापक्वाभ्यामारम्भश्चिन्तनीयः । तदेवमवयविनोयावद्द्रव्यभाविना एव

---

1 दशमे क्षणे–जे । 2 3 4 5 7 9 इत्यत्र →← एतच्चिह्नान्तर्गताः पाठाः 'जे' पुस्तके न सन्ति । 6 संयोगनिवृत्तिमपेक्ष्यैव–पा. ८. पु; जे । 8 °रपि–जे । 10 नास्त्येव–पा. ७. पु ।

विशेषगुणाः पाकजाः परमाणुष्वेवेति व्यवस्थिते सुखादयो न शरीरगुणाः अयावद्द्रव्यभावित्वात्, न परमाणुगुणाः प्रत्यक्षत्वादित्माधिकारोक्तं समाहितं वेदितव्यमिति ॥

(१२९) **एकादिव्यवहारहेतुः सङ्ख्या।**

अथोद्देशक्रमप्राप्तां सङ्ख्यां निरूपयति-**एकादीति।** व्यवह्रियतेऽनेनेति हानोपानादि क्रियते इति व्यवहारो विज्ञानम्। एकं द्वे त्रिणीत्याकारम्, तस्य विषयतया हेतुः सङ्ख्येति प्रमाणमुक्तम्। न ह्येकादि विज्ञानं निर्विषयं व्याघातात्। नाप्यलीकविषयमबाधनात्। नापि घटस्वरूपमात्रनिबन्धनं घटमन्तरेण घटान्तरेऽपि भावात्। नापि घटत्वनिबन्धनं पटेऽपि भावात्। न चारजतेऽपि रजतप्रत्ययो भवन्ननिमित्तान्तरमपेक्षते इतिवत् घटे भूत्वा पटादावपि भविष्यति। न च निमित्तान्तरमपेक्षिष्यत इति साम्प्रतम् अभ्रान्तत्वात्। सोऽयं घटादावेकप्रत्ययो घटपटत्वारिक्तविषयः तत्प्रत्ययनिमित्तमन्तरेण [1]पटादावपि जायमानत्वात्, वस्त्रचर्मकम्बलेषु नीलप्रत्ययवत्। न हि तद्व्यतिरेकेण भवति तद्विषयश्चेति व्याघातात्। न हि तत्प्रत्ययनिमित्तमन्तरेण भवत्यभ्रान्तश्चेति सम्भवति, आकस्मिकत्वप्रसङ्गात्।

एतेन स्वरूपाभेद एकत्वं स्वरूपभेदस्तु नानात्वं द्वित्वमिति [2]**भूषणः** प्रत्याख्यातः। स्वरूपाभेदो हि घटस्य घट एवोच्यते। घटादिप्रत्ययस्य स्वरूपप्रत्ययस्य च घटाद्येकनिबन्धनत्वात् एकादिप्रत्ययस्य च घटपटादिसाधारणत्वात्, तथा च तन्निबन्धन [3]एकादिप्रत्ययः तं विहाय पटं नोपसङ्क्रामेत्। एवं स्वरूपभेद एव यदि द्वित्वं तदा त्र्यादिष्वपि द्वित्वप्रत्ययः स्यात्; घटादावेव वा स्वरूपभेद इति पटादौ द्वित्वप्रत्ययो न स्यादिति।

अथवा व्यवह्रियतेऽनेनेति व्यवहार इत्यभिधानमुच्यते, तेन एकादिशब्दप्रवृत्तिनिमित्तं सङ्ख्येत्युक्तं भवति। तथा च सङ्ख्याग्राहकप्रत्यक्षानुग्राहकस्तर्को दर्शितः। तथाहि यदि सङ्ख्या पदार्थो घटादिस्वरूपादधिको न स्यात् तदा घटमानयेत्युक्ते सत्तादाविवासन्दिग्धः किमेकमनेकं वेति न सन्दिह्येत। एकमानयेत्युक्ते घटं पटं वा इति परावृत्य न पृच्छेत्। समुच्चयासमुच्चयावेकत्वाऽनेकत्वे इति चेत्, न; एकत्वस्यैवासमुच्चयरूपत्वात्, द्वित्वादिसङ्ख्याया एव [4]समुच्चीयमानत्वात्। भिन्नानामभिन्नबुद्ध्युपग्रहमात्रस्य विषयतः स्वरूपतश्च विशेषाभावे त्र्यादिव्यवहारविलोपप्रसङ्गात्।

स्यादेतत्; त्वयाऽपि सङ्ख्याविशेषोत्पत्तयेऽपेक्षाबुद्धेर्विशेषोऽवश्यमभ्युपगन्तव्यः,

---

१ → ← एतच्चिसान्तर्गतः पाठः 'जे' पुस्तके नास्ति। २ भूषणो न्यायसूत्रवृत्तिकार इति प्रतिपादितमधस्तात्। ३ एकादि व्यवहारः—पा. ८. पु.। ४ समुच्चयत्वात्—कि; क।

अन्यथा तदविशेषे द्वित्वमेव त्रित्वमेवोत्पद्यत इति नियमो न स्यात्। न स्याच्च रूपादिषु चतुर्विंशतिरेव गुणा इति, कर्मसु पञ्चैवेत्यादिनियम इति चेत्, सत्यम्; क्वचित् तात्त्विकीं क्वचिद् भाक्तीं सङ्ख्यामेवोपादायेति वक्ष्यामः। सन्तु तर्हि द्वित्वादयः सामान्यविशेषाः घटत्वादिवत्, कृतं गुणान्तरकल्पनया? गुणपक्षेऽपि सामान्यद्वारैव प्रत्ययानुगमः समर्थनीयः तद्वरं लाघवात् तदेवास्तु। न; अविरोधात् परापरभावाभावाच्च। अन्यूनानतिरिक्तव्यक्तिवृत्तेश्च सामान्यद्वयस्थानभ्युपगमात्, भेदे प्रमाणाभावात् विरुद्धधर्माध्यासो हि तदिति। प्रत्ययवैलक्षण्यं प्रमाणमिति चेत्, न; धर्मविरोधमन्तरेण तस्यैवानुपपत्तेः। अन्यथा बुद्धिव्यपदेशपौनरुक्तयोच्छेदप्रसङ्गादिति।

अथवा एकादीत्यनेन गणितमुपलक्ष्यते। गुणत्वे सतीति चाधिकाराल्लभ्यते। तेन गणितव्यवहारहेतुर्गुणः सङ्ख्येति लक्षणमुक्तं भवति। लक्षणार्थश्च पूर्ववदिति। अन्यथैकव्यवहारहेतुरिति लक्षणे द्वित्वाद्यव्याप्तिः, द्वित्वव्यवहारे हेतुरित्युक्ते च त्रित्वाद्यव्याप्तिः। एकादिसमस्तव्यवहारहेतुरिति विवक्षितेऽसिद्धिः स्यादिति।

(१३०) **सा पुनरेकद्रव्या चानेकद्रव्या च। तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः। अनेकद्रव्या तु द्वित्वादिपरार्धान्ता। तस्याः खलु एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः। अपेक्षाबुद्धिविनाशाद्विनाश इति॥**

एवं प्रमाणतर्कलक्षणैर्व्यवस्थापितायाः सङ्ख्याया गुणान्तरेभ्यो विशेषं निरूपयति—**सा पुनरिति**। रूपादयो हि गुणा एकद्रव्या एव। संयोगादयस्त्वनेकद्रव्या एव। सङ्ख्या पुनरेकद्रव्या चानेकद्रव्या च। एकं द्रव्यमाश्रयतया सम्बन्धि यस्याः सा एकद्रव्या। अनेकं भिन्नं द्रव्यमाश्रयतया सम्बन्धि यस्याः साऽनेकद्रव्या।

तत्रैकद्रव्याया नित्यत्वाद्यतिदेशेन दर्शयति—तत्रेति। तत्र तयोर्मध्ये। सलिलमादिर्यस्य स सलिलादिः, स चासौ परमाणुश्चेति सलिलादिपरमाणुः; तस्य रूपं तदेवादिर्येषां द्व्यणुकादिरूपाणां तानि। तथा तेषामिव नित्यत्वमनित्यत्वं निष्पत्तिश्चैकद्रव्यायाः। एतदुक्तं भवति, यथा सलिलपरमाणौ रूपं नित्यं तथैकत्वमपि। यथा द्व्यणुकादौ रूपं कारणगुणप्रक्रमेणोत्पद्यते [1]तथैकत्वमपि। यथा द्व्यणुकादावाश्रयस्य विनाशात् तद्रूपं विनश्यति तथैकत्वमपीति।

---

1 तथा तस्यैकत्व–क।

अनेकद्रव्यामाह—**अनेकेति**। द्वित्वमादिर्यस्याः सा द्वित्वादिका। परार्द्धमन्तो यस्याः सा परार्द्धान्ता। परार्द्धात् परतः सङ्ख्याव्यवहारो नास्तीत्यागमदर्शनादवगन्तव्यम्।

तस्याः सङ्क्षेपेणोत्पत्तिविनाशप्रकारमाह—**तस्या खल्विति**। 'खलु' शब्दोऽवधारणे, निष्पत्तिरेव न त्वभिव्यक्तिमात्रम्। एकत्वे चैकत्वानि चैकत्वानि, तेभ्यः। अनेनासमवायिकारणमुक्तम्। अनेकद्रव्येत्यनेन प्रागेव समवायिकारणस्य दर्शितत्वात्। न एकमनेकम्, तदेव विषयो यस्याः बुद्धेः साऽनेकविषया बुद्धिः। तत्सहितेभ्य इति निमित्तकारणमुक्तम्। कथमेतत्? अथैकत्ववद् द्वित्वादिकमपि कारणगुणेभ्य एव जातमपेक्षाबुद्ध्या [1]एकपृथक्त्ववद् व्यज्यत इति किं न स्यात्? न स्यात्, द्व्यणुकादौ हि कारणगुणप्रक्रमेण द्वित्वादिकमुत्पद्यमानमेकत्वमिवैकद्रव्यं प्रसज्येत। त्रित्वादिकं तु नोत्पद्येत कारणभावात्। द्रव्यान्तरापेक्षया पराधंपर्यन्तं कारणस्यैकत्वादीनि सन्तीति कार्ये परार्द्धपर्यन्तमुत्पद्यमानमविरुद्धमिति चेत्; न; द्रव्यान्तराणामकारणत्वात्। तथा च कारणगुणपूर्वकत्वानुपपत्तिः। कारणाकारणसङ्ख्याभ्यः कार्याकार्यसङ्ख्याः स्युः संयोगवदिति चेत्, न, तद्वदेव तर्हि तासां न कारणमाश्रयः स्यात्। तथा च कारणपरमाणुभ्यां द्व्यणुकस्य त्रित्वादिव्यवहारो नोपपद्येत। किञ्च तैरेवैकत्वैरेकत्वं तैरेव द्वित्वादिकमिति महद्वैषम्यम्, कारणाविशेषे कार्यवैचित्र्यानुपपत्तेः। कार्यमपेक्ष्यैकत्वं स्वाश्रयमपेक्ष्य च द्वित्वादिकमिति चेत्, न; कार्यानित्यमेकमनेकव्यक्तिवृत्ति सामान्यमिति सामान्यलक्षणापत्तौ गुणत्वव्याघातात्। नानित्यं कार्यत्वे सति सततोत्पत्तिप्रसङ्गोऽपेक्षणीयान्तराभावादविनाशप्रसङ्गश्च। [2]कारणविनाशविरोधि गुणोत्पादयोरसम्भवात् द्वित्वद्विपृथक्त्वादेश्च समानदेशत्वे समानेन्द्रियग्राह्यत्वे च सति व्यञ्जकनियमानुपपत्तिरिति। तस्मादपेक्षाबुद्धिरेव द्वित्वादेरुत्पादिका नियामिका च, तद्विनाशश्च तद्विनाशक इति सङ्क्षेपः॥

(१३१) **कथम्? यदाबोद्धुश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सति तत्संयुक्तसमवेतसमवेतैकत्व[3]सामान्यज्ञानोत्पत्तावे[4]कत्वसामान्यतत्सम्बन्ध[5]ज्ञानेभ्य ए[6]कगुणयोरनेकविषयिण्येकाबुद्धिरुत्पद्यते तदा तामपेक्ष्य एकत्वाभ्यां स्वाश्रययोर्द्वित्वमारभ्यते। ततः पुनस्तस्मिन् द्वित्वज्ञानमुत्पद्यते। तस्माद्द्वित्वसामान्य-**

1 'एकपृथक्त्वात्' इति मु. कि. क पुस्तकयोर्नास्ति। 2 आश्रयनाशविरोधि–पा. ८. पु। 3 सामान्ये–जे। 4 'एकत्वसामान्यज्ञानोत्पत्तौ' इत्यधिकं 'दे' पुस्तके। 5 तत्र ज्ञानेभ्यः–कं. कि. व्यो (४५७। 6 एकत्वगुणयोः–कि।

ज्ञाना[1]दपेक्षाबुद्धेर्विनश्यत्ता, द्वित्वसामान्यत[2]त्सम्बन्धज्ञानेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानता, इत्येकः कालः ॥

[3]तदेतत् द्वित्वबुद्धिमात्रे न्यायप्राप्तां शिष्यजिज्ञासामनूद्य विशदयति—**कथमिति**। यदा यस्मिन् [4]काले बोद्धुश्चेतनस्य बुद्धिरुत्पद्यत इत्यग्रे भविष्यति। चक्षुषेत्युपलक्षणं त्वचा वा लिङ्गेन वेत्यपि द्रष्टव्यम्। **समानासमानजातीययो**रित्यनियमं दर्शयति। **सन्निकर्षेसतीति**—सम्बन्धे सतीत्यर्थः। तत्संयुक्तमिन्द्रियसंयुक्तं यद्द्रव्यं तत्समवेतौ यावेकत्वगुणौ, तयोः समवेतं यदेकत्वसामान्यं तत्र ज्ञानोत्पत्तौ सत्यामेकत्वसामान्यात् तत्सम्बन्धाच्च समवायलक्षणात्, तज्ज्ञानाच्च पूर्वोत्पन्नादेकत्वगुणयोर्विषयभूतयोः। अत एवानेकविषयिण्येका बुद्धिरुत्पद्यते उत्पन्ना भवति। यदोत्पन्ना भवति तदा तामपेक्ष्यैकत्वाभ्यां स्वाश्रययोर्द्वित्वमारभ्यते, द्वित्वारम्भणाय व्याप्रियते, द्वित्वारम्भानुगुणापेक्षाबुद्धिः सहकारिणी लभ्यते इति। यदा तदेत्येककालतानिर्देशोपपत्तिः। अपेक्षाबुद्ध्युत्पादऽद्वित्वोत्पद्यमानतयोरेककालत्वादिति।

अत्र च द्रव्यज्ञानात्पूर्वं गुणज्ञानम्, गुणज्ञानाच्च पूर्वं सामान्यज्ञानमिति विशेषणत्वादवसेयम्; व्यवच्छेदकस्य तथाभावात् स्वज्ञानेन च व्यवच्छेदकत्वात्। अनुनसंहितविशेषणस्य विशिष्टप्रत्ययादुपपत्तेः। तथा च कार्यमेव कारणे प्रमाणमिति द्वित्वस्यापेक्षाबुद्धिसत्त्वासत्त्वाधीनं सत्त्वासत्त्वमिति द्वे द्रव्ये इति द्रव्यज्ञानस्य सङ्कटप्रविष्टतया तदन्तर्भाव्य विनाशं व्युत्पादयति। **ततः पुनरिति**—तत उत्पन्ने द्वित्वे सति तस्मिन्नेव वर्त्तमानं यत् द्वित्वसामान्यं तत्र ज्ञानमुत्पद्यते। पुनरिति पूर्वोक्तसम्बन्धानुकर्षणार्थम्। तस्मादित्यानन्तर्यार्थम्। द्वित्वसामान्यज्ञानमेवापेक्षाबुद्धेर्विनश्यत्ता विनाशकारणसान्निध्यम्। यद्यपि सामान्यज्ञानमेवापेक्षाबुद्धेर्विनाशकारणं तदुत्पत्तिरेव च सान्निध्यं तथापि तस्य हेतुत्वमाविष्कर्तुं पञ्चमीनिर्देशः। द्वित्वसामान्यतज्ज्ञानात् तत्सम्बन्धाच्च द्वित्वगुणबुद्धेरुत्पद्यमानता—उत्पत्तिकारणसान्निध्यम्, पूर्ववत् पञ्चम्युपपत्तिः, यदेवापेक्षाबुद्धेर्विनाशकं तदेव गुणबुद्धेरुत्पादकमिति विनश्यत्तोत्पद्यमानतयोरेकः काल इत्युपपद्यते ॥

(१३२) तत इदानीमपेक्षाबुद्धिविनाशाद्द्वित्वगुणस्य विनश्यत्ता, द्वित्वगुणबुद्धितः सा[5]मान्यबुद्धेरपि विनश्यत्ता, द्वित्व-

1 दपेक्षाबुद्धिविनाशाद् द्वित्वगुणस्य विनश्यत्ता, द्वित्वगुणबुद्धितः सामान्यबुद्धेरपि विनश्यत्ता, द्वित्वगुणज्ञानत्सम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः—दे। 2 तत्सम्बन्धतज्ज्ञानेभ्यो—मु. भाः, तज्ज्ञाजनतत्सम्बन्धेभ्यो—व्यो. (४५७)। 3 तदेवम्—कि.। 4 क्षणे—पा. ८. पु.। 5 सामान्यबुद्धेर्विनिश्यत्ता—कि।

गुण[1]ज्ञानतत्सम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानत्येतकः कालः ॥

तत इदानीं तदनन्तरं तस्मिन् कालेऽपेक्षाबुद्धेर्विनाशाद् द्वित्वगुणस्य विनश्यत्ता, द्वित्वगुणबुद्धितः सामान्यबुद्धेरपि विनश्यन्ता, अपेक्षाबुद्धिविनाशगुणबुद्धयोर्द्वित्वगुणद्वित्वगुणद्वित्वसामान्यबुद्धिविनाशकतया तयोर्यौगपद्ये तयोर्विनश्यत्तायौगपद्यमित्यर्थः । द्वित्वगुणतज्ज्ञानतत्सम्बन्धेभ्यो 'द्वे द्रव्ये' इति द्रव्यज्ञानस्योत्पद्यमानता । गुणज्ञानमेव हि चरमं द्रव्यज्ञानस्योत्पादकं विशेषणतत्सम्बन्धयोः पूर्वसिद्धत्वात्, अपेक्षणीयान्तराभावाच्च तच्च तदैवेति भवत्येकः कालः ॥

(१३३) **त[2]दनन्तरं 'द्वे द्रव्ये' इति द्रव्यज्ञानस्योत्पादः, द्वित्वस्य विनाशः, द्वित्वगुणबुद्धेर्विनश्यत्ता, द्रव्यज्ञानात् संस्कारस्योत्पद्यमानतेत्येकः कालः ॥**

तदनन्तरं द्वे द्रव्ये इति ज्ञानस्योत्पादः; पूर्वनिर्दिष्टेभ्यो द्वित्वगुणतज्ज्ञानतत्सम्बन्धेभ्यो द्वित्वस्य विनाशः; पूर्वनिर्दिष्टादपेक्षाबुद्धेर्विनाशात् → [3]पूर्वनिर्दिष्टद्वित्वबुद्धितः सामान्यबुद्धिविनाशः, ← द्रव्यबुद्ध्युत्पत्तिरेव संस्कारस्योत्पादिका गुणबुद्धेर्विनाशिकेति तयोरुत्पद्यमानताविनश्यत्तेत्येकः कालः ॥

(१३४) **त[4]दनन्तरं द्रव्यज्ञानाद् द्वित्वगुणबुद्धेर्विनाशः द्रव्यबुद्धेरपि [5]संस्कारादिति ॥**

तदनन्तरं द्रव्यज्ञानाद्गुणबुद्धेर्विनाशः संस्कारस्योत्पाद इत्यपि द्रष्टव्यम् । क्षणान्तरे संस्कारबुद्धेरपि विनाश इति विशेषः ।

(१३५) **[6]एतेन त्रित्वाद्युत्पत्तिरपि व्याख्याता । एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो नि[7]ष्पत्तिरपेक्षाबुद्धिवि[8]नाशाच्च विनाश इति ॥**

एतेन त्रित्वाद्युत्पत्तिर्व्याख्याता—एतेन प्रकारेण-उत्पत्तिरित्युपलक्षणम्, विनाशोऽपि व्याख्यातः । तमेव प्रकारमाह—**एकत्वेभ्य** इति । तदयं प्रक्रियासङ्क्षेपः;

---

1 तज्ज्ञानतत्सम्बन्धेभ्यो–व्यो (४५७); तत्सम्बन्धतज्ज्ञानेभ्यो–कं; कि । 2 भाष्यमिदं जे दे पुस्तकयोर्नास्ति । 3 → ← एतच्चिह्नान्तर्गतः पाठः जे पुस्तके नास्ति । 4 तदनन्तरं द्वित्वगुणबुद्धिविनाशो–कि । 5 संस्कारात्–कं । 6 अनेन–पा. ६. पु । 7 द्वित्वादिनिष्पत्तिः–कि । 8 विनाशात्–कि; जे ।

--इन्द्रियसन्निकर्षः, तस्मादेकत्वसामान्यबुद्धिः, ततोऽपेक्षाबुद्धिः, ततो द्वित्वम्, तस्माद् द्वित्वसामान्यज्ञानम्, [1]तस्माच्च द्वित्वगुणज्ञानम्, ततो द्रव्यज्ञानम्, ततः संस्कार इत्युत्पादक्रमः।

विनाशक्रमस्तु अपेक्षाबुद्धित एकत्वसामान्यज्ञानस्य द्वित्वोत्पत्तिसमकालं विनाशः; अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानात् द्वित्वगुणबुद्धिसमकालम्; द्वित्वसामान्यज्ञानस्य द्वित्वगुणज्ञानात्; द्वित्वस्यापेक्षाबुद्धिविनाशात् द्रव्यबुद्धिसमकालम्; गुणबुद्धेर्द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालम्; द्रव्यबुद्धेस्तदनन्तरं संस्कारादिति।

प्रमाणन्तु संस्कारे द्वित्वविशिष्टद्रव्यस्मरणम्, द्रव्यज्ञानेऽनुव्यवसायः। गुणज्ञाने द्रव्यबुद्धिः सामान्यज्ञाने गुणबुद्धिः, द्वित्वसामान्यज्ञानगुणद्रव्यबुद्धयो द्वित्वे, अपेक्षाबुद्धौ च तत्कार्यं द्वित्वम्, सामान्यज्ञानेऽपेक्षाबुद्धिः, इन्द्रियसन्निकर्षे सामान्यज्ञानमिति। अपेक्षाबुद्धिस्तु द्वित्वस्योत्पादिका व्यञ्जकत्वानुपपत्तौ तेनानुविधीयमानत्वात् शब्दं प्रति संयोगविभागवदित्यनुसन्धेयम्। द्वित्वं बुद्धिजं प्रतिनियतपुरुषवेद्यत्वात् सुखवदिति तु जागराद्यज्ञानप्रयत्नाभ्यामनैकान्तिकं परं प्रत्यसिद्धं च इत्यनादेयम्॥

बुद्धेर्बुद्ध्यन्तरविनाश्यत्वे संस्काराविनाश्यत्वे च किं प्रमाणम्? आश्रयविनाशानुपपत्तावाशुतरविनाशित्वम्, आशुतरविनाशित्वे च परिशेषः। तथा हि बुद्धिस्तावदाशुतरविनाशिनीति विद्युत्सम्पातादिषु प्रत्यक्षसिद्धम्। प्रत्यर्थनियतत्वेन च कर्मसन्तानादौ तावदाशुतरोत्पादिनीत्यूहनीयम्। प्रतिक्षणं निमेषोन्मेषसन्ततौ स्थिरविषयेष्वपि लक्षणीयम्। तथा च स्थिरविषया अपि बुद्धयः सन्तानवर्त्तिन्यः, व्यवधाननिवर्त्तनीयत्वात् प्रदीपप्रभावत्। अन्यथोन्मील्य निमीलितनयनानामपि रूपसाक्षात्कारप्रसङ्गः। न चाहेतुको विनाश इति स्मर्त्तव्यम्, तस्मात् पूर्वपूर्वबुद्धीरुत्तरोत्तराः प्रतिघ्नन्ति; तदभावे च संस्कारः क्वचिदुभयमपि।

एवं द्वित्वादिकमपि यद्याशुतरविनाशि न स्यात् कालान्तरेऽपेक्षाबुद्धिमन्तरेण गुणान्तरवदुपलभ्येत। न चाभिव्यक्त्यर्थं तदपेक्षा, तस्याः कारणत्वादभिव्यञ्जकत्वे प्रागपि कारणत्वं न सिद्ध्येत्, साधितं चैतत्। तस्माद्यदा यदाऽपेक्षाबुद्धिस्तदा तदोत्पादितेति प्रत्युत्पन्नस्यैवोपलब्धेः पूर्वोत्पन्नावस्थानं योग्यानुपलम्भबाधितमित्याशुतरविनाश्येव द्वित्वादिकम्। तत्र च सत्येवाश्रयेऽसति च विरोधिनि गुणान्तरे निवर्तमानं निमित्तनिवृत्तेरेव निवर्त्तत इत्यवधार्यते। तथा च प्रयोगः, द्वित्वं निमित्तविनाशविनाश्यम्, आश्रयनाशविरोधिगुणान्तरप्रादुर्भावाभावे गुणस्य सतो विनाशित्वात् चरमज्ञानवत्। व्यतिरेकेण वा द्व्यणुकादिद्रव्यमुदाहर्तव्यमिति।

1 तस्माद् द्वित्वगुणज्ञानम्--कि।

कथं पुनर्द्वित्वविनाशकाले तद्विशिष्टद्रव्यज्ञानम्? को वाऽस्य विषयः? न हि धर्मधर्मिभ्यामपरः कश्चिद्विशिष्टो नाम; उच्यते; विशेषणं हि विशिष्टज्ञानकारणं न तु विषयः। तथा च विशिष्टज्ञानोत्पत्तिकालेऽसतोऽपि [1]पूर्वभाविनस्तत्त्वमविरूद्धम्। तत्किं विशिष्टज्ञानोत्पादकत्वमात्रं विशेषणत्वम्? इन्द्रियादेरपि तथाभावप्रसङ्गात्। ज्ञायमानस्य सत इत्यपि नास्ति, शब्दादेरपि तथाभावप्रसङ्गात्। व्यवच्छेदकस्य सत इति चेत्, न, उपलक्षणस्यापि विशेषणतापत्तेः। उपरञ्जकस्य सत इति तु स्यात्, तदेव त्वविवेचितं न श्रद्दधीमहि। तदात्मीभाव इति चेत्, न, असम्भवात्। न हि धर्मधर्मिणोस्तादात्म्यम्, तथा सति धर्मधर्मिभावानुपपत्तेः। न हि घटः स्वात्मना झटीतिप्रतीतिपथमवतरति, विशिष्टज्ञानस्य भ्रान्तत्वप्रसङ्गाच्च भिन्नयोरभेदावगाहित्वात्। भेदाभेदपक्षोऽस्तु इति चेत्, न, विरोधाय दत्तं जलाञ्जलौ कः पक्षस्तर्हि न स्यात्। नियमो न स्यादिति चेत्, नूनमनियमस्य विरुद्धत्वादिति भ्रातुर्मनसि विपरिवर्तते। सर्वे पक्षाः सन्तु इति चेत्, न, विरोधो हि भेदको यदा च सर्वमविरूद्धं तदा भेद[2]ककारणाभावात् सर्वमभिन्नमित्योष्ठपुरस्पन्दनस्याप्यवसरो नास्तीति क एतावति गहने प्रविशेत्। अवच्छेदकस्य सतो व्यवच्छेद्यप्रतीतौ स्वरूपनिवेशनमुपरञ्जकत्वमिति चेत्, अस्तु, न तु नाशकाले तत्सम्भवति, वर्तमानापन्नत्वात् प्रत्यक्षज्ञानस्येति। न च विशिष्टज्ञानं केवलविशेष्यालम्बनम्, उत्पलं नीलमुत्पलमित्यनयोरविशेषप्रसङ्गात्। न च विशिष्टं नाम षट्पदार्थव्यतिरिक्तम्, अनुभवयुक्त्यभ्युपगमाभावादिति।

इदमत्र तत्त्वम्; समानाधिकरणमवच्छेदकं विशेषणम्। अतद्व्यावृत्तिर्विशिष्टत्वम्, तेन नीलो गुणः स्वज्ञानेन विच्छित्तिप्रत्यायकतया समानाधिकारणतया च विशेषणम्, तत्प्रत्याय्यव्यवच्छित्त्यधिकरणतया उत्पलं विशेष्यम्, अनीलव्यावृत्तमुत्पलं विशिष्टप्रत्ययस्य विषयः। केवलज्ञानस्य तूत्पलमात्रम्। अवच्छेदकत्वाविशेषेऽपि व्यधिकरणमुपलक्षणम्, व्यावृत्तिश्च षट्पदार्थातिरेकिण्येवाभावरूपत्वात्। न च व्यावृत्तेरपि व्यावृत्त्यन्तरापेक्षायामनवस्था तत्स्वाभाव्यात्। एवञ्च क्वचिदिन्द्रियसामर्थ्यात् स्थिरं विशेषणं विशिष्टप्रतीतावात्मानमावेशयत्यपि न तु विशेषणतायां तदुपयोगः। 'देवदत्त' इत्यादिनामयोजनायां शब्दस्यापि चाक्षुषत्वप्रसङ्गादिति सर्वं सुस्थम्।

स्यादेतत्; समवाय्यसमवादिनिमित्तानामविशिष्टत्वात् द्वित्वत्रित्वाद्युत्पत्तिनियमे **किं** कारणं वाच्यम्? द्वाभ्यामेकत्वाभ्यां द्वित्वं त्रिभिरेकत्वैस्त्रित्वमारभ्यत इति किमसङ्गतमिति चेत्, एकत्वे द्वित्वादेरभावात्। द्वाभ्यां द्रव्याभ्यां द्वित्वं त्रिभिर्द्रव्यैस्त्रित्वमिति चेत्, न,

1 पूर्वकाल–जे। 2 भेदे प्रमाणाभावात्–मु. कि. क।

सङ्ख्योत्पत्तेः पूर्वं तत्रापि तदभावात्। सत्त्वेनावस्थावैयर्थ्यं चापद्येत। एकत्वेष्वेव कश्चिद्विशेषोऽस्तीति चेत्, न, तत एव तर्हि द्वित्वादिव्यवहारोऽस्तु, कृतं द्वित्वादिना। बुद्धिविशेषादित्येके तदसत्, तस्या विषयविशेषमन्तरेणान्यस्य साक्षात्कारित्वादेरनुपयोगात्। अदृष्टविशेषादित्येके वर्णयन्ति, तदसत्; अनियमप्रसङ्गात्। सैव सामग्री कदाचित् कस्यचित् द्वित्वादिकमारभेत्, कस्यचित् त्रित्वम्; तथा चैकं तावदेव द्रव्यं कस्यचिद् द्वयं कस्यचित् त्रयं स्यात्। अदृष्टविशेषनियमस्तु दृष्टमुपाधिमाश्रित्य भवेत्, ऊर्ध्वगतावग्नित्ववत् तिर्यग्गतौ पवनत्ववच्च। द्वित्वाभिमानाद् द्वित्वोत्पतिरित्यन्ये; एतदपि नास्ति; अपेक्षा[1]बुद्धिविशेषमन्तरेण तदभिमानस्यैवानुपपत्तेः। तत्रापि अभिमानान्तरापेक्षायामनवस्था।

तस्मात् **कणादपादान्** प्रणम्य यद्वदामस्तद्विद्वांसो विदाङ्कुर्वन्तु; यथा पाके समवाय्यसमवायिनिनिमित्तानां साम्येपि रूपाद्यभावापेक्षया सामग्रीविशेषाद्रूपरसाद्युत्पत्तिनियमः तथाऽपेक्षाबुद्धेः स्वविषयसमानाश्रयद्वित्वाद्यभावापेक्षया द्वित्वाद्युत्पत्तिनियमः। न तर्ह्येकपुरुषापेक्षाबुद्धिजनिते द्वित्वे सति पुरुषान्तरापेक्षाबुद्ध्या तत्र द्रव्ये द्वित्वमुत्पद्येत। न सङ्ख्याया नियतपुरुषवेद्यतया तन्नियमेनैव [2]स्वाभावस्य विवक्षितत्वादित्यदोषः। अथवा शुद्धयाऽपेक्षाबुद्ध्या द्वित्वम्, द्वित्वसहितैकत्वबुद्ध्या त्रित्वम्, त्रित्वसहितैकत्वबुद्ध्या चतुष्ट्वमित्यादि ज्ञेयम्।

सेनावनादौ कथम्, नहि तत्र नियतसङ्ख्यासहितमेकत्वज्ञानमस्तीति चेत्, अत एव न तत्र नियता सहस्रसङ्ख्योत्पद्यते। अनियतैकत्वालम्बनत्वादपेक्षाबुद्धेरवान्तरसामान्यविशेषरहितं बहुत्वमात्रं तूत्पद्यत इति केचित्; तदसत्; घटत्वादिविशेषरहिते शुद्ध[3]मृद्विशेषे तत्र सन्देहानुपपत्तेः। अङ्गान्तरोपचयप्रत्ययक्रमेण महती महत्तरा सेना इत्यादिव्यवहारानुपपत्तेश्च। तस्माद्वस्तुस्थितेनाभावनियमेनैव तत्र नियमः, तदप्रतीतिस्तु नियतापेक्षाबुद्धेर्व्यञ्जिकाया अभावत्वादिति।

कथं पुनरभावस्य कारणत्वम्? अन्वयव्यतिरेकाभ्यामिति सुप्रसिद्धम्; काऽत्रापि कथन्ता। ननु रूपाद्यभावानां सर्वेषां सर्वानुविधानाविशेषात् कथं रूपस्यैव रूपाभावो रसस्यैव रसाभावः कारणमिति नियमः? स्वाभावपूर्वकत्वात् सर्वस्य। न हि तस्मिन्नसति तज्जायते, अन्यस्मिंश्च सत्यपि तज्जायत एव। तस्माद्रूपादिषु जनयितव्येषु रूपाद्यभाव एव प्रयोजकः, रसाद्यभावस्तु साहचर्यनियममात्रेण इति कृतमप्रकृतचिन्तया।

---

1 बुद्धिमन्तरेण–कि. क। 2 तदभावस्यस्येति पाठान्तरम्। 3 यद्यपि सर्वेष्वपि पुस्तकेषु 'शुद्धमृद्विशेषरहिते' इति पाठः किन्तु सोऽर्थदृष्ट्या न सम्यक् इति योऽर्थदृष्ट्या सम्यक् स पाठोऽत्र स्थापितः। संपादकः।

शतं विपीलिकानां मया निहतमित्यत्र कथम्? गुणादिष्विव गौणो व्यवहारः, आश्रयानुपपत्तेर्बाधकस्य तुल्यत्वात्। नष्टस्यापि समवायिकारणत्वमिति त्वलौकिकमवैदिकं च। स्वाश्रयनाशे हि कार्यं विनश्येत्; उत्पद्यत इति तु विरुद्धस्य मुख्यमुदाहरणम्। दृश्यते तावदिति चेत्; वरमनाश्रयमेव तर्हि, नाशवदुत्पद्य नान्तेनासमवायिकारणाभावेऽपि तज्जन्म सुसमाहितं स्यात्। न हि नष्टाश्रयाण्येकत्वान्यपि सम्भवन्ति, मा भूवन्, तान्यपि अतथाभूतान्येव कारणानि भविष्यन्तीति चेत्, तदेतदायातं मग्नश्चेन्नागलोकमेव पश्यतीति। ओमिति चेत्; तर्हि निमित्तमात्रादेव सङ्ख्योत्पत्तिमभ्युपगच्छन् सुतलमेव पश्य। तथा च गुणादिष्वपि सङ्ख्याव्यवहारो मुख्य एव समर्थ्येत। एवं तर्हि भावमर्यादातिक्रमः स्यादिति चेत्; अद्यापि मर्यादातिक्रमाद्बिभेष्येव? स्मर तर्हि समवायिनोऽसमवायिनश्च स्वरूपम्, न हि भिन्नकालं तद्भवतीति॥

(१३६) **क्वचिच्चाश्रयवि[1]नाशादपि। कथम्? यदैकत्वाधारावयवे कर्मोत्पद्यते तदैवैकत्व[2]सामान्ये ज्ञानमुत्पद्यते। कर्मणा चावयवान्तराद्विभागः क्रियते, अपेक्षाबुद्धेश्चोत्पत्तिः॥**

एवं प्रतिनियतविनाशकारणं व्युत्पाद्य साधारणमाह—**क्वचिदि**ति। तदेतत् सूक्ष्मत्वात् प्रश्नपूर्वकं व्युत्पादयति **कथमिति** द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मसमकालमेकत्वसामान्यज्ञानचिन्तायामेतल्लभ्यत इति सङ्क्षेपः॥

(१३७) **ततो यस्मिन्नेव काले विभागात्संयोगविनाशस्तस्मिन्नेव काले द्वित्वमुत्पद्यते, [3]संयोगविनाशाद्द्रव्यविनाशः सामान्यबुद्धेश्चोत्पत्तिः॥**

तथा ह्यवयवकर्मसामान्यज्ञाने, विभागापेक्षाबुद्धी, संयोगनाशद्वित्वोत्पत्ती, द्रव्यनाशद्वित्वसामान्यज्ञाने, ताभ्यां द्वित्वनाशापेक्षाबुद्धिनाशाविति यथाक्रममवसेयम्॥

(१३८) **ततो यस्मिन्नेव काले सामान्यज्ञानादपेक्षाबुद्धेर्विनाशस्तस्मिन्नेव काले आश्रयविनाशाद्द्वित्वविनाश [4]इति॥**

उपलक्षणं चैतत्। कर्मसमकालमपेक्षाबुद्धिचिन्तनादुभाभ्यामित्यपि द्रष्टव्यम्। तथाहि कर्मापेक्षाबुद्धी, विभागद्वित्वे, संयोगनाशद्वित्वसामान्यज्ञाने, द्रव्यनाशापेक्षाबुद्धिनाशौ, ताभ्यां द्वित्वनाश इति। परत्वापरत्वयोश्चैतत् स्फुटीभविष्यति॥

---

1 विनाशादिति–मु. भा। 2 सामान्य–मु. भा। 3 ततः संयोगविनाशात्–कि।
4 'इति' जे पुस्तके नास्ति।

(१३९) **शोभनमेतद्विधानं वध्यघातकपक्षे, सहानवस्थानलक्षणे तु विरोधे द्रव्यज्ञानानुत्पत्तिप्रसङ्गः ।**

इह केषाञ्चिद्विरोधः सहानवस्थारूपो यथा पाकजपूर्वापररूपादीनाम् । केषाञ्चिद् वध्यघातकलक्षणो यथाऽग्निसंयोगपाकजादीनाम् । अतो विरोधिगुणत्वेन बुद्धिषु सन्देहः । ननु सहानवस्थानलक्षणपक्षे अहेतुको विनाशः स्यात्, पूर्वविनाशोत्तरसद्भावयोस्तुल्यकालतया कार्यकारणभावाभावात् । न चैवम् । तत् कुतः सन्देहः? न, ज्ञानाविनाश्यत्वेऽपि तद्धेतोरेव पूर्वस्य विनाशोत्पत्तौ [1]सन्देहोपपत्तेः । ततो विचारमारभमाणो वध्यघातकपक्षे यथोक्तप्रक्रियानिर्वाहद्वारा व्यवहारनिर्वाहप्रयोजनमाह **शोभनमि**ति । प्रशस्तं सप्रयोजनतयेत्यभिप्रायः । तथा च व्यवहारसिद्धिरेवात्र प्रमाणम[2]स्तीत्यभिप्रायः । सहानवस्थानपक्षे बाधकमाह **सहेति** । तथा च तदधीनो नियतसङ्ख्यद्रव्यव्यवहारो न स्यादिति भावः ।

(१४०) [3]**कथम् गुणबुद्धिसमकालमपेक्षाबुद्धिविनाशाद्द्वित्वविनाशे तदपेक्षस्य द्वे द्रव्ये इति ज्ञान[4]स्यानुत्पत्तिप्रसङ्गः इति ॥**

एतत्कथमित्यादिना व्युत्पादयति **कथमि**ति । विशेषणतत्सम्बन्धतज्ज्ञानेभ्यो हि विशिष्टज्ञानं भवतीति दर्शितम् । सहानवस्थाने तु द्वित्वसामान्यज्ञानकाल एवापेक्षाबुद्धेरनवस्थानं गुणबुद्धिसमकालं चापेक्षाबुद्धिविनाशाद् द्वित्वविनाश इति विशेषणाभावात् कुतो द्वे द्रव्ये इति बुद्धिः स्यादित्यर्थः ॥

(१४१) **लैङ्गिकवज्ज्ञानमात्रादिति चेत् । स्यान्मतम् 'यथाऽ[5]भूतं भूतस्य' इत्यत्र लिङ्गाभावेऽपि ज्ञानमात्रादनुमानं तथा गुणवि[6]नाशेऽपि गुणबुद्धिमात्राद्द्र[7]व्यप्रत्ययः स्यादिति ॥**

अत्र शङ्कते **लैङ्गिकव**दिति । एतद्विवृणोति **स्यान्म**तमिति । मतमभिमतं परस्य भवेत् । अभूतं भूतस्य (वै. सू. ३-१-११) इत्यत्र सूत्रे 'अभूतम्'—अविद्यमानमाशुतरविनाशितया यथा शब्दबुद्ध्यादिलिङ्गं 'भूतस्य' विद्यमानस्य वीणावेण्वात्मादेर्लिङ्गिन इत्यर्थे सति लिङ्गाभावेऽपि तज्ज्ञानमात्राच्छब्दबुद्ध्यादिज्ञानमात्रादसत्यपि लिङ्गे वीणादेरनुमानमिति व्याख्याय दार्ष्टान्तिके योजयति **तथे**ति ।

---

1 सन्देहकालोपपत्तेः–जे । 2 °मस्तीति नातिव्याप्तिः–जे । 3 'कथम्' जे–व्योपुस्तकयोर्नास्ति । 4 स्याभावः–जे. दे । 5 'विरोध्यभूतं भूतस्य' इति वैशेषिकसूत्रम् । (वै. सू. ३-१-११ । 6 विनाशे गुणबुद्धि°–जे. व्यो. । 7 द्वे द्रव्ये इति प्रत्ययः–कि ।

(१४२) **न, विशेष्यज्ञानत्वात्। न हि विशेष्यज्ञानं सारूप्याद् विशेषणसम्बन्धमन्तरेण भवितुमर्हति। तथा चाह सूत्रकारः "समवायिनःश्वैत्याच्छ्वैत्यबु[1]द्धेः श्वेते बुद्धिस्ते कार्यकारणभूते" इति॥ (वै. सू. ८-१-९)।**

परिहरति नेति। एतद्विवृणोति **नहीति**। नहि दण्डीति वा श्याम इति वा सारूप्याद्व्यवच्छित्त्या सह व्यवच्छेदकस्य सारूप्यं साधर्म्यं सामानाधिकरण्यं यावत्। तस्माद्विशेषणसम्बन्धमन्तरेण प्रत्ययो भवितुमर्हति। तथा सत्यामदशायां 'श्यामो घटः' इति रक्तदशायामपि स्मर्यमाणपूर्वरूपे 'ऽश्यामव्यावृत्तः' इति 'श्यामः' इति वा प्रतीयेतेति भावः।

विशेषणाद्विशेष्यज्ञानं भवति न तु तज्ज्ञानमात्रादित्यत्र सूत्रकारानुमतिमाह **तथा चाहेति**। 'समवायिनः' इति सम्बन्धस्य कारणत्वमुक्तम्, 'श्वैत्याद्' इति विशेषणस्य 'श्वैत्यबुद्धेः' इति ज्ञानस्य, 'श्वेते बुद्धिः' इति श्वेतद्रव्यविषया बुद्धिः फलम्। '**ते कार्यकारणभूते**' इति। तद्विशेषणं सा च विशेष्ये बुद्धिरिति कार्यकारणभूते इति प्रकृतम्।

(१४३) **[2]न तु लैङ्गिकं ज्ञानमभेदेनोत्पद्यते, तस्माद्विषमोऽयमुपन्यासः न आशूत्पत्तेः। यथा शब्दवदाकाशमित्यत्र त्रीणि ज्ञानान्याशूत्पद्यन्ते तथा द्वित्वाज्ञानोत्पत्तौ इत्यदोषः॥**

लैङ्गिकं तु नैवमतो ज्ञानमात्रादपि भवन्न दुष्यतीत्याह **न त्विति**। अभेदेन सारूप्येण न हि तद्भवति शब्दः 'शब्दवती वा वीणेति बुद्धिः बुध्यते वा पुरुष इति, किन्तूपलभ्यमानः शब्दो वीणाकार्यः, एवंभूतशब्दत्वात्'; इदमनुव्यवसीयमाना बुद्धिः द्रव्याश्रिता, 'गुणत्वात् कार्यत्वाद्वा' इति साध्यसाधनभेदेन वैयधिकरण्येनेत्यर्थः **तस्माद्विषमोऽयमुपन्यासः**, अयं दृष्टान्तोपन्यासो विसदृश इति॥

स्यादेतत्; यद्यतीते विशेषणे द्वे द्रव्ये इति ज्ञानं तर्हि श्यामोऽयं कुम्भ आसीद् दण्डयद्यमासीदितिवत् द्वितयामासीत् त्रितयमासीद् इति स्यात्, नत्विदानीं द्वयं त्रयमिति। किञ्च सामान्यज्ञानमपेक्षाज्ञानं, द्वित्वाद्युत्पत्तिः, तत्सामान्यज्ञानम्, गुणज्ञानम्, द्रव्यज्ञानमिति

1 बुद्धेश्च-सूत्रपाठे। 2 ननु-दे।

क्रमोऽप्ययमनुपलम्भबाधित इति देश्यद्वयमाशङ्क्याह **नाशूत्पत्त्ते**रिति। एतद्दृष्टान्तेन स्फुटयति यथेति ॥

(१४४) **वध्यघातकपक्षेऽपि समानो दोष इति चेत्; स्यान्मतम्, न[1]नु वध्यघातकपक्षेऽपि तर्हि द्र[2]व्यज्ञानानुत्पत्तिप्रसङ्गः। कथम्? [3]सामान्यबुद्धिसमकालं संस्कारादपेक्षाबुद्धिविनाशादिति ॥**

शङ्कते **वध्यघात**केति। विवृणोति **स्यान्मत**मिति। यद्भयात् सहानवस्थानपक्षो हेयस्तदिहाप्युपस्थितम्। तत्र ह्यपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानकालेऽनवस्थानं गुणबुद्धिसमकालं गुणनाशात् द्रव्यज्ञानानुपपत्तिरिति न कश्चिद्विशेषः। ज्ञानवत् संस्कारस्यापि पूर्वज्ञाननाशकत्वाभ्युपगमादित्यर्थः।

(१४५) **न; समूहज्ञानस्य संस्कारहेतुत्वात् समूहज्ञानमेव संस्कारकारणम्, ना[4]लोचनाज्ञानमित्यदोषः ॥**

परिहरति **न समूहे**ति। विवृणोति **समूहज्ञानमेवे**ति। समूहज्ञानं विशेष्यज्ञानम्। अत्र च विशिष्टस्यैव सर्वदा स्मरणादिति प्रमाणं विशिष्टज्ञानानुत्पत्तिप्रसङ्गश्च तर्क इति। स्यादेतत्; अपेक्षाबुद्धिः संस्कारं मा कार्षीत्, द्वित्वोत्पत्तिसमकालमेकत्वविशिष्टद्रव्यज्ञानं यत् तत्किं न कुर्यात्? तावतापि स दोषस्तदस्थ एवेति किं नाशङ्कितम्? परिहृतप्रायत्वात् द्वित्वादिसङ्ख्योत्पत्त्यनभिभूतस्यैवैकत्वस्य विशिष्टज्ञानजनकत्वाद् 'द्वे द्रव्ये,' इत्यादिव्यवहारकाले 'एकं द्रव्यम्' इति व्यवहाराभावात्। अन्यथा द्रव्यज्ञानानुत्पत्तिप्रसङ्ग इति स एव तर्क इति।

(१४६) **ज्ञानयौगपद्यप्रसङ्ग इति चेत्; स्यान्मतम्-ननु ज्ञानानां वध्यघातकविरोधे ज्ञानयौगपद्यप्रसङ्ग [5]इति ॥**

अन्यदाशङ्कते **ज्ञानयौगपद्ये**ति। विवृणोति **स्यान्मत**मिति।

(१४७) **न; अविनश्यतोरवस्थानप्रतिषेधात्। ज्ञानायौगपद्यवचने [6]ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानं प्रतिषिध्यते। न हि वध्यघातकविरोधे ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानमस्तीति ॥**

---

1 'न नु' दे पुस्तके नास्ति। 2 ज्ञानानुत्पत्तिप्रसङ्गः—कि। 3 द्वित्वसामान्यबुद्धिसमकालं—मु. भा। 4 नालोचनज्ञानम् मु. भा। 5 इति चेत्—कि। 6 ज्ञानयोः इति दे पुस्तके नास्ति।

परिहरति **नाविनश्यतोरिति**—'प्रतिषेधात् [1]प्रयत्नज्ञानायौगपद्यात्' (वै. सू. ३-२-३) इत्यनेन सूत्रेण। तदेवाह **ज्ञानायौगपद्यवचनेनेति**। युगपदुत्पत्तौ हि प्रतिशरीरमेकत्वमणुत्वं च मनसो न स्यात्, तथा च व्यासङ्गानुपपत्तिः। अविनश्यतोश्च ज्ञानयोरवस्थाने वध्यघातकलक्षणो विरोधो न स्यादिति तदेव प्रतिषिध्यते नान्यत्, प्रमाणाभावादित्यर्थः॥

(१४८) परिमाणं मान [2]व्यवहारकारणम्॥

परिमाणं मानव्यवहारकारणमिति। अत्रापि व्यवहारो [3]ज्ञानशब्दश्च पूर्ववत्। तेन यदेतद्धस्तवितस्त्यादिभेदवदुपलभ्यते तत्परिमाणमिति प्रमाणमुक्तम्। न चैतत् द्रव्यस्वरूपम्, एकतराप्रतीतावन्यतरप्रत्ययात्। न चैतत्सामान्यमात्रम्, सातिशयत्वात्। यदि च घटादिस्वरूपं परिमाणं स्याद्, 'महदानय' इत्युक्ते यत्किञ्चिन्महदानयेत्। तथा च प्रेष्यप्रेषकसम्प्रतिपत्ती विरुद्ध्येयाताम्, 'घटशब्दात् घटनिश्चयवत् परिमाणनिश्चयोऽपि स्यात्; परिमाणसन्देहवत् घटसन्देहोऽपि स्यादिति तर्कः। मानव्यवहारकारणं गुणः परिमाणमिति लक्षणं पूर्ववत्। मानव्यवहारस्त्वत्र पलसङ्ख्याविशिष्टव्यहारविलक्षण एवेति नातिव्याप्तिरिति।

(१४९) तच्चतुर्विधम् अणु, महद्, दीर्घं ह्रस्वं [4]चेति॥

एतद्विभजते **तच्चतुर्विध**मिति। अणु महद्दीर्घं ह्रस्वं चेति भावप्रधानो निर्देशः॥

(१५०) तत्र महद्द्विविधम्—नित्यमनित्यं च। नित्यमाकाशकालदिगात्मसु परममहत्त्वम्। अनित्यं त्र्यणुकादावेव।

तदेतदवान्तरभेदेन व्युत्पादयति **तत्रेति**। तेषु मध्ये सुप्रसिद्धत्वात्पश्चादुक्तमपि प्रथमं महत्त्वमुक्तम्। क्व नित्यमहत्त्वमस्तीत्यत आह—**नित्यमिति**। तदेतदेव शास्त्रप्रदेशेषु परममहत्त्वमिति व्यवह्रियते [5]काष्ठां प्राप्तत्वादित्याह—**परमेति**। द्वितीयां विधामाह—**अनित्यमिति**। त्र्यणुकादावेवेत्यन्त्यावयविपर्यन्तम्। एवकारेण द्व्यणुकनित्यद्रव्यव्यवच्छेदः।

(१५१) तथाऽण्वपि द्विविधम्। नित्यमनित्यं च। नित्यं परमाणुमनस्सु [6]पारिमाण्डल्यम्। अनित्यं द्व्यणुके एव॥

---

1 प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्–इति वै. सूत्रम् (वै. सू. ३-२-३) 2 व्यवहरणम्–दे। 3 ज्ञानं शब्दस्य–जे। 4 च–दे। 5 काष्ठामिति नास्ति क्वचित। 6 तत्पारिमाण्डल्यम्–मु. भा।

अणुत्वं विभजते **अण्वपीति** । नित्यमनित्यं चेत्यपिनानुकृष्यते । नित्यं परमाणुमनःसु । अत्र मनसः स्वशब्देनोपात्तत्वात् 'परमाणु'शब्दस्तृणोपलादिन्यायेन चतुर्विधेषु वर्त्तते; तच्च परिमाण्डल्यमित्युच्यत इत्यर्थः । **अनित्यं द्व्यणुक एव**—एवकारस्तु नान्यत्रेत्यवधारणार्थः ।

(१५२) [1]कुवलामलकबिल्वादिषु महत्स्वपि त[2]त्प्रकर्षभावाभावमपेक्ष्य भाक्तोऽ[3]णुव्यवहारः ॥

कथं तर्हि बिल्वाद्यपेक्षया आमलकाद्यणु इति व्यवहारः, इत्यत आह **कुवलेति** । महत्त्वोत्पत्तौ कारणसद्भावेन चाक्षुषत्वान्यथानुपपत्त्या च तत्त्वतो महत्त्वे व्यवस्थिते भाक्तोऽयं व्यवहारः । भक्तिश्च प्रकर्षभावाभावः । आमलके यः प्रकर्षभावस्तस्याभावः कुवले, बिल्वे यः प्रकर्षभावस्तस्याभाव आमलके । स खलु द्व्यणुकेऽपि वर्त्तते इत्युभाभ्यां भज्यते इति भक्तिः, तामपेक्ष्य भवतीति भाक्त इत्यर्थः ।

ननु परमाणुषु द्व्यणुकेषु चाणुव्यवहारो महत्त्वाभावकृत एव किं न स्यात्? न स्यात्, द्रव्यत्वेन परिमाणानुमानात् । द्व्यणुकात् परमाणावपकर्षाच्च । न चाभावावस्ययापकर्षः सम्भवतीति न च द्व्यणुकस्य महत्त्वम्, कारणाभावात्, प्रत्यक्षत्वप्रसङ्गाच्च । एतेनाप्रतीतायां भक्तौ कथं भाक्तो व्यवहार इति निरस्तम्, प्रकर्षाभावस्य प्रत्यक्षसिद्धत्वात् । परमाणुष्वणुत्वस्यानुमानात् । अन्यायश्चानेककार्यत्वमिति न्यायेन पश्चात् मुख्यत्वभाक्तत्वविवेचनात् स्वर्गादिशब्दवदिति ॥

(१५३) दीर्घत्वह्रस्वत्वे [4]तूत्पाद्य-महदणुत्वैकार्थसमवेते ।

दीर्घत्वह्रस्वत्वे त्विति । उत्पाद्ये च ते महत्त्वाणुत्वे चेति ताभ्यामेकस्मिन्नर्थे समवेते । यत्रोत्पाद्यं महत्त्वं तत्र दीर्घत्वम्, यत्रोत्पाद्यमणुत्वं तत्र ह्रस्वत्वमित्यर्थः । एते नित्ये न स्त इति केचित्; तदसत् तथाहि महत्त्वं प्रकृष्यमाणं परमकाष्ठां प्राप्नोति । तथा दीर्घत्वमपि प्राप्नुयात् । यथा चाणुत्वमपकृष्यमाणं परमाणुकाष्ठां प्राप्नोति तथा ह्रस्वत्वमपि, उपपत्तेरुभयत्रापि तुल्यत्वात् । कथं तर्हि दीर्घत्वेत्या[5]दिको ग्रन्थः? सत्यम्, नित्यानित्यभेदेन महत्त्वाणुत्ववत् प्रत्येकं दीर्घत्वह्रस्वत्वयोर्द्वैविध्यं सुप्रसिद्धमेकदेशोत्कीर्तनेन स्मारयति **दीर्घत्वेति** । तथा च परमदीर्घत्वपरमह्रस्वत्वे परममहत्त्वपरमाणुत्वैकार्थसमवेत इति स्मर्तव्यमिति हृदयम् ॥

---

1 कुवलयामलक–मु. भा। 2 प्रकर्षभाव–दे। 3 ऽणुत्व–मु. भा। 4 चोत्पाद्य–मु. भा।
5 दीर्घत्वेत्यादि ग्रन्थः कि ।

(१५४) **समिदिक्षुवंशादिष्वञ्जसा [1]दीर्घेष्वपि तत्प्र[2]कर्षभावाभावमपेक्ष्य भाक्तो ह्र[3]स्वव्यवहारः ॥**

ननु यद्युत्पाद्याणुत्वैकार्थसमवेतं ह्रस्वत्वं तर्हि कथं वंशाद्यपेक्षयेक्ष्वादिषु ह्रस्वत्वव्यवहार इत्याशङ्क्याह **समिदि**क्ष्विति । अञ्जसा मुख्यतः दीर्घत्वोत्पत्तौ कारणोपपत्तेः । वंशे यो दीर्घत्वस्य प्रकर्षभावस्तस्याभाव इक्षौ, तमपेक्ष्येक्ष्वादिषु ह्रस्वत्वव्यवहारो भाक्तः । स हि मुख्ये ह्रस्वेऽप्यस्तीत्युभाभ्यां भज्यते इति भक्तिः, तत्कृतः । तथेक्षौ दीर्घत्वस्य यः प्रकर्षभावस्तस्याभावः समिधि, तमपेक्ष्य तत्र ह्रस्वत्वव्यवहारो भाक्त इत्यर्थः ॥

(१५५) **अनित्यं चतुर्विधमपि सङ्ख्यापरिमाणप्रचययोनि ॥**

एवं विभागमाश्रयं च निरूप्य कारणं निरूपयति **अनित्यमिति** । नित्ये कारणचिन्ता विरुद्धा इत्यनित्यग्रहणम् । सङ्क्षेपतः सङ्ख्या च परिमाणं च प्रचयश्चेति यथासम्भवं योनिः कारणं यस्य तत् तथोक्तम् ॥

(१५६) **तत्रेश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्यणुकेषु बहुत्वसङ्ख्या तैरारब्धे कार्यद्रव्ये त्र्यणुकादिविलक्षणे रूपाद्युत्पत्तिसमकालं महत्त्वं दीर्घत्वं च करोति । द्विबहुभि[4]र्महद्भिश्चारब्धे कारणमहत्त्वान्येव महत्त्वमारभन्ते न बहुत्वम् । समानसङ्ख्यैश्चारब्धेऽतिशयदर्शनात् ॥**

एतत्प्रपञ्चयिष्यन् केवलैव बहुत्वसङ्ख्या यत्र महत्त्वे कारणं तदाह **तत्रे**ति । द्व्यणुकेष्वस्मदादीनामपेक्षाबुद्धेरसम्भवात् तदभावे बहुत्वसङ्ख्यानुत्पादात् कथमेतदित्याशङ्क्याह **ईश्वरे**ति । ईश्वरबुद्धेः सर्वविषयत्वादेकत्वान्तराण्यप्यालम्बनानि यद्यपि तथापि नियामकं तत्रादृष्टमिति भवत्यपेक्षाबुद्धिः । तामपेक्ष्योत्पन्ना बहुत्वसङ्ख्या परमाणुद्व्यणुकेषु द्वाभ्यां द्वाभ्यां परमाणुभ्यामारब्धानि द्व्यणुकानि परमाणुद्व्यणुकानि परमाणुभिर्द्व्यणुकादिप्रक्रमेणैव कार्यद्रव्यमारभ्यते नान्यथेति नियमज्ञापनार्थं परमाणुद्व्यणुकेष्वित्युक्तम्, उपपादितं चैतत् पृथिव्यधिकारे । तैर्द्व्यणुकैरारब्धे कार्यद्रव्ये त्रसरेणौ रूपाद्युत्पत्तिसमकालं संयोगोत्पत्तिसमकालत्वात् सङ्ख्योत्पत्तेर्द्रव्योत्पत्तिसमकालत्वाद्वा महत्त्वं दीर्घत्वं च करोति । समवाय्यसमवायिनोः साम्येऽपि कार्यभेदो निमित्तभेदात् । तच्चाभावोऽदृष्टं वेति ।

---

1 दीर्घेऽपि–दे । 2 तत्प्रकर्षभाव–दे । 3 ह्रस्वत्व मु. भा । 4 र्महद्भिरारब्धे–जे. दे ।

किं पुनरत्र प्रमाणम्? परिशेषः। तथाहि रूपादीनामप्रसङ्ग एव व्यभिचारात् प्रकर्षापकर्षाननुविधानाच्च। रूपस्य व्यभिचारो वायौ, रसस्य तेजसि, गन्धस्याबादिषु, गुरुत्वस्यानलादौ, स्नेहस्यानम्भसि, स्पर्शस्य प्रकर्षाननुविधानम्; नहि स्पर्शप्रकर्षात् परिमाणं प्रकृष्यते, संयोगप्रकर्षाद्वा। विभागस्तु कारणे वर्तमान आश्रयं निघ्नन् विरोध्येव। परत्वापरत्वे च परिमाणोत्तरकालमुत्पद्येते, तथा वेगोऽपि शब्दबुद्ध्यादीनामप्रत्यासत्तिरेवेत्यप्रसक्तिः। अनुविधीयमानप्रकर्षतया कारणैकार्थसमवेततया च त्रितयमिह प्रसक्तम्। तत्र द्व्यणुकेषु महत्त्वप्रचययोरसम्भवात् सङ्ख्यैव परिशिष्यते। यथा चाणुपरिमाणं न [1]परिमाण कारणं तथोक्तं द्रव्य इति। तदयं प्रयोगः 'त्र्यणुकपरिमाणं बहुत्वसङ्ख्याकार्य[2]म्, परिमाणप्रचयासम्भवे सति कार्यमहत्त्वात्; यत्पुनर्न बहुत्वकार्यं न तदेवम्, यथा द्व्यणुकपरिमाणं द्वितूलकपरिमाणं वेति। विपक्षे [3]बाधकं तु कारणानुपपत्तौ कार्यानुत्पत्तिप्रसङ्गः।

अस्तु तर्हि बहुत्वमेव सर्वत्र महत्त्वकारणं, क्लृप्तत्वात् कृतं महत्त्वैरित्यत आह—**द्विबहुभिरि**ति। द्वौ च बहवश्चावयवा द्विबहवः, तैर्महद्भिरारब्धे; कारणमहत्त्वे च कारणमहत्त्वानि च कारणमहत्त्वानि, तान्येव महत्त्वमारभन्ते न बहुत्वम्। कुतः? समानसङ्ख्यैरारब्धेतिशयदर्शनात् कारणमहत्त्वादिति शेषः। अयमाशयः यत्र द्वाभ्यामप्रचिताभ्यामारब्धं द्रव्यं तत्र बहुत्वप्रचययोरसत्त्वादेवाकारणत्वम्, अन्यत्रावगतशक्तेः सतश्च कारणमहत्त्वस्यैव कारणत्वम्, तस्याप्यकारणत्वे महत्त्वानुत्पत्तिप्रसङ्गात्। सामर्थ्यावधारणाय तु युक्तिरुक्ता **अतिशयदर्शनादि**ति। न तु समानसङ्ख्यैरारब्धे कारणमहत्त्वेन कार्यमहत्त्वातिशयदर्शनाद् बहुत्वमकारणमेव, यतः समानमहत्त्वैरल्पसङ्ख्यैरारब्धमपेक्ष्य सङ्ख्यात एवातिशयदर्शनेन सङ्ख्याया अपि कारणत्वावधारणाद्; अन्यथा तदपेक्षातिशयो न स्यात्, महत्त्वस्याविशेषादिति। तस्मादेकं द्वयं त्रयं वा यथासम्भवमवधृतशक्तिकारणं न तु सम्भवदप्यकारणमिति॥

(१५७) **प्रचयश्च तूलपिण्डयोर्वर्तमानः पिण्डारम्भकावयव[4]प्रशिथिलसंयोगानपेक्षमाण इतरेतरपिण्डावयवसंयोगापेक्षो वा द्वितूलके महत्त्वमारभते, न [5]बहुत्वमहत्त्वानि, समानसङ्ख्यापलपरिमाणैरारब्धेऽतिशयदर्शनात्। द्वित्वसङ्ख्या चाण्वोर्वर्तमाना द्व्यणुकेऽणुत्वमारभते।**

---

1 न कारणं–कि। 2 °सङ्ख्याकारणकम्–जे। 3 'बाधकम्' इति 'जे' पुस्तके नास्ति। 4 प्रशिथिलसंयोगापेक्षमाण–कि. संयोगापेक्षः–जे, व्यो. (४५७) पिण्डारम्भकः प्रशिथिलावयवसंयोगापेक्षः–दे। 5 बहुत्वानि–कि।

प्रचयस्य कारणत्वमाह **प्रचयश्चेति**। तुलेत्युपलक्षणम्, न त्वेतदेव विवक्षितम्। **प्रचयो** द्रव्यारम्भकः संयोगविशेषः पिण्डयोर्वर्तमान इति बहुत्वसङ्ख्या व्युदस्यते। गुणकर्मारम्भे सापेक्ष इत्यपेक्षाकारणमाह **पिण्डारम्भकावयवप्रशिथिलसंयोगापेक्ष** इति। पिण्डयोरम्भका ये अवयवास्तेषां ये प्रशिथिलाः संयोगास्तदपेक्षः। **इतरेतरपिण्डावयवसंयोगापेक्षो वेति**। एकस्य पिण्डस्यावयवैरपरस्य पिण्डस्यावयवानां ये प्रशिथिलाः संयोगादयस्तदपेक्षो वेत्यर्थः। स हि द्वितूलके महत्त्वमारभते। द्वाभ्यां तूलपिण्डाभ्यामारब्धं द्वितूलकं न बहुत्वमहत्त्वे, बहुत्वस्य तत्राभावात्। महत्त्वस्य च सतोऽपि प्रचयापेक्षत्वात्। अन्यथा समाहारगुरुत्वस्य तुल्यतया तूलकजात्यविशेषाच्च मूलभूतानां त्रसरेणूनां द्व्यणुकानां वा तुल्यसङ्ख्यतया परिमाणातिशयानुपपत्तिः। तदाह—**समानेति**। अतिशयदर्शनात्। प्रचयेनेति शेषः। अत्रापि न महत्त्वमिति केवलस्य महत्त्वस्य प्रतिषेधः।

अणुत्वोत्पत्तिमाह **द्वित्वसङ्ख्या चेति**। अण्वोः परमाण्वोः महत्त्वोत्पत्तौ कारणाभावात्, द्रव्यत्वेन परिमाणस्य च सिद्धत्वात्, कार्यगुणस्य कार्यत्वात्, परमाणुपरिमाणस्याकारणत्वात्। अनेकसङ्ख्यायाश्च परिमाणं प्रति कारणत्वावगतेः अन्यस्यासम्भवादित्यभिसन्धिः॥

(१५८) **म[1]हत्त्ववत् का[2]रणबहुत्वमहत्त्वसमानजातीयप्रचयेभ्यो दीर्घत्वस्योत्पत्तिः। अ[3]णुत्ववत् द्व्यणुके द्वित्वसङ्ख्यातो ह्रस्वत्वस्योत्पत्तिः।**

इमां दीर्घत्वोत्पत्तिमतिदिशति **महत्त्ववदिति**। ह्रस्वत्वोत्पत्तिमतिदिशति **अणुत्ववदिति**। यदि हि महत्त्वाणुत्वाभ्यां ह्रस्वत्वदीर्घत्वे भिन्ने स्यातां तदा तदुत्पत्तिचिन्ताया अवसर; भेद एव तु कुतः?

(१५९) **अथ त्र्यणुकादिषु वर्तमानयोर्महत्त्वदीर्घत्वयोः परस्परतः को विशेषः द्व्य[4]णुके चाणुत्वह्रस्वत्वयोरिति? तत्रास्ति महत्त्वदीर्घतयोः परस्परतो विशेषः, महत्सु दीर्घमानीयतां दीर्घेषु च महदानीयतामिति व्य[5]वहारदर्शनादिति। अणुत्वह्रस्वत्वयोस्तु परस्परतो विशेषस्तद्दर्शिनां प्रत्यक्ष इति॥**

1 महत्त्ववत्त्र्यणुकादौ–दे। 2 कारणबहुत्वसमानजातीय–जे. दे। 3 अणुवत्–दे। 4 द्व्यणुकेषु–मु. भा। 5 विशिष्टव्यवहार–मु. भा।

तदेवारोहपरिणाहाभ्यां विकल्प्यमानं तथा व्यवहारयतीत्यभिप्रायेण पृच्छति **अथे**ति। उत्तरं **तत्रे**ति। प्रश्नद्वयमध्ये प्रथमे प्रश्ने [1]उत्तरमाह **महत्स्विति।** अभेदे निर्द्धारणमनुपपन्नम्, नहि घटेषु कुम्भ आनीयतामिति हि सम्भवतीति भावः। आरोहपरिणाहौ च परिणामभेदावेवेति। तथा च सुविहितं विहितमिति द्वितीयप्रश्ने उत्तरम् **अणुत्वे**ति। तद्दर्शिनां योगिनाम्। अस्माकं तु भाक्तव्यवहारापौनरूक्त्यान्यथानुपपत्तिः तद्भेदे प्रमाणमिति भावः।

(१६०) **[2]एतच्चतुर्विधमपि परिमाणमुत्पाद्यम्; आ[3]श्रयविनाशादेव विनश्यतीति ॥**

एवमुत्पत्तिं निरूप्य। विनाशं निरूपयति—**एतच्चतुर्विधमि**ति। उत्पाद्यमिति नित्याद् व्यवच्छिनत्ति। आधारविनाशादेव विनाशो न तु [4]**मीमांसकवत्** सत्यप्याश्रये शरीरादौ परिमाणं निवर्त्तत इति शङ्कितव्यम्, विनाशे परिमाणान्तरोत्पत्तौ च कारणाभावात् कारणसङ्ख्यापरिमाणप्रचयानां तत्कारणत्वात्। संयोगिद्रव्यैश्च पूर्वद्रव्यावयवसहितैः सति पूर्वद्रव्ये द्रव्यान्तरानारम्भात्। अकारणवर्तिभिश्च तैः परिमाणारम्भेतिप्रसङ्गात्, [5]असमवायिकारणलक्षणायोगाच्च ॥

(१६१) **पृथक्त्वमपोद्धारव्यवहारकारणम् ॥**

पृथक्त्वमपोद्धारव्यवहारकारणमिति। 'एतस्मादिदं पृथक्', 'एत[6]स्मादिदमितरद् अन्यद् अर्थान्तरम्' इति ज्ञानमभिधानं च अपवृज्यापेक्ष्य च उद्धारो निर्द्धारणमपोद्धारः; स चासौ व्यवहारश्चेति, तस्य निमित्तं पृथक्त्वमिति पूर्ववत् प्रमाणलक्षणे स्याताम्। तर्कस्तु न स्यात्-इतरेतराभावेनैव गतार्थत्वात्। तथाहि यावदुक्तं भवति 'इदमिदं न भवति' तावदुक्तं भवति 'इदमस्मात् पृथगर्थान्तरम् इतरत् भिन्नम्' इति।

न, पृथगादिशब्दाः पर्याया इत्यनुमन्यामहे, न त्वभावार्था इति; पञ्चम्याः सम्बन्धानुपपत्तेः। न हि 'घटात् पटः पृथक्' इति 'घटः पटो न भवति' इति वाक्यार्थः। प्रातिपदिकार्थमात्र एवोपपदविभक्तिरियमनुशासनबलादिति चेत्? **अन्यारादितरर्त** (पा. सू, २-३-२९) इत्यत्रान्यशब्दस्यार्थपरत्वात्। तथा चान्यशब्दसमानार्थतया नञोऽपि योगे पञ्चमी स्यात्। नञर्थविशिष्टः पृथक्शब्दार्थो न तु नञर्थमात्रमिति चेत्? न; 'अपरो

---

1 उपपत्तिमाह महतेति–जे। 2 तत्–मु. भा; 'अपि' जे. व्यो दे पुस्तकेषु नास्ति। 3 आधार–जे. व्यो (४८०), दे। 4 मीमांसकादिवत्–जे। 5 समवाय–जे। 6 एतस्माद्धिदमर्थान्तरम्–क।

घटः’ इत्यत्रापि स्यात्। न च पञ्चम्येवात्र निषेधार्था ‘पटो घटाद्’ इति ‘न घटः पटः’ इति स्थितेः पृथक्शब्दस्य निरर्थकत्वप्रसङ्गात्। तस्मात् ‘पृथक्’ ‘अन्यः’ इत्यादीनां योऽर्थः तत्पृथक्त्वं धर्मान्तरमास्थेयम्।

‘पृथक्’शब्दस्याविशिष्टम् इत्यर्थः इति चेत्; न; शब्दबुद्धिदण्डाद्यविशिष्टतयाऽपृथक्त्वेऽपि तद्विशिष्टस्य व्योमात्ममैत्रादेर्दर्शनात्। एतेन वैधर्म्यमात्रं पृथक्त्वमिति निरस्तम्। ‘श्यामाद् रक्तो विधर्म्मा न च पृथक्’ इति दर्शनात्।

अस्तु तर्हि गोत्वादिवत् सामान्यविशेषः पृथक्त्वमित्यपि न वाच्यम्, [1]जातिसङ्करप्रसङ्गात्। तस्माद् गुण एवेति स्थितम्। न चान्यत्रान्तर्भवति, रूपादीनामवध्यनिरूपकत्वात् व्यभिचाराच्च। एवं च सति गुणादौ ‘गौणः’ ‘पृथक्’ इति व्यवहारो द्रष्टव्यः। भेदश्च गुणयोगः। स एव तर्हि पृथक्त्वमस्तु इति चेत्; न; स्वरूपस्यावध्यनपेक्षत्वात्। यदाऽवध्यपेक्षस्तदा पृथग्व्यवहारं करोतीति चेत्; न चैतत् कदाप्यवधिमपेक्षते। तत्स्वाभाव्ये वा सर्वदाऽपेक्ष्येत। इतरेतराभाववैधर्म्ये च प्रागेव निरस्ते इति॥

(१६२) **तत्पुनरेकद्रव्यमनेकद्रव्यं च॥**

एवं व्यवस्थितस्य पृथक्त्वस्य भेदं निरूपयति **तत्पुनरिति**। ‘पुनः’शब्दः परिमाणमन्तरोक्तं व्यवच्छिनत्ति। नन्वेकमेव पृथक्त्वमस्तु कृतं भेदकल्पनयेति न वाच्यम्, सामान्यलक्षणापत्तेः। तथाप्यनेकद्रव्यमित्यनुपपन्नम्, प्रत्येकविश्रान्तैरेव पृथक्त्वैस्तथा व्यवहारोपपत्तेः। ‘द्वौ शुक्लौ’ इत्यादिव्यवहारवद् इति चेत्; न; अन्योन्यावधित्वानवधित्वाभ्यां विरोधेन भेदात्। प्रत्येकविश्रान्ते हि पृथक्त्वे अन्योन्यावधिकेऽपि ‘चैत्रो मैत्रात् पृथक्’ मैत्रश्चैत्रात् पृथक्’ इति प्रत्ययात्। न तु ‘चैत्रमैत्रौ मैत्रात् पृथक्’ इति प्रत्ययो यथा देवदत्तादेः। तस्माद्यथा प्रत्येकविश्रान्तैकत्वाभ्यां तथाभूतेन द्वित्वेन वा न द्वित्वव्यवहारः [2]प्रवर्तते, प्रत्येकप्रसङ्गात्, किन्तु व्यासज्यवृत्तेर्गुणान्तरादेव। तथा व्यासज्यवृत्तिगुणान्तरादेव ‘द्वौ पृथक्’ इति व्यवहार इति स्थितम्।

एवं तर्हि द्विपरत्वादयोऽपि किं न स्युः? अन्योन्यावधित्वाभावादिति चेत्; न; एकपरत्वस्यापि तथाभूतत्वे विरोधाभावेन भेदाभावाद् अतिरिक्तकल्पनानुपपत्तेः। न हि समानदेशस्थयोः संयुक्तसंयोगे विशेषोऽस्ति। न च तं विना ते भवतः। यत्रास्ति तत्र का

---

1 घटजलगतद्विपृथक्त्वाभाववति पटे पृथिवीत्वम्, पृथिवीत्वाभाववति जले द्विपृथक्त्वम्; उभयोः समावेशः जले इति परापरभावनुपपत्तिः, संपादकः। 2 ‘प्रवर्तते’ इति कि. पुस्तके नास्ति। सम्भवन्ति क.।

गतिः? एकपरत्वस्यान्योन्यापेक्षत्वात् द्विपरत्वस्य च तदन्यापेक्षत्वाद् इति चेत्? न; तत्राप्येकस्य परत्वाद् अपरस्य च परतरत्वात् प्रत्येकविश्रान्तिरेव; तदनादृत्य 'द्वे परे' इति व्यवहारः। न तु व्यासज्यवृत्तिरेक एव तत्र परत्वगुणः, एकस्यातिशयानतिशयानुपपत्तेरिति।

(१६३) तस्य तु नित्यानित्यत्वनिष्पत्तयः सङ्ख्यया व्याख्याताः।

नित्यत्वादिकमतिदेशेन दर्शयति **तस्य त्**विति। यथा एकत्वसङ्ख्या नित्यद्रव्येषु नित्या, अवयवविनि कारणगुणक्रमेणोत्पद्यते, द्रव्यविनाशाद् विनश्यति तथा एकपृथक्त्वमपि। यथा द्वित्वादिकमपेक्षाबुद्धेरुत्पद्यते तद्विनाशाद्विनश्यति, क्वचिदाश्रयविनाशात्, क्वचिदुभाभ्यां तथा द्विपृथक्त्वादिकमपीत्यर्थः॥

(१६४) एतावांस्तु विशेषः, एकत्वादिवदे[1]कपृथक्त्वाद्यपरसामान्याभावः सङ्ख्यया तु विशेष्यते, तद्विशिष्टव्यवहारदर्शनादिति॥

स्यादेतत्। तत् किं द्वित्वत्रित्वादिसामान्यविशेषा अपि तत्र [2]**समवयन्ति**? यद्येवं जातिसङ्करः स्यात् इत्यत आह—**एतावा**निति। कथं तर्हि 'द्वे पृथक्' 'त्रीणि पृथक्' इत्यादिव्यवहारः, इत्यत आह सङ्ख्यया त्वेकार्थसमवायिन्या विशिष्यते इति। उपलक्ष्यते यथा 'शुक्लः पृथक्' इति। शौक्ल्येनोपपत्तिमाह **तद्विशिष्टे**ति। कारणविशेषात् प्रकर्षनिकर्षलक्षणोऽवान्तरविशेषस्तु अस्त्येव माधुर्यादिवत्। स च सामान्यविशेष एव। गुणकर्मणोः समवेतस्य धर्मान्तरस्याभावादिति॥

(१६५) संयोगः संयुक्तप्रत्ययनिमित्तम्॥

संयोगः संयुक्तप्रत्ययनिमित्तम्। यद्विशिष्टे द्रव्ये 'संयुक्तमिदमनेन' इति मतिर्भवति स संयोगः इति प्रमाणमुक्तम्।

(१६६) स च द्रव्यगुणकर्महेतुः॥

कार्यप्रदर्शनेन तर्कमाह **स चे**ति। अवयवसंयोगा द्रव्यहेतवः। अग्निसंयोगः पाकजानाम्; परिमाणस्य प्रचयाख्यः। अवयवकर्मजः संयोगो निःक्रियावयविसंयोगस्य। परत्वापरत्वयोर्दिक्कालपिण्डसंयोगः। बुद्ध्यादीनामात्ममनः संयोगः। शब्दस्य भेर्याकाशसंयोगः। कर्मणो नोदनाभिघाताविति। एतेन यदि संयोगो न स्यात् द्रव्यगुणकर्म्माणि न स्युः कारणाभावात्, भावे वा सर्वदैव भवेयुः। द्रव्यादीनां पूर्वसिद्धानां सर्वदा तुल्य-

1 °पृथक्त्वादिष्वपर°—कं; °पृथक्त्वादिसामान्या°—कि। 2 सम्भवन्ति—क।

रूपत्वात् । क्षणभङ्गपरिणामवादयोरपास्तत्वात् । अदृष्टादिति चेत्, न, तस्याप्यनुष्ठानसाध्यत्वात्, तस्यापि प्रयत्नरूपत्वात् । तस्याप्यात्ममनः शरीरेन्द्रियसंयोगसाध्यत्वात् । अदृष्टान्तरमात्रसाध्यत्वे यत्नविधिवैयर्थ्यप्रसङ्गादिति तर्को दर्शितः ।

(१६७) **द्रव्यारम्भे निरपेक्षः, 'तथा भवतीति सापेक्षेभ्यो [1]निरपेक्षेभ्यश्च' (वै. १०-७) इति वचनात् । गुणकर्मारम्भे तु सापेक्षः 'संयुक्तसमवायादग्नेर्वैशेषिकम्' (वै. १०-२-७) इति वचनात् ॥**

यथा द्रव्यामारभते तं प्रकारमाह **द्रव्यारम्भे निरपेक्ष** इति । द्रव्ये कर्तव्ये तदवयवाः संयोगार्थमेव कारणान्तरमपेक्षन्ते, सति संयोगे न किञ्चिदित्यनपेक्षः संयोगः सहकारितया न किञ्चिदपेक्षते इत्यर्थः । एतेन चरमभाविनिमित्तान्तरं नापेक्षत इत्यपि लभ्यते । अत्र सूत्रकारसम्मतिमाह **तथा भवती**ति । अस्यार्थः—सर्वथाऽनुत्पन्नसंयोगतया संयोगापेक्षेभ्यस्तन्तुभ्यो 'भविष्यति पटः' इति यथा प्रत्ययस्तथाऽनुत्पन्नसंयोगतया सापेक्षेभ्यः, उत्पन्नसंयोगतया निरपेक्षेभ्यो 'भवती'ति प्रत्ययः । सर्वथोत्पन्नसंयोगतया निरपेक्षेभ्यो 'भूतः' इति प्रत्यय इत्यपि द्रष्टव्यमिति ।

एवं सूत्रकारवचनाज्जानीमो द्रव्यारम्भे आत्मलाभकारणातिरिक्तं संयोगस्यापेक्षणीयं नास्तीति गुणकर्मारम्भे सापेक्षः । गुणेषु कर्मसु च कर्तव्येषु स्वात्मलाभकारणातिरिक्तमप्यपेक्षते । [2]तथा हि यथा पाकजेष्वग्निसंयोग औष्ण्यम्, न च तेनाऽसौ जन्यते । परिमाणे प्रचयः स्वाश्रयावयवप्रशिथिलसंयोगम्, न च तेनासौ जन्यते । परत्वापरत्वयोर्दिक्कालपिण्डसंयोगा अपेक्षाबुद्धिम्, न च तया ते जन्यन्ते इत्यादि स्वयमूह्यम् । एवं कर्मणि नोदनाभिघातौ स्पर्शं वेगं चापेक्षेते, न च ताभ्यां तौ जन्येते इति । अपेक्षणीस्य चरमभावित्वमत्राविवक्षितम् । अत्र सूत्रकारसम्भतिमाह **संयुक्तसमवाया**दिति । अस्यार्थः—पार्थिवेन परमाणुना पाक्येन संयुक्तेऽग्नौ समवायादग्नेर्वैशेषिकमौष्ण्यं पाकजानां निमित्तमिति शेषः । तेन स्वानुत्पादकापेक्षत्वात् सापेक्ष इत्युक्तं सूत्रकृता भवतीति ।

(१६८) **अथ कथंलक्षणः कतिविधश्चेति? अप्राप्तयोः प्राप्तिः संयोगः । स [3]च त्रिविधः अन्यतरकर्मजः, उभयकर्मजः [4]संयोगजश्च संयोग इति ॥**

---

1 अनपेक्षेभ्यश्चेति–जे; इदं सूत्रं शङ्करमिश्रस्य सूत्रपाठे नोपलभ्यते किन्तु चन्द्रानन्दविरचितसूत्रवृत्त्याः सूत्रपाठे तूपलभ्यते । 2 तथा हि कि; क पुस्तकयोर्नास्ति । 3 स तु–पा. ३. पु किरणावली सम्मतोऽयं पाठः–सं । 4 'संयोग इति' कं; दे. कि पुस्तकेषु नास्ति ।

अथ कथंलक्षण इति। किं लक्षणं किं प्रकारमस्य लक्षणमित्यर्थः। प्रतीतिः—प्रत्येतव्यस्य लक्षणमपि सर्वसाधारणमिति स्वकं तु विशेषलक्षणं किमस्येत्यर्थः। **कति-विधश्चे**ति—कत्यस्य विधाः प्रकारा इत्यर्थः। उत्तरम्, **अप्राप्तयो**रिति। प्राप्तिः संश्लेषः। स च समवायोऽपीत्यत उक्तमप्राप्तयोरिति। समवायस्त्वप्राप्तयोर्न भवत्येव, जातः सम्बद्धश्चेत्येककालत्वात् विद्यमानयोरप्राप्तयोः संश्लेषः संयोगः। समवायस्तु नैवमित्यस्य व्यवच्छेदः। द्वितीये प्रश्ने उत्तरं '**स तु त्रिविध** इति पूर्वे नैवमिति व्यवच्छेदार्थस्तु शब्दः। तिस्रो विधा दर्शयति **अन्यतरे**ति॥

(१६९) **तत्रान्यतरकर्मजः क्रियावता निष्क्रियस्य। यथा स्थाणोः श्येनेन विभूनां च मूर्तैः॥**

अन्यतरकर्मजं लक्षयति **तत्रे**ति। तेषु मध्ये क्रियावता चलता निष्क्रियस्य तदभिमुखक्रियारहितस्येति यावत्। उदाहरति **यथा स्थाणोः श्येनेने**ति। विभूनां चाकाशकालादिगात्मनां मूर्तैः परमाण्वादिभिरन्यतरकर्मजः एवमवयविभिस्तु कारणाकारण-संयोगजात् कार्याकार्यसंयोगादन्यतरकर्मजः इति विवेक्तव्यम्॥

(१७०) **उभयकर्मजो विरुद्धदिक्क्रिययोः सन्निपातः। यथा मल्लयोर्मेषयोर्वा॥**

उभयकर्मजं लक्षयति—**उभये**ति। विरुद्धे दिशौ प्राचीप्रतीच्यौ, अवाच्युदीच्यौ च दृश्यादृश्ये इति यावत्, तयोः क्रिये ययोः तौ विरुद्धदिक्क्रियौ, तयोः सन्निपातः—अभिघात इत्यर्थः। उदाहरति **यथे**ति।

(१७१) **संयोगजस्तूत्पन्नमात्रस्य चिरोत्पन्नस्य वा नि[1]ष्क्रियस्य कारणसंयोगिभिरकारणैः कारणाकारणपूर्वकः कार्याकार्यगतः संयोगः। स चैकस्माद् द्वाभ्यां बहुभ्यश्च भवति॥**

संयोगजं लक्षयितुं विभजते **संयोगज**स्त्विति। उत्पन्नमात्रस्यैकचिरोत्पन्न-स्यापरः। **निःक्रियस्ये**ति—संयोगस्यैव केवलस्य कारणमाविष्कर्तुं कारणसंयोगिभिरकारणैः समवायिकारणसंयोगिभिस्तदन्यैः। अत एव कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः समवेतासमवेतगत इत्यर्थः। पुनस्यावान्तरभेदमाह **स चे**ति। 'च'शब्दः पुनरर्थे॥

1 अक्रियस्य–जे; व्यो (४८९)

(१७२) **एकस्मात्तावत्तन्तुवीरणसंयोगाद् द्वितन्तुकवीरण-संयोगः ॥** (१७३) **द्वाभ्यांतन्त्वाकाशसंयोगाभ्यां द्वि[1]तन्तुकाकाशसंयोगः** (१७४) **बहुभ्यश्च तन्तु-तुरीसंयोगेभ्य ए[2]कः पटतुरीसंयोगः ॥**

तदेतत्सर्वमुदाहरणैः स्पष्टयति **एकस्मात्तावद्** इति । तावच्छब्दः क्रमे । अत्र तिसृष्वपि विधासु तन्तूनां पटं प्रति कारणत्वम्, वीरणाकाशतुरीणामकारणत्वं समवायितयाऽनेन कारणाकारणसंयोगपूर्वकत्वं संयोगस्य; तन्तुसमवेतत्वं तु द्वित्रितन्तुकपटयोः असमवेतत्वं च वीरणाकाशतुरीणाम्, तेन तत्संयोगानां **कार्याकार्यगतत्वा**मिति ॥

(१७५) **एकस्माच्च द्वयोरुत्पत्तिः, कथम्? यदा पार्थिवाप्ययोरण्वोः संयोगे सति अन्येन पार्थिवेन पा[3]र्थिवस्य, आ[4]प्येन चाप्यस्य युगपत्संयोगौ भवतः, तदा ताभ्यां संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते । ततो [5]यस्मिन्नेव काले द्व्यणुकयोः कारणगुणपूर्वक्रमेण रूपाद्युत्पत्तिः, तस्मिन्नेव काले इतरेतरकारणाकारणगतात् संयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते ॥**

एकस्माच्च संयोगात् द्वयोरपि संयोगयोरुत्पत्तिरित्याह **एकस्माच्चे**ति । एतत् प्रश्नपूर्वकं स्पष्टयति **कथ**मिति । **पार्थिवाप्ययोरिति**—विजातीयत्वेनानारम्भकत्वमभिप्रैति । **अण्वोरि**ति—परमाण्वोः पार्थिवेन पार्थिवस्य, आप्येनाप्यस्येत्यारम्भकत्वसूचनम् । **युगपदि**ति संयोगयौगपद्येन द्व्यणुकयोर्युगपदुत्पत्तिं प्रदर्शयितुम् । युगपत्संयोगद्वयोत्पत्तिप्रदर्शनाय तामाह **तत** इति । इतरस्य पार्थिवद्व्यणुकस्य कारणं पार्थिवपरमाणुः, अकारणमाप्यः परमाणुः । इतरस्याप्यद्व्यणुकस्य कारणमाप्यः परमाणुः, अकारणं पार्थिवपरमाणुः, तयोर्गतात् समवेतात् इतरस्य पार्थिवपरमाणोः कार्यं पार्थिवद्व्यणुकम्, अकार्यमाप्यः परमाणुः, इतरस्याप्यपरमाणोः कार्यमाप्यं द्व्यणुकम्, अकार्यं पार्थिवः परमाणुः, तद्गतौ तत्समवेतौ पार्थिवपरमाण्वाप्यद्व्यणुकगत एकः आप्यपरमाणुपार्थिवद्व्यणुकगतोऽपरः संयोगः, तौ युगपदेककालमुत्पद्येते इत्यर्थः ॥

1 एको द्वितन्तुका°–कं, द्वितन्त्वाकाश–कि । 2 एकपटतुरी–कि । 3 तस्य पार्थिवस्य–दे । 4 आप्येनाप्यस्य–दे; अन्येनाप्येनाप्यस्य कं कि; व्यो (४९१) 5 यस्मिन्काले–मु. भा ।

(१७६) [1]**किं कारणम्? कारणसंयोगिनाह्य[2]कारणेन कार्यमवश्यं संयुज्यत इति न्यायः। अतः पार्थिवं द्व्यणुकं कारणसंयोगिनाऽऽ[3]प्येनाणुना सम्बद्ध्यते; आप्यमपि द्व्यणुकं का[4]रणसंयोगिना पार्थिवेनेति ॥**

पृच्छति **किं कारण**मिति किं प्रमाणमित्यर्थः। उत्तरं **कारणे**ति। अकारणेनेति शेषः। "पार्थिवद्व्यणुकमाप्येन परमाणुना, आप्यद्व्यणुकं पार्थिवेन परमाणुना संयुज्यते; तदकार्यत्वे सति तत्संयोगिकार्यत्वात्। यद्यदकार्यत्वे सति यत्संयोगिकार्यं तत्तेन संयुज्यते, यथा तुरीसंयुक्ततन्तुकार्यः पटस्तुर्या" इत्यनुमानमित्यर्थः। 'यदि तु तेन न संयुज्येत तत्कार्येणापि न संयुज्येत कारणाभावात्' इति विपक्षबाधकमूहनीयम्। तमेनं न्यायं **नैयायिक**मर्थं प्रत्यामनन्ति **अत** इति।

(१७७) **अथ द्व्यणुकयोरितरेतरकारणाकारणसम्बद्ध्योः कथं परस्परतः सम्बन्ध इति? तयोरपि संयोगाजाभ्यां संयोगाभ्यां स[5]म्बन्ध इति ॥**

उक्ततर्कसिद्ध्ये पृच्छति **अथे**ति। उत्तरं **तयोरपी**ति। ननु तज्जनकेनैव परमाणुद्वयसंयोगेन द्व्यणुकयोरपि संयोगः किं न जन्यते, कृतमत्र तज्जन्याभ्यां कार्याकार्यसंयोगाभ्याम्, प्रत्यासत्तेरपि कारणैकार्थसमवायलक्षणायाः सम्भवात्? न; तस्मिन् काले द्व्यणुकस्य द्व्यणुकान्तरकारणसंयोगित्वाभावात्। कारणसंयोगिना चाकार्येण कार्यस्य संयोगजः संयोगः परमाणुनैवेति। एवं तर्हि परमाणोरपि द्व्यणुकेन सह संयोगजस्य संयोगस्यानुपपत्तिः; न हि तस्य कारणसंयोगि द्व्यणुकमिति सम्भवति? न; कार्यमकार्येण संयुज्यमानं [6]कारणसंयोगेनैवेति नियमादिति।

अत्र च दैवादवयवक्रियामुत्पन्नायां विभागसमकालमवयविनि यदि क्रियोत्पद्यते तदा संयोगक्रिये सम्भूय संयोगमुत्पादयतः, प्रत्येकमन्यत्रावधृतशक्तिकत्वाद् इत्यपि द्रष्टव्यम्। तथा हि चरणक्रियातो विभागः, श्येनावयविनि कर्म, ततो विभागेन पूर्वसंयोगनिवृत्तिः, अवयविकर्मणा विभागः, ततश्चरणस्थाणुसंयोगः, श्येनविभागात् पूर्वसंयोगनिवृत्तिः, तदनन्तरं चरणस्थाणुसंयोगेन श्येनकर्मणा च स्थाणुश्येनसंयोगः। एवमुभयकर्मजेऽपि संयोगानुप्रवेशो

1 कारण संयोगिना हि कार्यम्–दे। 2 हि कार्यमवश्यं–जे। 3 संयोगिनाऽणुना–जे। 4 द्व्यणुकं पार्थिवेनेति जे, व्यो (४९१) दे। 5 संयोग–जे; व्यो. (४९२) 6 कारणसंयोगि नैवेति–मु. कि क।

लक्षणीय इति **टीकाकृ**तः । तदसत्; संयोगो हि विभागमनुत्पाद्य तदविरोधिनं संयोगमुत्पादयति । कर्म्म तु तमुत्पाद्य तद्विरोधिनम्, ततो विरोधान्न सम्भूयकारितासम्भव इति त्रैविध्यमेवेति । अस्तु तावदेवम्, संयोगस्तु संयोगकारणमित्यत्र किं प्रमाणम्? अन्वयव्यतिरेकौ; निःक्रिययोः कार्याकार्ययोः संयोगः कारणाकारणसंयोगमन्तरेण न क्वचिद्दृष्टः, तस्मिंश्च सति पटतुर्यादौ दृश्यत इति ॥

(१७८) **ना[1]स्त्यजः संयोगो नित्य[2]परिमण्डलवत् पृथगनभिधानात्। यथा चतुर्विधं प[3]रिमाणमुत्पाद्यमुक्त्वाऽऽह "नित्यं [4]परिमडणलम्" (वै. सू. ७-१-३६) इति । एव मन्यतरकर्मजादिसंयोगमुत्पाद्यमुक्त्वा पृथङ् नित्यं ब्रूयात्। नत्वेवमब्रवीत्। तस्मान्नास्त्यजः संयोगः ॥**

अजसंयोगमिच्छन्तः केचिद्विभागं न सहन्ते तान् प्रत्याह—**नाजः संयोगोऽस्ती**ति । **नित्यपा[5]रिमाण्डल्यवदि**ति व्यतिरेके दृष्टान्तः । अत्र हेतुः—पृथगनभिधानात् । सर्वार्थोपदेशप्रवृत्तेन महर्षिणा प्रतिज्ञातं हि तेन यद्भावरूपं तत्सर्वमभिधास्याम इति । एतद्विवृणोति **चतुर्विध**मिति ॥

(१७९) **परमाणुभिराकाशादीनां प्रदेशवृत्तिरन्यतरकर्मजः संयोगः। विभूनां तु परस्परतः संयोगो नास्ति युतसिद्ध्यभावात् ॥**

ननु कथमस्य प्रयोगः? यथाश्रुते प्रतिज्ञापदव्याघातात् । संयोगं पक्षीकृत्याजत्वप्रतिषेधे त्रिविध[6]मधिकम्, उक्तं प्रति सिद्धसाधनात् । तदतिरिक्तस्यप्रतीतावाश्रयासिद्धेः, इत्याशङ्क्याह **परमाणुभि**रिति । अयमाशयः—न वयं प्रथमतः संयोगमेव प्रतिषेधामस्तस्याजत्वं वा, किन्तु त्रिविधे व्युत्पादिते यश्चतुर्थमप्युपगच्छेत् तं प्रति कोऽसावजः संयोगः कुत्र वेति पृच्छामः । स यदि ब्रूयात् 'परमाणुभिराकाशादीनां यः संयोगः सोऽज' इति तत्रेदमुपतिष्ठते--**परमाणु**भिरिति । सोऽन्यतरस्य परमाणोर्यत्कर्म तज्ज एव । ननु महति [7]अप्राप्तिपूर्विकाप्राप्तिः संयोगः, न चाकाशस्य परमाणुभिरप्राप्तिरस्ति व्यापकत्वाद्, अत उक्तं **प्रदेशवृत्ति**रिति । अव्याप्यवृत्तिर्व्युत्पादितश्चायमर्थः । तेन परमाणौ वर्तमाना क्रिया

---

1 नाजः संयोगोऽस्ति-जे व्यो (४९२), दे । 2 परिमाण्डल्य-पा. १. पु । 3 परिमाणमुक्त्वा-दे । 4 परिमाण्डल्यम्-पा. ५. पु किरणावलीकारसम्मतश्चायं पाठः । 5 परमाणुवदिति-कि । 6 'अधिकम्' इति कि. क. पुस्तकयोर्नास्ति । तथाप्यर्थो न स्पष्टः । 7 प्राप्तिपूर्विका-कि. क।

संयुक्तेनाकाशादिप्रदेशेन स्वाश्रयं विभज्य असंयुक्तेन संयुनक्तीति न तत्र लक्षणानुपपत्तिः प्रदेशश्चोपाधिभेद एव ।

न चैवमुपाधय एव संयोगतदभावाश्रया इत्युक्तम् । अपि च महति न्यग्रोधे मूलादग्रमग्राच्च मूलमुपगच्छतः कपेः यदि मूलाग्राभ्यामेव संयोगविभागौ न न्यग्रोधे, न तदा तावपि अवयवापेक्षयाऽवयविनाविति न्यायेन निरवयवे परमाणावेव संयोगः स्यात्, तथा च नोपलभ्येतेत्यनुभवविरोधः । सावयव एवावयवे वर्त्तते इति विचारे निरवयवे न स्यादेवेति द्व्यणुकादिप्रक्रमाभावात् सर्वानुत्पत्तिः । भेर्यां च ताडितायां संयोगस्य नभोऽव्यापकतया तदनुरोधेन शब्द उत्पद्यमानो नभो व्याप्नुयात् । तथा च सर्वत्र तदुपलम्भप्रसङ्ग इत्यादि स्वयमूहनीयम् ।

तस्मादाकाशादयः परमाणुभिः परमाणुक्रियया संयुज्यन्ते विभज्यन्ते च नित्यद्रव्यत्वे सति निःक्रियत्वात्, चलद्भिः परमाणुभिर्निश्चलपरमाणुवदिति सिद्धम् । विभूनां परस्परमजः संयोगो भविष्यति । तथा हि आकाशं कालादिना संयुज्यते मूर्तसंयोगित्वात् द्रव्यत्वाद्वा शरीरवदिति । न चासौ कर्मजस्तेषां निष्क्रियत्वात्, नापि संयोगजस्तेषां निरवयवत्वात्, इति यदि ब्रूयात्तत्रेदमुपतिष्ठते **विभूनामि**ति । विभवः परस्परं न संयुज्यन्ते युतसिद्धिरहितत्वात् अवयवावयविवद् इत्यापाततः सत्प्रतिपक्षत्वात् । संयोग एव तेषां न सिद्ध्यतीत्यर्थः । संयोगगतकार्यत्वप्रयुक्तेयं युतसिद्धिव्याप्तिरिति चेत्; न; संयोगसाधकस्य हेतोर्विभागापादकत्वात् । सोऽप्यापाद्यतामिति चेत्; न; तस्य संयोगप्रतिद्वन्द्वित्वेन तदजत्वव्याघातात् । अजयोर्विरोधो न भविष्यतीति चेत् न; तथात्वे तल्लक्षणव्याघातात् । 'अप्राप्तिपूर्विका प्राप्तिःसंयोगः, 'प्राप्तिविरोधी गुणो विभागः' इति हि ते । गुणलक्षणाप्राप्तिःसंयोग इत्यस्तु, विभागस्तु लक्षणविरोधापत्तेरेव विभूनां न भविष्यतीति चेत्; न; अयुतसिद्धानां प्राप्तिर्नित्या प्राप्तिरिति वा समवायलक्षणाक्रान्ततया गुणत्वानुपपत्तेः । तथापि गुणत्वे समवायोच्छेदात् । ओमिति चेत्; न; गुणादीनां निर्गुणत्वेनाप्राप्तत्वप्रसङ्गादिति । तस्मादनुकूलतर्काभावात् प्रतिकूल[1]तर्कसद्भावाच्च विभुसंयोगसाधनमन्यथासिद्धम् । व्यापकानुपलब्धिस्तदभावसाधने सत्तर्कतयाऽनन्यथासिद्धेति स्थितम् ॥

(१८०) **सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं [2]पृथगाश्रयाश्रयित्वं चेति ॥**

---

1 तर्कभावाच्च–कि. क। 2 युताश्रयसमवायित्वं चेति–जे व्यो. (४९४) दे।

अथ केयं युतसिद्धिरित्यत आह—**सा पुनरि**ति । द्वयोः सम्बन्धिनोरन्यतरस्य वा सम्बन्धिनः पृथग्गतिमत्त्वम् । विभागहेतुक्रियासम्बन्ध इति यावत् । युताश्रयाश्रयित्वं परस्परपरिहारेण पृथगाश्रयाश्रयित्वं चेत्यर्थः । इयं द्वयी युतसिद्धिः संयोगव्यापिका [1]यत्र नास्ति तत्र संयोगोऽपि नास्तीति सङ्क्षेपः । उभयसाधारणं तु युतसिद्धेर्लक्षणमप्राप्तयोर्विद्यमानतेति । अस्त्येव तर्हि विभूनामियम्, तत्कथं न संयोगः? अस्त्येव न तूत्तरकालं प्राप्तेः कारणमस्ति, विशेषावुपादाय तु चिन्ता व्यापकनिवृत्त्या तन्निवृत्तिसाधनाय । अथ व्यापकनिवृत्त्या अयुतसिद्धत्वेन विभूनां समवाय एव किं न स्यात्, न स्यात्; द्रव्यत्वे सत्यकार्यत्वात् परमाणुवत् । नह्यकार्यं द्रव्यमकारणे समवैति, आधाराधेयभावनियमप्रसङ्गादिति ॥

(१८१) **विनाशस्तु स[2]र्वस्य संयोगस्यैकार्थसमवेताद्विभागात् । क्वचिदाश्रयविना[3]शादपि; कथम्? यदा तन्त्वोः संयोगे सति, अन्यतरतन्त्वारम्भकेंऽशौ कर्मोत्पद्यते ते[4]न कर्मणाऽश्वन्तराद्विभागः क्रियते, विभागाच्च तन्त्वारम्भकसंयोगविनाशः; संयोगविनाशात् तन्तुविनाशः, तद्विनाशे [5]च तदाश्रितस्य [6]संयोगस्य विनाश इति ॥**

एवमुत्पादे निरूप्य विनाशं निरूपयति—**विनाशस्त्व**ति । सर्वस्य त्रिविधस्यापि ययोः संयोगस्तयोरेव वर्तमानाद्विभागाद्विरोधिगुणादित्यर्थः । तत्किं सर्वत्रैवं नेत्याह **क्वचिदि**ति । **कथमि**त्यादिना स्पष्टयति । संयुक्तद्रव्यमक्रियमेव अवयवक्रियाविभागादिन्यायेन यदा विनश्यति तदा तद्विनाशात्तदाश्रितरूपादिवत्तदाश्रितः संयोगोऽपि विनश्यतीत्यर्थः । अंशुसंयोगविनाशसमकालं तन्त्वन्तरे कर्मचिन्तनात् उभाभ्यामपि भवतीति केचित् । तदसत्; द्रव्यनाशकाले विभागानुपपत्तेः । तथा हि अंशोः संयोगनाशतन्तुकर्मयौगपद्ये, यदा अंशुसंयोगनाशात्तन्तुनाशः तदा तन्त्वन्तरे कर्मणा विभागः किमाश्रयो जायताम् । न च [7]पूर्वकालविशेषेऽपि सद्भावमात्रेण समवायिकारणत्वम्, कारणत्वाविरोधेऽपि समवायित्वविरोधात् । तुल्यकालयोः सम्बन्धात् । न चाश्रयनाशेऽपि यथा कार्यं क्षण[8]मात्रसम्बद्धमवतिष्ठते तथोत्पत्स्यतेऽपीति साम्प्रतम्, विनाशस्य सहेतुकत्वनियमेन तदुपपत्तेः । इह त्वसमवाये समवायिकारणानुपपत्तेः ॥

(१८२) **विभागो विभक्तप्रत्ययनिमित्तं शब्दविभागहेतुश्च ॥**

---

1 यस्य–जे । 2 सर्वसंयोगस्य–दे । 3 °विनाशादिति–जे. दे । 4 तेनांश्वन्तराद्–जे । 5 तद्विनाशे तदाश्रितस्य–मु. भा; दे । 6 तन्त्वन्तरसंयोगस्य–मु. भा; दे । 7 पूर्वकालसद्भावमात्रेण–कि; क. । सम्बद्ध–कि. क पुस्तकयोरस्ति तथाप्यर्थदृष्ट्या असम्बद्धमित्येवं शुद्धम् । सं ।

विभागो विभक्तप्रत्ययनिमित्तमिति। निमित्तमिति विशेषणम्। प्रत्ययः प्रतीतिः, प्रतीयते अनेनेति। शब्दश्चेति प्रमाणकथनम्। संयोगाभावे विभागव्यवहार इति चेत्, न; रूपरसादिषु विभक्तप्रत्ययाभावात्। द्रव्ययोरिति चेत्, अवयवावयविनोस्तदभावात्। संयोगनाशो विभाग इति चेत्; न; अन्यतराश्रयविनाशात् संयोगविनाशे विभक्तप्रत्ययप्रसङ्गात्। न हि द्वयोः संयुक्तयोरेकतरविनाशेऽन्यस्मिन् विभक्तप्रत्ययः कस्यचित्। न च तत्र संयोगो न विनष्टः। न वा संयोगविनाशो न प्रतीतः। द्वौ संयोगिनौ विनष्टसंयोगौ विभक्तप्रत्ययालम्बनमिति चेत्; न; प्रमेयाधिक्याभावात्। न हि घटत्वनिमित्तको घटप्रत्ययस्तदेकत्वानेकत्वेऽनुविधत्ते; शुक्लत्वनिमित्तको वा शुक्लप्रत्यय इति। न च विरोधिनं गुणमन्तरेण सत्याश्रये गुणविनाशकारणमस्ति।

कर्मैव संयोगविनाशकमस्तु, तस्मिन् सति तन्निवृत्तिदर्शनात्, अन्वयव्यतिरेकगम्यत्वाच्च वस्तुसामर्थ्यस्य। न हि गुणान्तरस्यापि गुणविनाशकत्वेऽन्यत्प्रमाणमस्तीति चेत्; न; तदनुविधानस्य सन्दिग्धत्वात्। न ह्यग्निसंयोगात् तृणादिकं विनश्यदुपलभ्यत इत्यग्निसंयोग एवाहत्य तस्य नाशकः इन्धनविनाशाद्वा वह्निर्विनश्यतीति स एव तस्य नाशकः, किन्तु क्रियाविभागादिन्यायेनावयवविश्लेषविनाशौ। न हि तावन्तरेण द्रव्यान्तरसंयोगान्निमित्तनाशाद्वा द्रव्यं विनश्यतीत्यतिप्रसङ्गात्। तदिह किं कर्मैव विरोधि विरोधिगुणोत्पादकं वेति सन्दिह्यते।

तत्रायं निर्णयः संक्षेपतस्तावद् द्विविधमेव जगति विनाशकारणम्, विरोधिधर्मः, विनाशश्चेति। तत्रापि विरोधी समानाधिकरण एव, विनाशस्तु कारणस्यैवेति नियमः। अन्यथाऽतिप्रसङ्गात्। जातिमात्रेण हि गुणान्तरविरोधित्वे तज्जन्मनि वध्यजातीयं क्वचिन्न विरुध्येत। एवामुदासीनविनाशोऽपि यदि विनाशकः स्यात्, सर्वत्र सर्वं विनश्येत। एवं सत्यङ्गुल्यामुत्पन्नेन कर्मणा अङ्गुलीतरुसंयोगनाशेऽपि हस्ततरुशरीरतरुसंयोगनाशो न स्यात्; हस्तादीनां निःक्रियत्वात्; अङ्गुलीकर्मणश्च व्यधिकरणत्वात्। न चाङ्गुलितरुसंयोगनाशाद्धस्तादितरुसंयोगनाशो भविष्यति इति युक्तम्; कर्मजं शरीरादिसंयोगं प्रति अङ्गुलीतरुसंयोगस्याकारणत्वात्; अकारणनाशस्याविनाशकत्वात्। तस्मात् कर्मजनितविभागपरम्परया निःक्रियसंयोगपरम्परा विनाश्यत इति अनिच्छन्नपि गले पादुकयाङ्गीकारयितव्य इति। तमिममनुग्राहकं तर्कं लक्षणेऽनुपदमेव सूचयिष्यति। → [1]व्यधिकरणमपि कर्मैव विनाशकमस्तु। न चातिप्रसङ्गः, आश्रयाश्रितपरम्परासंयोगस्यैव विनाश्यत्वात्। न;

---

1 → ← एतच्चिह्नान्तर्गतः पाठः 'जे' पुस्तके नास्ति।

विरोधिनः समानाधिकरणस्यैव विनाशकत्वमित्यत्र असतिबाधके सङ्कोचानुपपत्तेरिति **भासर्वज्ञ**मतनिरासः ← ।

कार्येण कारणानुमानमाह—**शब्दविभागहेतुश्च ।** न केवलमनुभूयते कार्येणानुमीयते इति चार्थः । वीणावेण्वादिवद्दवदहनदह्यमानस्फुटद्वेणुटात्कारादयोऽपि वाय्वाभिघातादेव जायन्ते, किमत्र गुणान्तरकल्पनयेति चेत्; न; एकस्मिन् विदले चरणाविष्टब्धे विदलान्तरे च बलवता नुद्यमाने अभिघातासम्भवात् । न हि तत्र दलेन दलमभिहन्यते, विलोमगमनत्वात् । नापि दलेन वायुरभिहन्यते; नुद्यमानत्वात् । नापि वायुना दलम्, वायोः प्रथमस्तत्र स्तिमितत्वात् न च नुद्यमानेन द्रव्यान्तरमभिहन्यते, निबिडावयवस्य [1]द्रव्यान्तरस्याभावात् । भवितव्यं च कार्यस्य वस्तुनोऽसमवायिकारणेन । न च संयोगनाश एवाऽसौ भावस्य तत्त्वात् । न च कर्म्मैव तदस्तु, प्रत्यासत्त्यभावेन तल्लक्षणानुपपत्तेरिति । तदयं प्रमाणार्थः—' विवादाध्यासितः शब्दसन्तानः संयोगाद्यतिरिक्तासमवायिकारणप्रभवः, संयोगाद्यनुपपत्तौ सत्यामुपजायमानत्वात् अवयवविरूपवत् ' । यद्वा ' यदेवं न भवति तत्संयोगानुपपत्तौ नोत्पद्यते, यथा संयोगजः शब्दः ' इति व्यतिरेकः । विभागकार्यत्वं चावान्तरमेव वक्ष्यति ।

(१८३) **प्राप्तिपूर्विकाऽप्राप्तिर्विभागः । स च त्रि[2]विधः । अन्यतरकर्मजः उभयकर्मजो विभागजश्च विभाग इति ॥**

लक्षणमाह **प्राप्तिपूर्विके**ति । न प्राप्तिः अप्राप्तिः, प्राप्तिविरोधी गुण इत्यर्थः । अथ प्राप्त्या संयोगेन सह किं देशकृतः, कालकृतः स्वरूपकृतो वाऽस्य विरोधः? सर्वं चैतदनुपपन्नम्, अत उक्तम् प्राप्तिपूर्विकेति । तथा च प्राप्तेर्वध्यता, विभागस्य घातकत्वं दर्शितम् । तेन ' संयोगविघातको गुणो विभागः ' इति संक्षेपः । तथा च अजसंयोगवदजविभागो नास्तीति सूचितम् । उपपादितं चैतदिति । एवं सति संयोगविभागयोरन्यथासिद्धपौर्वापर्यनियमलक्षणः कार्यकारणभावोऽप्यस्तु । न नः कश्चिद्दर्शनविरोधः असति संयोगे कस्य विरोधी विभागः स्यादिति । विरुद्धस्वभावतानिर्वाहप्रयुक्तोऽयं पूर्वापरभावो न निरूपाधिरिति चेत्; [3]कटिः श्रृणोतु, विरुद्धस्वभावता हि स्वरूपमेव विभागस्य । तथा च स्वरूपलाभाय अपेक्षणीयं न कारणमिति सुष्ठु अवसितम् । विनाश्यविनाशकयोरपि कार्यकारणभावः स्यादिति चेत्; स्यात्, न हि पौर्वापर्यनियमः कार्यकारणभाव इति हातुमुत्सामह इति ।

---

1 मूर्तान्तरस्याभावात्–जे । 2 त्रिविध एवे–जे; व्यो. (४९८) । 3 कोटि–क ।

कारणकृतमवान्तरभेदमाह—**स चेति**। चः समुच्चये। संयोगवत् सोऽपि त्रिविध इत्यर्थः। तदेतद्विशदयति **अन्यतरेति**॥

(१८४) तत्रान्यतरकर्मजोभयकर्मजौ संयोगवत्॥

अत्र विधाद्वयमतिदेशेन व्याचष्टे **तत्रेति**। यथा संयोगः उपसर्पणक्रियावता निःक्रियस्यान्यतरकर्मजः तथा विभागोऽप्यपसर्पणक्रियावता निःक्रियस्यान्यतरकर्मजः। [1]**यथा स्थाणोः श्येनेन** इत्युदाहरणम्। यथा विरुद्धदिक्क्रिययोः सन्निपातः संयोग उभयकर्मजस्तथाऽपसर्पणक्रियावतोर्विभाग उभयकर्मजः। **यथा मल्ल[2]योर्मेषयोर्वेति**। तदेवोदाहरणमित्यर्थः।

(१८५) विभागजस्तु द्विविधः कारणविभागात् कारणाकारणविभागाच्च॥

तृतीयां विधामाह **विभागज**स्त्विति। तु शब्देन संयोगाद्व्यवच्छिनत्ति। संयोगजः संयोगः कारणाकारणसंयोगपूर्वक एकविध एव। विभागजविभागस्तु कारणमात्रविभागपूर्वकः, कारणाकारणविभागपूर्वकश्चेति द्विविध इत्यर्थः। यथा चैतत्तथा वक्ष्यामः॥

(१८६) का[3]रणविभागात्तावत् [4]कार्याविष्टे कारणे कर्मोत्पन्नं यदा [5]तस्यावयवान्तराद्विभागं करोति न तदाऽऽकाशादिदे[6]शात्। यदा त्वाकाशादिदेशाद्विभागं करोति न तदाऽवयवान्तरादिति स्थितिः। अतोऽवयवकर्माऽवयवान्तरादेव विभागमारभते, वि[7]भागाच्च द्रव्यारम्भकसंयोगविनाशः। तस्मिन्विनष्टे कारणाभावात् कार्याभाव इत्यवयविविनाशः॥

अत्र प्रथमां विधां व्युत्पादयति—**कारणेति**। **कार्याविष्टे**—कार्यव्याप्ते। अत्र 'अवयवान्तराद्' इत्यारम्भकं द्रव्यम्, 'आकाशादिदेशाद्' इत्यनारम्भकद्रव्यमवधिमभिप्रैति। आरम्भकसंयोगाश्रयश्च द्रव्यमारम्भकम्, तद्विपरीतमनारम्भकं द्रव्यम्। यद्यपि यदा तदेत्याह, तथापि यत्तदिति फलतीति तथैव प्रत्येतव्यम्। न हि यदा करोत्येकं तदाऽपरं न करोति, अन्यदा करोत्यभिप्रेतम्, सम्भवति वा विभागे कर्तव्ये कर्मणोऽपेक्षणीयान्तराभावाद् प्रतिबन्धानुपपत्तेः।

1, 2 इदं प्रतीकद्वयं मूलभाष्यस्य हस्तपुस्तिकासु न क्वचिदप्युपलभ्यते, किरणावलीकारेण तु मूलभाष्यस्य प्रतीकवदत्र गृहीतमिति भाति. सं.। 3 तत्रकारणविभागात्–मु. भा। 4 कार्याविशिष्टे–दे। 5 यदाऽवयवान्तराद्–जे; व्यो (४९९); दे। 6 यदा तु देशाद्विभागं करोति दे। 7 ततो विभागाच्च–मु. भा।

तदयमर्थः; यत्कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते न तत्कर्म द्रव्यारम्भकसंयोगाविरोधिनम्, यत्त्वेवं न तदविरोधिनमिति । विकसत्कमलकुड्मलदलादौ तथा दर्शनाच्चैतदवधारणीयम् । कार्यविपर्ययात् भवितव्यं कारणविरोधेन । न हि कार्यं विरुद्धमविरुद्धजातीयं च कारणमिति सम्भवति । तदिह कारणे वर्त्तमानं कर्म यदि द्रव्यारम्भकसंयोगाविरोधिनं विभागमारभते तदा तद्विरोधिनं न जनयेत् । जनयति च तत् । तेन तदविरोधिनं न जनयतीत्यवसीयते । न च वाच्यं द्रव्यारम्भकसंयोगविरोधितदविरोधिविभागजनकतया कर्मवैचित्र्यं किमस्तु, किं वोभयानुभयविभागजनकतयेति सन्दिह्यत इति; कार्यविरोधस्य प्रत्यक्षसिद्धत्वात् उभयजनकत्वे च सन्देहात् । सन्दिग्धमपहाय निश्चितमुपादाय चान्वयव्यतिरेकाभ्यां कार्यकारणभावावधारणात् । अन्यथा शङ्कापिशाचीप्रसरे सर्व्वत्र तदवधारणानुपपत्तेः ।

नन्वेवं सति संयोगेऽप्येष न्यायः किं न स्यात्, तत्रापि यत्कर्म द्रव्यानारम्भकसंयोगारम्भकम्, न तत् द्रव्यजनकसंयोगजनकम् यथा विकसितकमलदलसंमीलनकर्म । तथा चात्रापि कारणसंयोगपूर्वकाः कारणाकारणसंयोगाः कल्पनीया इति ? न; संयोगस्य स्वरूपतो विरोधाभावात् । अनारम्भकद्रव्यसमवायाद्धि संयोगो द्रव्यानारम्भको न तु स्वरूपतः । अनारम्भकं च द्रव्यमारब्धद्रव्यम् अन्त्यावयवीति विजातीयमिति च त्रिविधम् । न चैवंभूते वर्तमानं कर्मैवंभूतेनैव अनेवंभूतेनैव वा संयोगमारभते नान्यादृशेनेति नियमोऽस्ति; पृथिव्यां वर्तमानेन कर्मणा पृथिव्यन्तरवत् पाथस्यापि संयोगजननात् । कमलदलसमवेतेन कर्म्मणा दलान्तरवदाकाशादिनापि संयोगजननात् । तस्मात् कार्ययोरविरोधादत्र कारणविरोधो नावकल्प्यत इति न नियमसिद्धिः । विभागे तु स्वभावविरोधात् कारणस्य भेदसिद्धिरिति युक्तमुत्पश्यामः ।

सिद्धायां च व्याप्तौ किं स्याद् अत आह **अत** इति । अवयवकर्म कर्मविशेषः अवयवान्तरादेव विभागं द्रव्यारम्भकसंयोगविरोधिनमेव [1]विभागविशेषमारभते न तदविरोधिनमित्येवकारार्थः । ततः किम् अत आह—**विभागाच्चे**ति । तस्माद्विशिष्टादिति चकारार्थः ॥

(१८७) **तदा कारणयोर्वर्तमानो विभागः कार्यविनाशविशिष्टं कालं स्वतन्त्रं वाऽवयवमपेक्ष्य सक्रियस्यैवाऽवयवस्य कार्यसंयुक्तादाकाशादिदेशाद्विभागमारभते न निष्क्रि-**

---

1 विभागमारभते-कि, क ।

यस्य, कारणाभावादुत्तरसंयोगानुत्पत्तावनुपभोग्यत्वप्रसङ्गः ॥

एवं कर्म्मविशेषाद्विभागविशेषस्ततो द्रव्यारम्भकसंयोगविनाशः, तस्मादवयवविनाश इत्यस्तु, विभागजविभागस्य तु नाद्यापि वार्ता इत्यत आह **तदेति**। अथोत्पन्नमात्र एव कारणयोर्वर्त्तमानो विभागः कार्यसंयुक्तादाकाशादिदेशाद्विभागं नारभत इत्यत आह—**कार्यविनाशेति**। अयमभिसन्धिः, विभागेन हि विभागे कर्तव्ये अवश्यं किञ्चिदपेक्षणीयम्; अन्यथाऽनपेक्ष्यविभागकारणत्वेन कर्मत्वापत्तेः। न चाश्रयमेवापेक्षिष्यत इति युक्तम्, कर्मसमानत्वात्। नापि कर्मैव तस्यापेक्षणीयम्, व्यभिचारात्। उत्तरसंयोगानिवृत्तेऽपि हि अवयवकर्मणि चतुर्थपञ्चमादिविभागोत्पत्तेरविरोधात्। तस्मात् कार्यविनाशविशिष्टः कालः स्वतन्त्रो वाऽवयवविभागस्यापेक्षणीयः। स्वातन्त्र्यमप्यवयवस्य कार्यविनाशविशिष्टत्वमेव। ततो विवक्षावैचित्र्यमात्रेणायं विकल्पः।

केचित्तु कार्यशब्देनाऽत्र द्रव्यारम्भकः संयोगोऽभिसंहितः। तथा च द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य स्वतन्त्रं वावयवमिति द्रव्यविनाशविशिष्टं वाऽवयवमपेक्ष्येति व्याचक्षते; तदसत्; प्रतिबन्धकाभावो ह्यपेक्षते। न च संयोगः समानाश्रयोऽसमानाश्रयो वा विभागोत्पत्तिं प्रतिबध्नाति। तथात्वे तद्बध्यत्वानुपपत्तेः। द्रव्यं तु तथाभूतविभागोत्पत्तिप्रतिबन्धकं स्यात्। न हि द्रव्यारम्भकसंयोगविरोधिविभागवानवयवः सत्येव द्रव्ये तत्संयोगोपलक्षितादाकाशादिदेशाद्विभज्यत इति सम्भवति सति द्रव्ये धारणाकर्षणोपपत्तौ द्रव्यविनाशात्। तस्मात् द्रव्यमेव तथाभूतविभागोत्पत्तिबन्धकमिति तद्विनाश एवापेक्षणीयः। तर्हि प्रथमविभागोत्पत्तिमपि द्रव्यं किं न प्रतिरुणद्धि इति चेत्; न; तत्प्रतिरोधे सर्वत्र प्रतिरोधापत्तेः। तस्मात् कर्मणा विभागे कर्तव्ये न कश्चित् प्रतिमल्लः। तद्विशेषात्तु विभागविशेष इत्येव रमणीयमिति सक्रियस्यैवावयवस्येत्युक्तम्।

अ[1]थ विभागपरम्परा निःक्रियस्यैवेति किं न स्यात्? इत्यत आह **न निःक्रियस्येति**। कुतः? कारणाभावात् क्रियानिवृत्तेरिति विशेषः। उत्तरसंयोगो हि क्रियानिवृत्तेः कारणम्। स च विभागजविभागात् पूर्वसंयोगनिवृत्तौ सत्यां भवेत्। न हि पूर्वस्मिन् संयोगे सत्येवोत्तरसंयोगोत्पत्तिरिति भावः। यदि च पूर्वमेव क्रिया निवर्त्तेत कारणाभावादुत्तरसंयोगानुत्पत्तौ कर्मानुपभोग्यत्वमपुरुषार्थत्वं प्रसज्येतेत्युत्तरमाह—**उत्तरेति**। कारणाभावादित्याद्येकवाक्यतया उत्तरसंयोगप्रयोजनादिक्रियेति सुप्रसिद्धम् ॥

---

1 अथ कारणाकारणविभागपूर्वकविभागपरम्परा—कि; क।

(१८८) [1]न तु तदवयवकर्माकाशादिदेशाद्विभागं करोति, त[2]दारम्भककालातीतत्वात्। कालातीतत्वात् [3]प्रदेशान्तरसंयोगं [4]करोत्येव, अकृतसंयोगस्य कर्मणः कालात्ययाभावात् ॥

यद्येवमेतावन्तं कालमनुवर्त्तत एव कर्म, तर्हि तदेवोत्तरं विभागमारभतां क्लृप्तशक्तिकत्वात् कृतं विभागेन कल्पनीयशक्तिकेन इत्यत आह [5]**नहीति**। कुतः? तदारम्भककालातीत्वात्। कर्मणो हि तदारम्भककालः, उत्पत्तेरनन्तरं निरपेक्षत्वात्। सहकार्यपेक्षस्यापि कालातिक्रमोऽकारणत्वे पर्यवस्यतीत्यर्थः। नन्वेवमपि उत्तरसंयोगमपि न कुर्याद् अनपेक्षत्वाविशेषाद् इत्यत आह—**प्रदेशान्तरसंयोग** इति। उत्तरसंयोगे कर्तव्ये पूर्वसंयोगोऽप्यस्य प्रतिबन्धकः। न हि क्रिया प्राप्तापरित्यागेनाप्राप्तप्राप्तये सम्भवति। ततस्तदभावकाल एव संयोगारम्भकालः, स च नातीत इत्यतस्तमारभत एवेत्यर्थः। 'इति'-शब्दः कारणमात्रविभागजविभागव्युत्पादनसमाप्तौ ॥

(१८९) **कारणाकारणविभागादपि, कथम्? यदा हस्ते कर्मोत्पन्नमवयवान्तराद् विभागमकुर्वदाकाशादिदेशेभ्यो विभागानारभ्य [6]प्रदेशान्तरे संयोगानारभते → [7]तदा ते कारणाकारणविभागाः कर्म यां दिशं प्रति कार्यारम्भाभिमुखं तामपेक्ष्य कार्याकार्यविभागानारभन्ते ←। तदनन्तरं कारणाकारणसंयोगाच्च कार्याकार्यसंयोगानिति। यदि कारणविभागानन्तरं कार्यविभागोत्पत्तिः कारणसंयोगानन्तरं कार्यसंयोगोत्पत्तिः ॥**

कारणाकारणविभागपूर्वकं विभागं व्युत्पादयति—**कारणाकारणेति**। अवयवान्तरद्विभागमकुर्वदिति द्रव्यारम्भकसंयोगविरोधिविभागजननस्वाभाव्यव्यवच्छेदः। **यां दिश**मित्यपेक्षाकारणमुक्तम्। ननु कारणावर्त्तिना कर्मणोत्तरसंयोगे कृते कारणाकारणविभागाः सह क[8]र्मणो निवर्त्तन्ताम्, कार्याकार्यविभागास्तु कुतो निवर्त्तिष्यन्त इत्याशङ्क्याह **तदनन्त**रमिति। संयोगजसंयोगेभ्य[9]स्तेऽपि विभागजविभागाः निवर्तिष्यन्त इत्यर्थः। तदेतनूद्य देशयति **यदीति** ॥

---

1 न हि पा. ३. पु। 2 तदारम्भकालातीतत्वात्–मु. भा। 3 उत्तरसंयोगं–व्यो (५०३)। 4 करोति–जे। 5 ननु इति मूले स्वीकृतः पाठः; सं.। 6 प्रदेशान्तरसंयोगान्–दे। 7 →← एतच्चिह्नान्तर्गतः पाठो दे पुस्तके भ्रष्टः। 8 सकर्मणो–मु. कि। 9 स्तेभ्यः कि।

(१९०) **नन्वेव[1]मवयवावयविनोर्युतसिद्धिदोषप्रसङ्ग इति? न, युतसिद्ध्यपरिज्ञानात् ॥**

यद्येवमवयवे चलत्यपि विभज्यमानेऽपि संयुज्यमानेऽप्यवयवी न चलेन्न विभज्येत न संयुज्येत तर्हि स्वावयवेभ्यो युतसिद्धिः स्यात्। चलाचलत्वविभक्ताविभक्तत्वसंयुक्तासंयुक्तत्वानां युतसिद्धिव्याप्तत्वात्। वस्त्रोदकादौ तथा दर्शनात्। तथा च स समवायो व्याहन्येत तल्लक्षणानुपपत्तेरितिभावः। परिहरति **नेति**। अयमभिप्रायः—केयं युतसिद्धिर्या आपादयितुमिष्टा? न तावच्चलाचलत्वादिकमेव, तेनैव तदापादनानुपपत्तेः, अस्यार्थस्येष्टत्वाच्च। नाप्यवयवावयविनोर्मिथो [2]विभागित्वमापाद्यतेऽसंयोगित्वात्। नापि संयोगित्वमापादनीयम्; अप्राप्तेरभावात्, अप्राप्तौ हि सत्यां संयोगावकाशः, अन्यथा तत्त्वानुपपत्तेः। नाप्यसमवाय एव युतसिद्धिः, गुणादावपि समवायोच्छेदप्रसङ्गात्। एवमस्तु न नः किञ्चिदनिष्टं प्रत्युताभिमतमेवेदमिति चेत्; न; समवायासिद्धौ तन्निषेधानुपपत्तेः। न हि निषेध्यसिद्धिमन्तरेण निषेधकं प्रमाणमात्मानमासादयति। तस्माद् युतसिद्धिमपरिजानन्नेव शब्दप्रसिद्धिमात्रेण परो धन्धयतीति ॥

(१९१) **सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वम्; [3]इयं तु नित्यानाम्। अनित्यानां तु [4]युतेष्वाश्रयेषु समवायो युतसिद्धिरिति ॥**

अथ भवतः का युतसिद्धिरभिप्रेता? तन्निरुक्तिमन्तरेण भवानपि 'अयुतसिद्धानाम्' इत्यादिकमर्थशून्यं शब्दमेव केवलमारचयतीत्यत आह—**सा पुनरिति**। द्वयोः परमाण्वोरन्यतरस्य वा व्योमाद्यपेक्षया मूर्त्तस्य पृथग्गतिमत्त्वम्। नन्वियं युतसिद्धिरस्त्येवावयवावयविनोरित्यत आह **इतीयं नित्यानाम्**। नित्यानामेवेयं युतसिद्धिरसमवायसहचारिणी [5]नाऽनित्यानाम्, तेषां सत्यप्येवंभू[6]तत्वे स्वाभाविकस्याधार्याधारभावस्य प्रत्यक्षसिद्धत्वेनाशक्यपरिहारत्वादित्यर्थः। अथानित्यानां का इत्याह—**अनित्यानां त्विति**। परस्परपरिहारेण द्रव्यादीनां तेषु पृथग्भूतेष्वाश्रयेषु समवायो युतसिद्धिरित्यर्थः। नन्वेवमयुतसिद्धानामपृथगाश्रयसमवेतानामित्यर्थः स्यात्, तथा च समवायेनैव समवायो लक्षणीयः समवायाभावेन वेति? पूर्वस्मिन्नात्माश्रयो दोषः, उत्तरस्मिन् परस्पराश्रयदोष इति। न; एतयोर्लक्षणयोर्व्यापकोपलक्षणत्वात्। अप्राप्तेर्विद्यमानता हि युतसिद्धिरनयोर्व्यापिका सैव ताभ्यामुपलक्ष्यत इति न किञ्चिदनुपपन्नम्।

---

1 नन्वेवं युतसिद्धिदोषप्रसङ्ग–जे; दे। 2 विभङ्गित्व–कि। 3 इतीयं–जे. दे. व्यो (५०५), किरणावलीकारोऽपि सम्भतः। 4 युतेषु तु समवायो–जे। 5 °चारिणी नित्यानाम्–कि; क। 6 भूतत्वे तेषां–जे।

(१९२) **त्वगिन्द्रियशरीरयोः पृथग्गतिमत्त्वं नास्ति युतेष्वाश्रयेषु समवायोऽस्तीति परस्परेण संयोगः सिद्धः। अण्वाकाशयोस्त्वाश्रयान्तराभावेऽप्यन्यतरस्य पृथग्गतिमत्त्वात् संयोगविभागौ सिद्धौ। तन्तुपटयोरनित्ययोराश्रयान्तराभावात् परस्परतः संयोगविभागाभाव इति। दि[1]गादीनां [2]तु पृथग्गतिमत्त्वाभावादिति → [3]परस्परेण संयोगविभागाभाव इति ←।**

अथानित्यानामपि पृथग्गतिमत्त्वमेव युतसिद्धिः किं न स्यात्? किमुभयोपन्यासस्य प्रयोजनम्? एकेनाप्युपलक्षण[4]सिद्धिरित्यत आह—**त्वगिन्द्रिये**ति। पृथग्गतिमत्त्वं मिथो विभागहेतुक्रियायोगो नास्ति, युतेष्वाश्रयेषु समवायस्त्वस्ति। तेनानयोर्युतसिद्धिर्द्रव्यतया मिथः संयोगः सिद्धः। अयमेव तर्हि युतसिद्धेरुपलक्षणमस्तु कृतं प्रथमेन इ[5]त्यत आह—**अण्वाकाशयोस्त्वि**ति। प्रयोजनमुक्त्वा द्वितीयस्य व्यतिरेकोदाहरणमाह—**तन्तुपटयो**रिति। प्रथमस्याह—**दिगादीना**मिति। न च चलाचलत्वादिनावयवावयविनोर्युतेष्वाश्रयेषु समवाय आपादयितुं शक्यते, आश्रयान्तरस्य प्रत्यक्षबाधितत्त्वादिति तात्पर्यम्॥

(१९३) **विनाशस्तु सर्वस्य विभागस्य क्षणिकत्वादु[6]त्तरसंयोगावधिसद्भावात्। न[7] तु संयोगवद् ययोरेव विभागस्तयोरेव संयोगाद्विनाशो [8]भवति, संयुक्तप्रत्ययवद् विभक्तप्रत्ययानुवृत्त्यभावात्। तस्मादुत्तरसंयोगावधिसद्भावात् [9]क्षणिक इति।**

एवं विभागस्योत्पत्तिं व्युत्पाद्य विनाशं व्युत्पादयति **विनाशस्त्वि**ति। सर्वस्य त्रिविधस्यापि उत्तरसंयोगस्यावधेः पर्यन्तस्य सद्भावादुत्पादादिति कारको हेतुरुक्तः। ज्ञापकमाह—**क्षणिकत्वादि**ति। आशुतरविनाशित्वात्—उत्तरसंयोगावधेराशुतरविनाशस्य प्रत्यक्षसिद्धत्वादित्यर्थः। एतत्तर्केणोपपादयति। **न तु संयोगवदि**ति। विभागाधारयोरेव द्रव्ययोः पुनः संयोगेन विभागविनाशे तस्य चिरकालावस्थायित्वमापद्येतेत्यर्थः। ततः किम्? न ह्येवं सति नः किञ्चिदनिष्टं प्रसज्यत इत्यत आह संयुक्तप्रत्ययवदिति। अयमाशयः

1, 2 दिगादीनां पृथग्गति°–जे। 3 → ← एतच्चिह्नान्तर्गतः पाठो जे पुस्तके नास्ति। 4 सिद्धिरित्यत–कि। 5 अत एव–क। 6 वधेः सद्भावात्–पा. ६; ७. पु; संयोगावधि सद्भावात्क्षणिक–मु. भा। 7 न संयोग° जे; व्यो.। 8 भवति कस्मात्–मु. भा। 9 क्षणिकः–जे; दे।

— संयोगस्तावत् चिरकालमनुवर्तते, प्रत्यभिज्ञानस्यान्यथासिद्धत्वात्। न हि कस्यचिद् विभागादेव संयोगो विनश्यति, अवयवसंयोगविनाशे द्रव्यानुत्पादप्रसङ्गात्, नोदना[1]द्यनुपपत्तेश्च। तस्माद्ययोरेव संयोगस्तयोरेव विभागात् सत्याश्रये तस्य विनाश इति स्थितिः। तथा [2]चान्तरा विनाशकारणाभावादुत्पादककारणानुपपत्तेस्तत्कार्यस्य च दर्शनात् प्रत्यभिज्ञानमन्यथासिद्धम्। विभागस्य तु प्रत्ययानुवृत्तिरेव नास्ति, सत्यपि च बाधितत्वाद्भ्रान्ती।

कार्यस्य हि कर्तव्यपुरुषार्थापेक्षयोत्पादोऽवस्थानं च, कृतयावत्कर्तव्यस्य च निवृत्तिरिति स्वभावः। न हि कृतयावत्कर्त्तव्यं [3]च कार्यमवतिष्ठते चेति सम्भवति। कार्यं च विभागस्योत्तरविभागशब्दौ पूर्वपूर्वसंयोगनिवृत्तिश्चेत्येतावदेव। न ह्येतदतिरिक्तमस्य युगान्तरेऽपि कर्त्तव्यमस्ति, तच्चानेन सर्वं कृतम्। तस्मान्निवर्तितव्यमस्यावशिष्यते; न चाहेतुका निवृत्तिः स्थैर्यसिद्धान्ते। न च कर्मैवास्य निवर्त्तकमुत्तरविभागानुत्पत्तिप्रसङ्गात्। तस्मादुत्तरसंयोगादेवास्य विनाशः। नह्युत्तरसंयोगे सति संयुक्तप्रत्ययवद्विभक्तप्रत्ययोऽनुवर्तते। अनुवर्तते चेत्, न संयोगाभावनिबन्धनो बाधकात्। बाधकश्च विवादाध्यासितो विभाग उत्तरसंयोगजातविनाशः तावतैव कृतकर्तव्यत्वात् कर्मवदिति। कृतकर्त्तव्यस्याप्यवस्थाने प्रायणाद्यनुपपत्तिप्रसङ्ग इति॥

(१९४) **क्वचिदाश्रयवि[4]नाशाद्विनश्यतीति। कथम्? यदा द्वितन्तुककारणावयवेंऽशौ कर्मोत्पन्नमंश्वन्तराद्विभागमारभते तदैव तन्त्वन्तरेऽपि कर्मोत्पद्यते, विभागाच्च तन्त्वारम्भकसंयोगविनाशः, तन्तुकर्मणा तन्त्वन्तराद्विभागः क्रियते इत्येकः कालः॥**

एवं साधारणं विनाशकारणमुक्त्वाऽसाधारणमाह **क्वचिदि**ति। एतत् कथमित्यादिना व्युत्पादयति **यदे**ति। द्वितन्तुकस्य कारणं तन्तुः, तस्यावयवोंऽशुः, तस्मिन् अवयवावयवविभागसमकालमवयवान्तरे कर्मचिन्तनादेतल्लभ्यते इत्यर्थः। तथा ह्यंशुकर्मणा अंश्वन्तराद्विभागस्तन्त्वन्तरे च कर्मेत्येकः कालः॥

(१९५) **ततो यस्मिन्नेव काले विभागात्तन्तुसंयोगविनाशस्तस्मिन्नेव काले संयोगविनाशात्तन्तुविनाशः, तस्मिन्विनष्टे तदाश्रितस्य तन्त्वन्तरविभागस्य विनाश इति।**

---

1 °द्यनुपपत्तिश्च–जे। 2 चावान्तर–जे। 3 कर्तव्यकार्य–कि। 4 क्वचिच्चाश्रयविनाशादेव–मु. भा; क्वचिदाश्रयविनाशादपि–पा. ५, ६. पु।

ततो विभागादंशुसंयोगविनाशः, तन्त्वन्तरकर्मणा च विनश्यतस्तन्तोर्विभागः, ततोऽंशुसंयोगविनाशात्तन्तुविनाशः। तन्त्वन्तरविभागात् द्वितन्तुकारम्भकसंयोगविनाशः, कालान्तरे च तन्तुविनाशात्तदाश्रितस्य विभागस्य विनाश इति।

(१९६) **एवं तर्हि उत्तरविभागानुत्पत्तिप्रसङ्गः कारणविभागाभावात्। [1]ततः प्रदेशान्तरसंयोगवति संयोगाभाव इत्यतो विरोधिगुणा[2]सम्भवात् कर्मणः [3]कालान्तरावस्थायित्वं नित्यद्रव्यसमवेतस्य [4]च नित्यत्वमिति दोषः।**

अत्र चोदयति **एवं तर्हीति।** कारणविभागेन हि द्रव्यविनाशविशिष्टं कालं स्वतन्त्रं वाऽवयवमपेक्ष्योत्तरविभागः कर्त्तव्यो न तु कर्मणेति पूर्वमेव सिद्धान्तितम्। स चाश्रयविनाशादपेक्षाकारणमप्राप्यैव विनष्ट इति कारणाभावादुत्तरविभागानुत्पत्तिः प्रसज्यत इत्यर्थः। ततः किमनिष्टं स्यादित्यत आह [5]**ततश्चेति।** उत्तरविभागोत्पत्त्याहि पूर्वसंयोगनिवृत्तौ उत्तरसंयोगोत्पत्तिः स्यात्; प्रतिबन्धकसद्भावे तु पूर्वसंयोगे उत्तरसंयोगो नोत्पद्यत इत्यर्थः। किमतो यद्येवमत आह—**अत** इति। उत्तरस्य संयोगस्य विनाशकारणस्याभावाद्यावदाश्रयविनाशं कर्मावतिष्ठेतेत्यर्थः। एतच्चानिष्टं प्रमाणबाधितत्वात्। नह्यनुत्पन्नोत्तरसंयोगो यावत् सत्त्वं चलन्नेव कश्चित्तन्तुरस्तीति नित्यत्वमपि कर्मणः क्वचित्प्रसज्येतेत्याह नित्येति॥

(१९७) **कथम्? य[6]दाऽऽद्यद्व्यणुका[7]रम्भके परमाणौ कर्मोत्पन्नमण्वन्तराद् विभागं करोति तदैवाऽण्वन्तरेऽपि कर्म। ततो यस्मिन्नेव काले विभागाद् द्रव्यारम्भकसंयोगविनाशस्त[8]दैवा[9]ऽण्वन्तरकर्मणा द्व्यणुकाण्वोर्विभागः क्रि[10]यते। ततो यस्मिन्नेव काले विभागाद् द्व्य[11]णुकाणुसंयोगस्य विनाशस्तस्मिन्नेव काले संयोगविनाशाद् द्व्यणु[12]कस्य विनाशः। तस्मिन्विनष्टे तदाश्रितस्य द्व्यणुकाणुविभागस्य विनाशः। ततश्च विरोधिगुणासम्भवान्नि[13]त्यद्रव्यसमवेतकर्मणो नित्यत्व[14]मिति तन्त्वं-**

---

1 ततश्च प्रदेशान्तरसंयोगाभावादित्यतः–जे; पाठोऽयं किरणावलीसम्मतः। 2 गुणसम्भवात्–दे। 3 चिरकालावस्थायित्वं–मु. भा। 4 °स्य नित्यत्व–दे। 5 ततः मु. भा। 6 यदा द्व्यणुका–जे। 7 रम्भकपरमाणौ–मु. भा। 8 तत्रैव–दे। 9 अणुकर्मणा–जे, दे; व्यो (५०८)। 10 'क्रियते' इति जे, 'दे' पुस्तकयोर्नास्ति। 11 द्व्यणुकस्य–कि। 12 द्व्यणुकविनाशः–दे। 13 'नित्यद्रव्यसमवेत' इति जे, दे पुस्तकयोर्नास्ति। 14 'इति' दे पुस्तके नास्ति।

श्वन्तरवि[1]भागाद् विभाग इत्यदोषः। आश्रयविनाशात् तन्त्वोरेव विभागो विनष्टो [2]न तन्त्वंश्वन्तरविभाग इत्येतस्मादुत्तरो विभागो [3]जायते, अङ्गुल्याकाशविभागाच्छरीराकाशविभागवत्। [4]तस्मिन्नुत्पन्ने कर्म संयोगं कृत्वा विनश्यतीत्यदोषः ॥

एतत्कथमित्यादिना व्युत्पादयति **कथमिति**। अण्वन्तरादारम्भकसंयोगिनः → [5]अण्वन्तरेऽनारम्भकसंयोगिनि ← द्व्यणुकारम्भकपरमाणुकर्मणा द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकसमकालमनारम्भककर्मसंचिन्तनादेतलभ्यते इति सङ्क्षेपः। विरोधिगुणोपनिपाताश्रयविनाशयोः विनाशकारणयोरसम्भवान्नित्यत्वम्। न च कर्मान्तरेण विभागान्तरोत्पत्तेः पूर्वसंयोगनिवृत्तावुत्तरसंयोगोत्पत्तौ च तत्कर्म निवर्त्स्यतीति युक्तम्; कर्म्मवति कर्म्मान्तरानुत्पत्तेरिति समाधत्ते [6]**तन्त्वन्तरविभागादि**ति। **विभाग** इति–'उत्तरो विभागः' इत्यतो हेतोः कर्मणः कालान्तरावस्थायित्वमदोषः।

एतद्विशदयति **आश्रये**ति। यदा हि तन्तौ वर्त्तमानेन कर्म्मणा तन्त्वन्तराद्विभागः क्रियते तदा तदवयवादंशोरपि विभागः क्रियते, अङ्गुलिकर्म्मणा कुड्यविभागसमकालं कुड्यावयवविभागवत्। स च विभागो विनाशकारणाभावादस्त्येव, तस्मादुत्तरो विभागः सञ्जायते। अङ्गुल्याकाशविभागादिव शरीराकाशविभाग इति निदर्शनम् यद्यपि प्रस्तुते क्रियावतस्तन्तोर्निष्क्रियेणाकाशादिदेशेनोत्तरो विभागो निदर्शने च निःक्रिययोरेव शरीराकाशादिदेशयोरिति वैषम्यम्, तथापि किमनेन कार्यैकार्थसमवायलक्षणायाः प्रत्यासत्तेः, पूर्वभावनियमस्य चाविशेषात्। कर्मणोऽकारणत्वस्य चोभयत्रापि समानत्वात्।

इदं पुनरवशिष्यते; द्रव्यारम्भकसंयोगविरोधिविभागजनकं यत्कर्म तदविरोधिनं न जनयतीति प्राङ्निष्टङ्कितम्। अन्यथा तन्तौ वर्तमानेन कर्मणा [7]अंश्वन्तरविभागं जनयताऽऽकाशादिदेशविभागोऽपि किं न जन्यते? को नु खल्वकारणविभागत्वेनानयोर्विशेषः?। मूर्तामूर्तविभागजनकत्वेन प्राग्व्यवस्था कृता यदाऽवयवान्तरान्न तदाकाशादिदेशादिति वचनादित्यपि नास्ति; अमूर्त्तविभागारम्भानारम्भयोरतीन्द्रियत्वात् मूर्त्तविभागजनकत्वेन विरोधाच्च। तस्मात् तन्तुकर्मणा तन्वन्तरविभागजनके[8]नांश्वन्तरविभागो जन्यत एवेति कथं तद्बाधकः

1 विभागादुत्तरो विभाग-दे। 2 न तु–दे। 3 सञ्जायते–जे। 4 तस्मिन्नेव काले–मु. भा।
5 →← एतच्चिह्नान्तर्गतः पाठो 'जे' पुस्तके नास्ति। 6 तन्त्वंश्वन्तरविभागादिति–मु. भाष्ये पाठः।
7 अण्वन्तरविभाग–कि; क, जे। 8 अण्वन्तरविभभाग–कि; क जे।

परिहार इति। [1]परमाणुकारणकारणेऽपि वर्तमानस्य विभागविशेषस्य द्रव्यारम्भकसंयोगविरोधित्वाविशेषात्। यथा ह्यङ्गुल्यां वर्त्तमानेन कर्मणा कुड्यपरमाणुपर्यन्तविभागाद् द्रव्यारम्भक[2]संयोगाविरोधित्वाविशेषात् युगपज्जन्यते तथा तन्तौ वर्तमानेन कर्मणा तन्त्वन्तरपरमाणुपर्यन्तविभागाद् द्रव्यारम्भक[3]संयोगविरोधित्वाविशेवाद् युगपज्जन्यन्ते इत्यदोषः।

यथा च परमाणवो द्व्यणुकादिप्रक्रमेण स्थूलकार्यमारभन्ते, परमाणुकर्माणि तत्संयोगद्वारेण, परमाणुसंयोगाश्च द्व्यणुकादिसंयोगद्वारेणेति कारणत्वमवशिष्टं साक्षात्परम्परया वेति सूक्ष्मेक्षिका, तथा परमाणुविभागा अपि स्थूलकार्यारम्भकसंयोगविरोधिन एव द्व्यणुकादिविभागजननद्वारेणेति सूक्ष्मेक्षिका। नह्यंशोर्विभागो द्वितन्तुकारम्भकतन्तुसंयोगविरोधी। स च विभागो न सम्भवतीति सम्भवति। तस्मात् द्रव्यारम्भकसंयोगविरोधित्वाविशेषात् तन्तुविभागसमकालं [4]अंश्वन्तरविभागोऽपि कर्मणैव क्रियते। स चोत्तरविभागमारभते इति सुष्ठूक्तं [5]**तन्त्वंश्वन्तरविभागाद्विभाग इत्यदोष** इति।

अथवा तन्तुकर्मसमकालं तदणावपि कर्मोत्पन्नं विनश्यदवस्थतन्तुतदण्वाकाशादिदेशेभ्यो युगपद्विभागानारभते द्रव्यारम्भकसंयोगाविरोधित्वेनाविशेषात्। तत्र तन्तौ नष्टे तदाश्रित एव विभागो नष्टोऽन्यस्तु वर्त्तते। स च त[6]न्त्वंश्वन्तरविभाग उच्यते। तन्त्वोर्यदंश्व[7]न्तरंस विशेषस्तदीयत्वात्। [8]तेनांश्वाकाशविभागात्तन्त्वाकाशविभागो जायते तथा चाङ्गुल्याकाशविभागाच्छरीराकाशविभाग इत्युदाहरणे स्फुटम्। 'शरीर'शब्दस्त्वत्र हस्तोपलक्षणपरः। आरभ्यारम्भकत्वादस्य प्रतिषेधात् अङ्गुलीशरीरान्तरे च हस्ताद्युपलब्धेरिति कृतं विस्तरेण। निस्तीर्णं कथञ्चि[9]त्तु क्षुरधारचङ्क्रमणमिति।

नित्यत्वप्रसङ्गस्त्वप[10]रिज्ञातोत्तरं प्रयोजयति। अनारम्भके हि परमाणावुत्पन्नं कर्म द्रव्यारम्भकसंयो[11]गाप्रतिद्वन्द्वित्वाविशेषेण द्व्यणुकादिवत् व्योमादिदेशादपि विभागमारभमाणं तत्र कुतश्चिद् बिभेति, द्रव्यारम्भकसंयोगविरोधिविभागजनकं [12]यत्कर्म तत् विरूद्धकार्यतया तन्नारभत्त इत्युक्तमिति न प्रस्मर्तव्यमित्येव तु तत्र परिहार इत्यभिप्रायः। एवं तावद-

---

1 आपरमाणुकारणेऽपि–कि, क। 2, 3 'संयोगविरोधि' इति सर्वत्र पाठः संयोगाविरोधि इति अर्थदृष्ट्या अत्र भाव्यम्। 4, 5, 6 सर्वत्र 'अण्वन्तर' इति कि. क. पुस्तकयोः 'जे' पुस्तके तु अंश्वन्तर इति समीचीनः पाठः। 7 अण्वन्तरमणुविशेषः–कि· क। 8 तेनावन्तरा–कि, क। 9 'त्वक्षुरधाराचक्राचङ्क्रमणम्' इति यद्यपि पाठस्तथापि अर्थदृष्ट्या यः पाठः समीचीनः स एव स्वीकृतः। 10 परिहारान्तरं–जे। 11 संयोगप्रतिद्वन्द्वि इति पाठः 'अर्थदृष्ट्या'त्र संयोगा इति भाव्यम्। 12 यत् तत्–कि. क। कर्म–जे।

विभक्तावयवद्रव्यकर्मणा जनितो विभागो द्रव्यान्तरस्यावयवक्रियाविभागादिन्यायेन विनाशाद्विनश्यतीति दर्शितम् ।

(१९८) **अथवाऽश्वन्तरविभागोत्पत्तिसमकालं [1]तस्मिन्नेव तन्तौ कर्मोत्पद्यते । [2]ततोऽश्वन्तरविभागात् तन्त्वारम्भकसंयोगविनाशः, तन्तुकर्मणा च[3] तन्त्वन्तराद्विभागः क्रियते इत्येकः कालः । ततः संयोगविनाशात्तन्तुविनाशस्तद्विनाशाच्च तदाश्रितयोर्विभागकर्मणोर्युगपद्वि[4]नाशः ॥**

सम्प्रति यत्रैवावयवे क्रियाविभाग आरब्धस्तस्यैवावयवक्रियाविभागादिन्यायेन विनाशात् सह कर्म्मणा विभागो विनश्यतीत्यपि क्वापि स्यादित्याह **अथवेति** । उत्तरसंयोगस्त्वत्र न जायत एव समवायिकारणाभावात् । न चैवं कर्म्मणोनुपभोग्यत्वदोषः; सत्याश्रये ह्युत्तरसंयोगानुत्पत्तावनुपभोग्यत्वदोषो न त्वन्यथा; आश्रयविनाशे तु कारणसामर्थ्येन ल[5]ब्धजन्मना कर्म्मणा प्रक्रियाचिन्ताया एवोपभोग्यत्वादिति ।

(१९९) **तन्तुवीरणयोर्वा संयोगे सति द्रव्यानुत्पत्तौ पूर्वोक्तेन विधानेन आश्रयविनाशसंयोगाभ्यां तन्तुवीरणविभागविनाश इति ॥**

एवमुत्तरसंयोगादाश्रयनाशाच्च प्रत्येकं विभागविनाशं व्युत्पाद्य द्वाभ्यां समुच्चिताभ्यां विनाशमाह **तन्तुवीरणयोर्वेति** । द्रव्यानुत्पत्तावित्यनारम्भके वीरणे वर्त्तमानस्य कर्मणो द्रव्यारम्भकसंयो[6]गाप्रतिद्वन्द्विविभागजनकतया तन्तोराकाशादिदेशाच्च युगपद्विभागोत्पत्ति सूचयितुम् । तथा च पूर्वोक्तेन विधा[7]नेनांशुक्रिया[8]विभागादिन्यायेन वीरणकर्मविभागादिना च प्रकारेण [9]अंशुकर्मसमकालं वीरणकर्मसंचिन्तनादेतल्लभ्यत इति सङ्क्षेपः ॥

(२००) **परत्वमरत्वं च परापराभिधानप्रत्ययनिमित्तम् ॥**

परस्परानुविद्धव्यवहारकारणतया व्युत्पत्तिवैशद्यार्थं सङ्क्षेपार्थं चैकग्रन्थेन परत्वापरत्वे निरूपयति **परत्वमपरत्वं चेति** । यथासङ्ख्यं परापराभिधानयोः परापरप्रत्ययोश्च निमित्ताविशेषणम् । यद्विशिष्टे द्रव्ये परमित्यभिधानं प्रत्ययो वा तदपरत्वमिति लक्षणमुक्तं प्रमाणञ्च ।

---

1 तस्मिन्नेव काले-दे । 2 ततोऽशुविभागात्-जे, व्यो, (५१०) । 3 च विभागः-जे;-दे । 4 विनाश इति-दे । 5 लब्धजन्मनः कर्मणः-मु. कि । 6 'संयोगप्रतिद्वन्द्वि°' । इति सर्वत्र पाठस्तथापि 'संयोगाप्रतिद्वन्द्वि' इति शुद्धोऽर्थदृष्ट्याऽत एवं स्थापितः-सं । 7 विधानेनाणुक्रिया-मु. कि । 8 विभागादिना-मु. कि । 9 अणुकर्म-कि ।

संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वयोरेव परापरव्यवहारनिमित्तत्वान्न ततोधिकयोस्तयोः प्रमाणमस्ति। संयोगाल्पत्वमेव हि सन्निकृष्टत्वं प्रत्यासन्नत्वमपरत्वं वोच्यते, तद्बहुत्वमेव च विप्रकृष्टत्वं दूरत्वं परत्वं वोच्यते, इति चेत्; न; तदपेक्षया प्रमातर्यपि परापरप्रत्ययप्रसङ्गात्, संयोगबह्वल्पभावस्याविशेषात्। भवति हि 'यावत्यस्ति मत्तो वाराणसी तावति वाराणस्या अहमपि'। न तु सा किञ्चिदपेक्ष्य मत्तः परापरा वेति अहमपि तस्याः परो अपरो वेति तदविशेषात्। परत्वापरत्वोत्पत्तिनियमे कारणं वाच्यमिति चेत्; न; कारणशक्तिनियमादेव तन्नियमोपपत्तेः। भेर्याकाशसंयोगस्योभयाश्रितत्वाविशेषेऽपि नभस्येव शब्दो न भेर्यामितिवत् संयोगाऽल्पत्वबहुत्वाविशेषेऽपि प्रमेये एव परत्वापरत्वे न प्रमातरीति सर्वमुपपन्नम्। ननु व्यवहारनिमित्ताविशेषेऽपि व्यवहारविशेष उपपद्यते? न; अतिप्रसङ्गात्॥

(२०१) [1]तद् द्विविधम्, दिक्कृतं कालकृतं च। तत्र दिक्कृतं [2]दिग्विशेषप्रत्यायकम्। कालकृतं [3]च वयोभेदप्रत्यायकम्।

इत्येवं व्यवस्थिते कारणभेदाद् भेदमाह—**द्विविधमिति**। तत् पुनः परत्वं चापरत्वं च प्रत्येकं द्विविधम्। दिक्कृतं दिक्संयोगासमवायिकारणकृतम्, कालकृतं कालसंयोगासमवायिकारणकृतमित्यर्थः। कार्यविशेषाद्विशेषमाह—दिक्कृतं दिग्विशेषप्रत्यायकमित्यादि। विशिष्यत इति विशेषः, दिगेव विशेषो दिग्विशेषः कालात्। एवं वयोभेदोऽपि कालविशेष उच्यते। यथा च परत्वापरत्वाभ्यां दिक्कालावनुमीयेते तथा प्रागुक्तम्। अथवा दिग्विशेषो देशविशेषः सन्निकृष्टविप्रकृष्टलक्षणः। वयोभेदः शरीरावस्थाविशेषो बाल्यकौमारादिलक्षणः। तत्प्रत्यायकं श्रुताभ्यां हि परत्वाऽपरत्वाभ्यां देशविशेषश्चानुमीयते। तथा च। लोकव्यवहारो हानोपादानादिः सिद्ध्यतीति॥

(२०२) तत्र दिक्कृतस्योत्पत्तिरभिधीयते। कथम्? एकस्यां दिश्यवस्थितयोः पिण्डयोः संयुक्तसंयोगबह्वल्पभावे सत्येकस्य द्रष्टुः सन्निकृष्टमवधिं कृत्वा 'एतस्माद्—विप्रकृष्टोऽयम्' इति प[4]परत्वाऽऽधारेऽसन्निकृष्टा बुद्धिरुत्पद्यते। त[5]तस्तामपेक्ष्य परेण दिक्प्रदेशेन [6]संयोगात्

1 'तत्तु द्विविधम्' इति मुद्रित भाष्ये। 'तद् द्विविधम्' इति प्राचीनपाठः। किन्तु किरणावलीकारस्य 'द्विविधम्' इति पाठः सम्मतो भाति। सम्पादकः। 2 देशविशेष–जे; व्यो (५१५), दे। 3 तु–दे। 4 परत्वाऽऽधारे बुद्धिरुत्पद्यते–जे. व्यो (५१३)। 5 तामपेक्ष्य–जे, व्यो, दे। 6 योगात्–जे, व्यो, दे।

परत्वस्योत्पत्तिः । वि[1]प्रकृष्टं चावधिं कृ[2]त्वेतरस्मिन् सन्निकृष्टा बुद्धिरुत्पद्यते । ततस्तामपेक्ष्यापरेण दिक्-प्रदेशेन संयोगादपरत्वस्योत्पत्तिः ॥

शिष्याणामवधानायोत्पत्तिमभिधातुं प्रतिजानीते—**तत्रेति** । यदि हि दिक्पिण्ड-संयोगात् परत्वमपरत्वं चोत्पद्यते, सर्वत्र सर्वदा सर्वथोत्पद्येत, अविशेषात् । परस्परापेक्षया च तन्नियमे इतरेतराश्रत्वं स्यादित्यभिप्रायवान् पृच्छति—**कथमिति** । अभिप्रायस्याक्षेपं परिहरन्नाह—**एकस्यामिति** । अत्र एकदिङ्नियमान्न सर्वत्र, एकद्रष्टृनियमान्न सर्वथा, अपेक्षाबुद्धिनियमान्न सर्वदेति । संयुक्तसंयोगाल्पत्वबहुत्वलक्षणयोः सन्निकृष्टत्वविप्रकृष्टत्वयोर-पेक्षाबुद्धिविशेषयोश्च स्वकारणादुत्पत्तेः स्वप्रमाणात् प्रतीतेश्च परस्परानपेक्षत्वान्न परस्परा-श्रयदोष इति । **परत्वाधार** इति—भविष्यत्परत्वाधारे । **परेण [3]दिक्प्रदेशेनेति**—परत्वोत्पादको दिक्प्रदेशः परः स च विप्रकृष्टो बुद्धिसन्निहितः ।

तथा तेन पूर्वमुत्तरत्रापीत्यनेन विधिना समवाय्यसमवायिनिमित्तेभ्यः पिण्डदिक्पिण्ड-संयोगापेक्षाबुद्धिभ्यः परत्वोत्पत्तिं दर्शयित्वा अपरत्वस्योत्पत्तिमाह—**विप्रकृष्टं चेति** । एकदिगवस्थितयोरेकस्य द्रष्टुरित्यनुकर्षणार्थश्चकारः ॥

(२०३) **कालकृतयोरपि । कथम् ? वर्तमानकालयोरनियतदिग्दे-शसंयुक्तयोर्युवस्थविरयो रूढश्मश्रुकार्कश्यवलिपलिता-दिसान्निध्ये सत्येकस्य द्रष्टुर्युवानमवधिंकृत्वा स्थविरे विप्रकृष्टा बुद्धिरुत्पद्यते । ततस्तामपेक्ष्य परेण काल-प्रदेशेन संयोगात् परत्वस्योत्पत्तिः । स्थविरं चावधिं कृत्वा यूनि सन्निकृष्टा बुद्धिरुत्पद्यते । ततस्तामपेक्ष्या-परेण कालप्रदेशेन संयोगादपरत्वस्योत्पत्तिरिति ॥**

कालकृतयोः परत्वापरत्वयोरुत्पत्तिमाह—**कालकृतयोरपीति** । अत्र पिण्डस्य समवायित्वं कालपिण्डसंयोगस्य चासमवायित्वम्, अपेक्षाबुद्धेर्निमित्तत्वमित्यपरोर्थः । तर्हि कारणविशेषात् कार्यविशेषः कथं भविष्यतीति । न हि तदविशेषे कालकल्पनायामपि किञ्चिद्बीजमस्तीत्यभिप्रायवान् पृच्छति—**कथमिति** । विदिताभिप्रायस्योत्तरं **वर्त-माने**ति । अवर्तमानस्य समवायिकारणत्वमवधित्वं च नास्तीति [4]वर्तमानयोरित्युक्तम् ।

---

1 तथा विप्रकृष्टं-मु. भा । 2 कृत्वैतस्माद् सन्निकृष्टोऽयम् इत्यपरत्वाधारे इतरस्मिन्-मु. भा ।
3 'दिग्देशेन' इति किरणावलीसम्मतः पाठः क । 4 वर्तमानकालयोरिति सर्वत्र भाष्ये पाठः ।

'[1]अनियतदिग्देशयोरिति दिक्कृताद्व्यवच्छेतुम् । युवत्वस्थविरत्वे शरीरावस्थाविशेषौ, तत्प्रतिपत्तये रूढेत्यादि । आदिग्रहणात् परिमाणसामर्थ्याऽऽनतीन्द्रियापाटवविशेषाः । बहुतरतपनपरिस्पन्दान्तरितजन्मत्वं विप्रकृष्टत्वम् । अल्पतरतमोपहवहनव्यवहितजन्मत्वं सन्निकृष्टत्वम् । परत्वोत्पादकं कालप्रदेशस्य परत्वम्; अपरोत्पादकत्वं चापरत्वमिति ।

(२०४) **विनाशस्त्वपेक्षाबुद्धिसंयोगद्रव्यविनाशात् । अपेक्षाबुद्धिविनाशात्तावदुत्पन्ने परत्वे य[2]स्मिन्नेव काले सा[3]मान्ये बुद्धिरुत्पन्ना भवति ततोऽपेक्षाबुद्धेर्विनश्यत्ता, सामान्यज्ञानतत्सम्बन्धेभ्यः परत्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः । ततोऽपेक्षाबुद्धेर्विनाशो गुणबुद्धेश्चोत्पत्तिः । ततोऽपेक्षाबुद्धिविनाशाद् गुणस्य विनश्यत्ता, [4]गुणज्ञानतत्सम्बन्धेभ्यो द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः । ततो द्रव्यबुद्धेरुत्पत्तिः, गुणस्य वि[5]नाशः ॥**

एव मुत्पत्तिं निरूप्य विनाशं निरूपयति—**विनाशस्त्विति** । अपेक्षाबुद्धिसंयोगद्रव्यनाशात् पृथक् पृथक् द्वाभ्यां द्वाभ्यां च सर्वेभ्यो विनाशः सप्रधानयोरिति सङ्ग्रहः । अत्र प्रथमां विधां व्युत्पादयति **अपेक्षेति** । तावच्छब्दः क्रमे । उत्पन्ने परत्वेऽविभज्यमानावयवस्थिरद्रव्ये समवायिनीति शेषः । ततस्तस्मिन् काले । एवमुत्तरत्रासाद्यञ्चैतत् पूर्ववत् समाधेयमिति ॥

(२०५) **संयोगविनाशादपि । कथम्? अपेक्षाबुद्धिसमकालमेव परत्वाधारे कर्मोत्पद्यते, तेन कर्मणा दिक्पिण्डविभागः क्रियते, [6]अपेक्षाबुद्धितः परत्वस्योत्पत्तिरित्येकः कालः । ततः सामान्यबुद्धेरुत्पत्तिः, दिक्पिण्डसंयोगस्य च विनाशः । ततो यस्मिन्काले गु[7]णबुद्धिरुत्पद्यते [8]तस्मिन्नेव काले दिक्पिण्ड[9]संयोगविनाशाद् गुणस्य विनाशः ।**

---

1 'अनियतदिग्देशसंयुक्तयोः' इति भाष्ये पाठः । 2 यस्मिन्-कं कि, । 3 सामान्य-मु. भाः व्यो (५१८) दे । 4 गुणतज्ज्ञान-कं; व्यो । 5 विनाश इति-मु. भा । 6 'अपेक्षाबुद्धितः' इति जे, व्यो, दे पुस्तकेषु नास्ति । 7 परत्वगुणबुद्धि-जे, दे । 8 तस्मिन्काल-जे । 9 संयोगस्य -जे, व्यो (५१८) ।

द्वितीयां विधामाह—संयोगेति। अपेक्षाबुद्धिसमकालमविनश्यदवस्थे परत्वाधारे कर्मसञ्चिन्तनादेतल्लभ्यते इति सङ्क्षेपः। —तथाहि [1]अपेक्षाबुद्धिपिण्डकर्मणी, परत्वोत्पत्तिदिक्पिण्डविभागौ, परत्वसामान्यबुद्धिदिक्पिण्डसंयोगविनाशौ। अथ सामान्यबुद्धेरपेक्षाबुद्धिविनाशगुणबुद्ध्युत्पत्ती, दिक्पिण्डसंयोगनाशात् परत्वस्य नाशः, इत्यपेक्षाबुद्धिनाशस्य परत्वनाशसमसमयभावितया न तदुत्पादकत्वम्। अथ संयोगनाशस्य परत्वनाशहेतुत्वं कुतः सिद्धम्? उपपन्नं हि परत्वमपेक्षाबुद्धिव्यावृत्तेरेव व्यावर्तते। दिक्पिण्डसंयोगव्यावृत्तौ तु कारणाभावात् परत्वान्तरं न जायत इत्येतावत्तदनुपलम्भ उपपद्यत इति। न, विप्रकृष्टत्वेन [2]परत्वस्य सन्निकृष्टत्वेन चापरत्वस्य व्याप्तत्वात्; व्यापकनिवृत्तौ च व्याप्यनिवृत्तेरवश्यंभावित्वात् सत्यामपि चापेक्षाबुद्धौ विप्रकृष्टत्वं निवर्त्तते तन्निवृत्तिकारणोपनिपातादिति दर्शितम्। न चाहेतुको विनाशः, तस्माद् विप्रकृष्ट[3]त्वलक्षणस्य दिक्पिण्डसंयोगनि[4]वृत्तेः परत्वं निवर्तत इत्येव रमणीयम्। उपलक्षणं चैतत् परत्वाधारे कर्मोत्पद्यत इति। अवधिद्रष्ट्रोरन्यतरकर्मणापि दिगवधिदिग्द्रष्टृसंयोगविनाशादपि परत्वविनाशाद् युक्तेरविशेषादिति ॥

(२०६) **द्रव्यविनाशादपि, कथम्? परत्वाऽऽधारावयवे कर्मोत्पन्नं [5]यस्मिन्कालेऽवयवान्तराद्विभागं करोति तस्मिन्नेव कालेऽपेक्षाबुद्धिरुत्पद्यते। [6]ततो विभागाद् यस्मिन्नेव काले संयोगविनाशस्तस्मिन्नेव काले परत्वमुत्पद्यते। ततः संयोगविनाशादूद्र[7]व्यविनाशः द्र[8]व्यविनाशात्तदाश्रितस्य गुणस्य विनाशः ॥**

तृतीयां विधामाह—**द्रव्येति।** परत्वधारावयवकर्मजविभागसमकालमपेक्षाबुद्धिसञ्चिन्तनादेतल्लभ्यत इति सङ्क्षेपः। तथाहि पिण्डावयवविभागापेक्षाबुद्धी, संयोगनाशपरत्वोत्पत्ती, द्रव्यनाशपरत्वसामान्यज्ञाने, परत्वानाशगुणबुद्धी इति।

(२०७) **द्रव्यापेक्षाबुद्ध्योर्युगपद्विनाशादपि, कथम्? यदा परत्वाऽऽधारावयवे कर्मोत्पद्यते तदैवापेक्षाबुद्धिरुत्पद्यते, कर्मणा चावयवान्तराद्विभागः क्रियते, परत्वस्योत्पत्तिरित्येकः कालः। ततो यस्मिन्नेव कालेऽव[9]यवविभागा-**

---

1 अपेक्षाबुद्धिकर्मणी–कि; क। 2 विप्रकृष्टत्वेन चापरत्वस्य–कि। 3 विप्रकृष्टलक्षणस्य–कि। 4 निवृत्तेरपरत्वं–कि। 5 यस्मिन्नेव–मु. भा। 6 'ततो' इति जे, व्यो, दे पुस्तकेषु नास्ति। 7 द्रव्याविनाशः सामान्य बुद्धेरुत्पत्तिः–जे, व्यो (५१९) दे। 8 तद्विनाशाच्च –मु. भा। 9 काले विभागाद्–जे, व्यो (५१९) दे।

द्द्रव्यारम्भकसंयोगविनाशस्तस्मिन्नेव काले सामान्य-बुद्धिरुत्पद्यते। तदनन्तरं संयोगविनाशाद्द्रव्यविनाशः सामान्यबुद्धेश्चापेक्षाबुद्धिविनाश इत्येकः कालः। ततो द्र[1]व्यापेक्षाबुद्ध्योर्विनाशात् परत्वस्य विनाशः ॥

द्रव्यापेक्षाबुद्ध्योर्युगपद्विनाशेन चतुर्थीं विधामाह—**द्रव्यापेक्षाबुद्ध्योरिति**। पिण्डावयवकर्मसमकालमपेक्षाबुद्ध्युत्पत्तेरेतल्लभ्यते। तथाहि परत्वाधारवयकर्मापेक्षाबुद्धी; अवयवान्तरविभागपरत्वोत्पत्ती। ततो आरम्भकसंयोगविनाशसामान्यज्ञाने, द्रव्यविनाशापेक्षा-बुद्धिविनाशौ; अथ परत्वस्य [2]विनाश इति ॥

(२०८) **द्रव्यसंयोगविनाशादपि, कथम्? यदा प[3]रत्वाऽऽधारावयवे कर्मोत्पन्नमवयवान्तराद्विभागं करोति तस्मिन्नेव काले पिण्डकर्मापेक्षबुद्ध्योर्युगपदुत्पत्तिः। ततो यस्मिन्नेव काले परत्वस्योत्पत्तिः तस्मिन्नेव काले विभागाद्-द्रव्यारम्भकसंयोगविनाशः, पि[4]ण्डकर्मणा च दिक्-पिण्डविभागः क्रियत इत्येकः कालः। ततो यस्मिन्नेव कालेसामान्यबुद्धिरुत्पद्यते [5]तस्मिन्नेव काले द्रव्या-रम्भकसंयोगविनाशात् पिण्डविनाशो [6]विभागाच्च दिक्पिण्डसंयोगविनाशः। ततो पि[7]ण्डसंयोगयोर्विना-शात् परत्वस्य विनाशः।**

द्रव्यसंयोगविनाशाभ्यां पञ्चमीं विधामाह—[8]**द्रव्यसंयोगेति**। [9]अवयव-विभागसमकालं पिण्डकर्मविनाशयौगपद्येन पिण्डकर्मापेक्षाबुद्धियौगपद्यचिन्तयैतल्लभ्यते। तथा ह्यवयवविभागपिण्डकर्मापेक्षाबुद्धयः, अवयवसंयोगनाशदिक्पिण्डविभागपरत्वोत्पत्तयः, द्रव्यनाशदिक्पिण्डसंयोगनाशपरत्वसामान्यबुद्धयः, अथ द्रव्यसंयोगनाशाभ्यां परत्वनाशः। सामान्यबुद्धितो गुणबुद्धेर्जन्मापेक्षाबुद्धेश्च विनाश इति ॥

---

1 द्रव्यापेक्षाबुद्धिविनाशात्-जे, यो. (५१९) दे। 2 'विनाश इति' इत्यनन्तरं प्रत्येक-सामर्थ्योलब्धेः सन्निपतनाविशेषाच्चेति इत्यधिकं जे. पुस्तके। 3 द्रव्यावयवे-दे। 4 पिण्डकर्मणा दिक्पिण्डस्य च विभागः-मु. भा। 5 तत्समानकाले संयोगविनाशात् तत्समकालं संयोगविनाशात्-व्यो (५१९) दे। 6 पिण्डविनाशाच्च दिक्पिण्डसंयोगविनाश-मु. भा। 7 पिण्डदिक्पिण्डसंयोग-विनाशात्-मु. भा; दिक्पिण्डसंयोगविनाशात् प्रतीकमिदं-कि. पुस्तके नास्ति। 8 पिण्डावयवकर्मा-पेक्षाबुद्धियौगपद्यचिन्तनादेतल्लभ्यते-कि। 9 कि पुस्तकेऽयं पाठो नास्ति।

(२०९) **संयोगापेक्षाबुद्ध्योर्युगपद्विनाशादपि, कथम्? यदा परत्वमुत्पद्यते [1]तदैव परत्वाधारे कर्म। ततो यस्मिन्नेव काले [2]परत्वसामान्ये ज्ञानमुत्पद्यते तस्मिन्नेव काले पि[3]ण्डकर्मणा दिक्पिण्डविभागः क्रियते। ततः सामान्य-बुद्धितोऽपेक्षाबुद्धिविनाशः, विभागाच्च दिक्पिण्ड-संयोगविनाश इत्येक कालः। ततः संयोगापेक्षाबुद्धि-विनाशात् परत्वस्य विनाशः॥**

संयोगनाशापेक्षाबुद्धिनाशाभ्यां षष्ठीं विधामाह—**संयोगापेक्षाबुद्ध्यो**रिति। परत्वोत्पत्तिसमकालं पिण्डकर्मचिन्तयैतल्लभ्यते। तथाहि परत्वोत्पत्तिपिण्डकर्मणी, सामान्य-ज्ञानदिक्पिण्डविभागौ, अपेक्षाबुद्धिनाशदिक्पिण्डसंयोगनाशौ; अथ परत्वस्य नाश इति॥

(२१०) **त्रयाणां समवाय्यसमवायिनि[4]मित्तकारणानां युग-पद्विनाशादपि, कथम्? यदाऽपेक्षाबुद्धिरुत्पद्यते [5]तदैव पिण्डावयवेऽपि कर्म। ततो यस्मिन्नेव काले [6]कर्मणाऽ-वयवान्तरद्विभागः क्रियते [7]परत्वस्य चोत्पत्तिः तस्मि-न्नेव काले पिण्डेऽपि कर्म। [8]ततोऽवयवविभागात् पिण्डारम्भकसंयोगविनाशः, पिण्डकर्मणा च दिक्-पिण्डविभागः क्रियते, सामान्यबुद्धेश्चोत्पत्तिरित्येकः कालः। ततः संयोगविनाशात् पिण्डविनाशः, सामान्य-ज्ञानादपेक्षाबुद्धेर्विनाशः; इत्येतत्सर्वं युगपत् त्रयाणां समवाय्यसमवायिनि[9]मित्तकारणानां विनाशात् पर-त्वस्य विनाश इति॥**

समवाय्यसमवायिनिमित्तानां युगपद्विनाशेन सप्तमीं विधामाह—**त्रयाणा**मिति। परत्वोत्पत्त्यवयवविभागोत्पत्तिसमकालं पिण्डकर्मचिन्तयैतत् सुलभम्। तथा ह्यपेक्षाबुद्ध्य-वयवकर्मभ्यां परत्वावयवविभागौ; स्वकारणात् पिण्डकर्मेत्यकः कालः। अथ परत्वसामान्य-

---

1 तदा–मु. भा। 2 परत्वसामान्यबुद्धि–दे। 3 पिण्डविभागः क्रियते–दे। 4 निमित्तानां –जे, दे. व्यो (५२०)। 5 तदा–दे. कं कि इत्यत्र 'तदा' 'तदैव' द्वयमपि नास्ति। 6 कालेऽवय-वान्तराद्–जे. दे. व्यो (५२०)। 7 अपेक्षाबुद्धेः परत्वस्य चोत्पत्तिः–मु. भा। 8 ततो विभागाद्–दे। 9 निमित्तानां–जे. दे व्यो (५२०)।

ज्ञानमवयवसंयोगविनाशः दिक्पिण्डविभागाश्च । ततोऽपेक्षाबुद्धिनाशद्रव्यनाशदिक्पिण्डसंयोगनाशाः । तेभ्यः परत्वनाश इति ॥

(२११) बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः ॥

क्रमप्राप्तां बुद्धिं निरूपयति—**बुद्धिरि**ति । यद्यपि बुद्धिर्ज्ञानमित्येतावतैव स्वस्थम्, यस्मिन् सत्यात्मनि 'जानामि' इत्यनुव्यसायो भवति सा बुद्धिः । तथापि बुद्ध्यादिशब्दानां के[1]चिदर्थभेदमाहुः तत्प्रत्याख्यानार्थं पर्यायोत्कीर्तनम् ।

साङ्ख्या हि प्रकृतेः सत्त्वप्रधानं प्रथमं परिणामं महदाख्यमन्तःकरणविशेषं बुद्धिमाहुः । बुद्धेर्विषयाकारः परिणतिभेदो घटपट इत्यादिज्ञानमाचक्षते । बुद्धावादर्शभूतायां वर्त्तमानेन ज्ञानेन चितिशक्तेः पुरुषस्य भेदाग्रहात्तद्वदभिमानमुपलब्धिं प्रचक्षते । बुद्धिस्थं च सुखादिकं परिणतिविशेषं [2]प्रत्ययं ब्रुवते; तदनेन प्रत्याख्यायते ।

यदि तावद् बुध्यतेऽनेनेति बुद्धिरित्यन्तःकरणमभिमतं तन्न वारयामः, मनस इष्टत्वात् । ततोऽप्यधिकेऽन्तःकरणे न प्रमाणमस्ति । ज्ञानयौगपद्यादेस्तावतैवोपपत्तेः । बोधो बुद्धिरिति भावार्थो विवक्षितश्चेत् सोन्तःकरणसाध्यः स च प्रत्यक्षसिद्धो 'अहं बुद्धः' इत्यपरोक्षात् व्यवसायात् । [3]अस्मदन्तःकरणमतीन्द्रियम् । अत एव न तद्धर्मोऽपि, आत्मधर्मतयैव प्रत्यक्षसिद्धत्वात् । न चात्मधर्मत्वम[4]प्याभिमानिकम्, तदन्यधर्मत्वस्य प्रागेव प्रतिषेधात् । यद्धर्मः खल्वयं बुद्धिः तस्यैव लोकवेदयोरात्मत्वेन प्रसिद्धेः । न चैवं कौटस्थ्यविरोधः, धर्मस्य प्रवृत्तिनिवृत्त्योरपि धर्मिणोऽत्यन्तभेदेनापि तत्त्वाविरोधात्, अत्यन्तभेदेऽपि च स्वभावनियमादेव धर्मधर्मिभावनियमोपपत्तेः । एतेन तद्वदभिमानो व्याख्यातः [5]तत्त्वत एव धर्मत्वव्युत्पादनात् । सुखादिकं त्वधिकमिष्यते, न तु 'प्रत्यय'शब्दवाच्यम्, बुद्ध्यते, उपलभते, जानाति, प्रत्येतीति लोके समानार्थम् । न तु प्रत्येतीति सुखी दुःखीति वा कश्चिद्व्यवहरति, परिभाषा तु परिशिष्यते सा तु परिभाषैव । तस्माद् बुद्ध्यादिशब्दाः समानार्था इति सुष्ठूक्तम् । भेदस्त्वस्याः विषयतः कारणतश्च ताभ्यामेव स्वरूपकृतोऽपि निरूप्यते इति तद्द्वारैव वक्ष्यते ॥

(२१२) सा चानेकप्रकाराऽर्थानन्त्यात् प्रत्यर्थनियतत्वाच्च । तस्याः सत्यप्यनेकविधत्वे समासतो द्वि[6]विधा विद्या चाविद्याचेति ॥

---

1 केचिदनुभेद–कि; क । 2 यदुपलभत इति–कि, क । 3 नास्यदन्तःकरणम्–कि क । नासौ अन्तःकरणम्–जे, किन्त्वर्थदृष्ट्या 'न' इति न घटते इति न स्थापितः–सं । 4 °स्याप्रामाणिक–कि, क । 5 तत एव–कि, क । 6 द्वे विधे–मु. भा ।

तत्र विषयतस्तावदाह **सा चेति**। अनन्तार्थत्वादित्यर्थः। नन्वर्थस्यानन्त्येपि ईश्वरबुद्धिरेकैवेत्याशङ्क्याह—**प्रत्यर्थनियत्वाच्चेति**। यावन्तमर्थमानन्त्योत्पन्ना बुद्धिः सा तावदर्थे नियताऽर्थान्तरं न स्पृशतीति न चास्पृश्यं परिहरति, अभावपरिहारप्रसङ्गात्। तथा चार्थस्यानन्त्यात् बुद्धिरप्यनन्ता भवतीति। ईश्वरबुद्धिरपि नियतार्थैव, न हि साप्यवगाढमर्थं परिहरति अनवगाढं वावगाहत इति भावः। व्यासमुक्त्वा समासमाह—**तस्या इति**। समासतः सङ्क्षेपतः सेति पूरणीयम्। **विद्या चाविद्या चेति**—यथार्थं ज्ञानं विद्या, अयथार्थं ज्ञानमविद्या; परस्परसमुच्चयार्थाभ्यां चकाराभ्यां तृतीयः प्रकारो व्यवच्छिद्यते। न चासौ सम्भवति शङ्काया अपि व्याहतत्वात्॥

(२१३) तत्राविद्या चतुर्विधा संशयविपर्ययानध्यवसायस्व[1]प्नलक्षणा॥

तत्र विद्यापूर्वकत्वादविद्यायाः पश्चादुक्ताया अपि लघुप्रतिपत्तित्वात्प्रथमं विभागमाह—**तत्राविद्येति**। यद्यपि मूलबुद्धावयथार्थायां स्मृतिरप्ययथार्थैव यथा रज्जुं भुजङ्गतयोप[2]लभ्य पलायितस्य तथैव स्मृतिः स सर्प इति, तथापि तदविवक्षया यथायथं संशयादिरूपभेदेनैव तद्व्यवहारः। यथार्था तु स्मृतिः प्रत्यक्षादिषु विद्याभेदेषु नान्तर्भवतीति पृथग्व्यवहरिष्यत इति।

अथ तर्कः किं न गणितः? अनुभूयते हि संशयं निर्णयं चान्तरा संशयात्प्रच्युतो निर्णयञ्चाप्राप्तः प्रमाणानामनुग्राहक ऊहापरनामा प्रसङ्गात्मा प्रमाकरणनिष्ठः पौरुषेयो व्यापारः कुठारगोचर इवोद्यमननिपातनादिः। अस्य ह्यविज्ञाततत्त्वो विषयः कारणोपपत्तिः पराभ्युपगतहेतुलक्षणा जननी। प्रमाणमनुग्राह्यः अनियतजिज्ञासाविच्छेदेन नियतजिज्ञासाजननमनुग्रहः। सैव संभावनेऽत्युच्यते। प्रमाणाङ्गस्य एतस्य तत्फलेनैव फलवत्ता। 'इह भूतले यद्यभविष्यत् घट इदमिव व्यज्ञास्येत' इत्येवमाकारं शरीरम्।

न च संशय एवायम्, एककोटिकत्वात्। न च निर्णयः, अयथार्थत्वात्। न यथार्थः, [3]आरोपितहेतुसमुत्थत्वात्। 'यदि स्यात् दृश्येत' इति यद्यलङ्कृतोऽर्थः सत्य एवेति चेत्; न; अनियतकोट्युपनिपाते नियतकोटिपरिग्रहस्य यद्यर्थत्वात्। न चैतावतैव सत्यत्वम्, आपादकसत्यत्ववदापाद्यसत्यस्यापि बाधितत्वात्। कथं [4]तर्हि प्रमाणमप्यनुगृह्णीयात् अनियतेच्छाविच्छेदेनेत्युक्तम्। न हि कुर्यां न कुर्यामित्यनियतचिकीर्षः कर्ता

---

1 स्वपन इति–जे। 2 पलभ्यमानस्य–कि; क। 3 आकारोऽपि तद्धेतुरसमर्थत्वात्–कि. क। 4 कथं हि–कि. क।

किञ्चित्करोति । अनियतेच्छाविच्छेदे कथं [[1]कु]र्यादिति चेत्, अनिष्टापत्तिनियतत्वादस्य। यथा [2]सविषान्नभक्षणोद्यतस्य 'सविषमिदं यदि भक्षयिष्यसि मरिष्यसि' इत्यनिष्टापत्तेर्न भक्षयेयमिति तत्स्मरणमेव [3]भक्षणेच्छाविच्छित्तिः । प्रमातुश्च द्वयमनिष्टम्, प्रमितहानिरप्रामाणिकोपगमश्चेति; तदिदं तुरगारूढस्य तुरगविस्मरणं यत्तार्किकाभिमानमुद्वहन्नपि तर्कान्न गणयति । अनेनैव हि परीक्षको लौकिकमतिविशते । तत्सत्यमेवैतत् विपर्ययभेदत्वात् पृथक् नोपदिष्टः । तथापि न्यायाङ्गतया विशेषतो व्युत्पादनमर्हतीति चेत् ['न'] तस्य छलादिवत् [4]समानतन्त्रविषयत्वादिति ।।

(२१४) संशयस्तावत् प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादु[5]भयविशेषानुस्मरणादधर्माच्च '[6]किं स्यात्' इत्युभयावलम्बी विमर्शः [7]संशयः ।

तत्रोद्देशक्रमानुसारेण संशयं निरूपयति—**संशयस्तावदिति** । तावच्छब्दः क्रमे संशयः प्रथमं कथ्यते ततो विपर्ययः कथयिष्यते इत्यर्थः । **किंस्वि**दित्याकारं दर्शयति—'किं स्विदिदमेवम् अथैवम्' इत्येवमाकारः प्रत्ययः संशयः इत्यर्थः । **विमर्शो** विरुद्धनानार्थामिवर्ष इति। विषयतः संशयस्वरूपमुपक्रम्य एतदेव स्पष्टीकर्तु**मुभयावल**म्बीति विरोध्युभयप्रकारवद्धर्मावलम्बीत्यर्थः । प्रसिद्धेत्यादि कारणकथनम् । प्रसिद्धाः प्रतीताः अनेकविशेषाः परस्परव्यावर्त्तका धर्म्माः शिरःपाण्यादयो वक्रकोटरादयश्च ययोः → [8]स्थाणुपुरुषयोस्तयोः क्वचिदेकत्र धर्मिणोः सादृश्यमात्रदर्शनात् । मात्रग्रहणान्निर्णायक ← विशेषादर्शनादिति लभ्यते । उभयो र्यौ विशेषौ स्थाणुपुरुषत्वे इति यावत् । तयोरनुस्मृतौ सत्यां संशयो जायते । एतदुक्तं भवति उभयविशेषानुस्मरणनिर्णायक विशेषादर्शनसहितात् समानधर्मवद्धर्मिदर्शनात् इति । संशयस्य च नित्यं दुःखहेतुत्वम्, अन्यथा तद्बाधनार्थं विशेषजिज्ञासानुपपत्तेः । दुःखतत्साधनयोश्चाधर्महेतु[9]कत्वे नियमात् उत्पत्तिमत्तयाऽदृष्टे हेतुत्वसिद्धेः । तं विशेषमाह—**अधर्माच्चेति** । आत्ममनःसंयोगादयस्तु साधारणत्वा ← न्नोक्ताः नत्वकारणत्वादिति ।

(२१५) [10]स च द्विविधः—अन्तर्बहिश्च ।

---

1 स्मर्यादिति कि. क. कथमस्मादिति—जे । 2 सनिकर्षान्न—कि. क । 3 °मेवेच्छाविच्छित्तिः कि. क । 4 सर्वतन्त्र° कि । 5 विशेषादर्शनादुभयविशेषानुस्मरणात्—जे । 6 किंस्विद—मु. भा । 7 संशय इति—दे । 8, 9 → ← एतच्चिह्नान्तर्गतः पाठः कि; क पुस्तकयोर्नास्ति । 10 सद्विविधः—जे, दे ।

अवान्तरभेदमाह **स चेति**। ज्ञातृधर्म-निमित्तकोऽन्तःसंशयो ज्ञेयधर्मनिमित्तको बहिरिति विभागः।

(२१६) **अन्तस्तावदादेशिकस्य सम्यङ्मिथ्याचोद्दिश्य पुनरादिशतस्त्रिषु कालेषु संशयो भवति किन्नु सम्यङ् मिथ्या वेति।**

प्रथमां विधामाह—**अन्तस्ता**वदिति। आदेशिको ज्योतिषिको विपर्यस्ततया सम्यगप्रतीततया मिथ्यादिश्य ग्रहोपरागादि पुनरादिशतः कथयतः त्रिषु कालेषु प्रतीच्यां पञ्चमेऽहनि ग्रहयुद्धमभूत्, प्राच्यामद्य पर्जन्यो वर्षति, पौर्णमास्यां चन्द्रोपरागो भविष्यतीति [1]खगणितः संशयो भवति, भ्रान्तोऽहमस्मिन्नर्थे सम्यग्दर्शी वेति।

(२१७) [2]**बहिर्द्विविधः** [3]**प्रत्यक्षविषये चाप्रत्यक्षविषये च।**

द्वितीयां विधां विभजते **बहिरपी**ति॥

(२१८) **तत्राप्रत्यक्षविषये तावत् साधारणलिङ्गदर्शनादुभयविशेषानुस्मरणादधर्माच्च संशयो भवति। यथाऽटव्यां विषाणमात्रदर्शनात् गौर्गवयो वेति॥**

साधारणलिङ्गदर्शनादुभयसाधारणचतुःपादमात्रलिङ्गदर्शनात्। **उभयविशेषे**ति गोगवयरूपविशेषानुस्मरणात्॥

(२१९) **प्रत्यक्षविषयेऽपि स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यदर्शनाद् वक्रादिविशेषानुपलब्धितः स्थाणुत्वादिसामान्यविशेषानभिव्यक्तावुभयविशेषानुस्मरणादु[4]-भयत्रा[5]कृष्यमाणस्यात्मनः प्रत्ययो दोलायते 'किं'-नु खल्वयं स्थाणुः स्यात् पुरुषो वेति॥**

प्रत्यक्षविषयेऽपीति—एतदुक्तं भवति यथा [6]समानधर्मजत्वाविशेषेऽपि प्रत्यक्षाप्रत्यक्षविषयतयाऽ[7]न्तर्गणिको भेदः तथा समा[8]नधर्मजत्वाविशेषेऽपि ज्ञातुस्तज्ज्ञेयतद्धर्मजन्योऽ[9]न्तर्गणिको भेदः, न तु समानधर्मज्ञत्वविरोधेन, तथा हि ज्ञानत्वाद्ययथार्थं नु यथार्थं वेति ज्ञायमानत्वात् तथाभूतमतथाभूतमिति वा समानादेव धर्मात्, एवमयोग्यत्वे तद्वृत्तयाऽनु-

---

1 सुगणित–कि, क। 2 बहिरपि–कि। 3 प्रत्यक्षे–दे। 4 उभयतः जे। 5 आश्लिष्यमाणः–दे। 6 समानधर्मत्वाविशेषेऽपि–कि. क। 7, 9 ऽन्तर्ज्ञानिको–कि. क। 8 समानधर्मत्वाविशेषेऽपि–कि. क।

पलभ्यमानत्वादित्यपि समानदेव धर्मात् । तथा व्याहतप्रतिपत्तित्वात् व्याहतप्रतिपत्तिविषयत्वाच्चेति । समानादेव धर्मात् तेषां सर्वेषां तदतत्साधारणत्वादिति । असाधारणस्तु धर्मोऽग्रे निरूपयिष्यत इत्येकविध एव संशय इति ।

ननु स्थाणुर्वा पुरुषो वेति 'वा'शब्दः सादृश्यार्थः, तथा च स्थाणुरिव पुरुषश्चेति स्यात् । स्थाणुपुरुषसदृशोऽयमिति ज्ञानं यथार्थमेव कथमविद्याप्रभेद इति ? न; सारूप्यज्ञानाद् विकल्पज्ञानस्याधिकस्यानुभवसिद्धत्वात् । असंशयेऽपि सारूप्योपलब्धिस्तद्यथा 'स्थाणुपुरुषसदृशीयं छाया' इति । तथापि सदृशदर्शनजमुभयस्मरणमात्रं विद्यैव इति चेत्; न; उभयस्मृतेरस्यातिरेकात् । स्थाणुपुरुषावयं तत्सदृशः पाषाणस्तम्भ इति निश्चयात्मकः प्रत्ययः; संशयस्तु न तदात्मक इति । भेदाग्रहं तु वक्ष्यामः । न वाऽधिकोऽप्ययं यथार्थः । नो खलु विकल्प्यमानं वस्तु अस्त्यर्थक्रियासु वोपयुज्यते । कथं तर्हि आरोप्येतापीति चेत्; न; परस्परविरुद्धयोरेवैकस्मिन् धर्मिणी समारोप्यमाणयोर्विकल्पविषयत्वात् । तयोरपि प्रत्येकं प्रतीतत्वादित्येतत्सर्वमभिसन्धायोक्तमुभयत आकृष्यमाणस्यात्मनः प्रत्ययो दोलायत इति ॥

(२२०) विपर्ययोऽपि प्रत्यक्षानुमानविषय एव भवति ॥

तदेवमनर्थजत्वाविशेषेप्यनिश्चयात्मकत्वात् संशयात् निश्चयात्मकतया विपर्ययो भिद्यत इति द्वितीयमविद्याप्रभेदमाह—**विपर्ययो**ऽपीति । अन्तर्बहिश्चेत्यपेरर्थः ।

(२२१) प्रत्यक्षविषये तावत् प्रसिद्धाऽनेकविशेषयोः पित्तकफानिलोपहतेन्द्रियस्यायथार्थालोचनादसन्निहितवि[1]षयज्ञानजसंस्कारापेक्षायात्ममनसोः संयोगादधर्माच्चास्मिन्न तद् इति प्रत्ययो विपर्ययः, यथा गव्येव अश्व इति ॥

अतस्मिँस्तदिति प्रत्ययो विपर्ययः । अतस्मिन्नित्ययथार्थता दर्शिता, अनेन विद्यातोऽसमानजातीयाद् व्यवच्छेद इति । तदिति निश्चयाकारता, तेनानिश्चयात्मकात् समानजातीयाद् व्यवच्छेदः । प्रत्यय इति जागरावस्थात्वं तेन स्वप्नव्यवच्छेद इति । एतदुक्तं भवति—अयथार्थनिश्चयात्मकं जागरावस्थाज्ञानं विपर्यय इति; लोके तथैव प्रसिद्धेः । कारणमाह—**प्रसिद्धे**ति । प्रसिद्धाः प्रतीताः अनेके विशेषाः परस्परव्यावृत्तिहेतवो धर्मा ययोरारोप्यारोपविषययोः तौ तथोक्तौ; तयोः; नह्यारोप्यारोपविषयापरिज्ञाने कश्चिद् विपर्येति । आरोप्यापरिज्ञाने सामर्थ्यानुपलब्धौ तद्धेतुत्वासम्भवेन हानादिव्यवहारानुपपत्तेः । अनुपलब्धेः

---

1 विषयज—दे ।

संस्कारस्यासम्भवेन सादृश्यानुपयोगप्रसङ्गाच्च; अन्वयव्यतिरेकाभ्यां सादृश्यदर्शनस्य विभ्रमं प्रति कारणत्वावधारणात्। आरोपविषयाप्रतीतौ निरालम्बनत्वापातात्। अन्यथाख्यातिपक्षे च सालम्बनत्वनियमादिति।

ननु पीतः शङ्खस्तिक्तो गुड इति सारूप्याभावेऽपि भ्रान्तिदर्शनात् कथमेतत्? न; आरोप्यज्ञानजनितसंस्कारसहकारितया तदुपस्थापनेन हि सारूप्यमुपपद्यते न त्वन्यथा। न च पीतिमतिक्तत्वयो [1]रजतादेरिव संस्कारोपस्थाप्यत्वम्, प्रत्यक्षत एवोपस्थितेः। न [2]च → तिक्तत्वपीतिमानावत्रारोप्यावपि तु संसृष्टता। तथा च सैव यावतोपस्थाप्यते तावदेव सारूप्यमिह ग्राह्यम्। अगृह्यमाणासंसर्गत्वं च ← तथा तच्च संसृष्टगुणे नास्यास्तीति न किञ्चिदनुपपन्नम्।

स्यादेतन्न किं तयोरित्यत उक्तम् 'अयथार्थालोचनात्'—यथार्थालोचनाभावात्। तत्त्वाग्रहादिति यावत्। सम्प्रति विभ्रमकाले स्वतो विशेषनिषेधात्। साधारणधर्मवतो धर्मिणो ग्रहे सतीति लभ्यते, यस्यासौ विभ्रमो भविष्यति तस्य पित्तकफानिलोपहतेन्द्रियस्येति समवायिकारणं प्रदर्शयता सन्निहितविशेषाग्रहे चासन्निहितविशेषारोपे चेन्द्रियोपघातस्य हेतुत्वमुक्तं भवति। अन्वयव्यतिरेकसिद्धं चैतत्।

न च दोषाः सहजशक्तिविधानहेतव एव, विरुद्धसहकारिसन्निवेशादेकस्यापि विरुद्धकार्यजननाविरोधात्। धर्माधर्माभ्यामामात्मनः सुखदुःखवत्। परेषां वा तस्यैव ज्ञानस्य [3]भेदाग्रहेण विपरीतव्यवहारवत्। असन्निहितेत्यादिनापेक्षणीयं निमित्तमुक्तम्। आत्ममनसोः संयोगादित्यसमवायिकारणमुक्तम्। यद्यपि विभ्रमात्' क्वचित्सुखमपि भवति तथापि दुःखोदर्कस्स इत्यवश्यमधर्मो हेतुरस्तीति अभिप्रायवतोक्तमधर्माच्चेति। उदाहरणं यथा गव्येवाश्व इति।

(२२२) असत्यपि प्रत्यक्षे प्रत्यक्षाभिमानो भवति। यथा व्यपगतघनपटलमचलाजलनिधिस[4]दृशमम्बरम्, अञ्जनचूर्णपुञ्जश्यामं शार्वरं तम इति॥

ननु सम्भवत्येतत् दृश्ये दृश्यान्तरस्य सुसदृशस्य समारोपः, कथं पुनरतीन्द्रियस्य परात्मनो निमेषोन्मेषाद्यनुमितस्य प्रत्यक्षेऽत्यन्तविसदृशे समारोपो 'अयमसौ सुखी पण्डितः कामी ईश्वर इत्यादिप्रत्ययः? तद्वरं सत्य एवायं प्रत्ययोऽस्तु इति **चार्वाकास्तान्**

---

1 रज्ज्वादेरिव–जे। 2 →← एतच्चिह्नान्तर्गतः पाठः कि, क पुस्तकयोर्नास्ति तत्र तु 'न च तिक्तत्वपीतिम्नां संसर्गत्वं च तथा च' इति पाठः। 3 भेदग्रह–कि. क;। 4 सदृशे वपुरम्बरजनचूर्णपुञ्जवच्छायं–दे।

प्रत्याख्यातुमाह—**असत्यपी**ति । शब्दलिङ्गानुमितं व्यापकममूर्तमाकाशमिति वस्तुगतिः । तद्व्यपगतजलदपटले विततालोकमण्डले पयः स्वच्छानवच्छिन्नदेशतया व्यूहनाविष्टम्भनाप्रेर्यतया सारूप्येणारोप्यत इति लोकानुभवसिद्धम् । तद्वदात्मनोऽपि दृश्यमूर्तान्तराप्रयोज्यतया तत्प्रयोजकतया च सारूप्येण शरीरतादात्म्यारोप इति भावः । [1]यत्तु वियति विक्षिप्तनयना नीलिमानमाकलयन्ति तदतिदूरङ्गमा नयनरश्मयस्तिग्मकरकिरणाभिघातपरावृत्ताः स्वाधिष्ठानगोलकाभिसम्बाद्धस्तदीयामेव श्यामिकां गगने पीतिमानमिव शङ्खादावारोपयन्तीति केचित् । तत्र काचलाक्षाः साक्षीकर्तुमुचिताः । यथाह भगवान् **पतञ्जलि**स्तथा ग्राह्यं भूगोलमध्यमेढीभूतस्य सुमेरोः प्रत्यगुदक्प्रागवाक्क्रमेण रजतसुवर्णपद्मराग[2]मरकतमयानि चत्वारि शृङ्गाणि, तस्य दक्षिणे इन्द्रनीलमयस्य शिखरस्य प्रभयाऽऽकाशं नीलमाभाति, अन्यत्र सीतपीतलोहितमिति । तथापि निष्क्रिये नीरूपेऽत्यन्तविसदृशे कथं क्रियारूपाद्यारोपः ? सादृश्यनिबन्धनत्वात् भ्रान्तेऽस्ति तत् ।

उदाहरणान्तरमाह—**अञ्जनेति** । शर्वर्या इदं शार्वरम् । भा[3]ऽभावस्य तमसः चक्षुर्मात्रग्राह्यतया शुक्लभास्वरविरोधितया च सारूप्येण नियमादृष्टवशाच्च संस्कारोपस्थापितश्यामतयाऽवभासो यथा तथा निःक्रियस्यात्मनो देशान्तरोपलब्धिलक्षणक्रियावत् सारूप्यान्नीरूपस्यापि संयुक्तसमवायेन रूपसन्निकर्षलक्षणरूपलक्षणवत् सारूप्यात्तथाभास इति । एवमन्यदपि त्रसरेणौ परमाणुरिति । चलत्सु तारकादिषु वायुरयं वातीति, जले चलति तत्प्रतिबिम्बितं सतारकं नभश्चलतीत्युदाहरणमूहनीयम् ॥

(२२२ अ) अनुमानविषयेऽपि बाष्पादिभिर्धूमाभिमतैर[4]ग्न्यनुमानम्; गवयविषाणदर्शनाच्च गौरिति । त्रयीदर्शनविपरीतेषु 'शाक्यादि'-दर्शनेषु 'इदं श्रेय' इति [5]मिथ्याप्रत्ययः । शरीरेन्द्रियमनस्सु आत्माभिमानः, [6]कृतकेषु नित्यत्वदर्शनम्, कारणवैकल्ये कार्योत्पत्तिज्ञानम्, हितमुपदिशत्सु अहितमितिज्ञानम्, अहितमुपदिशत्सु हितमिति ज्ञानम् ॥

अनुमानविषयेऽपीति—अलिङ्गे लिङ्गाभिमानादतथाभूते तथाभूतानुमानमित्यनुमित्याभास इत्यनेकोदाहरणानुगतः सङ्क्षेपः ।

---

1 यत्तु विक्षिप्त–कि. क; यत्र वियति विक्षिप्त–जे । 2 इन्द्रनीलमयानि–जे । 3 भावस्थितस्य–मु. कि; क । 4 वह्न्यनुमानम्–जे । 5 प्रत्ययविपर्यय इति–मु. भा । 6 कृतके–कि ।

एवं लौकिकविपर्ययमुक्त्वा [1]परीक्षकविपर्ययमुदाहरति **त्रयी**ति। ऋग्यजुःसाम्नां त्रयं त्रयी [2]सैव दर्शनम्, दृश्यतेऽनेन पारलौकिकः पन्थाः। तद्विपरीतेषु तद्विरुद्धेषु शाक्याः बौद्धाः। आदिग्रहणा**द्दिगम्बरादयः**। तेषां दर्शनेषु दर्शनप्रतिरूपकेषु इदं श्रेयः प्रशस्ततरमिति। व[3]स्तुतः प्राशस्त्यस्य सिद्धप्रामाण्यत्रयीसिद्धत्वात्।

शरीरेन्द्रियमनस्स्वात्माभिमानस्तेषामनात्मत्वस्य [4]प्रमाणसिद्धत्वात्। कृतकेषु पृथिव्यादिषु नित्यत्वदर्शनं दृष्टिः, कारणवैकल्ये कार्योत्पत्तिज्ञानम्, अकर्तृकं विश्वम्, मोक्षे सुखं तत्र ज्ञानं चेति। हितमुपदिशत्सु वेदवृद्धेष्वहितमिति, अहितं [5]चोपदिशत्सु तथैव हितमिति। अथवा वस्तुगत्या यदहितं तद्धितमिति उपदिशत्सु [6]पाखण्डेषु हितमिति ज्ञानमित्यर्थः। इह विभ्रमतः प्रवृत्तिनिवृत्तियोग्यार्थः परिस्फुरतीत्यनुभवसिद्धम्। न चाऽसतोऽसत्तया स्फुरणे प्रवृत्तिरस्ति, [7]नह्यसदिहेदं रजतमित्यवगम्य रजतार्थी प्रवर्तते इति सम्भवति। एवं ज्ञानाकारप्रवेदनेऽपि प्रवृत्त्यनुपपत्तिः।

न हि ज्ञानात्मनो रजतस्य बहिर्व्यवहारे सामर्थ्यमस्ति। न चासमर्थस्यानवगत-सामर्थ्यस्य वा प्रवृत्तिविषयत्वम्, ततोऽसतः सत्त्वेनासमर्थस्य समर्थत्वेनावभासनं तद्भेदाग्रहो वेति द्वयमवशिष्यते। विचारासहलक्षणानिर्वचनीयख्यातावपि तथा। न हि विचारासह-मेतद्रजतमित्यवधार्य कश्चित् प्रवर्तते, तस्मात् तत्रापि विचारसहत्वेनावभासनं तद्भेदाग्रहो वेति द्वयमेवावशिष्यते। तत्र [8]प्रथमे पक्षे विपरीतख्यातिपक्षपात एव वादिनामित्यर्द्धं तावदवसितं भावस्य। द्वितीये तु विचिन्त्यते। अन्यज्ञानादन्यत्र प्रवृत्तावतिप्रसङ्गे कः प्रतीकार इति। प्रवर्तकज्ञानसारूप्यं भेदाग्रह इति चेत्, न; निवर्तकसारूप्यस्य भेदा-ग्रहस्या[पि] सम्भवात्। न च सारूप्यादन्यकार्यमन्यः करोति स्फुलिङ्गसारूप्यात् खद्योते-नापि दाहप्रसङ्गात्।

स्यादेतत्। न वयमभेदग्रहं व्यवहारेऽङ्गमङ्गीकृत्य सारूप्याद्विभ्रमो व्यवहारयतीत्या-चक्ष्महे; किन्नाम सर्वत्र भेदाग्रह एव व्यवहारकारणं तत्र पुरोवर्तिज्ञानस्य यदापेक्षितार्थज्ञानं सन्निहितं तदा तद्भेदाग्रहात् प्रवर्तते, यदा तु हेयज्ञानं सन्निहितं तदा तद्भेदाग्रहान्निवर्तते। यदातूभयज्ञानं सन्निहितं तदा [9]तद्भेदाग्रहात् दोलायते इति कोऽतिप्रसङ्गः? सत्यज्ञानेऽपि भेदाग्रहादेव व्यवहरतीति [10]नानियतहेतुकत्वेन युगपत्प्रवृत्तिनिवृत्ती इति। अ[11]स्यन्नये

1 परीक्षकं–कि; क। 2 शैव–जे। 3 वस्तुतः प्रस्तुवतः–जे। 4 प्रत्यक्षसिद्धत्वात्–कि; क। 5 चोपदिशत्सु प्रतिपादयत्सु तेष्वेव तथैव–जे। 6 पाषण्डिष्वहितमिति–जे। 7 तेन ह्यसदिहेदं–कि; जे अर्थदृष्ट्याऽत्र 'न' इति सम्यक्–सं। 8 प्रथमे विपरीतं–कि. क। 9 तद्भेदाग्रहो–कि. क। 10 व्यवहरतीत्यनियतहेतुकत्वेन–कि. क। 11 न अस्यन्नये–कि. क।

अपेक्षिताभेदग्रहस्यानपेक्षितभेदाग्रहसाहचर्यनियमवत्त्वापि नये अपेक्षितानपेक्षितभेदाग्रहस्य युगनद्धवाहित्वात्। अन्यथा [1]विपर्ययेऽतिव्याप्त्यापत्तेः।

इदं रजतमिति ह्यवधारणात्मकं नेदं रजतमिति [2]निर्णयनियतम्। तथा च रजताद् भेदस्य ग्रहे विपरीतख्यातिरापद्यते। न अरजतात्मनस्तदनात्मनावभासमानत्वात् भेदाग्रहमात्रेण निवृत्तेरप्यापत्तिः अनपेक्षितभेदाग्रहस्य निवृत्तिकारणत्वेनाभ्युपगमात्। नेदं रजतमित्यनपेक्षिताभेदाग्रहो नञर्थ इति तत्कुतोऽभेदग्रह इति चेत्; न; माभूत्, भेदाग्रहस्तावत् तव कण्ठगतैरपि प्राणैरपरिहेयः। तथाप्यनपेक्षिताभेदाग्रहान्न निवर्तेत इति चेत् न; यद्येवमपेक्षिताभेदाग्रहात् [3]प्रवर्ततेऽपीति नायं पन्थाः। [4]न च सर्वत्र भेदाग्रहस्य प्रवृत्तिकारणत्वमभ्युपगच्छतोऽभेदग्रहे किञ्चित् प्रमाणमस्ति। अबाधितसामानाधिकरण्यप्रतीतिरेव प्रमाणमित्यपि वार्तम्। यदाऽभेदग्रहादेव सामानाधिकरण्यव्यवहारस्तदा कुतोऽयं विभाग इति चिन्त्यम्। अभेदग्रहस्य व्यवहारानङ्गतया व्यवहारेण व्यवस्थापयितुमशक्यत्वात्। भेदस्य योग्यानुपलब्धिबाधितत्वादिति चेत्, अथ कोऽयं भेदस्य बाधः? यद्यनुपलम्भमात्रं नाभेदसिद्धिः, [5]तथाऽभेदप्रतिपत्तिरिति चेत्, तत्र किमस्यां प्रमाणमित्येव चिन्त्यते व्यवहारस्य अन्यथैव सिद्धेरिति कृतं विस्तरेण॥

(२२३) अनध्यवसायोऽपि प्रत्यक्षानुमानविषय एव सञ्जायते॥

सम्प्रत्यनध्यवसायलक्षणां तृतीयामविद्यामाह—**अनध्यवसायोऽपीति**। अनुपलब्धसपक्षविपक्षसंस्पर्शस्य धर्मस्य दर्शनात् विशेषत उपलब्धानुपलब्धकोटिकं ज्ञानमनध्यवसायः। अत एवायं संशयाद्भिद्यते। स ह्युपलब्धसपक्षविपक्षसंस्पर्शधर्मदर्शनादुत्पद्यते। उपलब्धाव्यवस्थितकोटिविषय इति लोकप्रसिद्धिः, तदनुसारित्वाच्च परीक्षकाणां तदिदमुक्तं प्रसिद्धार्थे संज्ञितया आत्मादिषु सुप्रसिद्धार्थेषु च संज्ञितया।

(२२४) [6]तत्र प्रत्यक्षविषये तावत् प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा व्यासङ्गा[7]दर्थित्वाद्वा 'किम्' इत्यालोचनमात्रमनध्यवसायः। यथा वाहीकस्य पनसादिष्वनध्यवसायो

---

1 विपर्यये विपरीततयापत्तेः–जे। 2 नियतानियतम्–कि. क। 3 न प्रवर्ततेऽपीति–जे। 4 यदि च भेदाग्रहात्प्रवृत्तिस्तदा क्वचिदपि विशिष्टज्ञानं न सिद्ध्येत्; तत एव सर्वव्यवहारसिद्धेः अत आह न चेति–जे। 5 तथा भेदप्रतिपत्तिः–कि; क। 6 तत्र 'दे' पुस्तके नास्ति। 7 दनर्थित्वाद्वा–पा. १।६।७ पु।

भवति । त[1]त्र सत्ताद्रव्यत्वपृथिवीत्ववृक्षत्वरू[2]पवत्त्वादिशाखाद्यपेक्षोऽध्य[3]वसाय एव। पनसत्वमपि पनसेष्वनुवृत्तमात्रमाम्रादिभ्यो व्यावृत्तं प्रत्यक्षमेव; केवलं [4]तूपदेशाभावाद्विशेषसञ्ज्ञाप्रतिपत्तिर्न भवति ॥

पनसादिष्विति । व्यासङ्गात् विषयान्तराकृष्टत्वात् । ननु तथा सति तस्मिन् ज्ञानं न जायतैव; न; 'व्यासङ्गशब्देन तत्कार्यस्य विषयान्तरार्थत्वातिशयस्य विवक्षितत्वात् । घटपटोलम्भेपि घटार्थी घटे एव व्यवहरति न पटे । तदिदमुक्तं भवति **अनर्थित्वाच्चेति** । विशेषनिश्चयाभावे सतीति शेषः । **किमित्यालोचनमात्रमिति**—'मात्र'शब्देन विशेषनिश्चयानात्मकतां दर्शयति । एतदेव स्पष्टयति **तत्रेति** । [5]विशेषसंज्ञाप्रतिपत्तिविनिश्चयो न भवतीति । निश्चयनिषेधेनानिश्चयात्मकता दर्शिता, न तु निश्चयाभावमात्रं विशेषनिषेधस्य शेषाभ्यनुज्ञाफल[6]कत्वात् । सामान्येन ह्यनेन काचिदत्र संज्ञा प्रवर्तते इति निश्चितमेवा[7]विशेषात् । का पुनरसौ प्रसिद्धा अप्रसिद्धा च इत्यनध्यवसाय इत्यर्थः ॥

(२२९) **अनुमानविषयेऽपि नारिकेलद्वीपवासिनः सास्नामात्रदर्शनात् 'को नु [8]खल्वयं प्राणी स्यात्' इत्यनध्यवसायो भवति ॥**

द्वितीयां विधामाह—**अनुमानविषयेऽपीति** । 'नारिकेलद्वीपवासिन' इत्यप्रसिद्धगोत्वोपलक्षणपरम् । सास्नामात्रदर्शनादित्यनन्यत्रोपलब्धचेष्टमानावयवविशेषदर्शनोपलक्षणपरम् । कोनु खल्वत्र प्राणी स्यात् प्रसिद्धोऽप्रसिद्धो वेत्यर्थः । यद्यपि को नु खलु स्यादिति जिज्ञासा तथाऽपि तत्कारणेनानिश्चयात्मना ज्ञानेन भवितव्यं प्रथमं, नहि निश्चितेऽर्थे जिज्ञासोत्पद्यते नापि सर्वथैवाज्ञात इति ॥

(२२६) **[9]उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारेणैव यदनुभवनं मानसं तत्स्वप्नज्ञानम् ॥**

स्वप्नलक्षणां चतुर्थीमविद्यामाह **उपरतेति** । स्वकार्याद्विरतवदिन्द्रियवर्गस्य प्रलीनमनसो निरिन्द्रियप्रदेशावस्थितान्तःकरणस्येन्द्रियद्वारेणैव यदनुभवनं पूर्वज्ञानप्रत्यवेक्षणैकं

---

1 तत्र हि–दे । 2 रूपादि–दे । 3 ऽध्यवसायो भवति मु. भा । 4 केवलमुपदेशाभावाद्–दे । 5 विशेषसञ्ज्ञाविनिश्चयो–कि; क. । 6 विषयत्वात्–जे । 7 वा विशेषणत्वात्–जे । 8 खल्वयं स्यात्–मु. भा । 9 तत्र ह्युपरते°–दे ।

ज्ञानं यत्रासत्यपि चक्षुरादिव्यापारे चक्षुषाऽवश्यमिममर्थं पश्यामीमं श्रोत्रेण शृणोमीत्यनुव्यवसायः तत्स्वप्नज्ञानम्। अयथार्थत्वेऽप्युपरतेन्द्रियग्रामस्वभावाद्विपर्ययाद्व्यवच्छेदः। नियतकोटिकत्वात् संशयाऽनध्यवसायाभ्याम्, अनुभवनमिति स्मृतेः। यद्यपि यथार्थमपि क्वचित् स्वप्नज्ञानं भवति यथा 'अहमिह शय्यायां संविष्टः तिष्ठामि' तथापीन्द्रियद्वारकता तत्र यथार्थैवेति प्रतिपादनार्थमिन्द्रियद्वारेणेत्युक्तम्। इन्द्रियग्रामोपरमार्थं प्रलीनमनस्कस्येति॥

(२२७) **कथम्? यदा बुद्धिपूर्वादात्मनः शरीरव्यापारादहनि खि[1]न्नस्य प्राणिनो निशि वि[2]श्रामार्थमाहारपरिणामार्थं वाऽदृष्टकारितप्रयत्नापेक्षादात्मान्तःकरणसं[3]योगान्मनसि क्रिया[4]प्रबन्धादन्तर्हृदये निरिन्द्रिय [5]आत्मप्रदेशे यदा निश्चलं मनस्तिष्ठति तदा प्रलीनमनस्क इत्याख्यायते। प्रलीने च तस्मिन्नुपरतेन्द्रियग्रामो भवति। तस्यामवस्थायां प्रबन्धेन प्राणापानसन्तान[6]प्रवृत्तावात्ममनःसंयोगविशेषात् स्वापाख्यात् संस्काराच्चेन्द्रियद्वारेणैवासत्सु विषयेषु प्रत्यक्षाकारं स्वप्नज्ञानमुत्पद्यते।**

तदेतत् प्रश्नपूर्वकं विवृणोति **कथमि**त्यादिना। बुद्धिपूर्वकादितीच्छापूर्वकः प्रयत्नो विवक्षितः। शरीरव्यापाराच्चेष्टालक्षणात्। अहनीति जागरावस्थोपलक्षणपरम्। खिन्नस्य विश्रान्तस्य। **निशी**ति—शयनकाले विश्रामार्थं परिश्रमोपशमार्थम्; आहारस्य अशीतपीतस्य रसादिभावेन परिणामार्थं परिपाकार्थं, चादृष्टजनितं प्रयत्ननिमित्तमपेक्षमाणादात्ममनःसम्बन्धात् संयोगादसमवायिकारणान् मनसि समवायिकारणक्रियाप्रबन्धात् क्रियासन्तानादन्तर्हृदयं प्राप्य तस्मिन्नन्तर्हृदये तस्य विचारणं निरिन्द्रियात्मप्रदेशे निश्चलं निवृत्तपूर्वक्रियासन्तानं तिष्ठति। पुनः सहसैव न चलति। ततः किमत आह → **प्र[7]लीनेति**। किमतो यद्येवमत आह ← **तस्या**मिति। प्रबन्धेन [8]प्रस्तारेण। अत्राप्यदृष्टकारितप्रयत्नापेक्ष आत्मप्राणसंयोगः कारणमि त्यूहनीयम्। **प्राणापानसन्तानेति**—प्राणनं प्राणः अपानमपानः, तत्सन्ताने प्रवृत्तावात्ममनसोः संयोगविशेषाददृष्टादिसाचिव्येन संयोगमात्रव्यावृत्तत्वात् स्वाप

1 खिन्नानां प्राणिनां—कं। 2 विश्रमार्थं—कं। 3 सम्बन्धान्—मु. भा, दे। 4 सम्बन्धात्—दे। 5 आत्मप्रदेशे निश्चलं—दे। 6 प्रवृत्तादात्म—दे। 7 →← एतच्चिह्नन्तर्गतः पाठो कि, कपुस्तकयो र्नास्ति। 8 प्रस्तावेन—कि; क।

इत्याख्या यस्य तस्मात्। एतेन [1]शयनपदार्थस्थले न निरुक्त इति मन्तव्यम्। **असत्सु विषयेष्विति**—अर्द्धरात्रे प्रसुप्तो यानाह्निकानर्थाननुपश्यति। न च ते तथा, वाराणस्यां सुप्तः पाटलिपुत्रे पश्यति। न चाऽसौ पाटलिपुत्रे न च ते वाराणसीयाः। एवमजातानेव जातान् मृतानिव जीवतः, यून एव स्थविरानित्यादि। अनेनाविद्यात्वमुपदर्शिततिम्। सुप्तेप्यवस्थाविशेषे ज्ञानं स्वप्नज्ञानं कर्मधारयपक्षे सुषुप्तत्वानुपपत्तेः। इन्द्रियद्वारेणैव प्रत्यक्षाकारं साक्षात्करोतीति चोपलक्षणम्। लिङ्गद्वारेणैवानुमित्याकारं क्वचिदित्यपि द्रष्टव्यम्; यथाऽस्मिन्देशे धूमादग्निरित्ययमेवाहेत्यादि॥

(२२८) **तत्तु[2]त्रिविधम्—संस्कारपाटवाद्, धातुदोषाददृष्टाच्च।**

तस्यान्तर्गणितं भेदमाह **तत्तु त्रिविधमिति**। यद्यपि सर्वत्र सर्वेषां कारणत्वमस्ति तथाप्यतिशयमाश्रित्य त्रैविध्यम्।

(२२९) **तत्र संस्कारपाटवात्तावत् कामी क्रुद्धो वा यदायमर्थमाहतश्चिन्तयन् स्वपिति तदा सैव चिन्तासन्ततिः प्रत्यक्षाकाराः सञ्जायते॥**

तदाह **तत्रेति**। कामी क्रुद्धो वा यमर्थं कामिनीमरातिमर्थं वाऽऽहतः प्रयत्नवान् चिन्तयन् स्मरन् स्वपिति निद्रयाऽभिभूयते तदा सैव चिन्तासन्ततिः, तज्जनितः संस्कारसन्तानः, कारणशब्दस्य कार्ये उपचारात्; प्रत्यक्षाकारा साक्षात्कारवती। एकविषयत्वात् कार्यकारणरूपत्वाच्च संस्कारसन्ततिरेव स्वप्नप्रतीतिरुक्ता।

(२३०) **धातुदोषाद् वातप्रकृति[3]र्वातदूषितो वाऽऽकाशगमनादीनि पश्यति। पित्तप्रकृतिः पित्तदूषितो वाऽग्निप्रवेशकनकप[4]र्वतादीनि पश्यति। श्लेष्मप्रकृतिः श्लेष्मदूषितो वा सरित्समुद्रप्र[5]तरणादीनि हिमपर्वतादीन्॥**

धातुदोषादिति। धातवोऽसृग्मांसादयः शरीरधारणात्, तेषां दूषकत्वाद्दोषाः। वातपित्तश्लेष्माण एव वा धातवः शरीरस्थितिहेतुत्वात्, तद्दोषादुपचयलक्षणान् स्वप्नान् पश्यति। तद्विवृणोति **वातेति**। स्वभावादेव, वाताधिको वातप्रकृतिरित्युच्यते। आगन्तुकेन निमित्तेन क्षोभितवातो वातदूषितः आकाशगमनादीनीत्यादिशब्देनाधःप्रदेशे फलकपर्यन्तभ्रमणभूकम्पादिग्रहणम्। एवं पित्तप्रकृतिः स्वभावत एव पित्ताधिकः पित्तदूषितो

1 शयनपदार्थस्थलेन नो निरूक्त–जे। 2 'तत्तु त्रिविधम्' इति दे पुस्तके नास्ति। 3 स्तद्दूषितो–मु. भा। 4 पर्वतादीन्–मु. भा। 5 प्रतरणादीनि पश्यति–दे।

वाऽऽगन्तुकेन निमित्तेनाग्निप्रवेशकनकपर्वतादीनि आदिग्रहणात् मध्याह्नातपदिग्दाहादिग्रहणम्। तथा श्लेष्मप्रकृतिः स्वभावत एव श्लेष्माधिकः श्लेष्मदूषितो वा आगन्तुकेन निमित्तेन सरित्समुद्रप्रतरणादीनि पश्यति ॥

(२३१) यत्स्वयम[1]नुभूतेष्वननुभूतेषु वा प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा यच्छुभावेदकं ग[2]जारोहणच्छत्रलाभादि तत्सर्वं संस्कारधर्माभ्यां भवति। विपरीतं च तैलाभ्यञ्जनखरोष्ट्रा[3]रोहणादि तत्सर्वमधर्मसंस्काराभ्यां भवति। अ[4]त्यन्ताप्रसिद्धार्थेष्वदृष्टादेवेति ॥

तृतीयां विधामाह—यदिति। स्वयमनुभूतेषु प्राप्तेष्वननुभूतेषु अप्राप्तेषु च प्रसिद्धेष्वर्थेष्विह जन्मनि प्रतीतेषु अप्रसिद्धेषु चेह जन्मन्यप्रतीतेषु मध्ये → [5]यच्छुभावेदकं गजारोहणच्छत्रलाभादि ← इति, आदिग्रहणात् पर्वतारोहणपायसभक्षणादीनि; स्वयं प्राप्ते इह जन्मनि प्रतीतेषु यत् '[6]ब्राह्मणेन सुरापेया' पुण्येनागम्यागमनादि। इह जन्मन्यप्रतीतविषयन्तु मेरुपृष्ठारोहणदेवतादर्शनमन्दाकिनीविगाहनादि, तत्सर्वं [7]संस्कारधर्माभ्यां यदि पूर्वदिवसे पुराणादिश्रवणमस्याभूत्।

तद्विपरीतमशुभावेदकं तैलाभ्यञ्जनोष्ट्रारोहणादि इति; आदिग्रहणात् [8]अन्धकूपपातपङ्कमज्जनादिकं सर्वमधर्मसंस्काराभ्यां यदि पूर्वदिने कथंचिदस्यार्थस्य चिन्तनमभूत्। अत्यन्ताप्रसिद्धेषु आदित्यविगलनादिषु पूर्वज्ञारोपतोऽप्यचिन्तितेषु। संसर्गविषयश्चात्र संस्कारो नेष्यते, संसृज्यमानविषयस्तु अस्त्येवेति; अत एव स्मृतिरेव पटीयसीति ये स्वप्नं वदन्ति ते मूढमनसोऽनुकम्पनीयाः। इदं रजतमिति विपर्ययस्यापि तथाभावापत्तेश्चेति।

(२३२) स्वप्नान्तिकं यद्यप्युपरतेन्द्रियग्रामस्य भवति तथाप्यतीतस्य[9] ज्ञानप्रबन्धस्य प्रत्यक्षवेक्षणात् [10]स्मृतिरेवेति। भवत्येषा चतुर्विधाऽविद्या ॥

स्वप्नज्ञानमध्यपाति स्वप्नज्ञानविषयस्य यत्स्मरणं तदपि उपरतेन्द्रियग्रामस्य प्रलीनमनसो भवति यस्य [11]स्वप्नान्तिकमिति प्रसिद्धिः। स्वप्नस्यान्तोऽवयवविशेषो विषयतया

1 °मनुभूतेषु प्रसिद्धेषु वा दे। 2 गजारोहणं–दे। 3 °ष्ट्रारोहणाद्यधर्मसंस्काराभ्यामिति–दे। 4 अत्यन्ताप्रसिद्धेषु–दे। 5 →←एतच्चिह्नान्तर्गतः पाठो कि; क पुस्तकयोः पुनरावृत्तः–स। 6 ब्राह्मणेन पुण्येन–कि। 7 संस्कारधर्माधर्माभ्यां–कि. क। 8 अन्धकारपान–कि; क। 9 अतीतज्ञानप्रबन्धप्रत्यवेक्षणात्–दे। 10 स्मृतिरेवैषा चतुर्विधा भवत्यविद्या–दे। 11 स्वपीतमीति प्रसिद्धिः–कि; क।

अस्यास्तीति व्युत्पत्त्या, तत्कुत्रान्तर्भवति ? न तावदविद्यायाम्, यथार्थत्वात् । नापि विद्यायाम्, उपरतेन्द्रियग्रामस्येत्यादिस्वप्न[1]लक्षणयोगात् । अतिव्यापकतया न चेदं लक्षणमित्याह—**स्वप्नान्तिक**मिति । पूर्वज्ञानप्रत्यवेक्षणादसौ मयादृष्टस्तन्मया पायसम्भक्षितम् इत्याद्यनुसन्धानात् स्मृतिरेव तल्लक्षणयोगात् । तथा च विद्यायां व्याख्यास्यते । न चैवं स्वप्नलक्षणस्यातिव्याप्तिः अनुभवमिति विशेषणादिति भावः । उपसंहरति **एवे**ति ।

(२३३) विद्याऽपि चतुर्विधा—प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा ॥

सम्प्रति क्रमप्राप्तां विद्यां विभजते **विद्यापी**ति । यथार्था प्रतिपत्तिर्विद्येति सामान्यलक्षणमुक्तम् । साऽपि चतुर्विधाऽविद्यावदित्यपेरर्थः । किं नामधेयास्ताश्चतस्रो विधा इत्यत आह—**प्रत्यक्षे**ति । लक्ष्यते प्रतिपाद्यतेऽनेनेति लक्षणं नाम, सा तथोक्ता ॥

(२३४) तत्राक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षम् । अक्षाणीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्छ्रोत्र[2]मनांसि ।

त[3]त्र प्रत्यक्षमिति किमनपेक्षितावयवार्थसंज्ञानेनेत्याह—**तत्राक्षमक्ष**मिति । प्रतीत्य प्राप्य । अपार्थकञ्चैनत्, प्रतिगतं प्रत्यक्षमिति; प्रत्यक्षादिर्नाम यस्याः सा तथोक्ता तत् प्रत्यक्षमिति कुगतिसमासः । अव्ययीभावे हि परवल्लिङ्गतायां प्रत्यक्षा बुद्धिरिति न स्यात् । 'अक्ष' शब्दस्य पुण्डरीकाक्षादौ चक्षुष्येव प्रसिद्धिप्राचुर्यात् सङ्कोचो माभूदित्यभिप्रायवानाह **अक्षाणीन्द्रियाणि** घ्राणादीनि षट् न त्वेकादश **साङ्ख्य**वत् पञ्च वा **बौद्ध**वत् । सत्त्वाहङ्कारप्रभवत्वलक्षणस्य लक्षणस्यासिद्धेरहङ्कारादिप्रक्रियाया एवानभ्युपगमात् । इन्द्रस्यात्मन उपकारकाणीन्द्रियाणीत्यस्य शरीरादिगतत्वेनातिव्यापकत्वात् । शरीरसंयुक्तं साक्षात्प्रतीतिसाधनमित्येव तु लक्षणम्; **बौद्धो**ऽपि युगपज्ज्ञानानुपपत्त्या मनोऽधिकमिन्द्रियमङ्गीकारयितव्यः । अन्यथा व्यासङ्गानुपपत्तेः । ज्ञानान्तरभावाद् व्यासङ्गोपपत्तौ चक्षुरादिकमपि हापयितव्य इति । तदेतद् व्युत्पत्तिनिमित्तं [4]उक्तं न प्रवृत्तिनिमित्तं स्मृतिसंशयादिसाधारणत्वात् ।

उपलक्षणं चैतत्, लक्षणं तु यदनेनोपलक्ष्यते साक्षात्कारि यथार्थं ज्ञानं प्रत्यक्षमिति हि तत् । तत्र बुद्ध्यधिकारेण ज्ञानमिति लब्धे अज्ञानव्यवच्छेदः । विद्याप्रभेदाधिकारात् यथार्थमिति लब्धे अविद्याप्रभेदविपर्ययाद् व्यवच्छेदः । इन्द्रियापोद्यत्वेन च

---

1 लक्षणायोगात्–कि; क । 2 मनांसि षट्–मु. भा । 3 किमनपेक्षितावयवार्थाज्ञानेनेत्याह–किं. क । 4 व्युत्पत्तिनिमित्तं स्मृति संशयादिसाधारणत्वात्–कि. क ।

साक्षात्कारित्वे लब्धे क्षिप्रं तेनानुमानादित्रयव्यवच्छेदः। न चैवमिन्द्रियतत्संयोगाव्याप्तिर्दोषाय। न ह्यत्र प्रत्यक्षं प्रमाणमधिकृतमपि तु बुद्धिः। प्रसङ्गात् यदि [1]तदप्यपेक्षितं तदा तत्साधनमिति गृह्यताम्॥

(२३१) **तद्धि द्रव्यादिषु पदार्थेषूपपद्यते। द्रव्ये तावत्त्रि[2]विधे महत्यनेकद्रव्यवत्त्वोद्भूतरूपप्रकाशचतुष्टयसन्निकर्षाद् धर्मादिसामग्र्ये च स्वरूपालोचनमात्रम्। सामान्यविशेषद्रव्यगुणकर्मविशेषणापे[3]क्षादात्ममनःसन्निकर्षात् प्रत्यक्षमुत्पद्यते 'सद्' 'द्रव्यं' विषाणी शुक्लो गौर्गच्छतीति॥**

तदेतद्विषयतः कारणतः स्वरूपभेदेन प्रपञ्चयति **तद्धीति**। 'हि'शब्दः खल्वर्थः। स्पष्टतामाह—[4]**द्रव्यादीति**। विषयीकृत्य स्पष्टमुत्पद्यते इति लोकप्रसिद्धमेतन्नाप्रत्यक्षमित्यर्थः। तदेतदनुपदमेव वक्ष्यति इत्येतद**स्मदादीना**मिति। द्रव्ये तावत्त्रिविधे पृथिव्यामप्सु तेजसि चेत्यर्थः। किमविशेषात्सर्वत्र? न, इत्याह—**महति** महत्त्ववति, तेन महत्त्वस्य द्रव्यग्रहणकारणमुक्तम्। अकारणत्वे तत्प्रकर्षानुविधानानुपपत्तेः। नह्यकारणस्य प्रकर्षमकार्यमनुविधत्ते; न च परिमाणप्रकर्षः कारणसङ्ख्याप्रकर्षमनादृत्य सम्भवति। तत्र परिमाणप्रकर्षोत्पादद्वारेण तस्यापि प्रत्यक्षकारणत्वमस्ति तदाह—**अनेकद्रव्यवत्त्व** इति। अनेकं द्रव्यमारम्भकं येषामवयवानां तेऽनेकद्रव्या अवयवास्तद्वत्त्वमनेकद्रव्यवत्त्वं च स्वभावः, उद्भूतरूपं च प्रकाशस्यालोकः तैः सहिताः, चतुष्टयसन्निकर्षात् आत्मा मनो बहिरिन्द्रियं ग्राह्यं च द्रव्यमिति चतुष्टयसंयोगात्, धर्मादिसामग्र्ये सति, धर्माधर्मौ दिक्कालावीश्वरश्चेति साधारणानि निमित्तानि। तेषां समग्राणां भावे सति स्वरूपस्यालोचनं निर्विकल्पकं प्रत्यक्षं साक्षात्कार्युत्पद्यते इति भाविना सम्बन्धः।

नन्वेतत् स्वचरितविरुद्धम्, सामान्यज्ञानं द्रव्यज्ञानं गुणज्ञानमिति पूर्वपूर्वापेक्षमुत्तरोत्तरमिति द्वित्वादौ व्युत्पादितम्। तत्र तु द्रव्यज्ञानमेव प्रथमत इत्याशङ्क्याह—**सामान्येति**। विशेष्यज्ञानमधिकृत्य तदुक्तं नालोचनमधिकृत्य, आलोचनकाले सर्वेषां

---

1 तदपि जिघृक्षितम्–जे। 2 द्विविधे–क, पृथिव्युदकज्वलनसञ्ज्ञके इत्यधिकं–पा. ६. पु। 3 दात्मनः–दे। 4 द्रव्यादीन् पदार्थान्–जे; अयं तु मूलभाष्वे पाठःस्यादिति भाति किरणवल्यां. 'विषयीकृत्य स्पष्टमुत्पद्यते' इति दर्शनात्. 'द्रव्यादीन् पदार्थान् विषयीकृत्य स्पष्टमुत्पद्यते' इति ग्रन्थसम्बन्धः। संपादकः।

योग्यदेशस्थानां तदुपलब्धिसामग्रीसन्निधाने स्फुरणस्येष्यमाणत्वात्। विशेष्यज्ञानं प्रति हि विशेषणज्ञानं कारणम्। नहि [1]दण्डत्वमनुपलभ्य कश्चिद्दण्डीति प्रत्येति। स्वरूपं तु दण्डी प्रतीतावपि, गृह्यत एवेति भावः। न च समवायिनो धर्मा द्रव्यस्य व्यञ्जका इति नियमो, गोत्वाद्यप्रतीतावपि तदाश्रयस्य प्रतीतेः; अन्यथा संशयाद्यनुपपत्तिप्रसङ्गात्। योऽपि रूपादिर्व्यञ्जकः सोऽपि सत्तया न तु स्वज्ञानेन, महारजताद्यभिभूते धवलिम्नि पटस्य प्रतीतेरिति। तथापि सविकल्पकोत्पत्तावपि इन्द्रियार्थयोः सामर्थ्ये निर्विकल्पकसमसमयमेव तदुत्पद्यते, असामर्थ्ये पश्चादपि नोत्पद्यते; इत्यत्राप्येतदेवोत्तरं सामान्यविशेषेत्यादि। न हि कार्यविशेषानुविहितभावाभावं सहकारिविशेषमपेक्ष्यमाणस्य सामर्थ्यं हीयते। तथा च घटस्यालोचनेऽपि चक्षुषः प्रकाशापेक्षितया शक्तिरवसीदेत।

ननु विशिष्टं वस्तु नास्त्येव, स्वरूपतोऽधिकं सामान्यादीनां [2]विशेषणानां कल्पितत्वात्, व्यावृत्तेश्च व्यावृत्तिमतोऽनन्यत्वात् तुच्छत्वाच्च। ततस्तैमिरिककेशज्ञानवत् वस्त्वननुरोधितया न सविकल्पकज्ञानं प्रत्यक्षम्, अत्राप्येतदेवोत्तरं सामान्येति। स्थैर्यसिद्धौ सामान्यादीनां विशेषणानां व्यावृत्तेश्च विशिष्टताया अविरोधेनानुभवसिद्धत्वात्। अन्येषां च बाधकानां [3]तत्र तत्र निराकृतत्वात् निराकरिष्यमाणत्वादिति भावः। प्रत्यक्षं [4]यत्तन्नाभिलापसंसर्गयोग्यप्रतिभासं यथा निर्विकल्पकम्, यदभिलापसंसर्गयो[5]ग्यप्रतिभासं न तत्प्रत्यक्षं यथा शाब्दलैङ्गिकविकल्पादिति [6]प्रत्यक्षविपर्ययौ प्रत्याख्यातौ वेदितव्यौ; अभिलापनिमित्तानां सामान्यादीनां परमार्थसत्त्वे प्रत्यक्षाभिलापसंसर्गयोग्यप्रतिभास[7]त्वयोरविरोधात्। न च निर्विकल्पस्य प्रत्यक्षत्वप्रयुक्ताभिलापसंसर्गयोग्याप्रतिभासत्वमपि तु तथा प्रतिभाससामग्रीविरहप्रयुक्तम्। नाप्यभिलापसंसर्गयोग्यप्रतिभासप्रयुक्तमप्रत्यक्षत्वं शाब्दलैङ्गिकविकल्पानाम्, अपि तु अनिन्द्रियकरणत्वप्रयुक्तमिति त एवान्यौपानिधिकमस्य साक्षात्कारित्वं मुख्ये बाधकाभावात् तद्गतत्वे[8]नानुभवाच्च। बाधकं विनाप्यनुमानस्यावधीरणेऽतिप्रसङ्गात्। तदिदमुक्तं **प्रत्यक्षमुत्पद्यत** इति।

न च साक्षात्कारित्वेऽपि भ्रान्तत्वादस्य प्रत्यक्षाभासत्वमिति युक्तम्; तद्धि न देशकालाकारकृतं जात्यादियोजनायां सम्भवति गेहस्थस्य मणेः क्वचित् [9]कुञ्चिकाविवरस्थवत्। वस्तुत्ववद्देशवैशस्याभावादर्धरात्रस्थस्य मध्याह्नोपलम्भवत् कालवैकल्यानुपपत्तेः; पीतशङ्खवत्

1 दृढत्व–कि. क। 2 विशेषणानां ‘इति कि. क पुस्तकयोर्नास्ति’। 3 तत्र तत्र इति कि. क पुस्तकयोर्नास्ति। 4 प्रत्यक्षवत्तदभिलाप–कि. क। 5 प्रतिभासं तत्प्रत्यक्षम्–कि। 6 प्रसङ्गविपर्ययौ–जे। 7 त्वयोरधास ? कि. क। 8 °नानुभवाच्च–कि. क। 9 क्वचित्वस्तुवद्देश°–कि. क।

स्वरूपविपर्ययानुपपत्तेः। अस्थिरस्य स्थिरत्वेन, असमर्थस्य समर्थत्वेन, अस्थूलस्य स्थूलत्वेनावभासो विकल्प इति तु स्वप्नदर्शनम्, क्षणभङ्गस्य भङ्गादपोहवादस्यापोह्यत्वायवयवव्युपद्रवाणां विद्रावणादिति। नापि 'डित्थोऽयम्' इत्यादिनामयोजनायामनर्थात्मनः शब्दस्य [1]तदर्थतयावभासनाद् भ्रान्तत्वसम्भवात्। न हि 'डित्थोऽयं डित्थशब्द इति कश्चिदुपदिशति अपि तु डित्थशब्द[2]वाच्योऽयमिति। न चैतदन्यथा। अथ श्रोत्रस्य शब्दस्य चिरध्वस्तस्य चाक्षुषे विकल्पे कथमवभासः? विभ्रमाद्, अन्यत्र न चाक्षुषोऽयमिति न कथंचित्तटस्थ एव तु स्मर्यमाणः संज्ञिनमुपलक्षयतीति न किञ्चिदनुपपन्नम्। न चैवं शब्दादिस्मृतेरिन्द्रियव्यापारव्यवधायकत्वम्, सहकारित्वाद्व्यवधायकत्वानुपपत्तेः। तथात्वे चातिप्रसङ्गादिति संक्षेपः।

सामान्यान्येव परस्परतो विलक्षणत्वात् विशेषाः सामान्यविशेषाः। द्रव्यं च [3]गुणश्च कर्म च, तान्येव विशेषणानि व्यवच्छेदकानि। 'तदपेक्षादात्ममनःसंयोगाद्' इत्येकदेशोत्कीर्तनेन सर्वमेव पूर्वोक्तं स्मारयति। उदाहरति **सदिति**। →' [4]इति 'शब्दः प्रत्येकमभिसम्बध्यते। सदिति← सत्ताविशिष्टम्, द्रव्यमिति द्रव्यत्वविशिष्टम्, पृथिवीति पृथिवीत्वविशिष्टम्, विषाणीति विषाणद्रव्यविशिष्टम्, शुक्ल इति शुक्लगुणविशिष्टम्, गौरिति गोत्वविशिष्टम्, गच्छतीति क्रियाविशिष्टम्। अथवा सदित्यादि सामान्यद्रव्यगुणकर्मविशिष्टं गोद्रव्यावगाह्येकमेवेदं ज्ञानमिति॥

(२३६) रूपरसगन्धस्पर्शेष्वनेकद्रव्यसमवायात् स्वगतविशेषात् स्वाश्रयसन्निकर्षात् नियतेन्द्रियनिमित्त[5]मुत्पद्यते।

एवं प्रत्यक्षं द्रव्यस्य व्याख्या; गुणस्याह—**रूपे**ति। अनेकद्रव्यवद्द्रव्यसमवायान्महत्त्ववद्द्रव्यसमवायात्; स्वगतविशेषाद् [6]उद्भूतसमाख्यातात्, सामान्यविशेषात् स्वाश्रयसन्निकर्षात् इन्द्रियेण संयुक्तसमवायादिति यावत्। [7]**नियतेन्द्रियनिमित्त**मिति नियतमिन्द्रियं निमित्तं यस्य; चक्षुरेव रूपज्ञानस्य, रसनमेव [8]रस(न)ज्ञानस्य घ्राणमेव गन्धज्ञानस्य, त्वगिन्द्रियमेव स्पर्शज्ञानस्य तथोक्तम्॥

(२३७) शब्दस्य त्रयसन्निकर्षाच्छ्रोत्रसमवेतस्य तेनैवोपलब्धिः॥

---

1 तदात्मतया–जे। 2 °वाच्य इति–कि। 3 गुणकर्म–कि. क। 4 → ← एतच्चिह्नान्तर्गतः पाठः कि. क पुस्तकयोर्नास्ति। 5 मुत्पद्यतेज्ञानम्–दे। 6 °उत्तर–कि. क। 7 'नियतेन्द्रियनिमित्तमिति'–राठोऽयं कि. क पुस्तकयोर्नास्ति। 8 'रस' ज्ञानरय इति भाष्यम् 'न' अधिको भाति।

शब्दस्य त्रयसन्निकर्षात्—आत्ममनःश्रोत्रसन्निकर्षात् संयोगलक्षणात् । श्रोत्रसमवेतस्य तेनैव श्रोत्रेणैवोपलब्धिः ।

(२३८) **सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्ने[1]हद्रवत्ववेगकर्मणां प्रत्यक्षद्रव्य[2]समवायाच्चक्षुःस्पर्शनाभ्यां ग्रहणम् ॥**

सङ्ख्यादीनां द्रव्यग्रहणयोग्यतान्तर्भूतयोग्यतानां द्रव्यवद्द्वाभ्यामिन्द्रियाभ्यामुपलब्धिरित्याह **सङ्ख्ये**ति । तदुक्तं **प्रत्यक्षद्रव्यसमवायादि**ति सामान्यगुणानां स्नेहस्य विशेषगुणस्य, कर्मणश्च ।

कर्म प्रत्यक्षमित्येके न क्षमन्ते । संयोगविभागपरम्परैव केवलमुपलभ्यते, यः पुनरयं चलतीति [3]प्रत्ययः स संयोगविभागानुमितकर्मगोचर इति । तदसत्; सिद्धे ह्यप्रत्यक्षत्वे तत्प्रत्ययस्यान्यथासमर्थनमुचितम्, यथा वायोः, न त्वन्यथाऽतिप्रसङ्गात् । तदेव तु कुतः सिद्धिमिति वाच्यम्, न तावदुपलब्धेरेव, तस्याः साध्यत्वात्, नाशुतरविनाशित्वादिति व्यभिचारात् । नापि समनन्तरदेशसंयोगव्यवहितत्वात्, विभागेन व्यभिचारात् । न परमाणुवृत्तित्वात्, [4]तत एवासिद्धेश्च । महति द्रव्ये [5]वर्तमानं तत्प्रत्यक्षमिष्यते न परमाणौ । यदि तत्प्रत्यक्षमेकस्यामपि कर्मव्यक्तौ व्युत्पन्नायां चलतीति प्रत्ययः किं न स्यादिति चेत्, न; संयोगविभागयोरपि तुल्यमेतत् । तथा च कथमनुमीयेतापि ? कर्मत्वादेव परमाणुकर्मवदिति चेत्; न; परमाणुगुणदृष्टान्तेन सर्वगुणानामप्यतीन्द्रियत्वापातात् । आश्रयामहत्त्वमेव तत् प्रयोजकं न परमाणुगुणत्वम्, अतो रूपादिप्रत्यक्षस्य अनन्यथासिद्धेस्तदबाध एव दूषणमिति चेत्; तुल्यमिति ।

यदि च पूर्वदेशविभागोत्तरदेशप्राप्तिपरम्परया गतिरनुमीयते, आदित्यादेरिव सर्वत्र चलतीति प्रत्ययो न स्यात् । नह्युपलभ्यमानदेशान्तरप्राप्तिरपि मयूखमाली चलतीति कश्चित्प्रत्येति । तत्र देशान्तरप्राप्तिर्न प्रतीयत एव । देशान्तरस्यैवाकाशादेरप्रतीतिरिति चेत्, न; तर्हि सन्तमसे खद्योतस्यापि देशान्तरप्राप्तिरवसीयते तथा च गतिरपि नानुमीयेत । तस्य भागैरेव संयोगविभागाः प्रतीयन्त इति चेत् गभस्तिमालिनोऽप्येवमस्तु । तदाऽऽलोकस्य व्यापकत्वात् न तेन संयोगविभागौ लक्ष्येते इति चेत्; अव्यापकेनापि खद्योतालोकेन तस्य

1 स्नेहवेगद्रवत्व–दे । 2 समवायादाश्रयचक्षुः–दे । 3 प्रत्ययः संयोग°–कि । 4 व्यभिचारादेव–जे । 5 द्रव्येऽतिवर्तमानं–कि, क ।

तौ न लक्ष्येते। [1]घनोदकवत् युगपत् सञ्चारित्वात्, अवयवावयवितया संयोगविभागासम्भवाद्वा देशान्तरस्य चाकाशादेरनुपलब्धिरुभयत्रापि तुल्येति। अथ द्रव्यत्वे [2]चाविनष्टत्वे च व्यवधानाद्यनुपपत्तौ अचलनचक्षुषोपलब्धावनुपलभ्यमानत्वाद्देशान्तरप्राप्तिमनुमाय तया गतिरनुमीयते इति मन्यसे, तदेतदुभयत्रापि तुल्यम्। कथमेकत्र 'चलति' अन्यत्र चलतीति प्रत्यय इत्येषा दिक्।

(२३९) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां द्वयोरात्ममनसोः [3]सन्निकर्षादुपलब्धिः॥

बुद्ध्यादीनामान्तराणां प्रत्यक्षतामाह—**बुद्धी**ति। द्वयोरात्ममनसोः सन्निकर्षात् संयोगादात्मसमवेतानामिति शेषः। तत्र बुद्धौ केचित् स्वसंवेदनं प्रत्यक्षमाहुः। अन्ये त्वप्रत्यक्षैव बुद्धिः प्राकट्यानुमेयेत्याचक्षते। उभयत्रापि प्रमाणाभावः। बुद्धिः स्वव्यवहारे वेदनान्तरनिरपेक्षा, वेदनत्वात् यत्तु पुनः [4]स्वतो व्यतिरिक्तवेदनापेक्षं स्वव्यवहारे वेदनान्तरापेक्षं न तद्वेदनं यथा पटादि इति चेत्, न; परेण परवेदनव्यवहारे कर्तव्ये वेदनस्यापि वेदनान्तरापेक्षत्वेन बाधितत्वात्। तत् परिहारेणान्यत्र साधने विपक्षगामितया विरूद्धत्वाच्च। एतेन स्वव्यवहारे सर्वे [5]सजातीयानपेक्षाः यथा घटो घटव्यवहार इत्यादि निरस्तं वेदितव्यम्। अनवस्थाप्रसङ्गस्तु अवश्यवेद्यत्वानभ्युपगमेन निरसनीयः। प्रकाशत्वादित्यसाधारणमसिद्धं चेति। विवादाध्यासितवेदनं वेदनान्तरगोचरः वेदनत्वात् पुरुषान्तरवेदनवत् [6]स्मर्तव्यस्ववेदनवच्च। अवेदने तद्व्यवहारविलोपप्रसङ्गः। स्वयमेव वेदने पुरुषान्तरवेदनेऽपि च [7]वेदनान्तरानपेक्षत्वप्रसङ्ग इति। कार्यलिङ्गानुमेयत्वे तदसिद्धिप्रसङ्गः। [8]वेदनकारणे प्येवार्थप्राकट्यव्यवहारयोरुपपत्तिरिति सङ्क्षेपः॥

(२४०) भावद्रव्यत्वगुणत्वकर्मत्वादीनामुपलभ्याधारसमवेतानामाश्रयग्राहकैरिन्द्रियैर्ग्रहणम्; इत्येतदस्मदादीनां प्रत्यक्षम्॥

भावेति—भावः सत्ता, तेषां सामान्यानामुपलभ्याधारसमवेतानामिति। आश्रययोग्यतान्तर्भूतयोग्यत्वममीषां दर्शयति। अन्यथा परमाण्वादिष्वपि सत्तादिकं प्रत्यक्षमापद्येत

---

1 'नुद्यवत्'–जे। 2 चाविशिष्टत्वे–कि। 3 संयोगात्–मु. भा। 4 स्वतो व्यतिरिक्तवेदनापेक्षाम इति–कि. क पुस्तकयोर्नास्ति। 5 सजातीयापेक्षाः–कि. क। 6 स्मर्तव्यस्ववेदनवच्च इत्येतत् कि. क पुस्तकयोर्नास्ति। 7 वेदनान्तरापेक्षत्व–कि. क। 8 वेदनप्राकट्य°–. कि. क।

स्वरूपयोग्यताया अविशेषात् । अयोग्यत्वे घटादावनुपलब्धिप्रसङ्गात् अत एवाह [1]**स्वाश्रयग्राहकैरिन्द्रियैरि**ति । तत्र सत्तायां [2]गुणत्वे च सर्वेन्द्रियजज्ञानं द्रव्यत्वसङ्ख्यादिसामान्ये [3]त्र्यैन्द्रियम्, पृथिव्यादिषु [4]द्व्यैन्द्रियकं, रूपादिषु नियतेन्द्रियनिमित्तं बुद्धित्वादौ [5]मानसमिति । द्रव्ये संयोगात्, रूपादिषु बुद्ध्यादिषु च संयुक्तसमवायात् । रूपत्वादौ संयुक्तसमवेतसमवायात् । [6]शब्दे समवायात् शब्दत्वादिषु समवेतसमवायात् । किमनेन प्रपञ्चेन, इन्द्रियेण [7]स्वाश्रयसन्निकर्षादेव गुणादीनां ग्रहणादिति केचित् । स्वाश्रयसन्निकर्षादिति कोऽर्थः ? [8]यत्र तत्समवेतं तत्समवे**तस्ये**न्द्रियेण सन्निकर्षादिति । तदेवं विषयविवर्त्यक्षौमपरीधानमनुहरति । वयं हि ब्रूमो यदिन्द्रियेण सन्निकृष्टं तत्समवायादिति । अभावस्य तु योग्यप्रतियोगिनो विशेषणभावादिति चानुक्तमपि लभ्यते । तत्र तत्र [9]तद्विशिष्टस्य प्रत्ययस्योपदर्शनादित्यभिप्रायवानुपसंहरति **इत्येतदिति** । अयोगिनामित्यर्थः ।

(२४१) **अस्मद्विशिष्टानां तु योगिनां युक्तानां योगजधर्मानुगृहीतेन मनसा स्वात्मान्तराकाशदिक्कालपर[10]माणुवायुमनस्सु [11]तत्समवेतगुणकर्मसामान्यविशेषेसु समवाये चावितथं स्वरूपदर्शनमुत्पद्यते** ॥

योगिप्रत्यक्षमाह—**अस्मद्विशिष्टानामि**ति । विवरणं योगिनामिनि, ध्यानिनामित्यर्थः । ते च द्विविधाः, युक्तवियुक्तभेदात् । तत्र युक्ता इन्द्रियेभ्यः प्रत्याकृत्य साक्षात्कर्तव्यवस्तुन्यादरेण मनो [12]विधार्य प्रवर्तमानचिन्तासन्तानाः । वियुक्तास्तु अत्यन्ताभ्यासेन परमवशीकारमापन्नवि[13]गतावरणाः सर्वतः प्रद्योत[14]मनसो निरवशेषिताभ्यासाः । तत्र युक्तानां समाधिस्थानां योगजधर्मानुगृहीतेन मनसेति । आभ्यासिकस्य संस्कारप्रचयस्य [15]कामातुरे कामिनीज्ञानसाधारण्येन प्रत्यक्षैकहेतुना । नापि प्रमाणपरिगृहीतार्थविषयत्वं भावनाया विशेषः, धूमेन पर्वतनितम्बवर्तिनाऽग्निमनुमाय शीतार्तस्य ध्यायत इन्धननिवृत्तौ निवृत्तेऽपि दहने [16]तत्साक्षात्कारित्वापत्तेः । अत उक्तं **योगज धर्मानुगृहीतेने**ति ।

1 स्वाश्रयग्राहकैः कि. सम्मतः पाठः । 2 गुणत्वेन–कि. क । 3 त्रैन्द्रियं–कि. क । 4 वैन्द्रियकम्–कि. क । 5 मानमिति–कि. क । 6 'शब्दे समवायात्' इति कि. क पुस्तकयोर्नास्ति । 7 स्वाश्रयसन्निकर्षात् देवगुणादीनां ग्रहणादीनां ग्रहणात्–कि । 8 कोऽर्थः तत्समवेतस्येन्द्रियेण–कि. क । 9 तत्र विशिष्टस्यापादादित्यभिप्रायवान्–कि. क । 10 वायु परमाणु–दे । 11 तत्समवेतेषु च–दे । 12 विधायाप्रवर्तमानचिन्तासन्तानाः–.कि. क । 13 विगतावरणमनसः–जे । 14 प्रद्योतमानसो–कि । 15 कर्मान्तरकामिनी–कि. क । 16 साक्षात्कारस्य प्रत्यक्षतापत्तेः–कि. क ।

योगाच्च धर्मो जायत इत्यत्र योगविधय एव प्रमाणम् । तेषां कर्मविधितुल्ययोगक्षेमत्वात् । तेनानुग्रहः सहकारिता । [1]स्वस्यात्मनि ततोऽन्यस्मिन् वाऽऽत्मान्तरे आकाशे दिशि काले वायौ परमाणुषु चतुर्विधेषु मनःसु तत्समवेतेषु यथासम्भवं गुणेषु, कर्मसु, सामान्येषु, [2]अन्त्येषु विशेषेषु, समवाये चावितथं सत्यम्, अस्य विवरणं [3]**स्वरूपदर्शन**मिति । यद्यपि [4]स्वात्माऽस्मदादीनां कदाचित् विगलितशरीराविमिश्रीभावः क्षणमात्र[5]मायात्येव तथाऽपि बलवदविद्यासंस्कारमध्यपतितमेतद्विज्ञानं प्रतिपक्षकक्षाप्रवेशेन [6]परवशीकृतशरीर[7]मज्ञानकलापक[8]करालितायात्माभूमौ भूमाविव कलमबीजं संस्काराङ्कुराय न कल्पत इत्यसत्कल्पनया अपेक्ष्य योगिप्रत्यक्षे दर्शितमित्यवधेयम् ॥

(२४२) वियुक्तानां पुनश्चतुष्टयसन्निकर्षाद्यो[9]गजधर्मानुग्रहसामर्थ्यात् सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमु[10]त्पद्यते ॥

वियुक्तानामाह—**वियुक्तानां पुनरि**ति । ते हि समाधयः, समाधिप्रभावाद्विकरणधर्माणोऽणिमाद्याः कार्यसिद्धीर्दूरश्रवणाद्याश्चेन्द्रियसिद्धीरासादितवन्तः, तथा च तेषां चक्षुरादिनैव [11]सूक्ष्मेऽपि परमाण्वादौ, व्यवहिते नागलोके, देशविप्रकृष्टे सुरसदनादिके, कालविप्रकृष्टे [12]अतीतानागते, मनसा योगजधर्मानुग्रहरूपात् सामर्थ्यात् ज्ञानमुत्पद्यते इति । चतुष्टयसन्निकर्षाद् इत्यनेनेन्द्रियसन्निकर्षजत्वमुपलक्ष्यते । प्रमाणं तु योगिप्रत्यक्षे 'स्वर्गापूर्वदेवतादयः' [13]कस्यचित्प्रत्यक्षाः प्रमेयत्ववस्तुत्वसत्त्वादिभ्यः पटवदिति, विपक्षे बाधकश्च [14]तदर्थविधिवैयर्थ्यप्रसङ्गः ।

[15]नन्वप्रयोजकं सर्वमेतत् स्वकारणसामग्रीसम्भवप्रयुक्तकार्यं न तु विषयधर्मप्रमेयत्वादिमा[16]त्रप्रयुक्तम्, न हि प्रमेयत्वात् पार्थिवाः परमाणव आप्यद्रव्याश्रयाः तत् परमाणुवत् । नापि [17]रसादयः कस्यचित् चाक्षुषाः प्रमेयत्वाद्रूपादिवदिति शक्यम् । न च [18]स्वर्गादिषु प्रत्यक्षसामग्री सम्भवति । चक्षुरादीनां सम्बन्धवर्तमानप्रतिनियतविषयत्वात् मनसश्च बहिरस्वातन्त्र्यात् । [19]कामातुरस्वप्नकामिनीज्ञानादौ चक्षुराद्यनपेक्षस्यापि मनसः स्वातन्त्र्य-

1 अस्मिन्नात्मनि–कि. क । 2 सामान्येषु, विशेषेषु–कि. क । 3 अरूपदर्शनमिति–कि. क । 4 यद्यप्यर्थो–कि. क । 5 क्षणमात्रमागत्येव–कि. क । 6 वशीकृत–कि. क । 7 ज्ञानकलाप–कि. क । 8 कवलितायां भूमाविव–कि. क । 9 योगाद्योगजधर्म–दे । 10 मुत्पद्यते ज्ञानम्–दे । 11 सृष्टेऽपि–कि. क । 12 अतीतादिके–कि. क । 13 कस्यचिन्न कि. क । 14 तदनुविधि–कि. क । 15 ननु प्रयोजकं–कि. क । 16 °मात्रं–कि. क । 17 रसादयः चाक्षुषाः–कि. क । 18 प्रत्यक्षादिषु–कि. क । 19 कर्मान्तर– कि. क ।

मुपलब्धमिति चेत्, न; तस्य स्वप्नवहनाडीसिद्धोपघातेन विक्षतत्वात्। [1]न त्वपिप्लुते साक्षात्कारिणि क्वचिन्मनसो बहिः स्वातन्त्र्यमधिगतम्, तथा सत्य[2]न्धबधिराद्यभावप्रसङ्गात्।

अत्रोच्यते; न तावद् वयं कारणमनादृत्य स्वर्गादौ प्रत्यक्षं साधयामो येनाप्रयोजकत्वमाशङ्क्येत किन्तु कारणपुरस्कारेणैव। मनसश्च यथा सिद्धोपघातापेक्षस्य बहिरुपप्लवजनकत्वान्नान्धबधिराद्यभावप्रसङ्गः, तथा योगजधर्मानुगृहीतस्य बहिरनुप्लवजननेऽपि सिद्धोप[3]घातादेरन्वयव्यतिरेकाभ्यां मनःसहकारित्व[4]मुपप्लवेनैव गतम्। योगजस्यापि धर्मस्य तद्विधेरनुपप्लव इति न कश्चिद्विशेषः। अप्रामाण्ये वा पुराणादीनां कर्मविधिष्वपि कः समाश्वास इति। यत्तु पार्थिवाः परमाणवः आप्यद्रव्याश्रया इति किं न साध्यते इत्युक्तं तत्र प्रतिज्ञापदव्याघातनिरस्ततया कथं साध्यताम्? तथा हि यदि पृथिवीकार्यानुमितास्ते कथमाप्यद्रव्याश्रयाः?, अथाप्यद्रव्याश्रयाः कथं पार्थिवाः? मूर्त्तानां समानदेशताविरोधात्। तेषामारम्भकत्वस्य विजातीयानारम्भकत्वनियतस्यैव धर्मिग्राहकप्रमाणसिद्धेस्तत्साधने बाधनाच्च। एवं 'रसादयः कस्यचिच्चाक्षुषाः' इत्यत्रापि रसादिषु मध्ये रूपैकमिन्द्रियं चक्षुरिति मतम्, रूपस्य व्यञ्जकमिति वा। [5]प्रथमे प्रतिज्ञापदयोर्व्याघातः, यदि हि रसादिषु मध्ये रूपमात्रग्राहकं चक्षुः कथं तद्ग्राह्या रसादयः? अथ तद्ग्राह्या रसादयः, कथं तद्रूपमात्रग्राहकमिति। द्वितीये सिद्धसाधनं मनसः सर्वविषयत्वादिति। न चैवं तवापि व्याघातः, स्वर्गादीनामतीन्द्रियत्वेनैव सिद्धेः। तथा च स्वर्गादयः कस्यचित्प्रत्यक्षा इत्यनीन्द्रिया ऐन्द्रियका इत्युक्तं भवति। न; [6]प्रतिपत्तृभेदेनाविरोधात्। न हि [7]परबुद्ध्यादयो अप्रत्यक्षा इति स्वयमेषां प्रत्यक्षत्वं विरुध्यते। तथापि योगिनो नातीन्द्रियार्थदर्शिनः प्राणित्वादस्मदादिवत्। तद्बुद्धिरपि न [8]परमाण्वादिविषया बुद्धित्वादस्मदादिबुद्धिवदिति। तदिन्द्रियं नातीन्द्रियार्थविषयम् इन्द्रियत्वादस्मादादीन्द्रियवत् इत्यादीनां प्रतिपक्षसाधनानां का गतिः इति चेत्, **मीमांसागुरवो** मीमांसानभिज्ञाः प्रणित्वात्; तद्बुद्धिर्न वेदार्थविवेकवती बुद्धित्वात्; तन्मनो न तद्विषयमिन्द्रियत्वात्; त एव दृष्टान्ताः, इत्येषां का गतिरिति संक्षेपः॥

(२४३) तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षं[9] प्रमाणम्; प्रमेया द्रव्यादयः पदार्थाः, प्रमाताऽऽत्मा, प्रमितिर्द्रव्यादिविषयं ज्ञानम्॥

---

1 ननु विष्णु ते साक्षात्कारेपि. कि. क। 2 सत्यनुबधिराद्य–कि. क। 3 °घातादेवान्वयव्यतिरेकाभ्यां–कि. क। 4 मुपप्लवैव गति–कि. क। 5 'प्रथमे प्रतिज्ञापदयोर्व्याघातः' कि. क पुस्तकयोर्नास्ति। 6 प्रतिपक्ष–कि. क। 7 न हि बुद्ध्यादयो–कि. क। 8 परमाण्वादित् विषया बुद्धिवत्–कि. क। 9 प्रत्यक्ष–दे।

ननु प्रत्यक्षमिति प्रमाकरणविशेष इति प्रसिद्धम्। तत्कतमदत्र प्रमाणं किं वाऽस्य फलमित्यभिसन्धाय प्रमाणफलविभागमाह—**तत्रेति**। तेषु साक्षात्कारिषु समीचीनज्ञानेषु मध्ये सामान्यविशेषेषु द्रव्यगुणकर्मसमवेतेषु स्वरूपालोचनमात्रं अविकल्पकं प्रत्यक्षं प्रमाणं प्रमीयतेऽने[1]नेति करणव्युत्पत्त्या, प्रमेया द्रव्यादयः पदार्था यथायथं सर्व एव परिच्छेद्या विज्ञेया इति यावत्। प्रमाता परिच्छेत्ता आत्मा यथासम्भवं योगी चायोगी च। प्रमितिर्द्रव्यादिविषयं ज्ञानं सम्यग् नि[2]श्चय इति। अत्र प्रमाकरणमिति प्रमाणलक्षणम्, प्रमाणविषय इति प्रमेयस्य, प्रमाश्रय इति प्रमातुः, सम्यगनुभूतिरिति प्रमायाः। साक्षात्कारित्वेन विशेषितमेतदेव प्रत्यक्षप्रमायाः।

(२४४) सामान्यविशेषज्ञानोत्पत्तावविभक्तमालोचनमात्रं प्र[3]त्यक्षं प्रमाणम्।

नन्वेवंलक्षणकतया सामान्यविशेषज्ञानमपि प्रमितिः, तथा च तत्र किं प्रमाणमत आह—**सामान्येति**। अविभक्तं ज्ञानविशिष्टं शुद्धमिति यावत्। किं तदालोचनमात्रम्? आलोच्यतेऽनेनेत्यालोचनमिन्द्रियार्थसन्निकर्षः; स एव मात्रा शरीरं यस्य; तत्तथोक्तं तत्प्रत्यक्षं प्रमाणमस्मिन्साध्ये नान्यत्प्रमाणमपि, कुतः? तस्याफलरूपत्वात्। प्रमारूपं फलं यत्तन्न भवतीत्यर्थः। प्रमा हि प्रमाणसाध्या न तु कार्यमात्रं कारणान्तरं तु तदपेक्षत इति। न चैवमनवस्था दोषाय अनादित्वादिति।

(२४५) अथवा सर्वेषु पदार्थेषु चतुष्टयसन्निकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत्प्र[4]त्यक्षं प्रमाणम्। प्रमेया द्रव्यादयः पदार्थाः, प्रमाताऽऽत्मा, प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनमिति॥

प्रमाणफलविभागे [5]प्रकारान्तरमाह—**अथवेति**। 'वा'शब्दः समुच्चये [6]न तु विकल्पे। हेयादिज्ञानोत्पत्तावपि द्रव्यादिज्ञानं प्रमाणमिति वाक्यार्थः। तदेवाह—सर्वेषु पदार्थेषु द्रव्यादिष्ववितथं संशयविपर्ययरहितम्। **अव्यपदेश्यं** शब्दाजन्यं यत्परिज्ञानं जायते तत्प्रत्यक्षं प्रमाणम्। प्रमाकरणं शब्दजन्यमिति तु न सविकल्पकव्यवच्छेदार्थं किन्तु अव्युत्पन्नस्य सन्निहितेऽप्यर्थे व्याप्रियमाणे चक्षुषि शब्दश्रुतेरनतरं यद्गौरिति तत्र ज्ञानं जायते

1 ऽनेनेति व्युत्पत्त्या–कि. क। 2 निश्चयः मु. कि. क। 3 प्रत्यक्ष–दे। 4 प्रत्यक्ष–दे। 5 प्रमाणान्तर–कि. क। 6 न विकल्पे–पा. ३. पु।

तत्र रे[1]खोपरेखादिष्वक्षोपयोगेऽपि शब्दस्यैव कारणत्वात् तद्व्यवच्छेदार्थमिति द्रष्टव्यम्। तस्य फलमाह प्रमितिरिति। किं पुनस्तदित्यत आह—**गुणेति**। गुणदर्शनमुपादेयत्वज्ञानम्, दोषदर्शनं हेयत्वज्ञानम्, माध्यस्थ्यदर्शनं न हेयं नोपा[2]देयमेतदिति ज्ञानम्। यद्यपि चैतत् पदार्थस्वरूपबोधमात्रेण स्फुरति तथापि तज्जातीयत्वलिङ्गदर्शनप्रभवतया तस्य च प्रत्यक्षफलतया पारम्पर्येण एतदवगन्तव्यम्॥

(२४६) **लिङ्गदर्शनात्सञ्ज्ञायमानं लैङ्गिकम्॥**

प्रत्यक्षानन्तरमुद्देशक्रमानुरोधेनानुमानलक्षणं व्याख्यातुमारभते **लिङ्गदर्शनादिति**। द्विविधः खल्वयमनुमान[3]शब्दार्थो, भावसाधनः करणसाधनश्च। अनुमितिरनुमानम्; अनुमीयतेऽनेनेति चानुमानम्। तत्र यद्यपि प्रमाणत्वेन करणस्वरूपमेव व्युत्पादयितुमभिमतं तथापि करणस्य कारकविशेषतया तस्य क्रियासम्बन्धोपहि[4]तसीममहिमतया अनुमितरूपक्रियास्वरूपोपदर्शनेनैतदुपदर्शितं भवतीति भावप्रधानमेव निष्कृष्य व्याख्यातवान्। लिङ्गदर्शनात् सञ्ज्ञायमानं लैङ्गिकं लिङ्गजन्यमनुमितिरूपं फलमित्यर्थः। बुद्ध्यधिकारात् [5]ज्ञानफललाभे लिङ्गदर्शनजन्ये तद्गोचरसंस्कारे नातिप्रसङ्गः। दर्शनं ज्ञानं, तथा च दृष्टानुमितात् [6]श्रुतादर्थानुमितात् स्मृताच्च लिङ्गादित्यर्थः। एतावांस्तु विशेषः। वैशेषिकनये-शब्दादीन्यनुमानशरीर एवान्तर्भवन्तीत्यनुमितानुमानमेव तत् सर्वमिति। 'सं'शब्देन च असम्यगर्थानां संशयविपर्ययस्मृतीनां व्युदासः। स्मृतिरपि यथानुभवा न तु यथार्थेति वक्ष्यमाणत्वात्। सञ्ज्ञायमानमिति वर्तमानोपदेशस्यापि यथार्थत्वोपदर्शन एव तात्पर्यम्।

(२४७) **लिङ्गं पुनः यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते।**
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्॥ १॥
विपरीतमथो यत्स्यादेकेन द्वितयेन वा।
विरुद्धासिद्धसन्दिग्धमलिङ्गं का[7]श्यपोऽब्रवीत्॥ २॥

ननु लिङ्गं किमुच्यते अत आह—**लिङ्गं पुनरिति**। लिङ्गं पुनः प्रसिद्धमेवेत्यर्थः। निरूपाधिकसाध्य[8]सम्बन्धशालि लिङ्गमिति लोकप्रसिद्धमेवेत्यर्थः। न चैवंविधमपि लिङ्गमितिकर्तव्यतामन्तरेण स्वरूपमात्रेण प्रमाणम्। अन्तःकरणव्युत्पत्तिनिमित्तस्य प्रमाणस्य लक्षणार्थं

---

1 रेखोपरेखाद्यर्थं प्रत्यक्षोपयोगि–कि. क। 2 नोपादेयमिति ज्ञानम्–कि. क। 3 मनुमानशब्दो–कि. क। 4 संयमतया–कि. क। 5 ज्ञानपदलाभे जे; ज्ञानफललाभः, तेन लिङ्गजन्यतद्गोचरसंस्कारे नातिप्रसक्तिः पा. २. पु। 6 दृष्टादनुमितात् स्मृताच्च–कि. क। 7 कश्यपो–दे। 8 सम्बन्धो यस्य तल्लिङ्गमिति–पा. २. पु।

सङ्ग्रहश्लोकं पठति [1]**यदनुमेयेन सम्बद्धमिति । तल्लिङ्गमनुमापकमिति**—[2]तल्लिङ्गं प्रमाणमनुमापकम्—अनुमितिरूपप्रमाकरणम् । एतेन परामृश्यमाणं लिङ्गमनुमानम् । तथा च लिङ्गस्यावान्तरव्यापारवत्त्वेन करणत्वमिति [3]सङ्गच्छत इति भावः ।

इह श्लोके तच्छब्दस्योपात्त[4]त्वात्तस्य च नित्यं यच्छब्दसापेक्षत्वात् [5]पूरयति **यदिति** । यल्लिङ्गमनुमेयेन सम्बद्धम्—अनुमितिक्रियाव्या[6]प्तमिष्टतमेन साध्यधर्मविशिष्टेन धर्मिणा यत्सम्बद्धसंयुक्तं समवेतं विशेषणीभूतं च तस्मिन् वर्तते इत्यर्थः । एतेन पक्षधर्मता लभ्यते, एवं च सति, 'चतुर्विधा परमाणवोऽनित्याः गन्धवत्त्वाद् इति भागासिद्धमपि परिहृतम् । सपक्षसत्त्वं दर्शयति **प्रसिद्धं च तदन्विते** । 'च'शब्दोऽप्यर्थः। तदन्विते साध्यधर्मान्विते सपक्षे प्रसिद्धमपि तेन सपक्षैकदेशवृत्तेरपि ग्रहणम् । तच्छब्देन योग्यतया साध्यधर्म एव परामृश्यते । विपक्षाद्व्यावृत्तिमाह—**तदभावे च नास्त्येव**—तदभावे—अनुमेयाभावे अनुमेयविपर्यये विपक्ष इति यावत्; यथा स्वयमेव च व्याख्यास्यते अनुमेयविपरीते चेति । विपक्षैकदेशवृत्तेरपि निराकरणार्थमवधारणम् । यद्यपि च लिङ्गे निरुपित एव तद्विधर्मा लिङ्गाभासा इत्यर्थो लभ्यते तथाप्यसिद्धयादिरूपविशेषसञ्ज्ञाज्ञापनार्थमाह **विपरीतमिति** । एतेन प्रतियोगिनिरुपणाल्लिङ्गप्रतिपत्तिः शिष्याणां सुकरा भवति ।

लिङ्गाभासव्यावृत्तं लिङ्गमिति व्यतिरेकिणापि लिङ्गलक्षणं दर्शितं भवति । अत उक्तलक्षणाल्लिङ्गात् कालात्ययापदिष्टप्रकरणसमत्वरहितात् एकेन लिङ्गलक्षणेन, द्वाभ्यां लिङ्गलक्षणाभ्यां वा शब्दात् त्रितयेन च यद्विपरीतं रहितं तद्लिङ्गं सामान्यतो लिङ्गाभासं **कश्यपात्मजः कणादो**ऽब्रवीत् । कापुनस्तस्य विशेषसंज्ञा अत आह—**विरूद्धासिद्धमिति** । समाहारे द्वन्द्वः । एतनैतद्दर्शितं भवति । एकस्मिन्नपि [7]दूष्ये यथायोगं बहूनि दूषणानि सम्भवन्ति । परिषदादिजिज्ञासायां समस्तान्यपि तान्युद्भावनीयानि । अजिज्ञासायां त्वेकमेव दूषणमुद्भाव्यमिति । यद्यपि च सिद्धे हेतुस्वरूपे तदुत्तरकालमितरेषां विरूद्धत्वादिदोषाणामवकाश इति प्रथममसिद्धमेव हेत्वाभासमुदाहरन्ति तथापि यद्यत्र स्फुटप्रतिभासं बलवच्च दूषणं तदेव वचनीयम् ।

अथवा सिद्धिः पक्षव्यवस्थितिः । सा चाविरूद्धस्यैव साधनस्य घटते न तु विरूद्धस्येति प्रथमं विरूद्धस्यैवोपन्यास इति विभावनार्थं समानतन्त्रसि[8]द्धस्य व्यतिक्रमः । तत्र

1 प्रतीकमिदं 'जे' पुस्तके नास्ति । 2 तल्लिङ्गमनुमापकमनुमितिरूपप्रमाकरणम्—पा. २. पु । 3 करणत्वमपि सङ्गृहीतमिति—पा. २. पु । 4 तच्छब्दस्य—पा. २. पु । 5 सूचयति—पा. २. पु । 6 व्याप्तमिष्टं तत्साधर्म्यविशिष्टेन—कि । 7 दृष्टे—कि. क । 8 क्रमस्य—इत्यधिकम्—२. पु० ।

सन्दिग्धानैकान्तिको अनैकान्तिक इति यावत्। स हि धर्मद्वयसद्भावेऽपि न विपक्षाद् व्यावर्तक इत्येकेन लिङ्गलक्षणेन विपरीतः यथा 'शब्दोऽनित्यः प्रमेयत्वादिति। विरुद्धस्तु पक्षधर्मतासद्भावेऽपि न सपक्षे वर्तते नापि विपक्षाद्व्यावृत्त इति धर्मद्वयेन विपरीतः यथा शब्दो नित्यः कृतकत्वात्'। असिद्धस्त्वेकेन द्वाभ्यां त्रिभिश्च विपरीतो भवति यथा 'अनित्यः शब्दः सामान्यवत्त्वे सति चाक्षुषत्वात्' इत्येकेन विपरीतः। तथा हि [1]अस्य सपक्षे घटादौ सद्भावेऽपि विपक्षाद् सामान्यादेर्व्यावृत्तावपि पक्षधर्मत्वं नास्तीति। द्वाभ्यां च विपरीतः यथा 'शब्दोऽनित्यः अप्रमेयत्वात्' इति। त्रिभिर्विपरीतो यथा 'अनित्यः शब्दोऽकार्यत्वात्'; अस्य हि न शब्दे सद्भावो नापि सपक्षे घटादौ नापि विपक्षाद्व्यावृत्तिरिति॥

(२४८) **यदनुमेयेनार्थेन देशविशेषे कालविशेषे वा सहचरितमनुमेयधर्मान्विते चान्यसर्वस्मिन्नेकदेशे वा प्रसिद्धम्; अनुमेयविपरीते च सर्वस्मिन् प्रमाणतोऽसदेव तद्[2]प्रसिद्धार्थस्यानुमापकं भवतीति।**

पूर्वोक्तसङ्ग्रहवाक्ये अनुमेयेन सम्बद्धमित्यस्य विवरणम् [3]**अनुमेयेनार्थेनेत्यादि**। यद्यपि चानुमाने देशकालौ व्यभिचारिणौ न हि पर्वतादिदेश एव। नापि प्रभातादिकाल एव धूमाद्दहनसिद्धिरिति प्रसिद्धमेव, तथापि क्वचिदनुमानविशेषे तयोरपि प्रयोजकत्वद्योतनार्थमुक्तं देशविशेषे कालविशेषे चेति। एतच्च 'एवं सर्वत्र देशकालाविनाभूतम्' इत्यत्राग्रे स्फुटीभविष्यति। **प्रसिद्धं च तदन्वित** इत्यस्य विवरणम् **अनुमेयधर्मान्विते च** इति। प्रसिद्धं भूयो दृढव्याप्तिकतया गृहीतम्-प्रमाणत इत्यनुषज्यते। **तदभावे च नास्त्येव** इत्यस्य विवरणम् **अनु[4]मेयविपरीते च** इति। व्यतिरेकदृष्टान्तस्यापि प्रामाणिकस्यैव परार्थमुपादानम्, अन्यथा काल्पनिकस्यापि दृष्टान्तत्वे हेत्वाभासव्यवस्थानुपपत्तेः। एतच्च व्यतिरेकबलप्रयुक्तक्षणभङ्गादिसाधननिराकरणावसरे तत्तत्प्रदेशे व्याख्यातमेव **तल्लिङ्गमनुमापकमित्यस्य विवरणं** तदप्रसिद्धार्थस्येति॥

(२४९) **यत्तु यथोक्तात्त्रिरूपाल्लिङ्गादेकेन धर्मेण द्वाभ्यां [5]वा धर्माभ्यां विपरीतं तदनुमेयस्याधिगमे लिङ्गं न [6]भवतीत्येतदेवाह सूत्रकारः "अप्रसिद्धोऽनपदेशोऽसन् स[7]न्दिग्धश्चानपदेशः" (वै. सू. ३-१-१५) इति॥**

1 तस्य-कि.। 2 तदप्रसिध्यनुमापकं-दे। 3 अनुमेयेनेत्यादि-कि। 4 परमुपादानम्-पा. १. पु० जे। 5 वा विपरीतं-भा। 6 भवतीत्याह-दे। 7 सन्दिग्धश्चेति-भा। सन्दिग्धानपदेश-दे।

द्विती[1]यस्य सङ्ग्रहवाक्यस्य विवरणं **यत्तु यथोक्ता**दिति । ननु यदि यथोक्तरूपत्रयसम्पत्तिमात्रेण गमकत्वं तदा कालात्ययापदिष्टप्रकरणसमयोरपि गमकत्वं प्राप्तमत आह—**इत्याह सूत्रकार** इति । अपदिश्यते व्यपदिश्यतेऽनेनेत्यपदेशो हेतुः । नापदेशोऽनपदेशः । अहेतुस्तद्विरोधी हेत्वाभास इत्यर्थः । कोऽसौ हेत्वाभासस्तत्राह—**अप्रसिद्ध** इति । दृढव्याप्तिकतया हि ज्ञानं प्रसिद्धिः । सा च सपक्ष एव चिन्त्यते । विरुद्धस्तु हेत्वाभासः सजातीये नास्ति प्रत्युत सा[2]ध्यविपर्ययव्याप्त इति व्युत्पत्त्या पक्षे अप्रसिद्धोऽगृहीतव्याप्तिको विरुद्ध एवाभिधीयते इत्यर्थः । न केवलं विरुद्धोऽनपदेशः किन्तु पक्षेऽसन्नप्यसिद्धोऽनपदेश इत्यर्थः । न केवलं विरूद्धासिद्धो किन्तु सन्दिग्धानैकान्तिकश्चानपदेश इत्यर्थः । चकाराद[3]नपदेशपदस्य च पुनरावर्त्तनादन्योऽपि कालात्ययापदिष्टप्रकरणसमरूपो हेत्वाभासोऽस्तीति सूचितम् । निःप्रतिपक्षमेव पटुतरप्रत्यक्षाद्यबाधितमेव हि साध्यं प्रायशः साधनार्हमिति लोकप्रसिद्धत्वाद् व्यक्तमनभिधानम् । 'अप्रसिद्धपदेन'[4] सङ्ग्रहो न पुनरभावात्, तथा च वक्ष्यते । प्रसिद्धं च तदन्विते इत्यनेन च तयोर्निराकरणमिति रमणीयम् ॥

न पुनर्यदनुमेयेन सम्बद्धमित्यनेनापाततस्तयोरपि पक्षधर्मत्वात् [5]व्याख्यानेन त्वपक्षधर्मतायामसिद्धत्वे सर्वमसिद्ध एवान्तर्भवतीति । न चैवं सत्यन्वयव्यतिरेकमात्रस्यैवेदं लक्षणमिति वाच्यम्; केवलान्वयिनः केवलव्यतिरेकिणोपि प्रमाणसिद्धत्वात् । अन्यथा वैधर्म्यदृष्टान्तव्युत्पादनस्यापि वैयर्थ्यात् । ननु [6]रूपत्रयसम्पत्तिमतो न गमकत्वं व्यभिचारात् । ततोऽप्यधिकस्य गमकत्वे तदुदाहरणप्रसङ्गात् । सत्यम्, वस्तुगत्या हि चतुरूपसम्पत्तिः, पञ्चरूपसम्पत्तिरेव गमिका । अनुमानत्रयसाधारण्यादबाधितविषयत्वासत्प्रतिपक्षत्वयोः पृथगनुदाहरणम् । प्रयोजकद्वारेण रूपत्रयमात्रमुदाहृतम् । तथा हि सपक्षे सत्त्वं प्रयोजकीकृत्य केवलान्वयी, विपक्षासत्त्वं च प्रयोजकीकृत्य केवलव्यतिरेकी, [7]उभयं च प्रयोजकीकृत्यान्वयव्यतिरेकी । पक्षधर्मतापि तर्हि साधारणत्वान्न वाच्या इति चेत्; न; तथा सति निराश्रयस्यहेतोर्निरुपणोपन्यासस्याप्यशक्यत्वात् । न हि निराश्रयं किञ्चिद् विधीयते प्रतिषध्यते चेति । तस्मात् सुष्ठूक्तं **य[8]थोक्तात्त्रिरूपादिति** । तत्रानुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते' इत्यन्वयिनो लक्षणम् । इदमेव तदभावे च नास्त्येव' इति

---

1 द्वितीयसङ्ग्रहवाक्यविवरणं–कि. क । 2 साध्यविपरीत–पा. २. पु । 3 °नपदेशस्य–कि. क । 4 पदेन त्वभिधानमेव–पा. २. पु । 5 व्याख्याने त्वपक्षधर्मताऽसिद्ध एवान्तर्भवतीति–पा. १. पु; व्याख्याने त्वपक्षताधर्मताऽप्रसिद्ध एवान्तर्भवतीति–जे । 6 स्वरूपत्रय–कि । 7 उभयं च प्रयोजकीकृत्यान्वयव्यतिरेकी' इति कि. क. पुस्तकयोर्नास्ति । 8 त्रिरूपादिति–कि. क ।

सहितं व्यतिरेकिणः। समस्तं त्वन्वयव्यतिरेकिणः। अनुमानजनकत्वं च सामान्यलक्षणं त्रयाणामित्यवगन्तव्यम्।

(२५०) **विधिस्तु 'यत्र धूमस्तत्राग्निः' 'अ[1]ग्न्यभावे धूमोऽपि न भवति' इत्येवं प्रसिद्धसमयस्यासन्दिग्धधूमदर्शनात्साहचर्यानुस्मर[2]णात् तदनन्तरमग्न्यध्यवसायो भवतीति। एवं सर्वत्र देशकालाविनाभूतमितरस्य लिङ्गम्॥**

यथोक्तमपि लिङ्गमगृहीताविनाभावस्य सकृद् ग्रहणेऽपि वा विस्मृताविनाभावस्य न गमकमत आह **विधिस्त्वि**ति। 'तु'शब्दः तादात्म्यतदुत्पत्त्यादेर्व्याप्तिग्रहणोपादत्वनिरासार्थः। विधिस्तु-अविनाभावग्रहणप्रकारस्तु। कोऽसावित्यत आह—**यत्रेति**। तदनेनान्वयव्यतिरेकावेव भूयोदर्शनसहका[3]रिणौ तद्ग्रहणोपाय इति दर्शितम्। अन्वयव्यतिरेकाभ्यां प्रथमदर्शने एव व्याप्तिर्गृह्यते। शङ्कामात्रं तु [4]भूयोदर्शनेन निराक्रियत इति मतं व्युदस्यति **एवं प्रसिद्धसमयस्ये**ति। एवमन्वयव्यतिरेकाभ्यां प्रसिद्धो गृहीतः सुदृढप्रमाणेन भूयोभूयः समयोऽविनाभावो येन पुरुषेण तस्येत्यर्थः॥

[5]इदमत्राकूतम्—यो यमुपाधिमादाय येन सह सम्बद्ध्यते स निरुपाध्यवस्थायास्तस्या गमकः, यथा वह्निर्धूमस्य। सोपाध्यवस्थायामप्युपाधेः केवलस्यैव सामर्थ्ये स एव गमको न तूपहितः। यथा आहारपरिणतिभेदस्यैव गमकत्वे मैत्रीतनयत्वम्। यत्र तूपाधिः केवलो व्यभिचारी तत्र सोपाधिरपि गमक एव, यथा आर्द्रेन्धनवान् वह्निर्धूमस्य, तत्कस्य हेतोः? विशिष्टस्य निरुपाधित्वात्। भूयोदर्शनं हि तज्ज्ञानजनितसंस्कारसहितमिन्द्रियमुच्यते। मणिभेदतत्त्वं चात्र स्फुटमुदाहरणम्।

तथाहि मणिर्यैर्यैर्विषयैस्तत्तद्व्यवहारविषयो भवति धारयितुः तत्तत्फलसम्पादकश्चोन्नीयते ते[6] च सूक्ष्मासूक्ष्मविशेषाः परीक्षकेण भूयोभिरेव दर्शनैरुन्नीयन्ते तथाऽत्रापि। प्रथमं हि काकतालीयव्युदासाय, ततः सातत्योर्ध्वगमनविशेषनिश्चयाय ततश्चोपाधिनिरासाय। न चात्र वारसङ्ख्यानियमोपयोगो निरुपाधिसम्बन्धबोधावधिनियमात्। असन्दिग्धधूमदर्शनाद्धूम एवायमविच्छिन्नमूलो न बाष्पादिकमिति ज्ञानात्। तदनेन विप्रतिपन्नं प्रति विशिष्टधूमवत्त्वादिति प्रयोक्तव्यमिति दर्शितम्; [7]तथाविधं प्रति प्रकरणादेरनङ्गत्वात्।

---

1 अग्नेरभाव न भवति–दे। 2 -स्मरणादनन्तरं–दे। 3 सहचारिणौ–कि। 4 भूयोदर्शनेन न–कि. क.। 5 निरुपाध्यवस्थायां तस्य गमकः–कि. क। 6 ते सूक्ष्मविशेषाः कि. क। 7 अतथाविधं प्रति करणादेरनङ्गत्वात्–कि. क।

न च पूर्वमविनाभावग्रहेपि [1]तदर्थलिङ्गग्रहेपि विस्मृताविनाभावस्यापि तद्भवतीत्यत उक्तं **साहचर्यानुस्मरणा**दिति । तदनेन दृष्टान्तेन प्रथमत एकं लिङ्गग्रहणं तदनु पक्षे द्वितीयं लिङ्गग्रहणमिति दर्शितम् । न चैतावन्मात्रमनुमितेः कारणं तथाहि द्वितीय[2]लिङ्गग्रहणम्; वस्तुगत्या लिङ्गग्रहणमित्येतावतैव व्याप्तिस्मृतेः सहकारि, लिङ्गत्वरूपेणोल्लेखितया वा ? न तावदाद्यः, दूराद्धूमविषयवस्तुत्वज्ञानस्यापि प्रकारान्तरायातव्याप्तिस्मृतिं प्रति सहकारित्वप्रसङ्गात् । द्वितीयस्तु द्वितीयलिङ्गदर्शने नास्त्येव; तस्माल्लिङ्गत्वोल्लेखि तृतीयलिङ्गदर्शनमास्थेयम् इत्याह **अनन्तरमग्न्यध्यवसायो भवतीति** । अग्निरध्यवसीयतेऽनेनेत्यध्यवसायः परामर्शः । तत्परं तद्भवति—प्रमाणं भवतीत्यर्थः ।

यद्यपि द्वितीयलिङ्ग[3]दर्शनस्यापि स्मृत्या सह विनश्यदवस्थस्यैव परामर्शज्ञानजनकत्वं क्वचिद् दृष्टं तथापि यत्र दृष्टमात्र एव वह्निनिवृत्तौ धूमः कालान्तरे जिज्ञासावशात् परामृश्यते तत्र द्वयोरपि लिङ्गदर्शनयोरतीतत्वात् [4]परामर्शज्ञानं प्रति साहचर्यानुस्मरणमेव कारणम् । यस्तु सर्वथा [5]परामर्शज्ञानं नेच्छति तेन वाक्यस्य चतुर्थोऽवयव उपनयो नेष्टव्यः, पक्षधर्मताप्रतिपादकत्वेनास्योपयोगः परार्थानुमाने । स्वार्थानुमाने तु सा द्वितीयलिङ्गदर्शनादेवावगतेति किं परामर्शेणेति चेत्, न, पक्षधर्मता हि व्याप्त्या सह प्रतिसंहितानुमानोपयोगिनी तादृशी चोपनयेन त्यज्यते प्रदर्श्यते, न द्वितीयलिङ्गदर्शनेन; तस्य हि व्याप्त्यनुसन्धानरहितं पक्षधर्मतामात्रमेव गोचरः । न च तदनुमानोपयोगि, तस्मादुपनयार्थो न द्वितीयलिङ्गदर्शनविषयः, ततः स्वार्थानुमाने यद्यस्ति तस्योपयोगो नूनं परामर्शोऽपि तृतीयः स्वीकर्तव्यः । नास्ति चेत् परार्थानुमानेऽपि परामर्शैकार्थ उपनयो नादरणीयः ।

ननु कोयं प्रतिबन्धो नाम ? अनौपाधिकः सम्बन्ध इति ब्रूमः । नन्वयमपि अव्यभिचारस्य तन्निदानीभूतोपाध्यभावस्य वाऽनिश्चयेऽशक्यनिश्चय एव, न च तादात्म्यतदुत्पत्तिनिश्चयमन्तरेणान्यस्तदुपायः सम्भवति । यदि हि कारणमात्मानं वा कार्यात्मानौ व्यभिचरतस्तदा । कार्याकस्मिकत्वप्रसङ्गस्य निःस्वभावत्वप्रसङ्गस्य च विपक्षे बलवद्बा[6]धकोपष्टम्भस्य सम्भवात्। भवेदेवं यदि तादात्म्यतदुत्पत्तिरूप एव प्रतिबन्धः, ताभ्यां समानोपायो वा तयोरेव वा प्रतिबन्धपर्यवसानं [7]त एव वा प्रतिबन्धनिश्चयोपायः । उपायत्वमपि तयोः

---

1 'तदर्थलिङ्गग्रहेपि' इति १. पु. नास्ति । 2 लिङ्गदर्शनम् . पा. २. पु–जे । 3 लिङ्गदर्शनस्य–कि. क । 4 परामर्शज्ञानमेव कारणम् पा. २. पु–जे । 5 परामर्श–कि. क । 6 बाधकोपलम्भस्य सद्भावात्–कि. क । 7 पर्यवसानमेत एव–कि ।

सहचारावसाये वा व्यभिचारशङ्कानिरासे वा। व्यभिचारशङ्कापि उपाधिदर्शनाद्वा तच्छङ्कया वा। भूयोभूयः [1]सहचरितयोरपि उपलब्धयोश्च कयोश्चिदन्ययोर्व्यभिचारदर्शनानुसन्धानमात्रेण वेति।

तत्र सहचारावसायस्तावदिन्द्रियसन्निकर्षोत्पत्तिः तदुत्पत्त्यनिश्चयोऽपि वह्निधूमयोः सिद्ध्यति। व्यभिचारशङ्काऽपि योग्यतामुपाधीनां योग्यानुपलम्भादेव निरस्ता। अतीन्द्रियाणामुपाधीनां तु अन्यत्र प्रमाणपरिदृष्टानां शङ्का यथा निवर्तते तथा वक्ष्यामः। प्रमाणपथानवतीर्णोपाधिशङ्का तु तदुत्पत्तिनिश्चयमप्यास्कन्दतीति कथमेतेन सा निवर्तनीया? सहचरितयोरन्ययोर्व्यभिचारदर्शनमात्रेण तु व्यभिचारशङ्का कार्यकारणयोरपि समाना। तदुत्पत्तिलक्षणविशेषसिद्धौ विपक्षे बाधकप्रमाणप्रवृत्त्याशङ्कानिवृत्तिरिति यदि तदाऽस्माकमपि स्वाभाविकसम्बन्धसिद्धौ विपक्षे बाधकप्रमाणप्र[2]वृत्त्यैव शङ्कानिवृत्तिरिति समः समाधिः।

विशेषस्तु स्वाभाविकसम्बन्धस्य व्यापकत्वं तदुत्पत्त्यादेस्तु प्रत्येकमव्यापकत्वम्, न चोभयगामि किञ्चिदेकं साधारणं निमि[3]त्तमन्यदस्ति। न च तादात्म्येऽपि शिंशपात्ववत् वृक्षत्वमपि गमकम्, संयोगित्वाविशेषेऽपि धूमस्यैव वह्निगमकत्ववत् नियामकस्य [4]स्वभावसम्बन्धानतिरेकात्। न च समानोपायत्वादुभयोरन्यतरानिश्चये अन्यतरनिश्चयो न भवतीति साम्प्रतम्; प्रतिबन्धानिश्चयेऽपि हु[5]ताशनोष्मणोः कार्यकारणभावावधारणात्। कार्यकारणभावानिश्चयेऽपि वाऽनलधूमयोः प्रतिबन्धावबोधात्। यतो नातीतमेव वह्निमनुमिमते। न च तयोरेव प्रतिबन्धः पर्यवस्यति, तथा सति रसाद्रूपानुमानं न स्यात्। एकसामग्र्यधीनस्य रूपादे रसतो गतिरिति [6]वदता तदाभ्युपगतं त्वयैव नानयोस्तुदुत्पत्तिः न च तादात्म्यमिति प्रतिज्ञाहानम्। न च भेदे सति व्याप्यव्यापकभाव एव कार्यकारणभाव इति [7]**प्रज्ञाकर** सौदीर्यात्? तत् समाधेयम् तस्य पापादपि पापीयस्त्वात् तथा हि नियामकविरहे भिन्नयोरव्यभिचारः शङ्काकलङ्कित इति दुरवधारण इति तामपनेतुं कार्यकारणभावो[8]ऽनेनोपनीतः। स चेत्तद्रूप एवं कथं तन्निश्चयेनैव व्यभिचार-निश्चय इति।

न [9]चैत**त्कीर्ते**रनुमतं यद्रसेन रूपानुमाने अन्यथोपायमाह। यदि च सर्वलोकमतिवाह्य स्वयंकृतलक्षणैर्व्यवहारः, तदा भेदे सतीत्येतदपि त्यज्यताम्। अव्यभिचारमात्रे

---

1 सहचरितयोरपि इति कि. क, जे पुस्तकेषु मस्ति। 2 °प्रवृत्त्या च–कि. क। 3 निमित्तमस्ति–कि, क। 4 सम्बन्धस्वभावस्यबन्धानतिरेकात्–कि. क। 5 हुताशनभस्मनोः–पा. २. पु. जे। 6 वदता त्वयैव नानयोस्तादात्म्यं न तदुत्पत्तिरिति प्रतिज्ञातम्–कि. क। 7 प्रज्ञावता समाधेयम् कि. क। अत्र केनचिदन्यो 'पाठे न' भाव्यम्–अर्थानिश्चयात् संपादकः। 8 ऽनेन दर्शितः–कि. क। 9 सत्कीर्ते–कि. क।

तदुत्पत्तिरेत्येवास्तु लाघवात्। तादात्म्येप्येतदस्तीति चेत्, अस्तु शिंशपाऽपि वृक्षकार्यम्। कथं तेनैव तत्कर्तव्यमिति चेत्, को दोषः? असिद्धं सिद्धेन साध्यते, न च तदेव सिद्धमसिद्धं चेति सम्भवतीति चेत्, हन्त एवमनागतमपि कथं व्यापकतामात्रेण करणम्? असिद्धत्वात्। वर्तमानमपि कथं व्याप्यतामात्रेण कार्यं सिद्धत्वात्। एवं समानकालेऽपि कथमविनाभावमात्रेण कार्यकारणभूत इति? असिद्धावस्थायामुभयोरपि असाधकत्वाविशेषात्। सिद्धावस्थायामुभयोरपि साध्यत्वाविशेषात्। तस्मान्नियतपूर्वापरकालत्वमेव कार्यकारणभावः, अविनाभावस्तु नियममात्रमिति भावः।

न च त एव प्रतिबन्धाः, अद्यतनतपनोदयेन श्वस्तनतपनोदयानुमाने तादात्म्यतदुत्पत्त्योरन्यतरस्याभावात् तादात्म्यं च गमकत्वेन प्रत्युत विरुद्धमेव। न हि तदेव निश्चेयं तदेव नि[1]श्चायकमिति युक्तम्, निश्चितानिश्चितयोः परस्परविरुद्धत्वात्। भवतु वा अभेदेऽपि गम्यगमकभावः, तथापि वृक्षत्वसामान्यस्यानिश्चये तद्विशेषशिंशपात्वस्य निश्चय इति दुर्लभम्। यस्तु भिन्नयोरेव व्यावृत्त्योर्गम्यगमकभावः किन्तु अभिन्नाध्यवसेय[2]सम्बधात्तयोरपि तादाम्यं व्यवह्रियते इति समर्थ्यते स यद्यभिन्नदेवदत्तसम्बन्धात् छत्रकुण्डलयोरपि अभेदं व्यवहरति तदा को वारयिता? के[3]वले प्रमाणाभावः, स चेहापि समानः। तस्मादनौपाधिकत्वमेव स्वाभाविकत्वम्। तादात्म्यतदुत्पत्त्यालीढयोरप्यव्यभिचारे निरुपाधिकत्वमेव बीजम्, निरुपाधित्वनिश्चयेऽपि यदि शङ्कापिशाच्यवकाशः तदा कार्यकारणभावादिकमपि स्ववचनप्रतिहतमेव। यद्यपि सोपाधाववश्यं व्यभिचारो निरुपाधाववश्यमव्यभिचारः, व्यभिचारेऽवश्यमुपाधिः, अव्यभिचारे चावश्यमुपाध्यभावः तथापि यत्र स्फुटो व्यभिचारस्तत्र निष्फलमुपाध्यनुसरणम्। अस्फुटस्तु व्यभिचारस्तन्निदानोपाधिसद्भावनिश्चयेनैव प्रतिपाद्यते।

ननु तदभाव एव कथमवगम्यते? किमत्र [4]दुर्वचम्? प्रमाणपदवीमनवतीर्णस्यैवोपाधित्वेन शङ्कनीयत्वात्, अन्यथा तदुत्पत्तावपि शङ्काकलङ्कस्य दुःपरिहारत्वात्। [5]पर्यन्ततः सप्तघटिकादिकरणेऽप्यप्रवृत्तिप्रसङ्गात्। अर्थसन्देहात्तत्र प्रवृत्तिरिति न युक्तं यत्र प्रमाणानि परिभूय शङ्कापिशाची प्रसरति कुतस्तत्रार्थसम्भावनापि तदयं सङ्क्षेपः—व्यभिचार एव प्रतिबन्धाभावः। उपाधेरेव व्यभिचारशङ्का, अप्रमाणनिश्चय एवोपाधित्वेन शङ्कनीयः। साधने सोपाधिः, साध्ये निरुपाधिरेवोपाधित्वेन निश्चेयः। अतोऽन्यथात्वेन न च प्रमाणपरिदृष्ट एव कश्चिदुपाधित्वेन शङ्कनीयः। तया हि धूमानुमाने प्रत्यक्षेणोपलभ्यास्तावदुपाधयो

1 निश्चायकमपि भवति–कि. क। 2 सम्बन्धात्तादात्म्य–कि. क। 3 कि. क. पुस्तकयोर्नास्ति। 4 दुर्घटम्–कि. क। 5 सन्ततः सप्तघटिकाद्याहारकरणे–कि. क।

योग्यानुपलब्धेरेव निरस्ताः। प्रमाणान्तरपरिदृष्टानां व्यापकानामुपाधित्वे वह्नेः सार्वत्रिकत्वप्रसङ्गात्। अव्यापकानामपि तेषामुपाधित्वे वह्नेः सर्वदानुवृत्तिप्रसङ्गः।

अनित्यास्तु त्रिविधाः उभयाव्यभिचारिणः, उभयव्यभिचारिणः, अन्यतराव्यभिचारिणश्चेति। तत्र प्रथमद्वितीया उपाधिलक्षणा[1]भावादेव नोपाधयः। अन्यतराव्यभिचारिणस्तु द्विरूपाः, धूममात्राव्यभिचारिणो वह्निमात्राव्यभिचारिणश्चेति। पूर्वे लक्षणाभावादेव नोपाधयः। वह्निमात्रव्यभिचारिणोऽपि द्विविधाः व्याप्यमात्ररूपा [2]उभयरूपाश्चेति। पूर्वे पूर्ववत्, उभयरूपास्तु सामग्रीतोऽपरे न विद्यन्ते। सामग्री च न कश्चिदुपाधिः, धूमस्य वह्निनेव तयापि स्वभावसम्बन्धात्। वह्निजननसामग्र्या वह्नेरप्यन्तर्भावाच्च। न च साध्यधर्मसजातीयेतरत्वमुपाधिः, तस्य प्रमाणबाधैकनियतत्वात्। अत एवोपाध्यदर्शनेऽपि विरोधिप्रमाणसदसद्भावनिश्चयव्यग्रतया मुहूर्तमनुमितौ विलम्बन्ते; तदेवमनुमानमात्रे द्रष्टव्यम्। तर्कश्च सर्वशङ्कानिराकरणपटीयान् विराजते उपाधिलक्षणं तु साध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युक्तमेव।

किं पुनर्व्याप्तिग्रहणे प्रमाणम्? न तावत् मानसं मनसो बहिरस्वातन्त्र्यात्। दर्शनादर्शनरूपबाह्यसहकारित्वान्नैवमिति चेत्, न असाधारणनिमित्तसव्यपेक्षत्वेन प्रमाणान्तरापपत्तेः किञ्च [3]जात्यन्धस्य पूर्वानुभूतरूपादिविज्ञानजनितसंस्कारसहकारिणा मनसा रूपादिसाक्षात्कारजनने अन्धानन्धयोरविशेषापत्तिः। कार्यदर्शनादत्रैवं कल्प्यत इति चेत्, न, तस्यान्यथाप्युपपत्तेः। तस्माद् व्याप्तिः प्रत्यक्षयोस्सम्बन्धिनोर्बाह्येन्द्रियजन्यसविकल्पकग्राह्यैव, सञ्ज्ञास्मरणस्य चात्र प्रकारान्तरेणापि सम्भवात्, निर्विकल्पकस्यापि नापेक्षेति। क्वचित्सादृश्यादिवन्निर्विकल्पकेनैव गृह्यत इति।

तदेवं धूमानुमानं सिद्धवत् व्युत्पाद्य अन्यत्रानुमानेऽप्यतिदिशति—**एवं सर्वत्रेति**। एवमुक्तेन क्रमेण धूमानुमानवत् सर्वानुमाने व्याप्तिनिश्चय इत्यर्थः। यद्यपि देशकालौ व्यभिचारिणावित्युक्तमेव तथाप्येवमेव निरुपाधित्वेन तावपि गमकावित्याह—**देशकालाविनाभूतमिति**। एवमित्यनुषज्यते। इतरस्य साध्यधर्मस्य लिङ्गम्, यथा मगधायां कर्कट[4]वृश्चिकदष्टस्य भीतेन ऐन्द्रियमृत्तिकालक्षणं तज्जन्यविषापनोदस्य लिङ्गम्। कालाविनाभूतं च यथा भगवतो योगीश्वरस्य विषुवत्पर्वणि श्रद्धातिशयेनोपस्थानं परमाभ्युदये लिङ्गम्।

1 भावान्नोपाधयः–कि. क। 2 उभयरूपाश्च–कि. क। 3 जातान्धस्य–दे।
4 वृश्चिकभीतवत्–कि. क।

ननु सूत्रविरुद्धमेतत्—'**अस्येदं कारणं कार्यं संयोगिविरोधि** [1]**सम-वायि चेति लैङ्गिकम्**' (वै. सू. ९-२-१) इति सूत्रे चतुर्द्धा सम्बन्धिनियमादिति। तथा ह्यस्येदं कार्यम्, अस्येदं कारणमिति क्वचित् कार्यं क्वचित् कारणं प्रयोजकीकृत्योक्तम्। यथा अन्त्यतन्तुसंयोगात् पटचरमकारणात् भविष्यत् पटानुमानम्। वस्तुगत्या तु कार्य-कारणभाव एकलक्षण एव सम्बन्धः। एतद्द्वितयोदाहरणं स्फुटमेव। विरोध्युदाहरणं तु विस्फूर्जितमहिं दृष्ट्वा [2]झाटाद्यन्तरितस्य नकुलस्यानुमानम्। यत्पुनरभूतं वर्षकर्म भूतस्य वा, वाय्वभ्रसंयोगस्य कथं विरोधि? प्रत्युतानुकूलमेवेति दूषितं किमेतावता। नह्येकद्विकोदाहरणे दूषिते एव विरोधिलक्षणं दूषितं भवति। तत्रापि विरोधस्य दुःपरिहारत्वात्। नह्यन्यस्या-भावमात्रेणान्यस्य भावो नियमेन [3]सम्पद्यते। विरोधित्वे तु तथा सम्भवति। यद्विधौ यस्य नियमेन प्रतिषेधो यन्निषेधेन यस्य नियमेन विधिस्तयोरेव विरोधित्वादिति। समवाय्युदाहरणं यथा वारिसंयुक्तसमवेत उष्णस्पर्शो वारिस्थं तेजो गमयतीति।

(२५१) [4]**शास्त्रे कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थम्; कस्माद्? [5]व्यतिरेकदर्शनात्। तद्यथा—अध्वर्युः ओं श्रावयन् व्यवहितस्य होतुर्लिङ्गम्, चन्द्रोदयः समुद्र-वृद्धेः कुमुदविकासस्य च; शरदि जलप्रसादोऽगस्त्यो-दयस्येत्येवमादि तत्सर्वम् 'अस्येदम्' (वै. सू. ९-२-१) इति सम्बन्धमात्रव[6]चनात्सिद्धम्॥**

तदयं नियमो देशकालाविनाभावमात्रस्य गमकत्वेऽनुपपन्न इत्यत आह—**शास्त्रे अस्येदमि**ति (वै. सू. ९-२-१) सम्बन्धमात्रेऽनुमित्यङ्गतया प्रतिज्ञातेऽपि निदर्शनार्थं निश्चयेन विशेषोदाहरणमनिष्टं कृत्वा तस्यैव दर्शनार्थं कार्यादिग्रहणं न त्ववधारणार्थम्। विप्रतिपन्नः पृच्छति **कस्माद्** इति—कथमेतदित्यर्थः। तथा ह्यस्येदमिति सम्बन्ध-[7]प्रतिपादकेनैव सर्वोपसङ्ग्रहाच्छेषाभिधानं व्यर्थम्। न च सम्बन्धपदोपात्तस्याप्यतिप्रसक्तिः शेषपदैर्निवार्यते, तथा सति शेषपदान्येव सन्तु कृतमस्येति पदेन तस्मादेव सम्बन्धभेदाना-मधिगतेः। न चैवं सत्यनुमित्यङ्गस्य सम्बन्धस्य चातुर्विध्यमपि तथेष्यते, तस्मादस्येदं कार्यमस्येदं कारणमस्येदं संयोगि, अस्येदं विरोधि, अस्येदं समवायि इत्यवधारणार्थमेवैत-

---

1 समवायितेति—पा० २. पु। 2 घटाद्य—कि। 3 गम्यते—पा० २. पु। 4 शास्त्रे च—पा. ५. पु। 5 व्यतिरेकलिङ्गदर्शनात्—पा. ५-६. पु। 6 दर्शनात्—पा. १. पु। 7 प्रतिपादकपदेनैव —पा. २. पु।

दित्यर्थः । ज्ञाताभिप्रायस्योत्तरं **व्यतिरेकदर्शनात्**—कार्यादिव्यतिरेकेणापि लिङ्गदर्शनात् । अस्येदमव्यभिचारीति सम्बन्धमात्रमेव गमकम् । तस्यैव तु शिष्यानुरोधाद्विशदीकरणम्; एतस्य फलं तत्रोक्तमेव ।

यत्र कार्यादिव्यतिरेकः तद्दर्शयति '**यथाध्वर्युरि**ति । **हो**[1]**तुरिति** होतुरिति—अनेन होतृसन्निहितयागभूमिमुपलक्षयति प्रयोगस्त्वयम्' अध्वर्युरविदूरदेशेन होत्राऽनुसंहितः यागभूमा ओं श्रावयेति शब्दकर्तृत्वात् पूर्वोपलब्धाध्वर्युवत् । अत्र च कार्यताद्यभावः स्पष्ट एव । उदाहरणान्तरमाह—**चन्द्रोदय** इति । न चात्रापि तदनन्तरभावितामात्रेण कार्यत्वमाशङ्कनीयम् अन्यथासिद्धत्वात् । स्वावयवानामुत्तरदेशप्राप्तिरूपायाः समुद्रवृद्धेः परस्परदलविभागरूपस्य कुमुदविकासस्य च पूर्वरूपनिवृत्तौ रूपान्तरोत्पत्तिविशिष्टोत्पादलक्षणस्य च जलप्रसादस्य तत्कालसन्निपातिस्वकारणाधीनकर्मनिबन्धनत्वात् । कार्यादिव्यतिरिक्तस्यापि लिङ्गस्य दर्शनान्न्यूनं सूत्रमिति शिष्यभ्रमनिरासार्थं पूर्वोक्तमेव स्मारयन्नुपसंहरति—**एवमादि तत् सर्व**मिति । [2]एवमादिर्यत्तत् सर्वम् अस्येदमिति सम्बन्धमात्रवचनात् सिद्धम्—सूत्रकृता प्रमाणसिद्धं कृतमित्यर्थः । 'मात्र'शब्दः सम्बन्धविशेषकार्यकारणादेर्व्यवच्छेदार्थः ।

(२८२) तत्तु द्विविधम्–दृष्टं सामान्यतोदृष्टं च ॥

तदेवं सिद्धे लैङ्गिके तद्भेदं प्रदर्शयति—**तत्तु द्विविधमि**ति 'तु'शब्दोऽवधारणार्थः । द्विविधमेवेत्यर्थः । नन्वेतत् सञ्ज्ञाद्वयं [3]समन्वयमात्रे वा स्यात् तस्मिन् सति पारिभाषिकं वा? तत्र प्रथमे सर्वमेवानुमानं दृष्टं, प्रमाणप्रतीतं [4]सर्वमेव सामान्यतो गृहीतव्याप्तिकतयैव दृष्टं भवतीति कथं द्वैविध्यम् । द्वितीये तु समानतन्त्रन्यायेन त्रिविधम् ॥

(२८३) तत्र दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमानम् । यथा गव्येव [5]सास्नामुपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनाद् [6]गवि प्रतिपत्तिः ॥

सामान्यतोदृष्टपदेन नञन्तर्भाव उचित इत्यतो द्वैविध्यं दर्शयति **तत्रेति** । तत्र द्वयोर्मध्ये दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमानम्, प्रसिद्धं साध्यं ययोस्तौ तथा पक्षसपक्षावित्यर्थः । एकस्य हि आत्मनि व्याप्त्या [7]साध्यप्रसिद्धमपरस्य तु स्वात्मनि

---

1 'होतुरिति' कि. पुस्तके नास्ति । 2 'एवमादिर्यत्तत् सर्वम्' इति. कि. क. पुस्तकयोर्नास्ति । 3 सम्बन्धमात्रे–पा. २. पु; अन्वर्थं–कि; क । 4 सर्वं च–कि; क । 5 सास्नामात्र –मु. भा । 6 लिङ्गविप्रतिपत्तिः–दे । 7 एकस्य हि व्याप्त्याऽपरस्य–कि, क ।

व्याप्तिग्रहणविषयतयैव साध्यं प्रसिद्धम् । तदनयोः पक्षसपक्षयोर्जात्यभेदे एकजातीयत्वे सति यदनुमानं तद्दृष्टं यथा गव्येव सास्नामुपलभ्य देशान्तरे गवि प्रतिपत्तिः । सा गौः सास्नावत्त्वात् दृश्यमानगोपिण्डवत् इति । अथवा प्रसिद्धं यत्पूर्वलिङ्गेन सह दृष्टं साध्यं यत् सम्प्रत्यनुमेयं तयोरत्यन्तजात्यभेदे सतीति नेयम् । तत्र हि पूर्वं गोत्वजातिविशिष्टाया एव व्यक्तेः सास्नोपलम्भात् सम्प्रत्यपि गोत्वजात्यक्रान्तायाश्च व्यक्तेरनुमानमित्यत्यन्त-जात्यभेदः ।

(२५४) **प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लि[1]ङ्गानुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतोदृष्टम् । यथा कर्षकवणिग्राज[2]पुरुषाणां प्रवृत्तेः फलवत्त्वमुपलभ्य वर्णाश्रमिणामपि दृष्टं प्रयोजन[3]मनुद्दिश्य प्रवर्तमानानां फलानुमानमिति ।**

सामान्यतोदृष्टमुदाहरति **प्रसिद्धसाध्ययो**रिति । [4]**पूर्ववदि**ति—अत्यन्त-जातिभेदे सति लिङ्गं चानुमेयधर्मश्च लिङ्गानुमेयधर्मो तयोः सामान्ये लिङ्गानुमेयधर्मसामान्ये, तयोरनुवृत्तितो लिङ्गसामान्यस्य साध्यसामान्येन सहाविनाभावाद्यदनुमानं तत्सामान्यतो दृष्टम् । यथा कर्षकवणिग्राजपुरुषाणां प्रवृत्तेः फलवत्त्वमुपलभ्य वर्णाश्रमिणामपि प्रवृत्तेः फलानुमानम् । अत्र हि धान्यादिकं काञ्चनादिकं वाजिदारणादिकं यथासङ्ख्यं त्रयाणां फलं वर्णाश्रमिणां प्रवृत्तेः फलमित्यत्यन्तजातिभेदः । सिद्धसाध्यतापरिहारार्थं च **दृष्टं प्रयोजन-मनुद्दिश्ये**ति । अनुमानन्तु प्रवृत्तित्वसामान्यस्य फलत्वसामान्ये सहाविनाभावात् । अत एव सामान्यतोदृष्टं तेनैव [5]प्रकारेण नियमदर्शनात् । स्वर्गादिरूपफलविशेषलाभस्तु पक्षधर्मता-वशात् ।

(२५५) **तत्र लिङ्गदर्शनं प्रमाणम्, प्रमितिरग्निज्ञानम् । अथवाऽग्निज्ञानमेव प्रमाणम्, प्रमितिरग्नौ गुणदोषमाध्यस्थ्य-दर्शनम् ; इत्येतत्स्व[6]निश्चितार्थानुमानम् ॥**

तदेवं 'प्रमाण'शब्दस्य उ[7]भयप्रधानत्वम्, प्रमासाधनत्वाभिधानं करणव्युत्पत्ति-सिद्धं फलमन्तरेण न सङ्गच्छते अतः प्रमाणफलविभागं दर्शयति—**तत्रे**ति । तत्र तयोर्मध्ये

---

1 लिङ्गानुमेये–दे । 2 पुरुषाणां च–दे । 3 मुपदिश्य वर्तमानानां–दे । 4 पूर्वमत्यन्त-जातिभेदे कि; क । 5 अनुकारेण कि, क. जे । 6 स्वनिश्चयार्थं व्यो. (५७६) । 7 'उभयसाधनत्वम्' इति कि. क पुस्तकयोर्नास्ति ।

लिङ्गदर्शनं [1]प्रमाणमिति प्रमाकरणमित्यर्थः। प्रमितिरग्निज्ञानं प्रमाकरणस्य फलम्। यद्यपि लिङ्गदर्शनस्य परामर्शरूपस्योत्पत्त्यनुबन्धितया लिङ्गमेव विषयस्तथाऽपि व्यापारानुबन्धितया वह्निरेव विषय इति करणफलयोर्न व्यधिकरणत्वम्।

नन्वयं प्रमाणप्रमेयभावो न तावन्नियतः सोपाधित्वाद्, उपाधीनां चानियतत्वात्, तथा सति यन्नियतं न भवति न तत्परमार्थसत् यथा रज्ज्वामारोपितं सर्पत्वमिति युक्त्यनुसारात् प्रमाणप्रमेयभावस्य काल्पनिकत्वमापतितम् अत आह—**अथवेति**। सत्यमयमनियतः प्रमाणप्रमेयभावो न चपर[2]मार्थासत्त्वम् उपाधीनां नियतत्वात्। न हि येनोपाधिना प्रमाणत्वमिष्यते तदैव तेनोपाधिना तन्नेष्यत इति [3]कस्याभ्युपगमः। [4]एकोपाधिसद्भावे उपाध्यन्तरमपि सम्भवतीति चेत्, किं नश्छिन्नम्? सम्भवति सन्नयं पार्थिवो द्रव्यं घटश्चेति तत्त्वज्ञानमेव। [5]तद्वदग्निज्ञानमेव यद्विकल्परूपं यद्धूमरूपमासीत्तदेव प्रमाणं प्रमाकरणम्, प्रमितिः प्रमाकरणफलम् अग्नौ गुणदोषमाध्यस्थ्यज्ञानम्, हेयोपादेयोपेक्षाप्रतिपत्तिरित्यर्थः। वस्तुस्वरूपमात्रदर्शने च तज्जातीयत्वादिलिङ्गप्रतिसन्धानमन्तरेण हेयोपादेयत्वादिकं न परिस्फुरति। उपेक्षाबुद्धिश्च हेयोपादेययोरन्या तृतीयाऽस्तीति व्यक्तमेवेति। उपसंहरति—**एतत्स्वनिश्चितार्थमि**ति। स्वनिश्चितमिति भावे क्तः। स्वनिश्चयार्थमित्यर्थः। स्वनिश्चयो स्वज्ञानमस्य पञ्चावयवाद्यपरामर्शेऽपि सुकरः। विपर्यस्तादिप्रतिपादने तु सकलपरिकरशुद्धिरवश्यापेक्षणीयेत्यर्थः॥

इह खलु शब्दे त्रिविधा विप्रतिपत्तिः। प्रामाण्यतो भेदतो लक्षणतश्च। तत्र प्रथमो विकल्पः स्ववचनविरोधादेव निरस्तः। तत् प्रामाण्यमनभ्युपगम्य विवक्षितार्थस्य प्रतिपादयितुमशक्यत्वात्। प्रतिपादने वा तत एव प्रामाण्यसिद्धेः। ननु यस्य यत्र प्रतिबन्धो नास्ति तत्र तस्य प्रामाण्यं, यथा दहनेऽप्रतिबद्धस्य रासभस्य, न चास्ति शब्दस्य बहिरर्थेन सम्बन्ध इति चेत्, न, अविनाभावरूपसम्बन्धाभावादप्रामाण्यम्, तत्सम्बन्धमात्राभावाद्वा। प्रथमे चक्षुषोऽपि रूपज्ञानेऽप्रामाण्यम्, न हि तत्र तस्याविनाभावः। न च चक्षुरपि रूपकार्यत्वादेव रूपं प्रकाशयतीति वाच्यम्, तथा सति तद्गतत्वादेव रसादीनपि गमयेत्। रूपरसादिसमुदायो हि घटादिविषयः। अविनाभावज्ञानं चापेक्षेत, नह्यविनाभावस्यैवं महिमा यदयं स[6]त्तामात्रेणैव गमयति, तथात्वे वा, धूमादपि चक्षुष इव सत्तामात्रा-

---

1 प्रमाणम् प्रमाणकरणम्–कि. क। 2 न च परमार्थसत्–कि. क। 3 भ्युपगमात्–कि क। 4 एकोपाधिसम्भवे–पा० ५. पु०। 5 यद्धूमलिङ्गदर्शनस्य फलमासीत्तदेव–कि. क। 6 न सत्तामात्रेणैव –पा० ७. पु।

वस्थितादेव बहिः प्रतीयेत । अपि च ज्ञानसमसमयो वाऽर्थः प्रकाशते, अनन्तरसमयो वा? आद्ये न ग्राह्यग्राहकनियमः सव्येतरविषाणयोरिव । न च तस्माच्चक्षुषो जन्म, स्वकारणादेवायमस्य स्वभावभेदलाभो यदनात्मानमप्यकारणमपि कारणत्वाविशेषेऽपि रूपमेवाज्ञानमेव सत् प्रकाशयतीति रूपोपलब्धिकार्यदर्शनबलादेव व्यवस्थाप्यते; तस्याशक्यापह्नवत्त्वादिति चेत्, एवं तर्हि यस्य यत्रेत्यादि व्यापकानुपलब्धिस्त्वयैवानैकान्तिकी कृता, स्वभावसम्बन्धश्च दर्शित इति किमत्र वक्तव्यम् । तस्माद् यथा चक्षुरादिषु यथार्थानुभवजनननिबन्धनः प्रमाणव्यवहारः तथा तन्निबन्धनः शब्दस्यापि तदनुगुणः स्वभावभेदः, स्वकारणादायातो व्यवस्थाप्यते यत[1]स्तत् तत् सङ्केतोपधानस्तं तमर्थं प्रतिपादयेति । यद्यपि च सङ्केतः पुरुषाधीनत्वादनियतस्तथापि यदा यदन्यत्वे यस्य य[2]त्प्रतिपाद्यं तदा तत्रोपाधिनियमस्य कर्तुं श[3]क्यत्वात् अप्रामाण्यकथा सुदूरप्रतिहतेति तद्भेदे लक्षणे च विप्रतिपत्तिरवशिष्यते ।

(२८६) शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात् । यथा प्रसिद्धसमयस्य लि[4]ङ्गदर्शनप्र[5]सिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानम्; एवं शब्दादिभ्योऽपीति ।

तत्र [6]भेदोऽपि व्यावर्तकधर्मयोगादेव सिद्ध्यति; लक्षणं च तथाभूतमतस्तदेव निरूपयितुमुचितमित्यभिप्रायेण सिद्धवदाह—**शब्दादीनामप्यनुमानेऽन्तर्भाव** इति । यद्यपि समानतन्त्रादिषु उपन्यासक्रमेणान्तर्भावक्रमो दर्शनयितुमुचितः, तथापि शब्दस्य बहुविषयत्वान्नियतवि[7]षयोपमानादिषूत्कर्षः । शब्दादीनां सिद्धप्रमाणभावानामप्यनुमानेऽन्तर्भावः, 'अपि'शब्दश्च वक्ष्यमाणोपमानादिप्रमाणापेक्षया । अथवा शब्दादीनामनुमानेऽप्यन्तर्भावः; अभावादीनां कचित्प्रत्यक्षेऽपीति योजना । अत्र हेतुमाह—**समानविधित्वात्**, समानप्रवृत्तिकारणत्वात् विजातीयलक्षणानाक्रान्तर्भावादिति यावत् । अप्रतिबन्धकत्वे अप्रामाण्यमेव, साक्षात्प्र[5]तिबन्धकत्वे प्रत्यक्षान्तर्भावः, परम्पराप्रतिबन्धकत्वे चानुमाने एवान्तर्भावः । ननु समानविधित्वमेवासिद्धमत आह—**यथा प्रसिद्धसमयस्येति** । समयः सम्बन्धमात्रम् अव्यभिचार इति यावत् । प्रसिद्धः समयोऽव्यभिचारो यस्य तस्य लिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यां लिङ्गदर्शनं च प्रसिद्धेर्व्याप्तेरनुस्मरणं च । यथाऽतीन्द्रियेऽर्थे अनुमानं भवति । एवमनुमानप्रवृत्तिप्रकारं स्मारयित्वाऽतिदिशति **एवं शब्दादिभ्योऽपीति** ।

---

1 यतस्तत्तत् शङ्कितोपधानं तमर्थं–कि. क । 2 यदस्य यत्प्रतिपाद्यं–पा. ३. पु । 3 कर्तुमशक्यत्वात्प्रामाण्यकथा–कि. क । 4 असन्दिग्धलिङ्गदर्शन–मु. भा । 5 प्रसिद्धार्थाः पा० ६. पु । 6 भेदो व्यावर्तक–कि; क । 7 1 विषयोपमानादेरुत्कर्षः कि. क ।

इदमत्राकूतम्—यद्यप्येते पदार्था मिथः संसर्गवन्तो वाक्यत्वादिति व्यधिकरणम्, पदार्थत्वादिति चानैकान्तिकम्, पदैः स्मारितत्वादित्यपि तथा। यद्यपि चैतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादित्यादौ साध्याभावः; नह्यत्र संसर्गः संयोगः, समवायः, तादात्म्यं विशेषणविशेष्यभावो वा सम्भवति। ज्ञाप्यज्ञापकभावश्च स्वातन्त्र्येणानुमानान्तर्भाववादिभिर्नेष्यते। न च लिङ्गतया ज्ञापकत्वं यल्लिङ्गस्य तदेव तस्य विषयः, परस्पराश्रयप्रसङ्गात्। तदुपलम्भे हि व्याप्तिसिद्धिः, तत्सिद्धौ च तदनुमानमिति। तथाप्याकाङ्क्षादिमद्भिः पदैः स्मारितत्वात् 'गामभ्याज' इति पदार्थवत् इति स्यात्; न च विशेषासिद्धिर्दोषः संसर्गस्य संसृज्यमानविशेषापेक्षयैव विशिष्टत्वात्। यद्वा एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्त्वे सति तत् स्मारकत्वात् गामभ्याजेति पदकदम्बवदिति। न चैवमर्थासिद्धिर्दोषः, ज्ञानावच्छेदकतयैव तत् सिद्धेः। तस्य संसृज्यमानोपहितस्यैवावच्छेदकत्वात् न विशेषाप्रतिलम्भ इति।

तदेवं प्राप्ते नैयायिकादयः प्रत्यवतिष्ठन्ते। किं पुनरत्र प्रथमानुमाने साध्यम्? एते पदार्थाः संसर्गवन्तः संसृष्टा एवेति नियमो वा? सम्भावितसंसर्गा इति वा? तत्र न प्रथमः, अनाप्तोक्तपदकदम्बस्मारितैरनैकान्तात्। आप्तोक्त्या विशेषणीयमिति चेत्, न; वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः। न हि अविप्रलम्भकत्वमात्रमत्राप्तशब्देन विवक्षितम्, तदुक्तेरपि पदार्थसंसर्गाव्यभिचारात्; अपि तु तदनुभवप्रामाण्यमपि। न चैतत् शक्यमसर्वज्ञेन सर्वदा सर्वत्रायं [1]सम्यक्ज्ञानवानिति निश्चेतुम्, भ्रान्तेः पुरुषधर्मत्वात्। यत्र च क्वचिदाप्तत्वमनाप्तस्याप्यस्तीति न तेनोपयोगः। ततोऽ[2]स्मिन्नर्थभेदे अयमभ्रान्त इति केनचिदुपायेन ग्राह्यम्। न चैतत् संसर्गविशेषमप्रतीत्य शक्यं बुद्धेरर्थभेदमन्तरेण निरूपयितुमशक्यत्वात्। पदार्थमात्रे चाभ्रान्तत्वसिद्धावपि न किञ्चित् अनाप्तसाधारण्यात्। नापि द्वितीयः, योग्यतामात्रसिद्धावपि संसर्गानिश्चयात्; वाक्यस्य तदेकफलकत्वात्, योग्यतामात्रस्य च प्रागेव सिद्धेः अन्यथा तदसिद्धावासन्नसाकाङ्क्षपदस्मारितत्वादित्येव हेतुः स्यात्। तथा चाग्निना सिञ्चेदित्यादिस्मारितैरनेकान्तः, तथाविधानां संसर्गायोग्यत्वात् इति।

एवं द्वितीयेऽपि प्रयोगे हेतुराकाङ्क्षादिमत्त्वे सतीति। अत्र आकाङ्क्षापदार्थो न तावद्विशेषणविशेष्यभावः; नापि तद्योग्यता, नाप्यविनाभावमात्रम्, नापि विशेषाक्षिप्तसामान्याविनाभावम्; नापि प्रणिपत्तुर्जिज्ञासा। किं तर्हि? गुणक्रियाद्यविशेषजिज्ञासायामपि पदस्मारितविशेषजिज्ञासा आकाङ्क्षा इति निरूपितम्। तत् किमस्यां

---

1 सत्यज्ञानवानिति–पा० ५. पु; जे। 2 अस्मिन्नर्थे अयमभ्रान्त–कि. क।

ज्ञातायामन्वयप्रत्ययोऽथाज्ञातायामिति ? तत्र प्रथमे अनया व्यभिचारनिवर्तनीयो हेतुर्न विशेषणीयो मनःसंयोगादिवत् सत्तामात्रेणोपयोगात् । आसत्तियोग्यतामात्रविशिष्टस्तु निश्चितोऽपि न गमकः, '[1]अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ व्यभिचारात् । द्वितीयस्तु स्यादपि यद्यनुमानान्तरवत् आकाङ्क्षाज्ञानव्यतिरेकेण[2]ज्ञानवैधुर्यादन्वयप्रत्ययो न स्यात् । न त्वेवमस्ति आसत्तियोग्यताप्रतिसन्धानमात्रादेव साकाङ्क्षस्य सर्वत्र वाक्यार्थ-प्रत्ययात्, निवृत्ताकाङ्क्षस्य च तदभावात् । सत्तामात्रेणैवोपपत्तावनुपलभ्यमानज्ञानकल्प-नाऽनवकाशात्, न वाऽऽकाङ्क्षायां सत्यामप्यवश्यं वाक्यार्थप्रत्ययः । यदा ह्ययमेति पुत्रो राज्ञः पुरुषोपसार्यतामिति वक्ता उच्चारयति श्रोता च व्यासङ्गादिना निमित्तेन 'अयमेति पुत्र' इत्यश्रुत्वैव राज्ञः पुरुषोपसार्यतामिति शृणोति तदाऽस्ति आकाङ्क्षादिमत्त्वे सति पदकदम्बकत्वम्, न च स्मारितार्थसंसर्गज्ञानपूर्वकत्वम् इति ।

स्यादेतत्; [3]यावत् समभिव्याहृतत्वेनाप्तोक्तत्वेन च विशेषितहेतौ नायं दोषः; एवं च सति कतिपयपदश्राविणां यः कश्चित् क्वचित् संसर्गप्रत्ययोऽलिङ्ग [4]इव लिङ्गत्वाध्या-रोपात् । असंसर्गाग्रहमात्रेण [5]वा तत्र संसर्गव्यव[6]हारात् । न चैवं संसर्गो न सिद्ध्यति, आप्तवाक्येषु तत्सिद्धेः । न, सर्वविषयाप्तत्वस्यासिद्धेः, यत्र क्वचिदाप्तत्वस्यानैकान्तिकत्वात् प्रकृतविषये चाप्तत्वसिद्धौ संसर्गविशेषस्य प्रागेव सिद्ध्यभ्युपगमात् किमनुमानेऽन्तर्भावनीयम्? न च सर्वत्र जिज्ञासानिबन्धनम्, अजिज्ञासोरपि वाक्यार्थप्रत्ययात् । आकाङ्क्षापदार्थस्तर्हि कः? जिज्ञासां प्रति योग्यता, सा च स्मारिततदाक्षिप्ताविनाभावे सति श्रोतरि तदुत्पाद्य संसर्गाविगमप्रागभावः । न चैषोऽपि स्वज्ञानमपेक्षते प्रतियोगिनिरूपणाधीननिरूपणत्वादभावस्य तस्य च विषयनिरूप्यत्वादिति सिद्धमनुमानात् पृथक्त्वं शब्दस्येति ।

अत्रोच्यते; संसृष्टा एवेति नियम एव साध्यः । आप्तोक्तत्वेन विशेषणान्न व्यभिचारः, न च संसर्गविशेषनिश्चयमन्तरेणाप्तोक्तत्वमशक्यनिश्चयम् । तथा हि निपुणं तावदालोचयत्वायुष्मान्; यद्यपि भवता शब्दः प्रमाणं पृथक् स्वीकृतः तथापि किं शब्द-मा[7]त्रादर्थप्रतीतिः ? आहोस्विदाप्तोक्तत्वादिसहिताच्छब्दविशेषात्? न प्रथमः, अनाप्तवाक्ये व्यभिचारात् ननु तत्राप्यर्थप्रतीतिजनित एव, कथमन्यथा ततः प्रवर्तेत? इतरथा हि द्राविडादिवचनेष्विव गौडदेशीयस्य प्रवृत्तिसङ्कल्पोऽपि न स्यात्; किन्तु ज्ञातप्यर्थप्रतिपत्तिः

---

1 अयमुपैति–पा० २. पु० जे । 2 आकांक्षाव्यतिरेकेणान्वयप्रत्ययो–कि. क । 3 'यावत्' इति कि. क पुस्तकयोर्नास्ति । 4 एव–कि. क । 5 तत्–कि. क । 6 प्रत्ययात्–कि. क । 7 विवक्षितार्थप्रतीतिः–जे ।

अप्रामाण्यशङ्काकलङ्कितत्वेन न निःशङ्कप्रवृत्त्युपयोगिनी इति प्रामाण्यनिश्चयार्थमाप्तोक्तत्वावधारणप्रयासः ।

ननु लिङ्गमपि तदानीमर्थज्ञानं जनयत्येव, केवलं [1]तत्प्रामाण्यार्थमविनाभावप्रतिसन्धानमिति किं न कल्प्यते? कथमन्यथा लिङ्गाभासेऽपि प्रवृत्तिसम्भवः? भवेदेवं यदि शब्दवत् सत्तामात्रेण लिङ्गमपि गमकं स्यात् । न हि [2]धूमस्वरूपमात्रमेव लिङ्गम्, अपि तु साध्ये निरुपाधिसम्बन्धशालि अबाधितविषयत्वादिरूपसम्पन्नमेव । तथा च [3]सति साध्ये निरुपाधिसम्बन्धशालि अथ च [4]साध्यं विनापि भविष्यति इति कुतः शङ्काकलङ्कावकाशः? प्रामाण्यालिङ्गितस्यैव तद्रूपत्वात् ।

तदेतत् शब्देऽपि समानम् । न हि शब्दमात्रं विवक्षितार्थप्रतिपादकम्, 'घट'शब्दस्यापि पटार्थप्रतिपादकतापत्तेः । नाप्यर्थप्रतिपादकत्वमात्रं शब्दत्वम्, शब्दापशब्दविवेकानुपपत्तेः, तद्विभागव्यवस्थापकव्याकरणादिवैयर्थ्याच्च । किन्तु यः[5] शब्द उपाधिसम्बन्धाद्यस्मिन्नर्थे आप्तेन सङ्केतितः स एव तस्य प्रतिपादक इति । न चैतच्छब्द[6]-स्वरूपमात्रे सम्भवति । न चैवं सति 'सृण्येव जर्फरी तु फर्फरी तु' इत्यादेर्वेदवाक्यादाप्तोक्तत्वप्रतिसन्धानमात्रेण अविदितपदार्थस्यापि अर्थप्रतीतिप्रसङ्गः । नह्याप्तेनोच्चारणमात्रं तदुक्तत्वं किन्तु सङ्ग[7]तिमत्तया प्रतिपादनम् । कथं तर्हि शब्दाभासेऽपि प्रवृत्तिसम्भवः? अशब्द एव शब्दत्वाध्यारोपात्, अलिङ्ग [8]इव लिङ्गत्वाध्यारोपात्, यथा चलन्तीं पताकां दृष्ट्वा वायुर्वातीत्यादिष्वप्यविनाभावशालिषु प्रचुरतराभ्यासदशापन्नत्वेन मुहूर्तमप्यनुमितौ न विलम्बन्ते तथा शब्देऽपीति न कश्चिद्विशेषः । अन्यथा तु 'आप्तोपदेशः शब्दः' इति लक्षणस्यापि निर्लक्षणत्वापातात् ।

द्वितीये तु यदि संसर्गावगमात् पूर्वमशक्यमाप्तोक्तत्वावधारणम्, तदानीम् 'आप्तोपदेशः शब्दः' इति दुःपरिहरमन्योन्याश्रयत्वम् । यद् येन रूपेण न निश्चीयते न तत्तथा व्यवह्रियते, यथा रथ्यापुरुषः सर्वज्ञत्वेन । न निश्चीयते च विवादाध्यासितः पुरुषः आप्तत्वेन इति बौद्धानुमतव्यापकानुपलब्धिश्च स्वशिरसि पातिता भवति इति । यदि तूभयोः समः समाधिर्दोषो वा न तर्हि वयमेके पर्यनुयोज्या इति । एतेन द्वितीयेप्यनुमाने दूषणं प्रत्युक्तम् ।

---

1 तत्त्वप्रामाण्यप्रतिपत्त्यर्थ–कि. क । 2 धूमस्वरूपमेवात्र–कि. क । 3 'सति' इति कि. क पुस्तकयोर्नास्ति । 4 सम्बन्धं–कि. क । 5 यः शब्दो यदुपाधिसम्बन्धाद् यस्मिन्नर्थे आप्तेन शङ्कितः–कि. क । 6 च्छब्दमात्रे–कि. क । 7 °सत्तया–कि. क । 8 एव–कि. क ।

यत्पुनराकाङ्क्षायां सत्यामपि क्वचित् संसर्गावगमो न भवति इत्यनुकूलमेवैतत। न हि सति भावमात्रं कारणत्वम्, न च केवलमाकाङ्क्षासत्तियोग्यतारहिता तत्र कारणम्, अपि तु समुदिता। तथा च समुदायात् कारणैकदेशमपकृष्य व्यभिचारदर्शनं मृत्पिण्डादीनामपि कारणत्वं खण्डयति। आकाङ्क्षाव्यतिरेकेणापि क्वचिद्भविष्यतीति चेत्? इदं त्वशक्यम्, 'संसर्गावगमप्रागभावो ह्याकाङ्क्षा' इति निरूपितम्। न च भावः स्वप्रागभावमनुपमृद्य जायते; न चायमपि सत्तया हेतुः, तथा सति सर्वस्य सर्वत्र वाक्यार्थप्रत्ययप्रसङ्गात्। अस्मदादीना[1]मसर्वज्ञानामनादौ संसारे [2]संसर्गावगमप्रागभावः क्व नाम नास्ति। '[3]स्मारिततदाक्षिप्ताविनाभावे सति' इति तु विशेषणे त[4]ज्ज्ञानमेव प्रकारान्तरेण वक्ष्यते इत्यलं नैयायिकेष्वतिनिबन्धनेनेति ॥

(२८७) **श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तृप्रामाण्यपेक्षः "तद्वचनादाम्नायप्रामाण्यम्" (वै. सू. १-१-३), "लिङ्गाच्चानित्यः" (वै. सू. ३-२-३२), "बुद्धिपूर्वा वाक्यकृतिर्वेदे" (वै. सू. ६-१-१), "बुद्धिपूर्वो ददाति" (वै. सू. ६-१-३), इत्युक्तत्वात् ॥**

ननु य एव लौकिकास्त एव वैदिका इति न्यायाल्लोके चाप्तत्वावधारणे शब्दार्थनिश्चयः तर्हि वेदवाक्यस्यापि तथा स्यात्। न च तत्र कर्तृमात्रमेव सम्भावितमत आह **श्रुतिस्मृतीति**। श्रुतिस्मृती एव लक्षणं रूपं यस्य [5]वाक्यसम्प्रदायस्य स तथा। सन्दिग्धाप्तकर्तृत्वेनैतयोरुदाहरणं न केवलं लौकिको वाक्य[6]सम्प्रदायः, श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तुः प्रामाण्यमपेक्ष्य प्रत्यायकः 'न त्वाप्तोक्तत्वाद्' इति साध्यविपर्ययव्याप्त एवायं हेतुः। विप्रलिप्साविरहेऽपि भ्रमप्रमादयोः पुरुषेऽवश्यंभावितया तच्छङ्का[7]पङ्कस्य दुरपह्नवत्वात्। नित्यत्वे पुनरस्य शङ्कैव नास्तीत्यत आह '**तद्वचनादाम्नायप्रामाण्य**'मिति (वै. सू. १--१--३) सूत्रकारवचनादित्यर्थः। तदित्यनेन च '**अस्मद्बुद्धिभ्यो लिङ्गमृषेः**' वै. सू. १०--२--९) इति सूत्रे अभिप्रायोक्तस्य चास्मद्विशिष्टस्य वक्तुः परमेश्वरस्य परमर्षेः। तद्वचनात् तेन प्रणयनात् आम्नायस्य वेदस्य

---

1 असर्वज्ञानाम्--इति कि. क पुस्तकयोर्नास्ति। 2 धार्ष्ट्येनेति--पा. ४. पु। 3 स्मारितेन तेन पदार्थेन आक्षिप्तः अविनाभावः यस्य एवं भूते श्रोतरि यः संसर्गावगमप्रागभावः--जे. पा. टी। 4 संसर्गज्ञानम्। 5 समुदाय--कि. क। 6 पङ्कलोपस्य--कि. क 'तच्छङ्कस्य इति पाठः स्यादिति भाति। 7 इदं सूत्रं वै. सूत्रपाठे नास्ति चन्द्रानन्दसम्मत सूत्रपाठे तु अस्ति; उदयनसम्मतं चेदम्।

प्रामाण्यम् । यथार्थानुभवजनकत्वं हि प्रामाण्यं न तु नित्यत्वप्रयुक्तम्, तदपि दोषाभावप्रयुक्तम्, तच्च धर्मिग्राहकप्रमाणादेव परमेश्वरे सिद्धमिति भावः । प्रयोगस्तु 'आप्तोक्ता वेदाः, महाजनपरिगृहीतत्वात् । यत्पुनर्नाप्तोक्तं, न तत् महाजनपरिगृहीतं यथा रथ्यापुरुषवाक्यम् । इदानीं श्रूयमाणवेदवाक्यसजातीयेषु वेदवाक्येषु स्वतन्त्रपुरुषपूर्वकत्वम् आप्तोक्तत्वम् । सर्वदर्शनान्तःपातिपुरुषानुष्ठीयमानार्थत्वं च महाजनपरिग्रहः । सिद्धे च प्रामाण्ये क्वचित् फलाभावः । कर्मकर्तृसाधनवैगुण्यनिबन्धनो न व्यभिचाराय, तत् साकल्ये तत एव फलदर्शनात् ।

तदेवं [1]वैदिकवाक्यसम्प्रदायस्यान्यत्रागमने आवरणासम्भवे चाविकले श्रवसि श्रोतरि चावहिते यदुपलभ्य पुनरनुपलम्भनं तत् घटादिवदनित्यत्वैकनिबन्धनमिति यद्यपि प्रत्यक्षत एव परिच्छिन्नं तथाप्यस्मर्यमाणकर्तृकत्वादिना वैधर्म्येण यः प्रत्यवतिष्ठते तं प्रत्याह **लिङ्गाच्चानित्य** (वै. सू. २-२-३२) इति । न केवलं प्रत्यक्षात्, लिङ्गाच्चानित्य इति । अनित्यत्वप्रतिपादकं तावत् प्रत्यक्षमनन्यथासिद्धतया दुःपरिहरम् । नित्यत्वप्रतिपादकं तु प्रत्यभिज्ञानमन्यथाऽपि सङ्गच्छते । प्रत्युतानुमानमपि चात्रार्थेऽस्माकमस्ति तदेवमुभयप्रमाणसिद्धे वस्तुनि वैधर्म्यमात्रमप्रयोजकमिति भावः ।

अनुमानमेव दर्शयतिः—**बुद्धिपूर्वा वाक्यकृति** रिति । यत्र हि शब्दस्यैवानित्यतामुपपादयिष्यामः कुतस्तत्र तत्समूहस्य पदस्य कुतश्चित्तद्विशेषसमूहस्य वाक्यस्य नित्यतेत्यर्थः । वेदवाक्यस्य कृतिर्वाक्यरचना बुद्धिपूर्विका वाक्यरचनात्वात्, लौकिकवाक्यरचनावत् । अस्मर्यमाणकर्तृकत्वं चानुकूलमेव यत एव हि स्फुटतरं स्मरणं नास्ति, अत एव कर्ता साध्यते । न च क[2]स्यचित् क्वचित् स्फुटतरास्मरणमात्रेणाकर्तृकत्वं तथात्वे तु इहेत्यादीनां वाक्यानामन्धकूपानां चाकर्तृत्वप्रसङ्गात् । न चास्मरणपि 'नाहरासीन्नरात्रिरासीद्' इत्यादिवेदवाक्याद् एवं 'तस्मात्तपस्तेपानाच्चत्वारो वेदाऽजायन्त' इति कर्तृस्मरणात् । [3]अर्थवादमात्रमेतदिति चेत्; न कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात् । तथा च **कालिदासा**दिवाक्यस्याप्यकर्तृकत्वप्रसङ्ग इति ।

ननु, परिदृष्टसामर्थ्यकारकचक्रमधितिष्ठत एवेश्वरस्यापि कर्तृत्वम्, तथा च स्थानकरणादीनामन्वयव्यतिरेकाभ्यां वर्णनिष्पत्तिं प्रति सामर्थ्यावगमात् तदधिष्ठानशून्यतया न वेदकर्तृत्वं भवेत् । न च शरीरमन्तरेण तस्य स्थानकरणादिसम्भवः, तेषां ताल्वादि-

---

1 वाक्यसमुदायस्य–कि. क। 2 कदाचित्–कि. क। 3 अनुवाद–कि. क।

विवृतत्वादिरूपत्वाद् इति चेत् ; न; अनवबोधात् । न हि वयमस्य भगवतः कार्यविशेषेणानुविहितभावतयोपकरणशरीरं निराकुर्मः । त्र्यणुकादिनिष्पत्तये द्व्यणुकादिवत् शरीरान्वयव्यतिरेकानुविधायिकार्यनिष्पत्तये तदुपग्रहस्यापीष्यमाणत्वात् । गृह्णातीश्वरोऽपि शरीरमन्तराऽन्तरा दर्शयति च विभूतीरिति । अपि त्वायतनतया कर्तृत्वनिर्वाहकतया व्यापकतया च तत्तस्य नेष्यते भोगाभावात्, कर्तृत्वस्य नित्यत्वात् । कार्यस्य [1]कर्त्रा निरुपाधिसम्बन्धात् शरीरव्यभिचाराच्चेति ।

लिङ्गान्तरमाह—वेदे 'ददाति'–शब्दो बुद्धिपूर्वकः, 'द[2]दाति' इत्युक्तत्वात् लौकिक'ददाति' शब्दवदिति । लौकिक' ददाति' शब्दो हि सम्प्रदानमभिप्रेत्य प्रयुज्यते । ददातिकर्मणा यमभिप्रैति कर्ता ससम्प्रदानं वेदे च कर्तुरभावा'द्ददाति'शब्दो व्यर्थ एवेति भावः ।

ननु नित्यनिर्दोषतया वेदस्य स्वत एव प्रामाण्यमुत्पद्यते कृतं तत्रासिस्वीकारेणेति चेत् ; न; प्रामाण्यमुत्पद्यते इत्यस्यैव व्याहतत्वात् । औपाधिकसामान्यविशेषो हि प्रामाण्यं परापरभावानुपपत्तेः । यदि हि ज्ञानत्वं परम्, अपरं च प्रामाण्यं तदा अज्ञानरूपेष्विन्द्रियादिषु प्रामाण्यं न स्यात् । अथ प्रामाण्यं परं ज्ञानत्वमपरं तदानीं संशयविपर्ययादिष्वप्रमाणेषु ज्ञानत्वं न स्यात् । प्रमारूप उपाधिरुत्पद्यते, न चासौ स्वत ए[3]वोत्पद्यते । तथा हि प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वे सति तद्विशेषत्वात् [4]अप्रमावत् । यदि तु तावन्मात्राधीना भवेत् अप्रमाऽपि प्रमैव भवेत्, अस्ति हि तत्र ज्ञानं हेतुः, [5]अन्यथा ज्ञानमपि सा न स्यात् । ज्ञानत्वेऽप्यतिरिक्तदोषानुप्रवेशादप्रमैवेति चेत्, एवं तर्हि दोषाभावमधिकमासाद्य प्रमापि जायेत नियमेन तदपेक्षणात् । अस्तु दोषाभावोऽधिको भावस्तु नेष्यते इति चेत् ; भवेदेवं यदि दोषैर्भावैरेव भवितव्यम्, न त्वेवं विशेषादर्शनादेरभावस्यापि [6]दोषत्वात् । कथमन्यथा ततः संशयविपर्ययौ ? ततस्तदभावो भाव एवेति स कथं नेष्यते इति प्रामाण्यं प्रति यथा दोषाभावस्य तथा वक्तृगुणस्यापि कारणत्वम् । अप्रामाण्यं प्रति यथा दोषस्य तथा वक्तृगुणाभावस्यापि कारणत्वमिति सर्वथा दुःपरिहरम् ।

एवं प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् । यदि तु स्वतो ज्ञायते, कदाचिदपि प्रामाण्यसंशयो न स्यात् ज्ञानत्वसंशयवत् । ननु स्वतोऽपि

---

1 कर्ता–कि । 2 ददातिविमुक्तित्वात्–कि. क । 3 एव ज्ञायते–जे; जायते–पा० १. पु ।
4 अप्रमावत्–इति १. पु. नास्ति । 5 अथान्यथा–कि. क । 6 हेतुत्वाद् दोषत्वात्–कि. क ।

ज्ञास्यते, सन्देहसामग्रीसन्निपातात् सांशयिकमपि भविष्यति, विपक्षे किं बाधकमिति चेत्; नैतदेवम्, न हि साधकबाधकप्रमाणभावमवधूय समानधर्मदर्शनादेवासौ, तथा सति [1]तदनुच्छेदप्रसङ्गः। प्रमाणवदप्रमाणेऽपि [2]तत्प्रवृत्तिदर्शनाद्भवति शङ्का इति चेत्; तत् किं प्रमाणज्ञानोपलम्भेऽपि न तत्प्रामाण्यमुपलब्धम्, प्रमाणज्ञानमेव वा नोपलब्धम्? आद्ये कथं स्वतः प्रामाण्यग्रहः प्रत्ययप्रतीतावपि तदप्रतीतेः। द्वितीये तु कथं शङ्का? धर्मिण एवानुपलब्धेरिति। झटिति प्रचुरतरसमर्थप्रवृत्तेरपि न स्वतः प्रामाण्यम्, अन्यथैवोपपत्तेः। प्रवृत्तिकारणमिच्छा, तत्कारणमिष्टाभ्युपायताज्ञानम्, तत्कारणमपि तज्जातीयतालिङ्गानुभवः इत्यादि स्वकारणप्राचुर्यादेव सङ्गतम्। न तु प्रामाण्यग्रहस्य क्वचिदप्युपयोगः। न चानवस्था प्रामाण्यस्य अवश्यवेद्यत्वानभ्युपगमात्। तथात्वे वा उभयोरपि समत्वादिति॥

(२५८) प्रसिद्धाभिनयस्य चेष्टया प्रतिपत्तिदर्शनात्तदप्यनुमानमेव॥

यद्यपि शब्दानन्तरमुपमानमन्तर्भावयितुमुचितं, तथापि शब्दे एव चेष्टाप्रवेशः [3]समयबलप्रवृत्तेः। शब्द एव शब्दव्यवहारो लौकिकः प्रायिकत्वात् चाक्षुषे ज्ञाने [4]दर्शनव्यवहारवदिति केचित्; तदभिसन्धाय शब्दप्रस्तावे एव चेष्टोपन्यास इति भावः। अन्ये तु पृथगेव चेष्टा प्रमाणमित्याहुः। नह्यत्र धूमाग्निवन्नियताविनाभावोपलम्भः, नापि घटपटादिवन्नियतसङ्केतोपलम्भः, किन्तु ऊर्ध्वतर्जनीभागविन्यासाद् दशसङ्ख्याप्रतिपत्तिः क्वचिदेव केषाञ्चिदेव भवतीति कथमिव नातिरिच्यते। तदेतदुभयमपि दूषयति **प्रसिद्धाभिनयस्ये**ति। प्रसिद्धो व्याप्त्या गृहीतोऽभिनयः संस्थानविशेषः सङ्केतविशेषो येन पुरुषेण तस्य चेष्टया कायिकव्यापारेण प्रतिपत्तिदर्शनात् प्रतिपत्तिदर्शनरूपत्वात्। तदपि [5]प्रतिपत्तिदर्शनमुपलभ्यमानं ज्ञानमनुमानमेव, अनुमानफलमेवेत्यर्थः। अथवा तदपि चेष्टारूपमप्यनुमानमेवानुमाकरणमेव शब्दस्मृत्यवान्तरव्यापारं [6]प्रति विशेषः।

इदमत्राकूतम्। सति चेष्टायाः प्रामाण्ये तदीयप्रवेशश्चिन्तनीयः [7]प्रमाणमेव त्वसौ न भवति। द्विविधा हि सा [8]कृतसमयाकृतसमयभेदात्। तत्र कृतसमया तावच्चेष्टाऽभिप्रायस्थशब्दस्मरणमात्रोपयोगिनी लिपिवत्। शब्द एव चेष्टयोत्पादितस्मरणसमारूढः प्रमाणमर्थे। न च स्मृत्युत्पादनात् शब्दविषयमेवास्याः प्रामाण्यं, प्रमाफलस्य तथात्वात्।

---

1 तदनुच्छेदप्रसङ्गात्–कि. क। 2 तत्प्रतिपत्ति–कि. क। 3 समबल–कि. क। 4 दर्शनदिति–कि. क। 5 प्रतिदर्शन–कि. क। 6 तदिति विशेषः–कि. क। 7 प्रामाण्य–कि. क। 8 कृताकृतसमय–कि. क।

न च स्मृतिरेवास्यावान्तरव्यापारः। यदि हि चेष्टोपधानमन्तरेणावगतोऽपि शब्दो नार्थं गमयेदेवमपि सम्भवेत् न चैतदस्ति। नन्वेवं सति चेष्टयैडमूकस्य व्यवहारानुपपत्तिः? न ह्यसौ ततः शब्दस्मृतिमान् अगृहीतसमयत्वात् इति चेत्; अत एव तं प्रति समयबलेन शब्दवदर्थेऽपि चेष्टायाः कुण्ठत्वमेव। व्यवहारस्तु अन्वयव्यतिरेकाभ्यां नियतविषयाविनाभावस्य [1]अग्रहे प्रवृत्तिनिवृत्त्यौपायिकाभिप्रायानुमानादेडमूकस्य करितुरगयोः कशाङ्कुशाभिघातादेवेति।

अकृतसमया चेष्टा न प्रमाणान्तरमविनाभा[2]वाभावात्। न हि यत्र धूमस्तत्राग्निरित्यनौपाधिकसम्बन्धवद् यत्रोर्ध्वतर्जनी तत्र दशसङ्ख्यापदार्थस्मरणमिति नियमः, भयोपदर्शनादिषु व्यभिचारात्। स्मारयतु वा पदार्थान्, तथापि न प्रमाणम्। द्विधा हि सा समयप्रकारभेदात्। कृत्यन्वयिनी ज्ञप्त्यन्वयिनी च। तत्र कृत्यन्वयिनी प्रयोजकाभिप्रायं स्मारयन्ती प्रवर्तयति, तु न किञ्चित्प्रमापयति घटीप्रहरकशङ्खध्वनिवद्, अतो न प्रमाणमेव। ज्ञप्त्यन्वयिनी कारकेषु कर्तृकर्मादिरहिता केवलप्रातिपदिकार्थप्रधाना यथा आकुञ्चितहस्ता[3]ह्वानादागच्छेति। तथापि गौरश्व इत्यादिपदैरिव स्वतन्त्रेषु पदार्थेषु स्मारितेषु परस्परमन्वयायोगः। पदैकदेशविभक्तिविशेषवच्चेष्टैकदेशविशेषात् प्रकरणविशेषाद्वा कारकादिस्मृतिनियम इति चेत्; न, चेष्टैकदेशेऽपि विशेषाभावात्। नह्यतीतानागत[4]वर्त्तमानादिप्रतिपादकं चेष्टैकदेशविशेषं पश्यामः। प्रकरणादयस्तु विषयविशेषे शब्दादीन्नियमयन्ति, न तु कारकार्थे कालविशेषे नियमयन्ति, तथात्वे वा 'गौरश्व' इत्यादावपि प्रकरणादिभिः कर्मत्वादीनुन्नीय विवक्षितानुव्यवसायः स्यात्। नहि चेष्टाकलापे प्रकरणादयः कारकविशेषा[5]नाक्षेप्तुमलम्।

ननु पदकदम्ब इत्यस्ति नियमः तथा च कालसंख्याविशेषप्रतिपादकविभक्तिसमभिव्याहारवैयर्थ्यप्रसङ्गः। कथं तर्हि ततो व्यवहारविशेषाः? संशयप्रतिभयोरन्यतरस्मात् विशेषानुपलम्भेपि दूरवर्त्तिनि समानधर्मिणि स्थाण्वर्थिन इवेति। तस्मादुभयथापि चेष्टा न प्रमाणम् तदिदमुक्तं **कृताभिनयस्ये**ति। अकृताभिनयतच्चेष्टायाः प्रामाण्यसम्भावनैव नास्ति, कृताभिनयस्य तु चेष्टा स्वरूपतो न प्रमाणं तथापि संशयज्ञानवल्लिङ्गतया प्रमाणमित्यर्थः॥

(२५९) आप्तेना[6]प्रसिद्धगवयस्य गवयस्य गवा गवयप्रतिपादनादुपमानमाप्तवचनमेव॥

---

1 'अग्रहे' इति कि. क पुस्तके नास्ति। 2 मविनाभावात्–कि. क। 3 हस्ताग्राना°–जे. क। 4 वर्त्तमानपाकादि–जे। 5 नाज्ञप्तुमलम्–कि. क। 6 प्रसिद्धस्य।

उपमानमन्तर्भावयति **आप्तेनेति**। आप्तेन प्रसिद्ध[1]गोगवयसादृश्येन प्रसिद्ध[2]समयस्य अज्ञातगवयस्य कीदृग्गवय इति जिज्ञासावतो गवा गोसादृश्येन गवयशब्दवाच्यस्य प्रतिपादनात् 'यथा गौस्तथा गवयः' इति आप्तवचनमेवातिदेशवाक्यमेवोपमानं प्रमाणमित्यर्थः। वाक्यादेव सञ्ज्ञासञ्ज्ञिसम्बन्धपरिच्छेदस्यापि सिद्धेः। तथा हि न तावदस्य विषयः सादृश्यपदव्यपदेश्यं पदार्थान्तरमेव सम्भावनीयम्, सादृश्यस्य सामान्यानतिरेकात्। भूयोवयवसामान्ययोग एव हि सादृश्यम्। न चैतत् सदृशोऽसाविति ज्ञा[3]नं न प्रत्यक्षमिन्द्रियासम्बन्धत्वात् विशिष्टाननुभवेन चास्मरणरूपत्वादुपमानं प्रमाणमिति वाच्यम्, तथा सति एतद्विसदृशोऽसावित्यस्याप्युपमानत्वापत्तेः। [4]सादृश्यैकनियतं चैतत्। अथैतदर्थापत्तिरेवेति मनोरथः, तथा च कृतमस्मास्वपि विद्वेषेणेति। सञ्ज्ञासञ्ज्ञिसम्बन्धपरिच्छेदः प्रत्यक्षाद्यसाध्यत्वादुपमानफलमिति चेत्; न; वाक्यादेव समयपरिच्छेदोपपत्तेः 'यः खलु गोसदृशस्तस्य गवयशब्दः सञ्ज्ञा' इति वाक्यादेवानेन समयस्य परिच्छिन्नत्वात् केवलमिदानीं प्रत्यभिजानाति 'अयमसौ' इति।

भवेदेवं यदि सादृश्यं शब्दप्रवृत्तिनिमित्तं स्यात्, तथा सत्यप्रतीतगूनामव्यवहारप्रसङ्गात्। न चोभयमपि निमित्तम्। [5]स्वयंप्रतीतसमयसङ्क्रान्तये अतिदेशवाक्यप्रयोगानुपपत्तिरिति चेत्; न; 'गवय'शब्दे वृद्धव्यवहारात् गवयत्वे व्युत्पन्नो यदि वा सादृश्ये इति कथमेतन्निर्द्धारणीयम्? ननु मानमनिद्धार्यताम्, तथाप्यापाततः सन्दिहानत्वात् एतावतैव वाक्यफलमिति चेत्; न; पूर्वं निमित्तानुपलब्धेर्न फलसिद्धिः, इदानीन्तु तस्मिन्नुपलब्धे तदेव वाक्यं स्मृतिसमारूढं फलिष्यति; अध्ययनसमयगृहीत इव वेदराशिः अङ्गोपाङ्गपर्यवदातस्य कालान्तरे। न च वाक्यं वाक्येन स्वार्थस्य प्रागेव वा बोधितत्वात् पर्यवसितम् इति; गोसदृशपदस्योपलक्षणनिमित्तयोरन्यतरत्तात्पर्यसन्देहात्। इदानीन्तु गवयत्वे[6]ऽधिगते तर्कपुरस्कारात् सादृश्यस्योपलक्षणतायां व्यवस्थापितायां 'गङ्गायां घोषः' इतिवत् वाक्यादेवान्वयप्रतीत्युपपत्तेः।

तदत्र निपुणाः प्रत्यवतिष्ठन्ते—नन्वेवमपि वाक्यं पर्यवसितमेव तथा हि 'गोसदृशो [7]गवयशब्दवाच्यः' इति सामानाधिकरण्ये[8]नैवान्वयोपपत्तौ विशेषसन्देहेऽपि वाक्यस्य

1 प्रसिद्धसादृश्येन–कि. क। 2 गवयस्य–कि. क। 3 ज्ञानमिन्द्रियजमिन्द्रियासम्बन्धत्वात्–जे। अत्र 'न चैतत्' इत्यस्य सम्बन्धः 'उपमानं प्रमाणं वाच्यम्' इत्यनेनास्ति अतो नात्र 'न चैतत् सदृशोऽसाविति ज्ञानमिन्द्रियजमिन्द्रियसम्बन्धत्वात्' इति पाठे शुद्धिभासेऽपि अर्थदृष्ट्या मुद्रितः पाठ एव साधुः प्रतिषेधद्वयस्यात्रासम्बन्धत्वात्; सम्पादकः। 4 सादृश्यनियतं–कि. क। 5 स्वयंप्रतीतसमयसम्बन्धे–कि. क। 6 ऽवगते–जे। 7 गोसदृशो गवय इति–कि. क। 8 सामानाधिकरण्यमात्रेणैव–जे।

पर्यवसितत्वेन मानान्तरोपनीतानपेक्षणात् । भवति हि रक्तारक्तसन्देहेऽपि पटो भवतीति वाक्यपर्यवसानम्, अन्यथा वाक्यभेदे दोषात् । यत्र तु 'गङ्गायां घोषः' इत्यादौ पदार्था एवान्वयायोग्यस्तत्र प्रमाणान्तरो[1]पनीतेनाप्यन्वयः । [2]तस्माद् 'गोसदृशो गवयशब्दवाच्यः' इति [3]वाक्यान्निश्चितेऽपि सामान्यविशेषवाचकत्वेऽस्य मानान्तरमनुसरणीयम् । न च तदनुमानादिकं सम्भवतीत्युपमानमेव तदाचक्षत इति साधु विरचितम् ।

एतत्तु मूहूर्तमात्रमवधीयताम् । द्विविधं हि सामानाधिकरण्यम्, शाब्दमार्थं च । तत्र न तावच्छाब्दसामानाधिकरण्यमात्रेणान्वयोपपत्तिः; 'माता मे वन्ध्या' इत्यादिष्वपि प्रसङ्गात् । नापि क्रियाकारकयोः परास्परमपेक्षामात्रेण, तथा सति 'गङ्गायां जलम्' इतिवद् 'गङ्गायां घोषः' इत्यात्रापि परस्परमाधाराधेयभावप्रतीतावन्वयप्रसङ्गात् । आर्थं तु सामानाधिकरण्यं यथा घोषपदार्थपर्यालोचनायामिह दुर्लभं तथा 'गोसदृशो गवय' इत्यत्रापि दुर्लभमेव । गोसादृश्यं गवयपदप्रवृत्तिनिमित्तं न भवतीत्यायुष्मतैव निष्टङ्कितम् । [4]उपलक्षणमात्रेण चोदाहृतेन गोसादृश्येन यदुपलक्षणीयं गवयत्वं तेन सह यद्यन्वयः [5]तदानीं गङ्गापदेनाप्युपलक्षणी[6]यतीरपदेनैव सह घोषस्यान्वयोपपत्तौ कथमन्वयवैधुर्यम् । तस्माद् वास्तवसामानाधिकरण्यविरहादपर्यवसन्नं वाक्यमेवंविधां प्रमां करोति, तच्चानुमानशरीरमेवेति ॥

(२६०) दर्शनार्थादर्थापत्तिर्विरोध्येव । श्रवणादनुमितानुमानम् ॥

अर्थापत्तिमन्तर्भावयति **दर्शनार्थापत्तिरि**ति । दृश्यते उपलभ्यते इति दर्शनमुच्यते । उपलभ्यते हेयोपादेयत्वादिना विषयीक्रियत इत्यर्थः । दर्शनं चासावर्थश्चेति दर्शनार्थः । दृश्यमानोऽर्थो यत्रानुपपद्यमानः सन्नर्थान्तरं कल्पयति सा दर्शनार्थापत्तिः, यथा 'जीवन् देवदत्तो गृहे नास्ति' इति । इह हि गृहासत्त्वं दृढतरप्रमाणोपलब्धं जीवता क्वापि भवितव्यमिति सामान्यतः प्रवृत्तानुमानविरोधादन्यथानुपपद्यमानमर्थान्तरं बहिःसत्त्वरूपं कल्पयतीति तदेतद्दूषयति **विरोध्येवे**ति । विरोध्यनुमानमेवेत्यर्थः । यद्यपि जीवतो गृहाभावस्य बहिःसद्भावो न विरोधी किन्त्वनुकूल एव, उपपादकत्वात्; तथापि जीवनगृहासत्त्वयोः परस्परविरोधित्वादनुमानं बिरोध्यनुमानम् ।

इदमत्राभिसंहितम् । न तावदनियम्यानियामकयोः परस्परमुपपाद्योपपादकभावः, अतिप्रसङ्गात् । अथानेन सहैव स्थितिः, अनेन [8]विना चानवस्थानमस्य स्वभावादेवा-

1 प्रमाणान्तरोपनिपातेनाप्यन्वयः–कि. क । 2 गोसदृशस्य तस्माद् गवयशब्दो वाचक पा. ४. पु; जे । 3 निश्चयेऽपि–जे । 4 उपलक्षणता–जे । 5 तदा–कि. क । 6 तीरेणैव–कि । 7 दर्शनार्थापत्ति–दे; किरणावलीसम्मतोऽयं पाठः । 8 विनाचानवस्था यस्य स्वभावादेव मिलितम्–कि. क ।

वसितम् ; एवं तर्हि व्याप्तिरेवेयमन्व्यव्यतिरेकमुखनिरूप्येति कृत[1]मर्थान्तरत्वग्रहणेन । न च सत्यप्यविनाभावे तज्ज्ञानवैधुर्यात् प्रमाणान्तरत्वम्, अनुपपत्तिप्रतिसन्धानस्याप्यवश्याभ्युपगन्तव्यत्वात्, अन्यथाऽतिप्रसङ्गात्; अर्थापत्त्याभासानवकाशाच्च । 'यदाहमिह तदा नान्यत्र' यदा वाऽन्यत्र तदा नेह 'इति व्याप्तिग्रहस्य च प्रत्यक्षत एव सुकरत्वात् । न चाविनाभावनिश्चयेप्यपक्षधर्मत्वादर्थापत्तित्वम्, व्यधिकरणेनाविनाभावस्यैव निश्चयायोगात् । न चात्र प्रमाणद्वयविरोधोऽपि तथा सति रज्जुसर्पवद् एकस्य मिथ्यात्वप्रसङ्गात्, विभिन्नविषयत्वाच्च । क्वाप्यस्तीति सामान्यतो गेहस्यापि प्रवेशादेकविषयताप्यस्तीति चेत्, यद्येवं क्वचिदस्ति क्वचिन्नास्तीतिवन्न विरोधः । नन्वत्रापि विरोध एवार्थापत्त्या चोभयोरप्युपादानाद्विषयव्यवस्थेति चेत्; न; विभिन्नदेशतयाऽनयोः [2]सर्वत्रोपलम्भव्यतिरेकेणैकविषयतया विरोध एव न सङ्गच्छते, तच्च व्याप्तिशरीरमेवेति । प्रसिद्धानुमानसाधारणं चैतत् । न हि धूमोऽपि विना [3]वह्निनोपपद्यते; धूमाद् वह्निना भवितव्यमनुपलब्धेश्च न भवितव्यमिति । प्रमाणद्वयविरोधे चार्वाग्भापरभागव्यवस्थापनस्य सफलत्वात् । अनुमानाभावे विरोधस्यैवासिद्धेरिति चेत्; न; व्याप्तिग्राहकेण प्रमाणेन विरोधस्योक्तत्वात् तस्मात् सुष्ठूक्तं विरोध्यनुमानमेवेति ।

ननु तथापि श्रुतार्थापत्तिः पृथगस्तु केवलव्यतिरेक्यादिवत् किञ्चिद्वैधर्म्यादित्याह—**श्रवणा**दिति । एकस्य शब्दस्य श्रवणादनुपपद्यमानतया यच्छब्दान्तरकल्पनं सा श्रुतार्थापत्तिः, यथा 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति श्रवणाद् 'रात्रौ भुङ्क्ते' इति वाक्यकल्पना, शाब्दी ह्याकाङ्क्षा शब्देनैव परिपूर्यते । न हि भवति 'किं पचति' इत्युक्ते 'कलायम्' इति शब्दप्रयोगमन्तरेण प्रत्यक्षोपदर्शिते कर्मणि श्रोतुराकाङ्क्षानिवृत्तिः । क्वचिद् [4]भ्रूसङ्केतादावपि चेष्टाविशेषादभिप्रायस्थशब्दविशेषानुमानादेव तन्निवृत्तेः ।

ननु वाक्येन प्रागेव स्वार्थस्य बोधितत्वात् किमत्रानुपपन्नम्? वाक्यस्वरूपमेव 'गौरश्वः' इतिवत् परस्परमन्वयाभावात् इति दूषयति **अनुमितानुमानमिति** । लिङ्गभूताद्वाक्यादनुमितेन पीनत्वेन तत्कारणीभूतं हि रात्रिभोजनमनुमीयते, अत्रापि एतदभिसंहितम्, श्रुतार्थापत्तिस्तावत् स्वसिद्धान्तविरोधिनी, तथाहि सिद्धस्तावदर्थः प्रमाणस्य विषयो न तु तेनैव कर्तव्यः । न च 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र 'रात्रौ भुङ्क्ते'।

1 मर्थान्तरत्वग्रहणेति–कि. क; अतिप्रसङ्गात् तथा चानेन व्याप्तिरेवेयमन्वयव्यतिरेकमुखेन निरूप्येति कृतमर्थान्तरत्वग्रहेण–पा. २. पु । 2 सर्वत्र सम्भवव्यतिरेकेण–कि. क । 3 वह्निनोत्पद्यते कि. क । 4 वधूसङ्केतादावपि–कि. क ।

इति वाक्यशेषोऽस्ति, अनुपलम्भबाधितत्वात् । उत्पत्तिव्यक्तिसामग्रीताल्वादिव्यापारविरहादयोग्यस्याशङ्कितुमशक्यत्वाद् । तस्मादभिप्रायस्थ एव परिशिष्यते गत्यन्तराभावात् । वेदरूपे च वाक्ये वक्तुरभावात् स चेदभिप्रायो नास्ति, नास्ति श्रुतार्थापत्तिरिति । न च लोके तद् व्युत्पादनं निष्प्रयोजनत्वात्, लौकिकवैदिकयोर[1]ल्पत्वाच्च । तस्मात् स्वीकरणीयं वेदस्य पौरुषेयत्वं प्रतिहर्तव्या वा श्रुतार्थापत्तिरिति दुरुत्तरं व्यसनम् । यत्पुनः शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते इति, किमेतावता यस्य यथा नियमस्तस्य तथैव गमकत्वम्, अर्थवच्छब्देऽपि तस्याविशेषात् । तस्मात् सूक्तम् **अनुमितानुमानम्** इति ॥

(२६१) सम्भवोऽप्यविनाभावित्वादनुमानमेव ॥

सम्भवमन्तर्भावयति—**सम्भवोऽपी**ति । द्विविधो हि सम्भवो योग्यताकारो निश्चयाकारश्च । तत्र प्रथमोऽप्रमाणमेव अनिश्चायकत्वात् । यथा [2]सम्भवति ब्राह्मणे तपः, सम्भवति क्षत्रिये शौर्यम् । द्वितीयस्तु यथा सम्भवति शतं सहस्रे, सम्भवति पुण्यं पुराणेष्विति । तदर्थमाह—**अविनाभावित्वादि**ति । सहस्रं हि शतेनाविनाभूतं, न हि कार्यं कारणेन विना भवतीत्यनुमानमेव ॥

(२६२) अभावोऽप्यनुमानमेव, यथा 'उत्पन्नं कार्यं कारणसद्भावे लिङ्गम्, एवमनुत्पन्नं कार्यं कारणासद्भावे लिङ्गम्' ॥

स्यादेतत्; उपमानादौ प्रमाणान्तरप्रसक्तिसम्भावनया यत् तत्रान्तर्भावचिन्तनं तदुचितमेव, यत्र तु प्रमाणान्तरस्यैव प्रसक्ति[3]निरोधस्तदभावाख्यं प्रमाणमवश्यमभ्युपगन्तव्यमत आह—**अभावोऽप्यनुमानमेवे**ति । अपि शब्दात् क्वचित्प्र[4]त्यक्षमेवेत्यर्थः । नन्वभावस्य नेन्द्रियेण सन्निकर्षो नापि सत्तामात्रेण व्याप्रियमाणस्य [5]तस्य [6]क्वचित् लिङ्गत्वमत आह—**यथोत्पन्नमि**ति । यथोत्पन्नं कार्यं कारणस्य सामग्र्याः सद्भावे लिङ्गमेवमनुत्पन्नं कार्यं कार्यप्रागभावः कारणाभावे सामग्र्या अभावे लिङ्गं [7]ज्ञापकम् । स चाभावः क्वचित्प्रत्यक्षः क्वचिच्चानुमानिक इति लोकसिद्धमेवेत्यर्थः ।

ननु इह भूतले घटो नास्तीति प्रतीतेः साक्षात्कारित्वमसिद्धम्; प्राङ्नास्तितादिष्विन्द्रिय[8]व्यापारव्यतिरेकेणापि तथाविधाभावप्रतीतेरिति चेत्; न; वैजात्यात् । न हि

---

1 अनन्यत्वाच्च–जे । 2 सम्भवति क्षत्रिये शौर्यं सम्भवति च ब्राह्मणे तपः–कि. क । 3 विरोध–कि क । प्रमाणस्यैव प्रसक्तिनिषेधः–पा० २. पु । 4 प्रत्यक्षोऽपीत्यर्थः–जे । 5 'तस्य' –कि. क, पुस्तकयोर्नास्ति । 6 कस्यचित्–पा० ४. पु । 7 ज्ञापकः–पा० ४. पु । 8 'व्यापार' इति कि. क पुस्तकयोर्नास्ति ।

साक्षात्कृत्यनुमित्योरेकजातीयत्वम् । तथा व्यभिचारे वा साक्षात् परिदृश्यमानमपि वह्निज्ञानं न प्रत्यक्षतामियात् । तत्राप्यनुमीयमानवह्न्यादाविन्द्रियव्यभिचारसम्भवात् । साक्षात्कारिजातीये चाभावज्ञाने तस्य वज्रलेपायमानत्वात् ।

अभावज्ञानमानुमानिकमित्येतदेवासङ्गतम् तथाविधलिङ्गाभावादित्यपि न वाच्यम्; भवति हि तद्भूतलं तदा चैत्राभाववत्, एक ज्ञानग्रहणयोग्यस्य ज्ञायमानत्वेऽपि तत्र चैत्रवत्तया अज्ञायमानत्वादिति । न च प्रदेशान्तरे घटवत्तया अज्ञायमाने प्रदेशान्तरे च तद्वत्तया ज्ञायमानेन भूतले नेदमनैकान्तिकमिति वाच्यम्; तत्रेतिपदेन विशेषणात् । न चैवं सति ज्ञानाभावस्यात्मधर्मत्वेन भूतलधर्मत्वाभावाद् व्यधिकरणत्वम्, भूतलज्ञानाभावयोर्विषयविषयिभावलक्षणसम्बन्धस्य विद्यमानत्वात् । यत् पुनरत्र प्रलपितं ज्ञानाभावो न तावद्भूतलमात्रेण निरूप्यते, घटवत्यपि तथाभावप्रसङ्गात्, घटाभाववद् भूतलनिरूप्यत्वपक्षेऽन्योन्या[1]श्रयप्रसङ्गात्, द्वितीयेऽप्यन्योन्याश्रयः [1]प्रवृत्ते ह्यनुमाने तत्राभावग्रहणं गृहीते च तस्मिँस्तस्य लिङ्गतायामनुमानप्रवृत्तिः । परस्य तु व्यधिकरणाप्यनुपलब्धिर्व्यवहारयतीति । तदसत् वस्तुगत्या घटाभाववतैव भूतलमात्रेण [2]घटाभावस्य निरूपणाभ्युपगमात् । न चातिप्रसङ्गः तत्र घटाभावात् । न चान्योन्याश्रयः सत्तामात्रेणोपयोगात् । यदि घटाभाववता भूतलेनानुपलब्धिर्निरूप्येत तदा विपरीतस्यैव घटसम्बन्धस्य प्रसङ्गः स्यात् । तस्य जात्युत्तरत्वमेव, न चेद् एवम् अनुपलब्धिस्वीकारेऽप्यप्रतीकारादिति ।

स्यादेतत्, इन्द्रियान्वयव्यतिरेकानुविधाने सत्यपि तेन सहाभावस्यायोग्यत्वेन सम्बन्धाभावात् अधिकरणमात्रनिष्ठतया तत् सङ्कोच्यते यथा पर्वतोऽयं वह्निमान् धूमव[3]त्त्वादित्यत्र इति चेत्; भवेदेवं यदि रूपादिष्वपि चक्षुरादेर्योग्यतामीक्षामहे कार्यदर्शनात्तु तत्कल्पनमिहापि समानम् । न च योग्यताया अनिश्चयमात्रेण स्फुटतरसाक्षात्कारापह्नवः, तथा सत्यन्योन्याश्रयप्रसङ्गात् । कुतो वाऽनुमीयमानवह्न्यादावपि चक्षुर्न प्रवर्तते? तस्य सम्बद्धवर्तमानविषयत्वात् वह्नेश्च व्यवधानवशेनासम्बद्धत्वादिति चेत्; नन्वेतदेव कुतः? [4]अव्यवधाने साक्षात्कारिप्रत्ययप्रसङ्गादिति चेत्; तर्हि यत्र साक्षात्कारस्तत्राव्यवधानमिति कृतमस्मासु मिथ्याभिनिवेशेन । यद्यधिकरणग्रहणे तदुपक्षीणं स्यात् अन्धस्यापि त्वगिन्द्रियोपनीतघटादौ रूपविशेषाभावप्रतीतिः स्यात् । अस्ति हि तस्याधिकरणग्रहणमस्ति च प्रतियोगिस्मरणं अस्ति च श्यामे रक्तत्वस्य योग्यस्याभावोऽनुपलब्धिश्च । अधिकरणग्राह-

1 ऽन्योन्याश्रयः कि. क. 'प्रसङ्गात् द्वितीयेप्यन्योन्याश्रयः' इति तु नास्ति । 2 ज्ञानाभावस्य –कि. क । 3 धूमवत्त्वादिति चेत्–कि. क । 4 व्यवधाने–कि. क ।

केन्द्रियग्राह्याभाववादिनोऽपि समानमेतद् इति चेत्, न; प्रतियोगिग्राहकेन्द्रियग्राह्योऽभाव इत्यभ्युपगमात्। ममापि प्रतियोगि[1]ग्राहकेणेन्द्रियेणाधिकरणग्रहणे 'अनुपलब्धिः प्रमाणम्' इत्यभ्युपगम इति चेत्; न; वायौ त्वगिन्द्रियोपनीते रूपाभावप्रतीत्यनुदयप्रसङ्गात्। तथापि तत्तत्र सन्निकृष्टमिति चेत्; हन्तैवं तदन्यत्र चरितार्थमिन्द्रियमवश्यापेक्षणीयं च रूपाभावाद्यनुभवेनेति सिद्धं नः समीहितम्।

यत्पुनरेकाकिभूतलस्वरूपातिरिक्तमभावाख्यं प्रमेयमेव नास्तीति; तदसत् एकत्वसङ्ख्याया घटेऽपि सति तदवस्थत्वात्। अद्वितीयमात्रस्य व्यभिचारात्। [2]पटद्वितीये भूतलेऽघटव्यवहारवत् [3]अद्वितीयतामात्रेण च घटाभाववत् पटाभावव्यवहारस्यापि प्रसक्तेरविशेषात्। प्रतियोगिविशेषाद्विशेषो दृश्यमाने स्मर्यमाणे वा प्रतियोगिनि तथाभूतभूतलस्याभावाव्यवहारहेतुत्वादिति चेत्; कस्य पुनः प्रतियोगी घटः? न तावद् भूतलतद्विज्ञानयोः, सह सम्भवात् परस्परमवध्यत्वाच्च। नाप्यभावव्यवहारस्य, असत्यप्यभावे सघटेऽपि घटाभावव्यव[4]हारस्यापि प्रसञ्जितत्वात्।

यत्पुनः कीदृशेन भूतलेनाभावो निरूप्यते इति, तदसत्; भावव्यवहारस्यापि लोपप्रसङ्गात्। तथा हि घटस्य व्यवहारो न तावद्भूतलमात्रेण निरूप्यते अघटवत्यपि प्रसङ्गात् नापि सद्वितीयेन पटशकटवत्यपि प्रसङ्गात्। → [5]व्यवहर्तव्य[6]द्वितीयेनेति चेत्; तत्रैव संशयः। [7]तथापि किं विरोधिना भूतलेन सम्बद्ध्यते अनुकूलेन वा? विरोधित्वादेव न प्रथमः। द्वितीये तु घटवत् [8]तादृग्-भूतलेनैव निर्वाह इति ← व्यवस्थानुपपत्तेश्च घटवत्ता तन्निरूपेण घटसम्बन्धात् प्राक् तत्सम्बन्धानुपपत्तेः। सति सम्बन्धे वा पश्चात् घटस्वीकारवैयर्थ्यप्रसङ्गात्। तस्माद् भावव्यसनमपि त्यज्यतां स्वीक्रियतां वाऽभावः प्रमेयमिति।

स च प्रथमतो द्विधा, संसर्गाभावः तादात्म्याभावश्च। संसृज्यमानप्रतियोगिनिरूप्योऽभावः संसर्गाभावः। तदात्मत्वाभिमानप्रतियोगिनिरूप्यश्च तादात्म्याभावः। न च स्तम्भेऽधिकरणे पिशाचस्य तादात्म्यं नास्तीति अयमपि संसर्गाभावः एवेति वाच्यम्; न वै स्तम्भपिशाचयोस्तादात्म्यं प्रमाणसिद्धं किञ्चिदस्ति यत्प्रतिषेधनीयम्; किन्तु स्तम्भात्मतया प्रसञ्जितस्य पिशाचस्यायं प्रतिषेध इति। संसर्गाभावः प्राक्प्रध्वंसात्यन्तभेदेन त्रिधा भिद्यते। चरमसामग्री[9]संनिपतितसमवायिकारणजातीये सम्भावितोत्पत्तिकस्य कार्यजातीयस्य स्वोत्पत्तेः प्राक् संसर्गाभावः प्रागभावः। तथाजातीये कारणे उत्पन्नस्य पश्चात् संसर्गाभावः

---

1 ग्राहकेन्द्रियेणा–कि. क। 2 घट द्वितीय–कि. क। 3 अद्वितीयमात्रेण–कि. क। 4 घटाभावस्य–पा० २ पु। 5 →← एतच्चिह्नस्थः पाठः २. पु० नास्ति। 6 द्वितीयमिति–जे। 7 'तथापि' इति कि क. पुस्तकयोर्नास्ति। 8 'तादृग्' इति कि. क. पुस्तकयोर्नास्ति। 9 निपतित–कि. क।

प्रध्वंसाभावः। सम्बन्धिमात्रे सम्बन्धमात्रस्य अनियतकालसंसर्गाभावोऽत्यन्ताभावः। तदनेनेह भूतले घटो नास्तीति व्याख्यातम्; घटत[1]त्संसर्गमात्रयोरत्यन्तनिषेधासम्भवेऽपि संसर्गविशेषव्यक्तेरत्यन्तमभावात्। न चाप्रसक्तप्रतिषेधः, सामान्यतस्तस्यापि प्रसक्तत्वादिति। स चायं नोत्पद्यते नापि विनश्यति। इतरेतराभावोऽपि सामान्यवदविनाशित्वान्नित्य इति ॥

(२६३) **तथैवैतिह्यमप्यवितथोपदेश एवेति।**

तथा ऐतिह्यमन्तर्भावयति—**तथैतिह्यमिति**। 'इति ह' इति निपातसमुदायः पुरावृत्ते वर्त्तते। तस्य भाव ऐतिह्यम्। यथा दूरनिर्दिष्टप्रवृत्तकप्रवादपारम्पर्यमैतिह्यम्। श्रुतिस्मृत्यादिवाक्यवत् प्रसिद्धप्रकृष्टवक्तृकं यन्न भवति। लोके च प्रसिद्धमबाधिताकारं प्रवादपरम्परया यदभिसन्धाय पठन्ति [3]आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनमिति। एतादृशं चावितथमेवेत्याप्तोपदेश एव। तथा चानुमान एवान्तर्भवतीति भावः ॥

(२६४) **पञ्चावयवेन वाक्येन स्वनिश्चितार्थप्रतिपादनं प[4]रार्थानुमानम्। पञ्चावयवेनैव वाक्येन संशयितवि[5]परीताव्युत्पन्नानां परेषां स्वनिश्चितार्थप्रतिपादनं परार्थानुमानं विज्ञेयम्** ॥

ननु सिद्धमनुमानम्, पञ्चावयवप्रयोगसहायता, तु [6]तज्ज्ञानस्यानुपपन्ना, तद्व्यतिरेकेणापि [7]स्वयमनुमानोदयात्। न च [8]स्वार्थे अप्रतिपन्न एवासौ, तथा सति परप्रतिपादनस्याप्यनुपपत्तेरत आह **पञ्चावयवेने**ति। अर्थ्यते गम्यतेऽनुमेयमनेन इत्यर्थो लिङ्गम्, तस्यार्थस्य स्वनिश्चितस्य साध्याविनाभावितया स्वयं गृहीतस्य प्रतिपाद्यतेऽनेनेति प्रतिपादनम्, प्रतिपादकं यत् परार्थं परसन्देहव्युदासार्थं तत् परार्थानुमानम्। केन रूपेण पुनस्तत्प्रतिपादकत्वं तदाह—**पञ्चावयवेन वाक्येने**ति। इत्थंभूतलक्षणे तृतीया, पञ्चावयववाक्यरूपं तदित्यर्थः। अथवा [9]स्वनिश्चितस्यानुमेयस्य प्रतिपादनं प्रतिपत्तिर्येन लिङ्गप्रतिपादनावान्तरव्यापारवता पञ्चावयवेन वाक्येन स्मृतिसमारूढेन परार्थं भवति तत्तथाभूतं वाक्यं परार्थानुमानमिति। न चैवं सत्यनुमेयप्रतिपत्तेः शाब्दत्वप्रसङ्गः, केवलस्य शब्दस्यानिमित्तत्वात्। न च प्रतिलिङ्गमात्रेण विरम्य व्यापाराभावो विभिन्नविषयत्वादिति।

1 घटतत्संसर्गभावयो–कि. क। 2 तथैतिह्यमपि–दे। 3 आचारात् स्मृतिं–कि. क। 4 परार्थानुमानं विज्ञेयम्–दे। 5 विपर्यस्तं–मु. भा। 6 तस्यानुपपन्ना–पा० ५. पु। 7 सुखमनुमानोदयात्–कि. क। 8 चात्रार्थे–कि. क। 9 सुनिश्चित–कि. क।

ननु बौद्धानां द्व्यवयववादिनामपि वाक्येन संव्यवहारो भवति अतस्तद्व्युदासार्थं स्वोक्तमेव विवेचयति **पञ्चावयवेने**ति । इतरव्यवच्छेदोऽवधारणार्थे, तच्च व्युत्पादिष्यते प्रकृतमर्थमधिकृत्य सन्दिग्धवद्विपर्यस्ताव्युत्पन्नयोरपि जल्पवितण्डाभ्यां गलितेऽहङ्कारे सन्दिग्धतामेव नीत्वा प्रतिपादनम् । इयाँस्त्वत्र विशेषः, कस्यचित् स्वरसवाही सन्देहः, कस्यचित्तु आहार्य इति । तदनेन सन्दिग्धप्रतिपत्तये पञ्चावयववाक्यमङ्गमेवेति दर्शितम् । नहि स्वयं स्वभ्यस्तशास्त्रस्य पु[1]स्तकोपादानमेकान्ततोऽनुपयुक्तमिति अनभ्यस्तस्यापि तथा सम्भवतीति भावः ।

पदानि पुनः परस्परान्वितं स्वार्थं बोधयन्ति । वाक्यार्थस्य लिङ्गमन्यथैवेति किमार्द्रकवणिजो वहित्रचिन्तया । न हि स्वातन्त्र्येण शब्दस्य प्रामाण्यमस्माभिरिष्यते किन्तु → [2]वक्तृज्ञानापेक्षया ← । न चान्विताभिधाने प्रमाणमस्ति, अन्वितार्थप्रतीतेरन्याप्युपपत्तेः । यत्र व्युत्पत्तिस्तद्वस्तुगत्या पदार्थान्तरान्वितमिति तु न प्रकृतोपयोगि । न हि यत्र चक्षुषः सामर्थ्यमधिगतं तद्वस्तुगत्या स्पर्शवदिति तद्वत्ताप्यस्य विषयः । आकाङ्क्षानुपपत्तिरस्तु न हि [3]सामान्यतोऽन्वितानवगमे अन्वयविशेषजिज्ञासा स्यादिति चेत्; न; दृष्टेरविशेषे जिज्ञासावदाक्षेपतोऽ[4]प्यनुपपत्तेः । शब्दमहिमानमन्तरेण यतः कुतश्चिदपि स्मृतेषु पदार्थेषु अन्वयप्रतीतिः स्यात् न चैवम्; ततः शब्दशक्तिरवश्यं कल्पनीया इति चेत्; आधुनिककविकाव्यानुपपत्तेः । न हि संसर्गविशेषमप्रतीत्य वाक्यरचना नाम । न च स्वोत्प्रेक्षायां चिन्तावशेन पदार्थस्मरणव्यतिरिक्तमन्यत् प्रत्यक्षादि सम्भवति । → [5]ततः स्मृतानां कविभिः संसर्गो नावगम्येत ← । न हि येन यन्नियमेनापेक्षते तत्र तेनावश्यं स्वशक्तिराधेया; तथा च सति कारकज्ञापकादिभिः कार्यज्ञेयादिषु शक्तिकल्पनागौरवस्य सर्वत्र दुर्वारत्वात् ।

स्यादेतत् । पञ्चावयववाक्यं तदर्थधियमाधत्त इत्यसङ्गतम्, निरवयवस्य हि स्फोटस्य शब्दरूपत्वात् । यद्यपि च नाप्रतिपादिनात् शब्दादर्थप्रतीतिः, अर्थप्रतीतौ च सत्यां तदन्यथानुपपत्त्या स्फोटाभिधानस्य प्रतिपत्तिः, इत्यन्योन्याश्रयग्रस्ततया नार्थापत्तिः प्रमाणम्; तथापि 'गोपदम्' इत्यभिन्नाकारावगाहि प्रत्यक्षमेव नानावर्णातिरिक्तमेकमवयव्यादिवदभिन्नार्थं स्फोटं साधयति । न चैतदौपाधिकम्, तदभावात् । न तावदेकधी-

---

1 पुस्तकोत्पादन–जे । 2 →← एतच्चिह्नान्तर्गतः पाठः जे. पुस्तके नास्ति । 3 सामान्यतोऽधिगमे विशेषजिज्ञासा–कि. क । 4 प्युपपत्तेः–कि. क । 5 →← एतच्चिह्नान्तर्गतः पाठः 'जे' पुस्तके नास्ति ।

विषयत्वमुपाधिः, अनुभवानां क्रमशालितया तत्प्रभवसंस्काराणां क्रमवत्त्वात् तज्जनितस्मृतीनामपि क्रमवत्त्वात् , अननुसंहितोपाधेरुपहितप्रत्ययायोगाच्च । [1]नाप्येकार्थप्रत्ययहेतुत्वमुपाधिः, अन्योन्याश्रयप्रसङ्गात् । प्रतीतेह्येकपदत्वे [[2]एकार्थप्रत्यय]हेतुत्वमवगते च तस्मिन् एकपदत्वसिद्धिरिति । अत एव नैकार्थसम्बन्धाख्यानमप्युपाधिः, तस्मादुपाधेरसंवेदनात् । वनादिप्रत्ययवदयं प्रत्ययो न भ्रान्त इति । अत्रोच्यते औपाधिक एवायमभिन्नार्थप्रत्ययः । सम्भवति च एकार्थप्रतीतिहेतुत्वमेवोपाधिः । न चान्योन्याश्रयत्वम्, पूर्वमेकपदत्वावधारणानभ्युपगमात् । [[3]एकार्थ]प्रतीतिहेतुत्वं च [4]वर्णानां क्षणिकत्वेऽपि स्मर्यमाणानां नियतानुपूर्वीविशिष्टानां यावन्तो यादृशा ये च इत्यादिपरिगृहीतानां सुकरमेव; अन्यथा तु स्फोटस्वीकारेऽपि समानत्वाद् इति कृतं विस्तरेण ।

पूर्वपूर्वपदस्मरणानुगृहीतमन्त्यपदं स्मर्यमाणं वाक्यं न पुनरनुभूयमानं क्रमवद्वर्णसमुदायस्य पदस्य श्रवणेन्द्रियजाना[5]नुभवगोचरत्वासम्भवात् । यथा च पूर्ववर्णानुस्मृतिनिचयसरितान्त्यवर्णानुभवस्य उपान्त्यान्त्यवर्णवस्तुस्मृत्यनुभवयोर्निरन्तरं द्रुतमुच्चार्यमाणवस्तुपक्षे विनश्यवदवस्थयोरुपान्त्यान्त्यानुभवयोः लब्धस्मृत्यनुभवरूपवैचित्र्यस्यैकस्य वा ज्ञानकारणत्वं न सम्भवति तत् सर्वं समानतन्त्रसिद्धत्वात् नेह प्रतन्यते । पदप्रक्रिया तु प्रथमवर्णज्ञानस्योत्पादः संस्कारस्योत्पद्यमानता इत्येकः कालः । ततः संस्कारस्योत्पादः तेनैव पूर्ववर्णानुभवसंस्कारसचिवेन द्वितीयसंस्कारस्योत्पद्यमानता प्रथमवर्णज्ञानस्य विनश्यत्ता इत्येकः कालः । ततः [6]संस्कारान्तरस्योत्पादः द्वितीयवर्णज्ञानस्य विनश्यत्ता प्रथमवर्णज्ञानस्य च विनाशः । अन्त्यवर्णानुभवस्योत्पादः [7]उत्पन्नेन च संस्कारान्तरेणान्त्यवर्णानुभवसहकारिणा पूर्ववर्ण[8]द्वयनिचयस्मरणस्योत्पद्यमानता इत्येकः कालः । ततः स्मरणस्योत्पादः, अन्त्यवर्णानुभवस्य विनश्यत्ता, द्वितीयवर्णज्ञानस्य नाशः, ततः समयस्मृतेरुत्पद्यमानता इत्येकः कालः । ततः समयस्मृतेरुत्पादः, स्मरणस्य विनश्यत्ता, अन्त्यवर्णानुभवस्य विनाशः, पदार्थप्रतीपत्तेरुत्पद्यमानता इत्येकः कालः । ततः प[9]दार्थप्रतीतेरुत्पत्तिः, स्मरणस्य विनाशः, सङ्केतस्मृतेर्विनश्यत्ता, संस्कारस्योत्पद्यमानता इत्येकः कालः । ततः संस्कारस्योत्पादः [10]पदार्थप्रतिपत्ते-

1 नाप्येकत्वप्रतीतिहेतुत्वम्–कि. क अन्यत्र 'एकार्थप्रत्यय' इति युक्तः पाठ उपलब्धः तदनुसारेण । 2, 3 इत्यत्रापि अर्थदृष्ट्या संगतत्वात् ['एकार्थप्रत्ययः'] ['एकार्थप्रतीति'] इति च पाठौ क्रमण स्वीकृतौ । 4 वर्णानां इति कि. क पुस्तकयोर्नास्ति । 5 ज्ञानगोचरत्वासम्भवात्–पा० २. पु । 6 संस्कारस्य–कि. क । 7 उत्पन्नेन संस्कारेण–कि. क । 8 द्वयविषय–कि. । 9 पदार्थप्रतिपत्तेरपि संस्कारोत्पत्तिः–कि. क । 10 पदार्थस्मृतिपतिपत्तेर्विनश्यत्ता–कि. क ।

विनश्यत्ता, [1]सङ्केतस्मृते[विनाश] इत्येकः कालः [2]पदार्थप्रतिपत्तेरपि संस्काराद्विनाश इति।

अस्यां तु प्रक्रियायां 'सङ्केतस्मृतिसमय एवान्त्यवर्णानुभवस्य स्मरणेन विनाशितत्वात् पदार्थप्रतिपत्तौ पूर्वभावित्वमपि नास्तीति कारणत्वं न स्यात्', इति दोषस्य स्मरणानुभवयोरविरोध एव परिहार इति मन्तव्यम्। वाक्यप्रक्रिया तु अन्त्यवर्णानुभवस्योत्पादः → [3]स्मरणस्य विनश्यत्ता; ← ततः संस्कारपदप्रतिसन्धानयोरुत्पद्यमानता इत्येकः कालः। अथ तयोरुत्पादः। स एव पदप्रतिसन्धानात्मा समयसंस्कारोद्बोधः, सम्बन्धस्मरणस्योत्पद्यमानता संस्काराद्विचित्रस्य प्रत्ययस्य विनश्यत्ता इत्येकः कालः। अथ समयस्मरणस्योत्पादः विचित्रप्रत्ययस्य विनाशः, पदार्थानुसन्धा[4]नस्य विनश्यत्ता इत्येकः कालः।

(२६५) **अवयवा पुनः प्रतिज्ञाऽपदेशनिदर्शनानुसन्धानप्रत्याम्नायाः ॥**

पञ्चावयवं वाक्यमित्युक्तम्। तत्र च विशेषनिश्चयार्थमाह—**अवयवा** इति। 'पुनः' शब्देनावधारणार्थेन जिज्ञासादयो निराकृताः तेषामशब्दरूपत्वात्।

(२६६) **तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञा। [5]प्रतिपिपादयिषितधर्मविशिष्टस्य धर्मिणोऽपदेशवि[6]षयापादनार्थमुद्देशमात्रं प्रतिज्ञा, यथा 'द्रव्यं वायुः' इति ॥**

→ [7]तत्र न्यायप्राप्तत्वात् ← प्रथमं प्रतिज्ञामुदाहरति—**तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञा** इति। तत्र—तेष्ववयवेषु मध्ये। नन्वेवं सति यत्कृतकं तदनित्यमित्यस्यापि प्रतिज्ञात्वं स्यात्, अनुमेयोद्देशत्वात्; अतः प्रोक्तमेव विवृणोति **प्रतिपिपादयिषित**त्यादिना। अस्तित्वादिधर्मापेक्षया सर्व एव हि धर्मिणो धर्मविशिष्टाः; अतः प्रतिपादयितुमिष्टेन धर्मेण विशिष्टो यो धर्मी पक्षः, तस्य उद्देशमात्रमभिधानमात्रं साधनसहितं प्रतिज्ञा। न च तच्छून्यमुद्देशमात्रं किञ्चित्करमित्याह—[8]**अपदेशविषयमापादयितु**मिति। अपदेशो हेतुः।

नन्वेमप्यसाधनाङ्गत्वात् नैतत् प्रयोगार्हमिति चेत्; कथं न पुनरस्याः साधनाङ्गत्वम्? किं सर्वथैव कथास्वनुपयोगात्? अथोपयुक्तस्याप्यन्यथैव परिग्रहात्? आद्ये विप्रतिपत्तिमपि

1 सङ्केतस्मृतेर्विनश्यत्ता कि. क अत्र अर्थदृष्ट्या 'विनाश' इति पाठो भाव्यः, विनश्यत्ताया पूर्वमेवोक्तत्वात्। 2 पदार्थस्मृतिप्रतिपत्तेरपि कि. क। पदार्थस्मृतेरपि–पा० ४. पु। 3 → ← एतच्चिह्नान्तर्गतः पाठः 'जे' पुस्तके नास्ति। 4 नुसन्धानस्याविनश्यत्ता–कि. क। 5 प्रतिपादयिष्यतः–दे। 6 मापादयितुं–दे। 7 → ← एतच्चिह्नान्तर्गतः पाठः 'जे' पुस्तके नास्ति। 8 अपदेशविषयापादनार्थ–जे; पा० १।६. पु।

वयमपि च पराभ्युपेतपक्षविपरीतां कोटिमुपनीय तत्सिद्धयेऽवयवान्तरमभिदध्यादिति ब्रूमः। न[1]ह्येवंभूतविपरीतकोट्युपनीतदर्शकवाक्यव्यतिरेकेणान्यद् वाक्यप्रतिज्ञास्वरूपमस्ति। नापि तृतीयः; नहि प्रतिज्ञार्थो हेत्वादिभिश्चतुर्भिरभिधीयत इति वक्ष्यामः। नापि चतुर्थः, स हि अपेक्षाकाले वाऽन्यदा वा? न तावदाद्यः, नह्यनित्यं शब्दं बुभुत्समानानामनित्यः शब्द इत्यनुक्त्वाऽन्यत् किञ्चिद[2]पेक्षितम्, कृतकत्वादिति वा, यत्कृतकं तदनित्यमिति वा, कृतकश्च शब्द इति वा, सर्वस्यापाततोऽन्वयेनावगतिहेतुत्वाभावात्। प्रतिपन्नविवादविषया हि [3]तदनु तन्निर्णयहेतुसाधनं बुभुत्सामहे, न तु साधनं प्रथमतः प्रतीत्य पश्चाद्विवादविषयम्। तथा च तस्यैव प्रथममभिधाने प्राप्तेऽन्याभिधानानुपयोगादाक्षेपस्यापि कुतोऽवकाशः। अपेक्षित[4]कारणेऽपि वचनव्यतिरेकेणापेक्षितसिद्धेरभावात्। नाप्यन्यदा, नहि यत्कृतकं तदनित्यं यथा घटः, कृतकश्च शब्द इति वचनमवधानकारकम्, परस्पराश्रयप्रसङ्गात्; अवधाने सति अर्थनिश्चयस्तस्माच्चावधानमिति। वाक्यसामग्रीनियमानादरे तु तदुदाहरण-क्रमोऽपि नाद्रियेत। प्रतिपाद्यापेक्षनियमानुरोधश्च समान इति। 'अनित्यः शब्दः' इति [5]अपेक्षिताभिधायि प्रतिज्ञावचने कृते कुत इत्यपेक्षायां 'कृतकत्वाद्' इति हेतोः समुचितं समुत्थानमिति रमणीयम्।

[6]प्रतिज्ञाया उदाहरणमाह—**द्रव्यं वायु**रिति। वायुर्द्रव्यमित्यर्थः। यो हि वायुरूपं जानन्नपि तस्य द्रव्यत्वे सन्दिग्धस्तं प्रति सिषाधयिषितेन द्रव्यत्वेन विशिष्टस्य वायोरभिधानं प्रतिज्ञा। कथायां नियमः, शास्त्रे तु प्रतिपत्तिमात्रं समीहितमिति [7]भावनाय 'द्रव्यं वायुः' इति व्यत्ययाभिधानम्॥

(२६७) अविरोधिग्रहणात् प्रत्यक्षानुमानाभ्युपगत[8]स्वशास्त्रस्व-वचनविरोधिनो निरस्ता भवन्ति। यथा 'अनुष्णोऽग्निः' इति प्रत्यक्षविरोधी, 'घनमम्बरम्' इत्यनुमानविरोधी, → 'ब्रा[9]ह्मणेन सुरा पेया' इत्यागमविरोधी, ← [10]वैशेषि-कस्य 'प्रागुत्पत्तेः सत्कार्यम्' इति ब्रुवतः स्वशास्त्र-विरोधी, 'नशब्दोऽर्थप्रत्यायकः' इति स्ववचनविरोधी॥

---

1 नह्येवं भूतकोट्युपदर्शनमन्तरेण प्रतिज्ञायाः शङ्कमस्ति–पा० ४. पु; जे। 2 दप्युपेक्षितम्–जे। 3 तदर्थतन्नियतहेतुं साधनं–कि. क। 4 करणे–कि. क। 5 अपेक्षिताभिधानविषये–कि. क। 6 प्रतिज्ञोदाहरण–कि. क। 7 भावय–कि. कः। 8 शास्त्रवचन–दे। 9 → ← एतच्चिह्नान्तर्गतः पाठः व्यो पुस्तके नास्ति। 10 वैशेषिकस्य सत्कार्यम्–भा॥

अविरोधिपदस्य तात्पर्यमाह—**अविरोधिग्रहणा**दिति । प्रत्यक्षेणानुमानेन वाभ्युपगतं प्रतिपन्नं, तद्विरोध्यनुमानाभास इत्यर्थः । एवंविधस्य भ्रमादिना कदाचिदनुमातुमिष्टत्वात् ।

ननु वैशेषिकस्य प्रत्यक्षानुमानरूपप्रमाणद्वयमात्रमभ्युपगच्छतः स्वशास्त्रादिविरोधस्य कुतः प्रसक्तिः ? न हि शास्त्रं नाम पृथक् प्रमाणमस्ति इत्यत आह **अभ्युपगते**ति । न केवलमुभयसिद्धेनानुमानेनापि तु लोके शब्दतया प्रसिद्धेन, अस्माभिश्चानुमानतयाऽभ्युपगतेनेति नेयम् । अभ्युपगमनमात्रस्य स्वशब्देनैव लब्धत्वात् । अथवा न केवलं प्रत्यक्षानुमानाभ्याम्, अपि तु परशास्त्रमपि यत् स्वयमभ्युपगतम् आगमतयाभ्युपगतप्रामाण्यं तेनापि यद्विरुद्धं तदपि प्रतिज्ञाभासमित्यर्थः ।

प्रत्यक्षविरुद्धमुदाहरति—**यथाऽनुष्णोऽग्नि**रिति । प्रत्यक्षविरोधी [1]यथाऽग्निरुष्ण इति योजना । प्रसक्तं प्रतिषिध्यते, न च तेजो व्यतिरिक्तेऽन्यस्मिन् क्वचिदुष्णत्वमु[2]पलब्धम् । अनुमानादेवावगते तु अन्धपरम्परापातप्रसङ्गात् । प्रत्यक्षेण प्रतीतौ तद्विषयमनुमानमनेनैव बाध्यत इति । नन्वयुक्तमेतद् बाधाविनाभावयोः सहासम्भवात् । बाधे हि अपक्षधर्मत्वमनैकान्तिकत्वं च स्यादिति चेत्; अत एवेदं पृथक् दूषणमिति वदामः । न हि सर्वोपसंहारव्याप्त्यादिपरिगृहीतस्य वह्ने र्विपक्षत्वमपक्षत्वं वाऽसति बाधे वेधसाऽपि सुवचम् । [3]बाधेन तु दुष्टत्वे यदुत्तरकालीनमनैकान्तिकत्वादि सम्भवत्यपि किं तेनोपजीवकेन उपजीव्यस्य बाध्यस्य क्रियते ? अन्यथा विरुद्धस्यापि परिहारप्रसङ्गात् । तत्र हि साध्यस्य निश्चितत्वे हेतुरसिद्धो, हेतुनिश्चयेनैव साध्यं बाधितमिति वा कुतो विरुद्धावकाशः । उपजीव्योपजीवकभावेन तद्व्यवस्था प्रकृतेऽपि समानेति ।

अनुमानविरुद्धमुदाहरति—'**घनमम्बरम्**' इति । **अनुमानविरो**धीति —आकाशं हि स्वकार्यभूतेन शब्देन समवायिकारणतयाऽनुमीयते । शब्दश्च विभुगुणत्वात् सार्वत्रिकोऽप्यसमवायिकारणप्रादेशिकत्वान्नियम्यते । यदि पुनरसमवायिवत् समवायिकारणमप्यस्य निबिडावयवतया नियतदेशं स्यात्, न तर्हि [4]गन्धादिवत् सर्वत्रोपलभ्येत । ततो धर्मिग्राहकप्रमाणादेव घनमम्बरमिति प्रतिज्ञा बाध्येत इति ।

---

1 यथाऽग्निरर्थस्त्विति–कि. क । यथाऽनुष्णोग्निरिति–जे. अत्रार्थसङ्गत्या 'यथाऽग्निरुष्ण' इति पाठेन भाव्यमितिशोधयित्वा स्वीकृतः सं । 2 मवगतम्–जे । 3 बाधे तु दृष्टे तूत्तरकालीन–कि. क । 4 गन्धवत्–कि. क ।

आगमविरुद्धमुदाहरति—**ब्राह्मणेने**ति। क्षीरपानोदाहरणबलेन हि द्रवद्रव्यत्वात् सुरापानस्य पवित्रत्वं दर्शयता तत्साधनत्वं तावदवश्याभ्युपगन्तव्यम्। न च तत्रानुमानं प्रभवति, [1]श्रुतिस्मृतिभ्यामेकसमाधिगम्यत्वात्। तथा च दृष्टान्तसाधकेनैव स्वयमभ्युपगतेन सुरापानस्य पवित्रत्वं बाधितं भवति।

स्वशास्त्रविरूद्धमुदाहरति—**वैशेषिकस्ये**ति। ननु किमियं परिभाषा यत् स्वशास्त्रेणोक्तं तत्तथैव श्रद्धेयम्, अत आह **वैशेषिकस्ये**ति। विशेषो व्यवच्छेदः तत्त्वनिश्चयः, तेन व्यवहरतीत्यर्थः। न च सत्कार्यवादे प्रमाणं निश्चायकमस्तीत्यर्थः। विवादाध्यासितो भावः कारणव्यापारादपि प्राक् काले सन्, कार्यत्वात्; यत्पुनः कारणव्यापारात् प्राक् सन्न भवति, न तत् कार्यम्, यथा प्रधानमिति चेत्; न; व्याघातात्। यद्यपि साध्यक्रियासाधारणक्रियामात्रवि[2]षयत्वरूपकार्यत्वहेतौ नासिद्धिः, नाप्यसत इव गगनकुसुमादेः सतोऽपि प्रधानादेः कार्यत्वस्य व्यावृत्तत्वादसाधारण-व्यापारात् प्रा[3]गपि इति विशेषणात्। नापि स[4]न्दिग्धव्यतिरेकित्वं घटो जायते जनिक्रियां प्रति कर्ता भवतीत्यादिप्राक्[5]कारकत्वोपदर्शकप्रयोगस्य विपक्षे बाधकस्य सम्भवात्। न हि कारकमसद् भवति। न चेदं भ्रान्तं, मुख्ये बाधकाभावात्। न च सत्कार्यदूषणमेव बाधकम्, अन्योन्याश्रयप्रसङ्गात्। तथापि कारकव्यापारात् प्रागपि सन्निति प्रतिज्ञापदयोरेव व्याघातात्। न हि सति कारकव्यापारसाफल्यमाकल्यामः। असत्यपि तुल्यमेतदिति चेत्; न; सतोऽसतो जन्यत्वात्। स्वकारणसत्तासमवायरूपाया उत्पत्तेर्नित्यत्वेऽपि तत्क्रिया-विषयत्वेऽपि भावरूपे वस्तुनि हि कारकसाफल्यात्। सत्कार्यवादपक्षे तु अभिव्यक्तिस्तति-व्यङ्ग्यस्यापि सत्त्वात्। अतिप्रसक्तिश्च सत्त्वेऽपि समानाधिकरणविशेषनियमान्नियमः। सोऽपि तुल्यः कारण[6]सम्बन्धस्तु सति सम्भाव्यते न त्वसतीति विशेषः। न च कर्तव्य-स्वरूपसाधनत्वे क्रियामात्रात्तत्त्वविरहादका[7]रकत्वप्रसक्तिः। कृतिविशेषस्यैव क्रियात्वव्यप-देशात्। धात्वर्थमात्रस्य चातिव्यापकत्वात्; अन्यथा [8]सत्कार्यवादस्वीकारेऽपि अप्रतीकारात्। एतेन 'उपादानग्रहणात्' 'सर्वसम्भवाभावात्' 'शक्तस्य शक्यकारणात्' 'कारणाभावाच्च सत्कार्यम्' [9]इत्यपि हेतुचतुष्टयं निरस्तमिति ॥

1 श्रुतिस्मृत्यागमैकसमाधिगम्यत्वात्–पा० २ पु। 2 विषयत्वं रूपकार्यत्वत्वहेतौ–कि. क, अभ्यासकाले एव अशुद्धिशोधनसमर्थगुरूणां मार्गदर्शनेन शुद्धीकृतम् सं। 3 प्राक्प्रतीति–कि. क। 4 नाप्य-सन्दिग्ध–कि. क एतदिपि पाठान्तरवत् शुद्धीकृतम् सं। 5 कारण–कि. क। 6 अर्थंदृष्ट्वा इदमपि शुद्धीकृतम्–कि. क इत्यत्र तु 'सम्बन्धस्तु असति' इति पाठः, स तु अशुद्ध एव सं। 7 कारणत्व–कि. क। 8 सत्कार्यवादेऽपि–कि. क। 9 इत्यहेतु–कि. क **इत उर्ध्वं मुद्रिता किरणावली नोपलभ्यते** ॥

[1]स्ववचनविरूद्धमुदाहरति—**न शब्द** इति । यद्यपि प्रमाणेन बाधाविरोधः, स्वशास्त्रवचनयोस्तु न पृथक् प्रमाणत्वम्, प्रत्यक्षाद्यन्तर्भावे च तद्विरोधेनैव गतार्थम्, तथापि अभ्युपगतशास्त्रपुरःस्फूर्तिको विरोधः स्वशास्त्रविरोधः । पुरःस्फूर्तिकपरस्परव्याहतार्थवचनव्याघातः स्ववचनविरोधः प्रमाणाप्रमाणप्रतिसन्धानविरहेऽपि । 'अहं मौनी', 'माता वन्ध्या', 'मम कर्णे प्रविश्य गजो गर्जति' इति; उदाहरणान्तरमपि बोद्धव्यम् । शब्दस्यार्थप्रतिपादकत्वं विना 'शब्दो नार्थं प्रत्याययति' इति वचनोच्चारणानुपपत्तिरिति ॥

(२६८) लिङ्गवचनमपदेशः । यदनुमेयेन सहचरितं [2]तत्समानजातीये च सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्वस्मिन्नसदेव तल्लिङ्गमुक्तम्; तस्य वचनमपदेशः । यथा "क्रियावत्त्वाद् [3]गुणवत्त्वाच्च" (वै. सू. २-१-१३) । तथा च तदनुमेयेऽस्ति, तत्समानजातीये च सर्वस्मिन् गुणवत्त्वम्, असर्वस्मिन् क्रिया[4]वत्त्वमस्ति । उभयमप्येतदद्रव्ये नास्त्येव, तस्मात्तस्य वचनमपदेश इति सिद्धम् ।

प्रतिज्ञात्वे ज्ञाते कथम्, आकाङ्क्षानिवर्तनापेक्षाक्रमप्राप्तमपदेशमाह—**लिङ्गेति** । 'कुतः' इत्याकाङ्क्षानिवर्तकं लिङ्गवचनमपदेशः । अपदिश्यतेऽपेक्षितं लिङ्गमनेनेत्यर्थः ।

उक्तमपि लिङ्गमपदेशत्रैविध्यप्रदर्शनाय **अनुमेयेन सहचरितं** ध्रुवं कृत्वा त**त्समानजातीये सर्वत्र ए[5]कदेशे वा सामान्येन प्रसिद्ध**मन्वयिनः, **तद्विपरीते च सर्वस्मिन्नसदेव** इति व्यतिरेकिणः । समस्तेन चान्वयिनो व्यतिरेकिणो लक्षणमिति पुनर्दर्शयति **यदनुमेयेने**ति । अनुमेयः सिषाधयिषितधर्मविशेषणाह [ण इह] धर्मी, तेन सम्बद्धम् । 'तद्' इति जिज्ञासितिधर्मविशिष्टो धर्मी । तेन सजातीयः, साधारणधर्मवान् । तस्मिन् सर्वत्र एकदेशे वा साधारणधर्मवत्तया दृढतरप्रमाणसिद्धम्; तद्विरुद्धधर्मवति सर्वत्र असद् लिङ्गम्; तद्वचनमपदेश इत्यर्थः । सपक्षाव्यापकोदाहरणम्—**क्रियावत्त्वाद्** इति । सपक्षव्यापकोदाहरणम् गुणवत्त्वाद् इति ॥

(२६९) एतेनासिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तं भवति ॥

---

1 इत ऊर्ध्वं 'जे' पुस्तकस्था किरणावली प्रथमवारमेवोपलब्धा सम्पादिता—सं । 2 °जातीये सर्वत्र भा 'सर्वत्रैकदेशे वा' किरणावलीसम्मतः पाठः; सर्वत्र च—व्यो. (५०३) । 3 गुणवत्वाच्चेति—दे । 4 सर्वस्मिन्—दे, °वत्त्वमुभाय—भा । 5 पाठोयं—भा इत्यत्र नास्ति ।

अपदेशलक्षणकथनेन लिङ्गाङ्गव्याप्तिपक्षधर्मतातदुभयविकलाप्रतीतलिङ्गनिर्देशोऽपदेशाभासोऽसिद्ध–विरुद्ध–सन्दिग्धा–नध्यवसितभेदेन चतुर्विधः सूत्रकारेण साक्षादुक्तः ।

(२७०) तत्रासिद्धश्चतुर्विधः—उभयासिद्धः, अन्यतरासिद्धः, तद्भावासिद्धः अनुमेयासिद्धश्चेति । तत्रोभयासिद्धः—उभयोर्वादिप्रतिवादिनोरसिद्धो यथा 'अनित्यः शब्दः सावयवत्वाद्' इति । [1]अन्यतरासिद्धो यथा 'अनित्यः शब्दः कार्यत्वाद्' इति। तद्भावासिद्धो यथा 'धूमभावेनाग्न्यधिगतौ कर्तव्यायामुपन्यस्यमानो बाष्पो धू[2]मभावेनासिद्ध' इति । अनुमेयासिद्धो यथा 'पार्थिवं [3]तमः कृष्ण[4]रूपत्वाद्' इति ।

तत्र अनिश्चितपक्षधर्मताकोऽसिद्धः,—अनुमेयमसिद्धम्—अनिश्चितं यस्य, तद्भावासिद्धः–तस्मिन्ननुमेये भावोऽसिद्धोऽनिश्चितो यस्य स उभयविधोऽपि उभयान्यतरासिद्धभेदेन चतुर्विधः । तद्भावासिद्धमुभयासिद्धमुदाहरति—[5]**शब्दोऽनित्यः सावयवत्वाद्** इति । अन्यतरासिद्धमुदाहरति—[6]**शब्दोऽनित्यः कार्यत्वाद्** इति । तद्भावासिद्धः—तस्य लिङ्गस्य भावो लिङ्गत्वम् । तेन, अनिश्चितवचनं केचिदसिद्धं वर्णयन्ति, तदयुक्तम्; सर्वेषामनपदेशानामसिद्धान्तर्भावप्रसङ्गात् । तत्र **त्व** (च)पुरःस्फूर्तिकव्यभिचारविपरीतव्याप्त्युपजीवित्वेन तत्तद्भेदस्थितौ, अनुकूलप्रमाणोपजीवित्वेन, विपरीततर्कासद्भावेऽपि सद्भावानुकूलतर्काभावोपजीवित्वेन चोपाधिपुरस्कारेण च प्रतिबन्धसाधकप्रमाणाभावमुख्यनिरीक्षणेन [च] सिद्धसाधन-तर्कापरिशुद्ध्यप्रयोजकसन्दिग्धानेकान्तानामपि दूषणान्तरत्वप्रसङ्गात् ।

अनुकूलप्रमाणाद्युपजीवित्वेनापि तेषामसिद्धान्तर्भावेऽनैकान्तिकादीनामपि तथैवान्तर्भावप्रसङ्ग इत्यभिप्रायवान् तद्भावासिद्धं पृथगुदाहरति । तस्य लिङ्गस्य भावः सद्भावः असिद्धोऽनिश्चितो यस्मिन् [7]धूलीपटले स तद्भावासिद्धः । विवक्षितोभयान्यतरासिद्धो यथा धूमभावेन अनिश्चितो [8]धूलीपटलोऽग्न्यधिगतौ । अन्यतरानुमेयासिद्धमुदाहरति—'पार्थिवं तमः कृष्णरूपत्वात्' । ननु तमः 'शब्दवाच्यस्य सर्ववादिसिद्धत्वात् कथमाश्रयासिद्धिः' आरोपितरूपत्वाद् इति

1 अन्यतरासिद्धः कार्यत्वादनित्यः । 2 'धूमभावेनासिद्ध' इति दे पुस्तके नास्ति । 3 द्रव्यं तमः–भा । 4 रूपवत्त्ववद्–भा । 5, 6 पाठोऽयं भा इत्यत्र नास्ति । 7, 8 सर्वत्र मूलभाष्ये बाष्प इति उदाहरणम्; सम्पादकः ।

चेत्; न; आरोपानुपपत्तेः प्रागेवोक्तत्वात्। उच्यते—पार्थिवत्वं द्रव्यत्वविशेषः; सिद्धे च सामान्ये विशेषसाधनम्। तथा च द्रव्यत्वेन तमसोऽन्यतरासिद्धेरन्यतरानुमेयासिद्धत्वम्। उभयानुमेयासिद्धोदाहरणं तु 'गगनकमलं सुरभि कमलत्वाद्' इति द्रष्टव्यम्।

(२७१) यो ह्यनुमेयेऽविद्यमानोऽपि तत्समानजा[1]तीये सर्वस्मिन्नास्ति तद्विपरीते चास्ति स विपरीतसाधनाद्विरुद्धो यथा 'यस्माद्विषाणी तस्मादश्वः' इति॥

उभयान्यतरानिश्चितविशेषणविशेष्योभया अनुमेयासिद्धभेदा द्रष्टव्याः। उभयान्यतरानिश्चितविशेषणविशेष्योभयाः तद्भावासिद्धभेदा बोद्धव्याः।

शब्दसाध्यधर्मविपरीतधर्मव्याप्तलिङ्गनिर्देशो विरुद्धोऽनपदेश इति लक्षणोदाहरणाभ्यामाह—**यो ही**ति। अभिप्रेतसाध्यधर्मविपरीतव्याप्तेरदूषणत्वात्, दूषणत्वे सर्वानुमानविलयापत्तेः। स च सकलविपक्षव्यापको यथा 'शब्दो नित्यः कृतकत्वात्' इति भाष्ये सूचितः। विपक्षैकदेशवृत्तिस्तु उक्तः, यथा 'उपलभ्यमानविषाणो झाडान्तरितः पिण्डोऽश्वः विषाणित्वाद्' इति॥

(२७२) यस्तु सन्ननुमेये त[2]त्समानासमानजातीययोः साधारणः स सन्देहजनकत्वात् सन्दिग्धो यथा 'यस्माद्विषाणी तस्माद् गौः' इति॥

निश्चितविवक्षिततज्जातीयवृत्त्यनिश्चितो तज्जातीयवृत्तिलिङ्गापदेशः सन्दिग्धोऽनपदेश इति लक्षणोदाहरणाभ्यामाह **यस्तु** इति। 'समानासमानजातीययोः सन्नेव' इति एवकारः तज्जातीयवदतज्जातीयेऽपि [अ]सत्त्वं निवर्तयति; [3]न त्व (तु) निश्चयः। तेनानिश्चिताऽतज्जातीयव्यावृत्तेः सन्दिग्धानैकान्तिकादिसङ्ग्रहः। 'पक्षत्रयवृत्तिरनैकान्तिकः' इति तु लक्षणमनुपपन्नम्, सन्दिग्धव्यावृत्तिकाप्रयोजकयोरव्याप्तेः। असिद्धे च न तयोरन्तर्भावः, असिद्धलक्षणस्य तथाभावयितुमशक्यत्वात्। असिद्धव्याप्तिपक्षधर्मताकमसिद्धमिति तु लक्षणादन्तर्भावे सर्वानपदेशान्तर्भावप्रसङ्गात्। पुरःस्फूर्तिकविरुद्धाद्युपजीवित्वेन तत्तद्भेदे तर्कापरिशुद्धयप्रयोजकादीनामपि दूषणान्तरत्वापत्तेः। अत एव यथाश्रुतभाष्यमपि अन्यथा व्याख्यातम्। उदाहरणानि साध्यसजातीयासजातीयव्यापकाव्यापकभेदेनानेकविधानीत्युप-

---

1 जातीये च–जे, दे। 2 तत्समानजातीययोः साधारणः सन्नेव मु. भा. दे, तत्समानजातीययोः सन्नेव (व्यो. ६०७) 'सन्नेव' इति किरणावल्यामपि। 3 'न च निश्चयः' इति पाठोऽपि सम्भवेत्।

लक्षणतया सपक्षव्यापकविपक्षैकदेशवृत्तिसन्दिग्धभेदमुदाहरति—**यथेति**। 'शब्दो नित्यः प्रमेयत्वाद्' इति सपक्षविपक्षव्यापक इत्याद्युन्नेयः।

ननु विरुद्धाव्यभिचार्यपदेशाभासः कैश्चिदभ्युपेतः; स च नासिद्धः, उभयोरपि विरुद्धाव्यभिचारिणोर्निश्चितपक्षधर्मत्वात्। न विरुद्धः, प्रत्येकमपि विपरीताव्याप्तेः। न सन्दिग्धः, प्रत्येकाव्यभिचारिणोः समुदितयोरप्यव्यभिचारित्वात्। न च समुदितयोरसाधारणतया असाधारणव्यभिचारी, समुदितयोः साधनत्वेनानुपादानात्। प्रत्येकं हि विरुद्धार्थसाधकावव्यभिचारिणौ दुष्टावदुष्टौ वा? दुष्टत्वे उक्तेष्वनन्तर्भावात् अपर आभासः। अदुष्टत्वे वस्तुनो द्वैरूप्यापत्तिः। अत एव नानाध्यवसितौ, मिलितावेकधर्मिगतावनध्यवसितौ अध्यवसायं न जनयत इति। कुतः? दोषात्, असाधारणत्वाद् इति यदि, न प्रत्येकमसाधारणता, मिलितस्य च न साधनता, न चान्यस्य दोषेणान्यस्य दोषः। न कालात्ययापदिष्टः, अबलवत्प्रमाणबाधितविषयत्वात्। वस्तुतो विरुद्धौ चतुःपञ्चरूपसम्पन्नावव्यभिचारिणौ वेति न सम्भवति, वस्तुनो द्वैरूप्यापत्तेः। अभिमानतो विरुद्धाव्यभिचरित्वे द्वयोरेकस्य वा तस्य व्यभिचारित्वे क्व विरुद्धाव्यभिचारः? अगृह्यमाणविशेषदशायां तथात्वे प्रथमसाधस्य प्रथमतोऽसत्प्रतिपक्षत्वम्। द्वितीयसाधनस्य तु प्रथमेनैवागृह्यमाणसत्प्रतिपक्षदोषेण प्रतिरुद्धत्वात् उदय एव नास्ति, प्रागेव परविरोधकत्वम्। व्याप्तिपक्षधर्मतोपपन्नप्रथमसाधनसमानद्वितीयसाधनोपलम्भसम्भवे सम्भवति प्रतिरोधो द्वितीयेन प्रथमस्येति यदि, तदा व्याप्तिपक्षधर्मतोपपन्नौ विरुद्धार्थोपस्थापकावित्येवमगृह्यमाणविशेषौ, तथा च पुरःस्फूर्तिको विरुद्धाव्यभिचारः॥

(२७३) **एकस्मिंश्च द्वयोर्हेत्वोर्यथोक्तलक्षणविरुद्धयोः स[1]न्निपाते सति संशयदर्शनादयमन्यः सन्दिग्ध इति केचिद् यथा 'मू[2]र्तत्वामूर्तत्वं प्रति मनसः क्रियावत्त्वास्पर्शत्वयोः॥**

तदुपजीवित्वात् सत्प्रतिपक्षदोषस्य जघन्यत्वात् बाधोपजीव्यपक्षधर्मत्वादिवत् सत्प्रतिपक्षोदाहरणं तत्त्वानुपलब्धिप्रकारकमवसेयमित्याह—**एकस्मिन्निति**। **यथोक्तलक्षणयोरिति** व्याप्तिपक्षधर्मतयोः। **विरुद्धयोः**—विरुद्धार्थसाधकयोः। **संशयदर्शनात्**—निर्णयानुदयदर्शनात्। **अयमन्यः सन्दिग्धोऽनपदेश इति केचित्**

1 सन्निपाते संशय-व्यो (६-७-८)। 2 मूर्तामूर्तत्वं-कं पा. ४. पु. व्यो (६०८)।

यथा [1]मूर्तत्वामूर्तत्वे प्रति मनसः [2]क्रियावत्त्वास्पर्शवत्वे इति । एकैकस्य विरुद्धाव्यभिचारित्वं दोषो मिलितयो र्वा? नाद्यः, वास्तवव्याप्तिपक्षधर्मतोपपन्नस्याव्यभिचारिण एकैकस्य साधकत्वे तदुभयोपस्थापितसाध्यधर्मयोः प्रमाणोपस्थापितत्वेन विरोधासिद्धिरेकस्य संयोगभावाभाववदिति विरुद्धाव्यभिचारित्वासिद्धेः। अथ प्रमाणानुपस्थापितत्वेन विरोधसिद्धिः तर्हि स्वयमेवाव्यभिचारित्वानभ्युपगमात् कथं विरुद्धाव्यभिचारित्वम्? ततश्च व्यभिचारिणोप्यापाततो व्यभिचारानुपलम्भमात्रेणाव्यभिचारित्वे निपुणप्रतिपत्तृनिरूपणावसरे द्वयोरन्यतरस्य वा व्यभिचारित्वे प्रकृते क्रियावत्त्वस्य मूर्तत्वेन व्यभिचारोऽस्पर्शवत्त्वस्य च स्पर्शाभावस्यामूर्तत्वेन अनवच्छिन्नपरिमाणयोगेन कर्मणि व्यभिचारो व्यक्तः। अथ अस्पर्शत्वं स्पर्शगुणनिषेधेन इतरगुणवत्त्वम्, तस्य चानवच्छिन्नपरिमाणेन व्यभिचारोऽनुपलब्धचरः, स्पर्शेतरगुणवत्त्वस्य परिमाणमात्रशातितायां (शालितायां) निश्चयोऽस्तु; अवच्छिन्नानवच्छिन्नयोगितायां विपक्षे बाधकाभावेनानिश्चये सन्दिग्धप्रमेदित्वमस्पर्शत्वस्य। न द्वितीयः, अनुपलब्धव्यभिचारसमानसमाना जातीये [समानजातीय] सहचारः समानः ॥

(२७४) **नन्वयमसाधारण एव, [3]अचाक्षुषप्रत्यक्षत्ववत् संहतयोरन्यतरपक्षासम्भवात्। ततश्चानध्यवसित इति वक्ष्यामः ॥**

क्रियावत्त्वास्पर्शत्वयोरिति हि मिलितौ विरुद्धाव्यभिचारिणौ निर्णयानुत्पादकौ, अनध्यवसितदोषाद् इत्याह **नन्वयमि**ति। अचाक्षुषप्रत्यक्षवत् मिलितयोः सपक्षासपक्षव्यावृत्तत्वात्। नन्वचाक्षुषप्रत्यक्षवत्त्वं (क्षत्वं) गुणव्यवहारे साध्येऽगुणात्मादिगतत्वेन विरुद्धं भागासिद्धं वा; तत्कथमन [ध्य] वसितदृष्टान्तः? मैवम्, अभिप्रायापरिज्ञानात्। विवादाध्यासितेषु अचाक्षुषप्रत्यक्षेषु बाह्याचाक्षुषप्रत्यक्षजातीयत्वेन गुणव्यवहारं साधयतोऽसाधारणोदाहरणम्, अगुणादिवात्मादेः गुणादपि रूपादेर्व्यावृत्तत्वात्। ततश्चानध्यवसितलक्षणाक्रान्तत्वादनध्यवसितो विरुद्धाव्यभिचारी ॥

(२७५) **ननु शास्त्रे तत्र तयोभयथा दर्शनं संशयकारणमपदिश्यत इति? न, संशयो विषयद्वैतदर्शनात्। संशयोत्पत्तौ विष[4]यद्वैतदर्शनमेव निमित्तम्; तुल्यबलत्वे च तयोः प[5]रस्परं विरोधान्निर्णयानुत्पादकत्वं स्या[6]न्न तु**

---

1 मूर्तत्वामूर्तत्वं प्रति–मु. भा। 2 क्रियावत्त्वास्पर्शत्वयोः–मु. भा। 3 अचाक्षुषत्व–मु. भा। 4 दर्शनमेवकारणम्–मु. भा.। 5 परस्पर–मु. भा। 6 न संशय–दे।

संशयहेतुत्वम्। न च तयोस्तुल्य[1]बलत्वमस्ति, अन्यतरस्यानुमेयोद्देशस्यागमबाधितत्वात्, अयं तु विरुद्धभेद इति ॥

ननु विरुद्धाव्यभिचारी अनध्यवसितान्तर्गतोऽस्तु, स चानध्यवसितः सन्देहजनकत्वात् सन्दिग्धप्रभेदः, यदि च संशयं न जनयेत् विरुद्धाव्यभिचारी, विप्रतिपत्तेरपि न संशयो जायेत, ततः स्वपरशास्त्रविरोधश्च इत्यत आह—[2]**ननु चे**ति। तस्मिन् तस्मिन् सूत्रे उभयथा दर्शनमुभयप्रकारवद्धर्मवद्धर्मिदर्शनं संशयकारणमुक्तम्। तथा हि "दृ[3]ष्टं च दृष्टवतः दृष्ट्वा संशयः"। मूर्तधर्माविनाभूतधर्मवत्तया दृष्टमन्तःकरणं दृष्टवतः अमूर्तत्वादिना भूतास्पर्शत्वेन तुल्यमन्तःकरणं दृष्ट्वा संशयः, इति भवति विरुद्धाव्यभिचारी संशयहेतुरित्युक्तम्। अपरं च सूत्रम् असाधारणो धर्मः संशयहेतुरित्याह—[4]"यथादृष्टमयथादृष्टमुभयथा दृष्टत्वात् संशयः"। यथादृष्टं—येन धर्मेण सह दृष्टं पक्षे अयथादृष्टं तत्तुल्यवती च सपक्षे न दृष्टं विपक्षे च उभयथा साध्यसाधनप्रकारेण अदर्शनात् संशय इति असाधारणधर्मः संशयकारणमुक्तः।

समाधत्ते **ने**ति। संशयस्योत्पत्तौ विषयद्वैतदर्शनं कारणं (च) सूत्रस्यापि साधारणधर्मोपदर्शने तात्पर्यम्। तथा हि दृष्टं च विशेषद्वयसहचरितं तथाविधं दृष्टवतः दृष्ट्वा संशय इति सूत्रार्थः। यथादृष्टं—येन विशेषेण सह दृष्टम्, अयथादृष्टम्, अपरविशेषेण सह दृष्टम्, इत्युभयथादर्शनात्—साधारणधर्मदर्शनात् इति अपरसूत्रार्थः। सूत्राभ्यां पुनःपुनः समानधर्मस्य संशयकारणत्वोपवर्णनम् असाधरणधर्मस्य विशेषद्वयासहचारिणो विशेषास्मारकस्य न संशयहेतुत्वमिति दर्शयितुम्। एतदेव दर्शयति—**संशयोत्पत्ताविति**।

यद्यप्यसाधारणोधर्मः क्वचित् क्वचित् शास्त्रान्तरे संशयहेतुरुक्तः, तथापि असाधारणतयैव साधारणधर्मतया, विरुद्धव्यभिचारिणौ तु परस्परप्रतिबन्धात् निर्णयानुत्पादकौ, न तु संशयकारकौ यथा स्फूर्तिमन्तौ निपुणतरौ परस्परवादिप्रतिवादिनौ इति अनिपुणपुरुषविशेषं प्रति तुल्यबलत्वाभ्युपगमभेदेनेदमुक्तम्। पुरुषं प्रति तुल्यबलत्वमेव नास्तीत्याह **न चे**ति।

---

1 बलवत्त्व–मु. भा। 2 ननु शास्त्रे–मु. भा। 3 दृष्टं च दृष्टवत् 'इति सूत्रम्' (वै. सू. २-२-१८)। 4 यथादृष्टमयथादृष्टत्वाच्च 'इति सूत्रम्' (२-२-१९)। 'विद्याऽविद्यातश्च संशयः'। (वै. सू. २-२-१०)।

यद्यपि 'अमूर्तं मनोऽस्पर्शत्वाद्' इत्यत्र दूषणान्तरमध्यस्तीत्युक्तं तथापि अभ्युपेताप्तभावसूत्रकारवचनावायो(नोपायो)ऽस्तीत्याह—**अन्यतरस्येति** । अनभ्युपगताप्तभावं प्रति तु पूर्वकमेव दूषणम् । आगमबाधस्तु 'अप्रसिद्ध'पदेन सङ्गृहीतः । अप्रसिद्धो न प्रकर्षेण सिद्धः; प्रकर्षश्च विपरीताव्याप्तत्वम्, विजातीयव्यावृत्तत्वात् सजातीयाव्यावृत्तत्वं सन्दिग्धधर्मिविषयत्वमप्रतिरुद्धत्वं च यस्य न वर्ततेऽसावप्रसिद्धोऽनपदेश इति व्याख्यानात् ॥

(२७६) **[1]यश्चानुमेये विद्यमानः तत्समानासमानजातीययो[2]रसन्नेव सोऽ[3]न्यतरत्रासिद्धोऽनध्यवसायहेतुत्वादनवध्यवसितो यथा 'सत्कार्यमुत्पत्तेः' इति। अयम् 'अप्रसिद्धोऽनपदेशः' (वै. सू. ३-१-१८) इति व[4]चनादवरुद्धः ।**

अनध्यवसितं लक्षयति **यश्चेति** । अनुमेयवृत्तिस्तज्जातीयातज्जातीयव्यावृत्तिरिति यथाभाष्यं लक्षणेऽनपदेशान्तरासङ्गृहीतेऽनुपसंहारिणि भागासिद्धिः, विद्यमानतदतज्जातीयत्वे वा[ऽ]साधारणे भागासिद्धिरित्यत आह—**सोऽन्यतरत्रासिद्ध** इति । अनेनानुमेयमात्रे प्रसिद्धोऽप्रसिद्धप्रतिबन्धोऽनध्यवसित इति सामान्यलक्षणं सूचितम् । तज्जातीयातज्जातीययोरसत्त्वेऽसन् सत्त्वे वा [ऽ] सन्निति अप्रतिबद्धत्वे तात्पर्यम् यथा—'कार्यं स्वोत्पत्तेः प्रागपि स पजायमानत्वात् [5](सत्प्रजायमानत्वात्)। यद्यप्यत्र प्रतिज्ञाहेत्वोः प्रतिज्ञापदयोश्च विरोधः पुरःस्फूर्तिकः, तथापि हेतुदोषचिन्तायामनुपसंहार्यनध्यवसितोदाहरणमेतत्, उत्पत्तेः प्राक् सदसतोरभावात् । कथंचित् गगनकमलयोः सपक्षविपक्षभावे ततो व्यावृत्तिरपि कथंचिद् इति कथंचिदसाधारणानध्यसितः । असाधारणा[न]ध्यवसितोदाहरणं तु 'भूर्नित्या गन्धवत्त्वाद्' इति सुपसिद्धम् ।

ननु सूत्रम् 'अप्रसिद्धोऽसन् सन्दिग्धश्चानपदेशः (वै. सू. ३-१-१५) इति । अनध्यवसितस्तु त्रितयान्यतमान्तर्भूतो न भवति, तथा चानुपपन्नं भाष्यमित्यत आह—**अयमिति** । अनुमेयमात्रधर्मप्रतिबद्धः प्रसिद्धः; अयं च न तथा प्रसिद्ध इत्यप्रसिद्धपदेन सङ्गृहीतः । अत एव च सन्दिग्धश्चानपदेशतयानुक्तसमुच्चयचकारसङ्गृहीतयोः कालात्ययापदेशप्रतिरोधयोरप्रसिद्धपदेन व्याख्यानतः सङ्ग्रह इति ॥

---

1 यश्चसन्ननुमेये व्यो (६१०) । 2 रसन्नेव च व्यो (६१०) । 3 ऽन्यतरासिद्धो—भा । 4 वचनादेव रुद्धः—दे । 5 स ज्ञायमानत्वात् इत्यपि पाठः सम्भवति—सं ।

(२७७) **ननु चा[1]यं विशेषः संशयहेतुरभिहितः, शास्त्रे "तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वाद्" (वै. सू. २-२-२२) इति? न; अन्यार्थत्वात्। शब्दे विशेषदर्शनात्संशयानुत्पत्तिरित्युक्ते नायं द्रव्यादीनामन्यतमस्य वि[2]शेषः श्रावणत्वं किन्तु सामान्यमेव सम्पद्यते। कस्मात्? तुल्यजातीयेष्वर्थान्तर[3]भूतेषु द्रव्यादिभेदानामेकैकशो विशेषस्योभयथा दृष्टत्वादि[4]त्युक्ते न संशयकारणम्। अन्यथा षट्स्वपि पदार्थेषु संशयप्रसङ्गात्। तस्मात्सामान्यप्र[5]त्यक्षादेव संशय इति॥**

ननु [अ] साधारणो धर्मः संशयहेतुरुक्तः **न्यायवैशेषिक**सूत्रकाराभ्याम्, तथा च '[6]सामान्यानेकधर्मोपपत्तेः' इत्यनेकस्माद् व्यावृत्तोधर्मः अनेकधर्म इति इति व्युत्पत्त्या-[ऽ]साधारणधर्मो लभ्यते। 'तुल्यजातीयेषु अर्थान्तरभूतेषु च विशिष्टस्योभयथा दृष्टत्वात्' (वै. सू. २-२-२३) इति वैशेषिके तुल्यजातीयेभ्योऽर्थान्तरभूतेभ्यश्च विशेषस्य असाधारणधर्मस्योभयथा उभयविशेषेण सह नियतत्वेन दृष्टत्वादसाधारणः संशयहेतुरिति। तथा च सन्देहहेतुत्वात् सन्दिग्धप्रभेद एवानध्यवसित इत्यभिप्रायवानाशङ्कते **ननु चेति**। समाधत्ते **नेति**। संशयजननावच्छिन्नत्वं सन्दिग्धत्वं सन्देहजननयोग्यता वा? नाद्यः, संशयजनकसामग्रीविरहे संशयजनकानवच्छिन्नस्यासाधारणस्यापि असन्दिग्धत्वप्रसङ्गात्। न द्वितीयः, इतरकारणसाकल्ये यज्जातीये संशयदर्शनं तद्योग्यम्; तथा च निर्णायकानपि विशेषदर्शनविरहादिसहकारिप्राप्तौ पुरुषविशेषं प्रति सन्देहजनकत्वेन सन्दिग्धत्वप्रसङ्गात्। अनुमेयधर्मोऽव्याप्तः सन्दिग्ध इति साधारणासाधारणव्यभिचारिसामान्यलक्षणमिति चेत्; न; विपरीतव्याप्तावपि प्रकृतसाध्याव्याप्तिसम्भवेन असन्दिग्धत्वप्रसङ्गात्। विपरीतव्याप्तिविरहेऽव्याप्त इति चेत्; न; कालात्ययापदिष्टादेरनैकान्तिकान्तर्भावप्रसङ्गात्। बाधाद्युपजीविकायामव्याप्तौ पुरःस्फूर्तिकतया तर्कापरिशुद्ध्यादेरपि पृथग् दूषणत्वप्रसङ्गात्। असाधारणस्य सन्दिग्धानध्यवसितपुरःस्फूर्तिकतयाऽव्याप्तेरेव तयोरपि पृथग् दूषणत्वात्, असाधारणस्य सन्देहजनकत्वमभ्युपगम्य सन्दिग्धानध्यवसितस्य भेद उक्त इति सूचितम्।

1 चायं संशयहेतु°–दे। 2 विशेषः स्यात् मु. भा। 3 भूतेषु च–व्यो. (६१०)। 4 दित्युक्त–भा। 5 प्रत्ययादेव–भा। 6 न्या. सू. (१.१.२३)

नेति । वस्तुतस्तु अनध्यवसितस्य सन्देहजनकत्वमेव नास्ति अन्यार्थत्वात् सूत्रस्येत्याह—**अन्यार्थत्वादि**ति । सूत्रस्याऽन्योर्थः, तथा हि शब्दे श्रावणत्वमवगम्य कश्चित् सन्देग्धि 'किं शब्दो द्रव्यं, गुणः कर्मादिको वा' इति । अपरश्च संशयमाक्षिपति—'श्रावणत्वं तत्तद्विशेषासहचरितं कथं सन्देहं करोति ? यदि च कुर्यात् तदाऽनुपलब्धतत्तद्विशेषशेखरः स्याद्' इत्येवं परमतनिराकरणार्थं सूत्रं—**तुल्ये**त्यादि । असाधारणधर्मस्य असाधारणतयैव सामान्यधर्मतया दृष्टत्वादित्याह **शब्द** इत्यादि । उपसंहरति **तस्माद्** इति । सामान्यप्रत्यक्षादेव संशयः, नासाधारणधर्माद् इत्येवकारार्थः ।

ननु सिद्धसाधनमनपदेशः क्वान्तर्भवतु ? जिज्ञासितधर्मविरहाद् असिद्धे यदि, तदा 'व्याप्तस्य पक्षधर्मतया प्रतीतिः सिद्धिः' 'तदभावोऽसिद्धिः' इति लक्षणे सर्वेषामनपदेशानामसिद्धेऽन्तर्भावप्रसङ्गात् । तत्तद्बाधविरोधव्यभिचाराद्युपजीवितस्य भेदे प्रतिकूलप्रमाणवद् अनुकूलप्रमाणोपजीवितया सिद्धसाधनस्यापि पृथग् दूषणत्वापत्तेः । अनुकूलप्रमाणसद्भावो न विरोधकः, विपरीतसाधनं तु बाधकमिति बाधः पृथग्दोष इति चेत्; ततः किम् अनुकूलप्रमाणसद्भावेऽनुमानं साधकमसाधकं वा ? आद्ये पक्षधर्मतान्तर्भावनमपि विडम्बनम् । द्वितीये तु अनुकूलप्रमाणसद्भावमुपजीव्य अपक्षधर्मत्वं दोष इति कथं नानुकूलप्रमाणसद्भावः पुरःस्फूर्तिकः ? कथं च न पृथग्दोष इति ? सिद्धसाधनं कालात्ययापदिष्टान्तर्भूतमिति ब्रूमः । 'संशयकालप्रच्युते धर्मिणि साधनाभिधानं कालात्ययापदेशः' इति सामान्यलक्षणाद् बाधितविषयत्वं, साधितविषयत्वं च विशेषादिति ॥

(२७८) द्विविधं निदर्शनम्-साधर्म्येण वैधर्म्येण च। तत्रानुमेयसामान्येन लिङ्गसामान्यस्यानुविधानं साधर्म्यनिदर्शनम्; त[1]द्यथा 'यत्क्रियावत् तद्द्रव्यं दृष्टं यथा शरः' इति। अनुमेयविपर्यये च लिङ्गस्याभावदर्शनं, [2]वैधर्म्यनिदर्शनम्, त[3]द्यथा य[4]दद्रव्यं तत्क्रियावन्न भवति यथा सत्ता' इति ॥

साधने ज्ञाते तद्व्याप्तिग्रहणं यत्र तद्वचनं निदर्शनलक्षणमाह—**द्विविध**मिति । निदर्शनमिति निदर्श्यते व्याप्तिग्रहणविषयोऽनेन वचनेनेति सामान्यलक्षणं सूचितम् । **द्विविध**मिति विभागः ।

---

1 or 3 तद्यथा इति व्यो. (६१३) प्रतीके दे, इत्यत्र च नास्ति । 2 वैधर्म्यस्य–दे । 4 यदजन्यं–दे ।

अन्वयव्याप्तिग्रहणविषयवचनं साधर्म्यनिदर्शनमित्याह—**तत्रानुमेयसामान्येन लिङ्गसामान्यस्यानुविधानदर्शनं व्याप्तिदर्शकं वचनं साधर्म्यनिदर्शनम्**—यथा 'यत् क्रियावत् तद्द्रव्यम् यथा शरः' इति ।

व्यतिरेकव्याप्तिग्रहणविषयं वचनं वैधर्म्यनिदर्शनमित्याह—**अनुमेयविपर्यये लिङ्गविपर्ययकथकं वचनं वैधर्म्यनिदर्शनं** यथा 'यद् द्रव्यं न भवति तन्न क्रियावद् यथा सत्ता ॥

(२७९) [1]**एतेन निदर्शनाभासा निरस्ता भवन्ति। तद्यथा 'नित्यः शब्दोऽमूर्तत्वात्' यदमूर्त्तं तन्नित्यं दृष्टं यथा परमाणुः यथा कर्म, यथा स्थाली, यथा तमोऽम्बरवदिति, यद्द्रव्यं तत् क्रियावद् दृष्टमिति च। लिङ्गानुमेयोभयाश्रयासिद्धाननुगतविपरीतानुगताः साधर्म्यनिदर्शनाभासाः ॥**

निदर्शनलक्षणरहिता निदर्शनाभासा इति तदेव दर्शयति **अनेने**ति । 'शब्दो नित्योऽमूर्तत्वात्, यदमूर्तं तन्नित्यम् यथा परमाणुः' इति लिङ्गविकलः । 'यथा कर्म' इति अनुमेयधर्मविकलः । 'यथा तमः' इति आश्रयहीनः तमसो भावत्वेनाप्रतीतेः । 'अम्बरवद्' इति अप्रदर्शितान्वयः । 'यद् द्रव्यं क्रियावद्' इति विपरीतोपदर्शितान्वय इति साधर्म्यनिदर्शनाभासाः ॥

(२८०) **यदनित्यं तन्मूर्तं दृष्टं यथा कर्म, यथा परमाणुः, यथाऽऽकाशं य[2]था तमः, घटवद्यन्निष्क्रियं तदद्रव्यं चेति लिङ्गानुमेयोभयाव्यावृत्ताश्रयासिद्धाव्यावृत्तविपरीतव्यावृत्ता वैधर्म्यनिदर्शनाभासा इति ॥**

'शब्दो नित्यः अमूर्तत्वात् यन्न नित्यं न तदमूर्तम् यथा कर्म' इति साधनाव्यावृत्तः । 'यथाऽऽकाशम्' इत्युभयव्यावृत्तः । 'यथा तमः' इति आश्रयहीनः । 'घटवद्' इत्यव्यावृत्त्यभिधानम् । 'यन्निष्क्रियं तदद्रव्यम्' इति विपरीतव्यावृत्त्यभिधानम् । इति वैधर्म्यनिदर्शनाभासाः केवलव्यतिरेकिणि द्रष्टव्याः ॥

---

1 अनेन–दे; किरणावलीसम्मतोऽयं पाठः । 2 यथा तथा घटवद् यन्निष्क्रियं तदद्रव्यं दृष्टमिति–दे ।

(२८१) **निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यस्यानुमेयेऽन्वायनमनुसन्धानम्। अ[1]नुमेयधर्ममात्रत्वेनाभिहितं लिङ्गसामान्यमनुपलब्धशक्तिकं निदर्शने साध्यधर्मसामान्येन सह दृष्टम्, अ[2]नुमेये येन वचनेना[3]नुसन्धीयते तदनुसन्धानम्। तथा च 'वायुः क्रियावान्' इति। अनुमेयाभावे च तस्यासत्त्वमुपलभ्य न च तथा वायुर्निष्क्रिय इति॥**

जिज्ञासाक्रमेण व्याप्तिप्रतिपत्तिहेतुनिदर्शननिरूपणानन्तरं पक्षधर्मताप्रतिपत्त्युपाध्भावापन्नानुसन्धाननिरूपणार्थमाह **निदर्शन** इति। 'निदर्शने गृहीतव्याप्तिकस्य पक्षधर्मतापादकं वचनमनुसन्धानम्' इति सामान्यलक्षणमनुसन्धानपदसूचितम्। व्याप्तिप्रतिसन्धानात् अनु पश्चाद् धर्मिणि लिङ्गस्य सन्धायकं वचनमित्यर्थः। अन्वयव्याप्तिवचनप्रवृत्तलिङ्गानुसन्धानं साधर्म्यानुसन्धानमिति विशेषलक्षणम् इत्याह——**अनुमेयसामान्येनेति।**

ननु अनुसन्धानं लिङ्गस्य धर्मिणि सत्तामादर्शयति, बाधादिरहितत्वं वा? व्याप्तस्य धर्मिसम्बन्धितां वा? नाद्यः, जिज्ञासावशप्रवृत्तलिङ्गवचनस्य धर्मिसम्बद्धलिङ्गार्थत्वात् तदसम्बद्धलिङ्गस्य चाजिज्ञासितत्वात्। न द्वितीयः, धर्मिसम्बन्धमात्रोपक्षीणस्यानुसन्धानस्य व्यभिचारनिवर्तकव्याप्त्युपदर्शकनिदर्शनवद् बाधादिविरहोपदर्शनेऽसामर्थ्यात्। अन्यथा बाधाव्यभिचारयोः सहासम्भवे निदर्शनेनैव बाधादिविरहोपदर्शनेऽनुसन्धानमपार्थकं स्यात्। पुरःस्फूर्तिकबाधस्य पृथग्दृष्टत्वेन निदर्शनं विपरीतव्याप्तिव्यभिचारमात्रनिवर्तनपरं यदि, तदा तत एव पक्षधर्मतामात्रापादनपरमनुसन्धानमिति समानम्। न तृतीयः, व्याप्तिपक्षधर्मताधर्मद्वयाङ्गकं हि लिङ्गं जिज्ञासितम्, तत्र धर्मिसम्बन्ध(द्ध)ज्ञाप्यधर्मस्येव त[4]त् सम्बन्ध(द्ध)ज्ञापकधर्मजिज्ञासायां लिङ्गचनं तत्सम्बन्ध(द्ध)लिङ्गप्रतिपादनपरम् तदनुव्याप्तिप्रतिपादकनिदर्शनम्। न च व्याप्ततामात्रमग्रे जिज्ञासितं पक्षधर्मता तु पश्चादिति निर्दिष्टं कारणमस्ति। न च धर्मिसम्बन्ध(द्ध)स्याव्याप्तत्वात् व्याप्तस्य च धर्मिसम्बन्ध(द्ध)त्वात् पौर्वापर्यनियम इति वाच्यम्, साध्यधर्मस्येव साधनधर्मस्यापि पुरस्कृतसामान्यस्य [5]व्याप्तांशनिवेशात्। अन्यथा साधनसामान्यधर्मप्रतिपादकवचनात् साध्यसामान्यप्रतिपादकवचनस्यापि अवकाशप्रसङ्गात्।

---

1 अनुमेये–दे। 2 अनुमेयेन–दे। 3 नानुसन्धानम्–दे। 4 तत सम्बन्ध°। 5 व्याप्त्यंश विवेशात्।

तस्माद् व्याप्तजातीयस्य पक्षधर्मता प्रदर्श्यतां, पक्षधर्मजातीयस्य व्याप्तिर्वेति न कश्चिद्विशेष इति लिङ्गवचनादवधारितपक्षधर्मताकस्य निदर्शनावबोधितप्रतिबन्धस्य गमकत्वेऽनुसन्धानवैयर्थ्यमिति ।

न वैयर्थ्यम्, लिङ्गवचनादनुमेयसम्बद्धे विशेषतो लिङ्गदर्शनेन सामान्यतः प्रतिबद्धेऽवगतेऽपि प्रतिबन्धपुरस्कृतजातियुक्तं तु पक्षसम्बन्ध(द्ध)मिति नावगतम्; तदर्थमनुसन्धानम् । अन्यथा अनुमेयविशेषपुरस्कृतसामान्ययोः प्रतिबन्धानवगमेऽवान्तरविशेषावच्छिन्नसामान्ययोरेव प्रतिबन्ध इति शङ्कायां व्यभिचारशङ्कायामिव लिङ्गस्यागमकत्वप्रसङ्गात् इत्यभिप्रायवान् अन्वयव्यतिरेकाभ्यां विवरणव्याजेन अनुसन्धानसामर्थ्यमादर्शयति— **अनुमेयमात्रधर्मत्वेने**ति । 'मात्र' ग्रहणं व्याप्ततां निवारयति । लिङ्गसामान्यं प्रतीतं विशेषतोऽनुपलब्धप्रतिबन्धमवान्तरविशेषेणैव प्रतिबद्धमिति शङ्कया अगमकं स्याद् इति अनुसन्धानं व्याप्तजातीयस्य अनुमेयसम्बद्धादभेदं दर्शयति । अत एव कृतकश्च शब्द इति चकारोऽपि व्याप्तात् पक्षधर्मस्य अभेदं समुच्चिन्वन् चरितार्थः । निदर्शने 'साध्यधर्मसामान्येन' इत्यादिना साधर्म्यानुसन्धानं लक्षणं सहोदाहरणम् । 'अनुमेयाभावे वा' इत्यादिना व्यतिरेकव्याप्तिबलप्रवृत्तलिङ्गस्य अनुमेयधर्मताप्रदर्शकं वचनं वैधर्म्यानुसन्धानं लक्षणं सहोदाहरणं कथयति ॥

(२८२) **अनुमेयत्वेनोद्दिष्टे चानिश्चिते च [1]परेषां निश्चयापादनार्थं प्रतिज्ञायाः पु[2]नर्वचनं प्रत्याम्नायः । [3]प्रतिपाद्यत्वेनोद्दिष्टे चानिश्चिते च परेषां हे[4]त्वादिभिरवयवैराहितशक्तीनां परिसमाप्तेन वाक्येन निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः 'तस्माद्द्रव्यमेव' इति ॥**

जिज्ञासाक्रमप्राप्तं 'प्रत्याम्नाय' लक्षणमाह—**अनुमेयत्वेने**ति । व्याप्तिपक्षधर्मतोपपन्नलिङ्गप्रतिपत्तिसन्धानानन्तरं तत्तदनिष्टकोटिसम्भावकनिराससूचनाय प्रतिज्ञार्थस्य पुनरभिधानं प्रत्याम्नायः इति तात्पर्यार्थः । अनुमेय[5]त्वेनोद्दिष्टे चानिश्चिते चेति तत्तदनिष्टकोट्युपाढौकनसम्भावनेन परेषामनिष्टकोटिसम्भावनाशालिनाम् आकाङ्क्षायोग्यतासत्तिम[6]दत्रैवोपदर्शितव्याप्तिपक्षधर्मतोपपन्नलिङ्गप्रतिसन्धानद्वारा प्रतिज्ञायाः प्रतिज्ञार्थस्यानिश्चयापादनार्थं पुनर्वचनं प्रत्याम्नायः इत्यर्थः ।

---

1 परेषां पुनर्निश्चया–दे । 2 वचनं–दे । 3 अनुमेये प्रतिपाद्यत्वेनोद्दिष्टे–व्यो (६१६) । 4 हेत्वादिभिराहितशक्तीनां–व्यो (६१६) । 5 नोद्दिष्टो वा निश्चितेति । 6 मदत्र एवोपदर्शित इत्यपि पाठोऽत्र सम्भवेत् । सम्पादकः ।

ननु प्रत्याम्नायो वाक्यार्थप्रतिपत्तिफलको वा, अबाधितविषयत्वासत्प्रतिपक्षत्व-सूचनफलको वा, अन्यार्थो वा ? नाद्यः, आकाङ्क्षायोग्यतासत्तिमत्प्रतिसन्धीयमानपदकदम्बक-मात्राधीनवाक्याधीनवाक्यार्थबोधसम्भवे तदपरस्य सामर्थ्यानुपलब्धेः, उपलब्धौ वा 'गाम-भ्याज' इत्यादि लौकिकवाक्येऽपि प्रत्याम्नायस्थानीयपदकदम्बकोपादानप्रसङ्गः। न च विप्रतिपन्नवादिबोधजनकः तत्तद्विप्रतिपत्तिनिराकरणसंसूचनेन योग्यताप्रतिसन्धायकः प्रत्या-म्नायस्येति वाच्यम्, लौकिकवाक्यस्यापि क्वचित् क्वचित् विप्रतिपन्नजनमनोहरत्वात् प्रकृत-वादिनोरिव लौकिकवाक्यप्रयोक्तुराप्तत्वानिश्चयात्। न द्वितीयः, विरोधव्यभिचारनिरसन-परनिदर्शनवचनेनेने(नै)व तन्निरासप्रतिपत्तिलम्भवत् पक्षधर्मताप्रतिपादकवचनसन्दर्भादेव बाधादिसमस्तपक्षधर्मताविरोधकप्रकारनिरसनेन अबाधितविषयत्वाऽसत्प्रतिपक्षत्वप्रतिलम्भात्, अन्यथाऽविरोधाव्यभिचारसूचकसुगमना[या ?]भिधानप्रसङ्गः। व्याप्तिप्रदर्शकवचनोन्मूलीयत्वं-पुरःस्फूर्तिकविरोधादे 'यदि पुरःस्फूर्तिकबाधादेरपि, तदा पक्षधर्मतापादकवचनसन्त्रासनीयत्वम्। न तृतीयः, तात्पर्यार्थप्रतिपादनमन्तरेण वाक्यस्यान्यार्थत्वानुपलब्धेरित्यत आह—**प्रति-पाद्यत्वेने**ति। अनाप्तवचनेन प्रतिज्ञारूपेण प्रतिपादितेऽपि अनुमेयेऽनाप्तवचनार्थत्वादेव अनिश्चिते परेषां हेत्वादिभिरवयवैरुत्पादितासन्नसाकाङ्क्षबोधानां बाधप्रतिरोधशङ्काव्युदा-सद्वारेण योग्यतानुसन्धायकप्रत्याम्नायेन आप्तवाक्यावबोधसमर्पकेण विप्रतिपन्नं परं प्रति निश्चयोत्पादकेन प्रतिज्ञायाः पुनर्वचनेन वाक्यार्थबोधसिद्धिरित्यर्थः।

अयमाशयः—आकाङ्क्षायोग्यतासत्तिमत्तया अनुसन्धानफलकः प्रत्याम्नायः। न च लौकिकवाक्येऽपि प्रत्याम्नायाभिधानप्रसङ्गः; तद्वाक्येनाप्तोक्तेनानिश्चितेपि कथंचिद् आप्तोक्त-त्वसम्भावनायां प्रत्याम्नायार्थयोग्यतानुसन्धानसम्भवे प्रत्याम्नायाभिधानानुपपत्तिः। न्यायवाक्ये तु विप्रतिपन्नवादिबोधने योग्यतानुसन्धानविरहिणि योग्यतानुसन्धायकं तत्तद्बाधप्रतिरोधशङ्का-पसारकतर्कसंसूचकप्रत्याम्नायाभिधानं युक्ततरम्। न च प्रत्याम्नायेऽपि अपरापरप्रत्याम्नाया-पत्तिः, प्रथमप्रत्याम्नायस्यैव सकलप्रत्याम्नाया[1]च्च(र्थ)शङ्काव्युदासपरत्वात्। अत एव स्वार्थानुमितौ क्षणं ध्यात्वेति प्रत्याम्नायार्थो दर्शितः विप्रतिपन्नबोधके तु वाक्ये नैव प्रसङ्गः; सन्दिग्धाप्तोक्तत्वसम्भावनायां योग्यताप्रतिसन्धानावैधुर्यानुपपत्तेः। न च बाधितप्रतिरुद्धा-दिष्वपि प्रत्याम्नायदर्शनात् प्रत्यम्नायोऽनियामक इति वाच्यम्; व्यभिचरितार्थपक्षधर्मतयोरपि व्याप्त्युपदर्शनानुसन्धानदर्शनात् तयोरप्यनियामकत्वापत्तिः। तत्र निपुणप्रतिपत्तृनिरूपणेन आभासानाभासव्यवस्थितिर्यदि तदाऽऽम्नायेऽपि वस्तुनो बाधादिविरहाधारकप्रमाणसम्भवेऽना-

1 —MS किन्त्वर्थदृष्ट्या अत्र 'र्थ' इति समीचीनम्।

भासकत्वम्; अन्यथा त्वाभासत्वमिति समानमित्यभिप्रायवानुदाहरणमाह—**तस्माद्** इति। तस्मात्—क्रियावत्त्वाद् द्रव्यं वायुरित्यर्थः ॥

(२८३) तर्हि नन्वेतस्मिन्नसति [1]पूर्वेषामवयवानां समस्तानां व्यस्तानां वा तदर्थवाचकत्वमस्ति गम्यमानार्थत्वाद्, इति चेत्, न; अतिप्रसङ्गात्। तथा हि प्रतिज्ञानन्तरं हेतुमात्राभिधानं कर्तव्यं विदुषामन्वयव्यतिरेक[2]स्मरणाद[3]र्थावगतिर्भविष्यतीति; तस्मादत्रैवार्थपरि[4]समाप्तिः ॥

ननु आकाङ्क्षायोग्यताऽऽसत्तिमत्पदकदम्बकप्रतिसन्धानमेव वाक्यार्थबोधनसमर्थमित्यलं प्रत्याम्नायेन इत्यत आह—**तर्हि** इति। असति प्रत्याम्नाये पूर्वकावयवानां समस्तानां व्यस्तानां वा वादिसम्भावनायां योग्यतानुसन्धानविरहिणां वाक्यार्थबोधकत्वानुपपत्तिरित्यर्थः।

ननु व्याप्तिपक्षधर्मतोपपन्नलिङ्गवान् धर्मी बाधादिसमानविपर्ययश्चेति प्रतिषिद्धमतो गम्यत एव योग्यताप्रतिसन्धानमित्याह-**गम्यमानत्वादिति**। परिहरति-**नेति**। यदि व्याप्तिपक्षधर्मतोपपन्नं लिङ्गवचनमिति बाधादिविरहोऽर्थादवधार्यते तदा प्रतिज्ञानन्तरं साधनाभिधानमित्येव व्याप्तिपक्षधर्मतोपपन्नलिङ्गावगम इति निदर्शनाभिधानमप्यपार्थकम्। अत एवोक्तम्—

"विदुषां वाच्यो हेतुरेव हि केवलः" [प्रमाणवार्तिक]।

(२८४) कथम्? 'अनित्यः शब्दः' इत्यनेनानिश्चितानित्यत्वमात्रविशिष्टः शब्दः कथ्यते; 'प्रयत्नानन्तरीयकत्वाद्' इत्यने[5]नानित्यत्वसाधनधर्ममात्रमभिधीयते। इह 'यत् प्रयत्नानन्तरीयकं तदनित्यं दृष्टं यथा घटः' इत्यनेन साध्यसामान्येन [6]साधनसामान्यस्यानुगममात्रमुच्यते। 'नित्यमप्रयत्नानन्तरीयकं [7]दृष्टं यथाऽऽकाशम्' इत्यनेन सा[8]ध्याभावेन साधनस्यासत्त्वं प्रदर्श्यते। 'तथा च

1 परेषाम्–भा। 2 दर्शनाद–व्यो (६१७)। 3 दर्थाधिगति°–व्यो (३१७), तदर्थावगति–भा; अर्थाधिगति–दे। 4 परिसमाप्तिरिति–दे। 5 साधर्म्यवैधर्म्यमात्रम्–दे। 6 सामान्यस्य–दे। 7 न्तरीयकं यथा–दे। 8 साध्याभावे–दे।

प्रयत्नानन्तरीयकः श[1]ब्दः, न च तथाऽप्रयत्नानन्तरीयकः' इत्यन्वयव्यतिरेकाभ्यां [2]साधनसामान्यस्य शब्देऽनुसन्धानं गम्यते। 'तस्मादनित्यः शब्दः' इत्यनेन 'अनित्य एव शब्दः' इति [3]प्रतिपिपादयिषितार्थपरिसमाप्तिर्गम्यते। तस्मात्पञ्चावयवेनैव वाक्येन परेषां स्वनिश्चितार्थप्रतिपादनं क्रियते—इ[4]त्येतत्परार्थानुमानं सिद्धमिति ॥

अथ अव्याप्तस्यापि साधनत्वाभिधानसम्भवस्तदा बाधादिसम्पन्नस्यापि व्याप्तिपक्षधर्मताभिधानसम्भवः समानः। तस्मात् स्वप्रतिपत्त्यनुसारेण [5]पर**बोधि**[बोधे] व्याप्तौ पक्षधर्मतायां च प्रदर्शितायां बाधादिविरहोपायानुसारेण तत्सूचके वाक्यार्थपरिसमाप्तिरिति तत्तदाकाङ्क्षाद्युपस्थापनेन तत्तदवयवानां प्रश्नपूर्वकमुपयोगं दर्शयति। प्रत्याम्नायसामर्थ्यं दर्शयितुं **कथम्** इत्यादिना। सर्वत्र 'मात्र'ग्रहणेन योग्यतानुसन्धानविरहमाचष्टे। प्रत्याम्नायस्तु अनन्यार्थो योग्यतानुसन्धायक इत्युपसंहारव्याजेनाह—**तस्मादि**ति। तस्मात् पञ्चावयवेन विप्रतिपन्नबोधकेन न्यायवाक्येन परेषां स्वप्रतिपन्नार्थबोधनमिति परार्थानुमानमिति परस्मै अनुमित्युत्पादकसामग्र्युपदर्शनमित्यर्थः ॥

(२८५) **विशेषदर्शनजम[6]वधारणज्ञानं [7]संशयविरोधी निर्णयः ॥**

प्रत्यक्षानुमानाभ्यां ततः फलं निर्णयोऽर्थान्तरं यथार्थज्ञानत्वाच्च विद्यान्तरमित्यभिप्रायवान् दर्शयति—**विशेषे**ति। निर्णयसामान्यविशेषलक्षणे दर्शयति—**अवधारणज्ञानमि**ति। वास्तवैकविशेषोल्ले[8]**ख**(ल्लेखि)विज्ञानं निर्णय इति विशेषलक्षणम्।

(२८६) **एतदेव प्र[9]त्यक्षमनुमानं वा। यद्विशेषदर्शनात्संशयविरोध्युत्पद्यते स प्र[10]त्यक्षनिर्णयः, [11]यथा स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यालोचनाविशेषेष्वप्रत्यक्षेषूभयविशेषानुस्मरणात् 'किमयं स्थाणुः पुरुषो वा' इति संशयोत्पत्तौ शि[12]रःपाण्यादिदर्शनात् 'पुरुष एवाऽयम्' इत्यव-**

---

1 शब्दो दृष्टः न च तथाऽऽकाशवद-प्रयत्नानन्तरीयकः–भा; शब्दो न च तथा इत्यन्वय–दे। 2 दृष्टसामर्थ्यस्य साधनस्य सामान्यस्य शब्दानुसन्धानं–दे। 3 इत्यपि प्रतिपादयिष्यतः–दे। 4 इति सिद्धम्–दे। 5 बोधि MS अर्थदृष्ट्या 'बोधे' इति समीचीनम्–सं.। 6 धारणा–दे। 7 संशयविरोधि इति ज्ञानविशेषणं समीचीनं भाति। 8 ल्लेख MS 'ल्लेखि' इति शुद्धम्। 9 प्रत्यक्षानुमानं–दे। 10 स निर्णयः–दे। 11 यत्र–दे। 12 पाण्यादिविशेष–व्यो (६२०)–दे।

धारणज्ञानं प्रत्यक्षनिर्णयः। विषाणमात्रदर्शनात् गौर्गवयो वा' इति संशयोत्पत्तौ सास्नामात्रदर्शनात 'गौरेवायम्' इत्यवधारणज्ञानमनुमाननि[1]र्णय इति ॥

परिहरति—**एतदेवेति**। एतदेव निर्णयस्वरूपं प्रत्यक्षविषये प्रमाणान्तरमुत्पादयत् प्रत्यक्षम्; अनुमित्युत्पादकमनुमानम्। यत्तु फलं न जनयति तत् प्रत्यक्षादिफलत्वेन प्रत्यक्षादिकमेव; फलनिरूपणीयत्वात् साधनस्य। एतदेव स्पष्टयति 'यद्' इत्यादिना 'अनुमाननिर्णयः' इत्यन्तेन ॥

(२८७) **लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पटुवाभ्यासादरप्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुव्य[2]वसायेच्छानुस्मरणद्वेषहेतुरतीतविषया स्मृतिरिति ॥**

प्रमाणनिरूपणे तत्साधनतया प्रत्यक्षानुमाननिरू[3]पण(णे) कृते [4]**आनि** [तन्नि]रूपणप्राप्तौ निर्णयमात्रस्य प्रत्यक्षानुमानत्वे दर्शिते स्मृतिनिर्णयस्य तत्साधनस्य च प्रकृतेऽन्तर्भाव आधिक्यं वेति विमर्शधिया स्मृतिमेव तावत् कारणतो, विषयतो लक्षणतो निरूपयति—**लिङ्गदर्शनेत्यादि**। लिङ्गदर्शनेत्यादिना प्रणिधानादिसूत्रगतं कारणं कथयति—[5]**तत्सहितादात्ममनसोः संयोगाद्** इति साधारणम्। 'पटुवाभ्यासादरप्रत्ययजनिताद्' इति संस्कारकारणम्। 'संस्काराद्' इत्यसाधारणं कारणम्। अनेन लक्षणं सूचयति—संस्कारासाधारणकारणिका मतिः स्मृतिः"। दृष्टेति प्रत्यक्षतः, श्रुतेति वाक्यतः, अनुभूतेति अनुमानादितः। 'अवधारितेष्वर्थेषु' इति विषयोपदर्शनम्। अनेन गृहीतमात्रग्राहिका पूर्वग्रहेण सापेक्षा विषयनियमा 'अयम्' इति स्मृतिरिति सूचितम्। फलं दर्शयति—**शेषानुव्यवसायस्मरणेच्छाद्वेषहेतुः** इति। '[6]शेषः'—परिशेषः, 'अनुव्यवसितः'—व्याप्तिपक्षधर्मतोपपन्नलिङ्गविज्ञानम्; तस्य व्याप्तिस्मृतिः हेतुः। प्रथमपदस्मरणं द्वितीयपदस्मरणहेतुः। इच्छाद्वेषयोः सुखदुःखसाधनस्मृतिहेतुरित्यर्थः।

अतीतविषयेति प्रमाणत्वं निवारयति। **स्मृति**रिति लक्ष्यनिदर्शनम्। ननु स्मृतिरप्रमेति कुतः? अतीतविषयत्वं तावदनुमानादिषु व्यभिचरति; अथ स्मृति[7]दर्शितवेद्यस्य

---

1 निश्चये–दे। 2 नुव्यवसायस्मरणेच्छाद्वेषहेतु°–व्यो (६२०),–दे। 3 °पणे MS इति शुद्धम्। 4 आनि MS 'तन्नि' इति शुद्धम्। 5 'तत्सहिताद्–इति भाष्ये नास्ति। 6 शेषपरिशेषः–MS। 7 दर्शितावदवस्य–MS अर्थदृष्ट्येदं न सम्यक्।

स्मृत्युपदर्शनकालेऽसत्त्वेन अयथार्थत्वात् अयथार्था तर्हि स्यात् तथा च 'प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा' इति भाष्यविरोधः; अनुभवयथार्थतया स्मृतियथार्थतेति याचितकमण्डनाभिधाने भाष्याविरोध इत्यनुपपन्नम्, असदर्थत्वासिद्धेः। न हीदानीन्तनकाले पूर्वावस्थाग्राहिका स्मृतिः, इदानीन्तनकालस्य अनुभवाविषयत्वेन स्मृत्यगोचरत्वात्। ततश्चातीतश्यामे अतीतश्यामताग्राहकप्रत्ययवत् स्मृतेर्यथार्थत्वं यथार्थानुभवात्। सर्वस्मृतिः अनुभवयथार्थत्वायथार्थत्वाभ्यां यथार्थाऽयथार्था वेति।

अननुभवत्वमप्यसिद्धम्, अनुभवत्वे विरोधाभावात्। संस्काराऽसाधारणकारणप्रसूतत्वादननुभवत्वमिति चेत्; न; लिङ्गासाधारणकारणकत्वेन अनुमितेरप्यननुभवत्वापत्तेः। पूर्वानुभवापेक्षया स्वविषयनियमेन अननुभवत्वे जनकव्याप्तिज्ञानापेक्षनियतविषयानुमितेरप्यननुभवत्वापत्तिः। ज्ञापकानुभवापेक्षा त्वसिद्धा। गृहीतमात्रग्राहित्वं त(तु) धारावहनबुद्धावपि अननुभवत्वमापादयतीत्युपेक्षणीयम्। प्रमानुभवव्यवहारागोचरत्वं च दिङ्मूढाव्यवहारवत् कतिपयजनाव्यवहारेऽपि न वास्तवाव्यवहारसम्पादकम्, समस्तजनाव्यवहारश्चासिद्धः। मुनीनामव्यवहारश्च विप्रतिपन्नं प्रति अ(मु)नित्वासिद्धेरनुपपन्नः। औत्पत्तिकसम्बन्धपारमेश्वरसङ्केताभावेनाव्यवहार इत्यप्यसङ्गतम्, इतरेतराश्रयत्वात्, अव्यवहारेण तयोर्विरहः, तद्विरहेण चाव्यवहारः। [1]पूर्वानुभवेनाविषयीकृततत्तावभासतायामनपेक्षं च। न च तत्ता ज्ञातता, ज्ञातोऽयं सोऽयमिति अभेदापत्तेः। न चातिवृत्तानुभवविशिष्टता, तस्याः अनुभवेनानुल्लेखात्। स्मृतिबलेन तत्कल्पितमित्यपि न, अननुभूत एव स्मृतिस्तत्त्वांशोल्लेखिनीत्यपि कल्पनाप्रसङ्गात्। पूर्वकालविशिष्टता च यदि स्यात्, पूर्वमासीदयमित्यत्रापि तदित्युल्लेखापत्तिः। केवलवस्तुग्राहिणी स्मृतिः 'सः' इत्यभिप्रायस्तु अनुमितपूर्वकालत्वविशिष्टतायाम् इत्यपि न, 'तं घटं स्मरामि' इत्यनुव्यवसायाभावप्रसङ्गात्। तथा च द्वे एव प्रमाणे इत्यसङ्गतम्।

अत्रोच्यते—ईश्वरेच्छाधीनप्रमाशब्दावाच्यत्वेन अप्रमात्वम्। प्रमाशब्दावाच्यता च प्रमाणाभियुक्त(क्ता) [क्ष]**चरणकणभक्षजै**मिनिप्रभृतीनां स्मृतौ प्रमाव्यवहारविरहात् **इन्द्रपाणि**निप्रभृतिव्यवहारविरहादपशब्दव्यवहारवत् सत्या अननुभवत्वेन वा, अननुभवत्वं च पूर्वानुभवापेक्षयैव विषयप्रतिनियमादिच्छादिवत्। अत एवाज्ञानत्वमित्यपि न वाच्यम्, स्वभावतोऽर्थप्रवणत्वस्य ज्ञानत्वाभिव्यञ्जकत्वात्। न च स्मृतेः स्वभावतो

1 पूर्वानुभवानुविषयीकृतं तत्तावभासतायामनपेक्षं च MS।

विषयप्रवणत्वमिच्छावदसिद्धम्; अनुभवातिरिक्तसंस्कारायत्तनियतविषयत्वात्। अध्यक्षस्य इन्द्रियसन्निकर्षाधीनम्, लिङ्गस्य स्वविषयप्रतिबन्धायत्तम्, वाक्यस्य आकाङ्क्षायोग्यताहेतुकम्, आभासस्य च दोषप्रवणं नियतविषयत्वम्। ततश्च पूर्वानुभवापेक्षयैव संस्कारद्वारा नियतविषयत्वेनाप्रमात्वम्। तत्ता च अतीतकालावच्छेदः। अतीतकालावच्छेदश्च अनुभवोत्तरकालं तदनुभवगोचरः। 'पूर्वमयमासीद्' इत्यत्रापि 'तद्'इत्युल्लेखप्रसङ्गः इति न वाच्यम्, सकलपर्यायावच्छेदनियमाभावात्। अनुभूतदिवसमासादिरूपकालभेदो वा स्मृतिगोचरः, तस्य तु वृत्ततामनुसन्धाय तद्वाचकोल्लेखः। 'तं घटमहं स्मरामि' इत्यनुव्यवसायश्च वाचकोल्लेखानुसन्धानसहकारिसचिवकारणविशेषादिति सर्वं सुस्थम्॥

(२८८) **आम्नायविधातृणामृषी[1]णामतीतानागतवर्तमानेष्वतीन्द्रियेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद्धर्मविशेषाच्च यत्प्रा[2]तिभं य[3]थात्मनिवेदनं ज्ञानमुत्पद्यते तद् 'आर्षम्' इत्याचक्षते। तत्तु प्रस्तारेण दे[4]वर्षीणाम्, कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति 'श्वो मे भ्राताऽऽगन्ता इति हृदयं मे कथयति' इति।**

ननु यथार्थत्वाविशेषे स्मृतिवत् प्रातिभं ज्ञानं किमप्रमारूपं प्रत्यक्षादिवत्? प्रमारूपं वा? नाद्यः, यथार्थानुभवत्वात्। द्वितीये तु परोक्षमपरोक्षं वा? न तावत्परोक्षम्, लिङ्गानुसन्धानविरहेण जायमानत्वात्। न च नयनस्पन्दादिलिङ्गप्रतिसन्धानजम्, तेषां व्यभिचारित्वात्। न च धूमादिवत् तदवान्तरजातिभेदो लिङ्गम्, तद[न]नुसन्धानेऽपि जायमानत्वात्; अन्तःकरणस्य च बहिरप्रवृत्तेः। धर्मविशेषसहकृतान्तःकरणस्य बहिः प्रवृत्त्यभ्युपगमेऽपि कन्यकाप्रातिभाद्यव्याप्तिः। तत्रापि धर्मविशेषकल्पनेऽनुमातृणां धर्मविशेषविरहे प्रमानुपपत्तौ अनुमानविलोपापत्तिः। न चेश्वरापरोक्षप्रमावदपरोक्षप्रमान्तरमेवेदम्; अस्याजन्यत्वेन एतज्जनकस्यापरोक्षप्रमासाधकतमतया प्रत्यक्षत्वस्य बाह्यान्तरासम्भवेन दूषितत्वात्। प्रमाणान्तरत्वे द्वे एव प्रमाणे इति व्याघातः। लौकिकप्रमाणापेक्षया [5]कन्याप्रातिभप्रमाणस्यार्थान्तरत्वे न द्वे एव प्रमाणे इत्यत आह—**आम्नायविधातृणामिति।** आम्नायं वेदं विविधप्रकारेण साङ्गोपाङ्गेन चानुद्धर्तुं(चानुकर्तुं?) अर्थतः

---

1 विधातृणामतीतानागत–दे। 2 यत्प्रत्यभिज्ञानं–दे। 3 यथार्थ–भा। 4 ऋषीणाम्–व्यो (६२२)–दे। 5 प्रातिभव° MS।

पाठतश्च शीलं येषां ते तथा, ऋषीणां—त्रिकालदर्शिनाम् । **अतीतानागते**त्यादिविषयं दर्शयति । अतीन्द्रियेषु अस्मदादीन्द्रियपथानवतीर्णेषु । **धर्मादि**ष्विति सकलातीन्द्रियपरिग्रहः । **ग्रन्थोपनिबद्धेषु**—शास्त्रप्रतिपादितेषु, तदनुपनिबद्धेषु तदप्रतिपादितेषु ।

आत्ममनःसंयोगाद् इत्यसमवायिकारणमाह । **धर्मविशेषाद्** इति निमित्तम् । एतेन प्रत्यक्षसामग्रीसमुत्थत्वेन प्रत्यक्षतां कथयति । तथा हि योगजधर्मानुगृहीतान्तःकरणस्य बाह्यप्रवृत्तिवत् तपःप्रभावप्रसूतधर्मविशेषसहकारिमनःप्रवृत्तेः बहिः समानत्वात् । न च योगिप्रत्यक्षत्वं, योगजधर्माजन्यत्वात् । न च प्रकृष्टधर्मशब्दवाच्यत्वेन समानत्वम्, प्रकृष्टशब्दप्रवृत्तावेकनिमित्तविरहात् । न च शब्दसामान्यमात्रेण हेतुता, अनुमानप्रवृत्तौ तु अन्वयव्यतिरेकसमधिगतसामर्थ्यस्य लिङ्गदर्शनस्य हेतुत्वात्, धर्मविशेषस्य चानुपलभ्यमानस्य कल्पनानुपपत्तेः । कन्यायाश्च ज्ञानसन्दर्शनेन कारणान्तरानुपलम्भेन जन्मान्तरीयतपःप्रभावप्रभावितधर्मविशेषानुस्मरणं न्याय्यम् । योगिप्रत्यक्षबहिर्भूतत्वात् पृथक्प्रमाणविप्रतिपत्तिविषयत्वाच्च प्रत्यक्षप्रस्तावे कीर्तनम् । 'यत्प्रातिभम्' इति नामसङ्कीर्तनम् । प्रतिभैव प्रातिभम्, यथाऽऽत्मनि यथास्वरूपे तदार्षमिति । तच्च प्रस्तारेण बाहुल्येन ऋषीणां कदाचिच्चान्येषां धर्मविशेषसहायानाम्; यथा कन्यायाः 'श्वो मे भ्राता आगन्ता' इति ॥

(२८९) **सिद्धदर्शनं न ज्ञानान्तरम्; क[1]स्मात्? अञ्जनपादलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टृणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद्दर्शनं तत्प्रत्यक्षमेव । अथ दिव्यान्तरिक्षभौमान्तं प्राणिनां ग्रहनक्षत्रसञ्चारादिनिमि[2]त्तं धर्माधर्मविपाकदर्शनमिष्टं तदप्यनुमानमेव । अथ लिङ्गानपेक्षं ध[3]र्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतम् । इत्येवं बुद्धिरिति ॥**

अत एव सिद्धानां जन्मान्तरोपार्जिततपःप्रभावप्रसन्नपरमेश्वरप्रदत्ताणिमादिगुटिकादिसिद्धीनां यदतीतानागतादिपदार्थसार्थे विज्ञानं **ततः**(तत्) सिद्धदर्शनमार्षविशेष एव । तपःप्रभावप्रसूतधर्मविशेषोपनीतसहकारिप्राप्तेन्द्रियजन्यत्वाद् इत्यत आह—**सिद्धदर्शनम्**

1 'कस्मात्' इति व्यो पुस्तके नास्ति; कस्मात्प्रयत्नपूर्वकमञ्जन°–भा; कथय सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु सिद्धानां द्रष्टृणां दृश्यानामञ्जनपादलेप°......दर्शनं–दे । 2 निमित्तमुपलभ्य व्यो (६२३) निमित्तं प्राणिनां–दे । 3 धर्माधर्मादिषु–व्यो (६२३), धर्मात्मादिषु–दे ।

इति । न ज्ञानान्तरमार्षात् । सूक्ष्माः—स्वरूपतोऽस्मदाद्यतीन्द्रियाः, व्यवहिताः देशतः, विप्रकृष्टाः कालतः; तेष्वर्थेषु सिद्धानामिति—अञ्जनपादुकादिसिद्धानां दृश्य[1]द्रष्टॄणां यद्दर्शनं तद् आर्षविशेषत्वात् प्रत्यक्षम् । यच्च दिव्यान्तरीक्षभौमानां ग्रहनक्षत्रसञ्चारिनिमित्तं प्राणिनां धर्माधर्मविपाकदर्शनं तत् लिङ्गाधीनोत्पत्तिकत्वादनुमानमित्याह—**अथे**ति । यदि च लिङ्गप्रतिसन्धानविधुरधर्मविशेषसहकारिमनोजन्यं धर्मात्मादिविज्ञानमिष्टं तदार्षं प्रत्यक्षम् । बहिरिन्द्रियजन्यत्वे तु इतरप्रत्यक्षमिति समाप्ता बुद्धिः ॥

(२९०) **अनुग्रहलक्षणं सुखम् । स्रगाद्यभिप्रेतविषयसान्निध्ये सति इष्टोपलब्धीन्द्रियार्थसन्निकर्षाद् धर्माद्यपेक्षादात्ममनसोः संयोगादनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत्सुखम् । अ[2]तीतेषु विषयेषु स्मृतिजम् । अनागतेषु सङ्कल्पजम् । यत्तु विदुषामसत्सु विषया[3]नुस्मरणेच्छासङ्कल्पेष्वादिर्भवति तद् विद्याशमसन्तोषधर्मविशेषनिमित्तमिति ॥**

बुद्धिजत्वाविशेषेऽपि इच्छादिहेतुत्वात् सुखदुःखयोस्तयोर्मध्ये उपादेयत्वात् सुखं लक्षणतः, कारणतो, बिषयतः, फलतश्च निरूप्येत इत्यत आह—**अनुग्रहे**ति ।

ननु कोऽयमनुग्रहो नाम ? न तावत्कृपाविशेषः, इच्छयैव गतत्वात्; न चोपकारभेदः, धनदानादिलक्षणस्य असुखरूपत्वात्; सुखलक्षणस्य च स्वरूपासिद्धेः । अनुग्रहः सुखं, विषयेण विषयिणं प्रत्ययमुपलक्षयति तेन सुखबुद्धिविषयीकृतमित्यपि न; सुखेन हि निरूप्यमाणा बुद्धिः सुखबुद्धिः, सुखबुद्ध्या च निरूपणं, परस्पराश्रयदोषात् । अनुग्रहत्वलक्षणमिति भावप्रधानो निर्देशः, तेन सुखत्वाभिसम्बद्धं सुखमित्यपि न साम्प्रतम्, सुखत्वव्यवस्थापकानुपपत्तेः । इष्टत्वं तदिति चेत्; न; तदुपायेन व्यभिचारात् । स्वभावत इष्यमाणेन सुखत्वाभिव्यक्तिरिति चेत्; न; दुःखाभावेनानैकान्तिकत्वात् । सोऽपि सुखार्थमेवेष्येत इति चेत्; न; दुःखाभावस्यापवर्गस्य अपुरुषार्थत्वप्रसङ्गात् ।

अत्रोच्यते—अनुग्रहत्वं–सुखत्वं लक्षणं यस्य तदनुग्रहलक्षणं प्रतियोगिनिरूपणानधीनं स्वभावत इष्यमाणं सुखत्वाभिव्यञ्जकम् । स्वभावतश्चेष्यमाणत्वं प्रतियोग्यनिरूपितस्य उद्दिश्यमानस्यैवान्यत्र प्रवर्तकत्वम् ।

---

1 दृश्यद्रष्ट्रीणां प्रदर्शनं–MS । 2 'अतीतेषु स्मृतिजम्' इति टीकासम्मतः पाठो भाति–सं अतीतविषयेषु–दे । 3 °नुस्मरणसङ्कल्पेषु–दे ।

ननु प्रतियोग्यनिरूपितत्वमसिद्धं, तस्य दुःखाभावत्वेना(न) दुःखप्रतियोगिनिरूप्यत्वात्। दुःखाभावे तरतमभावानुपपत्तेः सुखी संवृत्तोऽस्मीति विधिमुखप्रत्ययाद् विधित्वमिति चेद्; न; लघुरयमिति प्रत्ययाल्लघुत्वेन समानत्वात्। न च वाच्यं सुखाभावो दुःखमिति विपरीतकल्पनं न कुत इति, लघुत्वाभावो गुरुत्वमिति किं न [1]कल्प्यत इत्यनेन समानत्वात्। ततश्च लघुत्वं वा गुणान्तरमेष्टव्यं दुःखाभावो वा सुखमित्यत आह **स्रगादीति**। सुखादिविषयतरतमभावं दर्शयन् प्रतियोगिकृतं तरतमभावं निवारयति। न च लघुत्वस्यैवं तारतम्यं प्रतियोग्यतारतम्यं विहाय। **इष्टोपलब्धीन्द्रियार्थेति**—इष्टोपलब्धिः इष्टतया विषयस्योपलब्धिरित्यर्थः। इन्द्रियार्थसन्निकर्षादयोऽपि हेतवोऽभाव[वि] लक्षणनिदानतया सुखस्याभाववैलक्षण्यमुपकल्पयन्ति। **धर्मादी**त्यादिशब्दः स्वच्छतादिपरिग्राहकः। कार्यभेदादपि अभावविलक्षणतामाह—**अनुग्रहेति**। अनुग्रहः सुखज्ञानम्, अभिष्वङ्गो रागविशेषः, नयनप्रसादो नैर्मल्यम्; 'आदि'शब्दात् मुखप्रसन्नता, एतेषां हेतुः। न च विवेकिनां सुखमपि दुखं, दुःखपक्षनिक्षेपादिति वाच्यम्, शरीरादिभेदवत् सुखस्यापि स्वभावभेदे विचारतो दुःखत्वात्।

नन्विन्द्रियार्थसन्निकर्षजं यदि सुखम्, अतीतादौ तर्हि सुखं न स्याद् इत्यत आह—**अतीते**ति। अतीते विषये ज्ञायमाने ततः सुखम्, अनागतेऽपि तथा। इन्द्रियार्थसन्निकर्षजं सुखं विजातीयं ज्ञायमानहेतुजं चान्यथा।

ननु तत्त्वज्ञानवतां स्मृतिसङ्कल्पादिरहितानामिन्द्रियार्थसन्निकर्षविरहिणां च सन्तोषसुखं कथमुत्पद्यताम्, इत्यत आह—**यत्तु**-इति। 'विद्या'—तत्त्वज्ञानम्, 'शमः'—इन्द्रियाणां जयः, 'सन्तोषः'—यथोपलब्धमात्रोपजीवनम्। एतेषु सत्सु जातो धर्मो धर्मविशेषो निवर्तकलक्षणः। तस्मात् सुखं सञ्ज्ञायमानमत्यन्तविजातीयमिति मन्तव्यम्॥

(२९१) **उपघातलक्षणं दुःखम्। विषाद्यनभिप्रेतविषयसान्निध्ये सति, अनिष्टोपलब्धीन्द्रियार्थसन्निकर्षादधर्माद्यपेक्षादात्ममनसोः संयोगाद् यदमर्षोपघातदैन्यनिमित्तमुत्पद्यते तद्दुःखम्। अतीतेषु सर्पव्याघ्रचौरादिषु स्मृतिजम्। अनागतेषु [2]सङ्कल्पजम्॥**

---

1 कल्पत MS। 2 सङ्कल्पजमिति–दे।

उपादेयं निरूप्य हेयं निरूपयितुमाह—उपघातः पीडा दुःखमित्येकोऽर्थः। तथा च भावप्रधाननिर्देशे दुःखत्वयुक्तं दुःखमिति लक्षणमुक्तं भवति। सुखाभावो दुःखमिति मतिमपनेतुं दुःखत्वव्यवस्थापकोपाधिं दर्शयितुमाह—**विषेति**। प्रतिकूलवेदनीयत्वं दुःखत्वाभिव्यञ्जकम्। प्रतिकूलवेदनीयता च यत्सम्बन्धेनाऽपरेऽपि हेयतया व्यवह्रियन्ते। ततः प्रतिकूलवेदनीयं दुःखत्वव्यवस्थापकम्। न च **सुखा**(दुःखा)भावेनातिव्याप्तिः, तस्य तद्धेतोश्च अपेक्षणीयत्वात्। सुखाभावस्य च दुःखत्वमिति पूर्ववद् निराकरणीयमिति तात्पर्यम्।

अनिष्टोपलब्धिरिति—अनिष्टसाधनतयोपलब्धिरित्यर्थः। अमर्षो द्वेषः, उपघातो दुःखज्ञानम्, दैन्यतात्मन्यपकर्षप्रत्ययः, तेषां निमित्तम्। सर्वमपरं सुखवद् बोद्धव्यम्॥

(२९२) **स्वार्थं परार्थं वा " अप्राप्तप्रार्थना " इच्छा। सा चात्ममनसोः संयोगात् सुखाद्यपेक्षात्स्मृत्यपेक्षाद्वोत्पद्यते। प्रयत्नस्मृतिधर्माधर्महेतुः। कामोऽभिलाषो, रागः, सङ्कल्पः, कारुण्यं, वैराग्यमुपधा, भाव इत्येवमादाय इच्छाभेदाः॥**

यदायत्तमिच्छाया नियतविषयत्वं सा बुद्धिस्तावन्निरूपिता, ययोश्च भाविनो साधनेच्छा [1]उपादित्सा जिहासा वेति च व्यवह्रियते तयोर्निरूपणानन्तरमिच्छां निरूपयति **स्वार्थमिति**। प्रार्थना-इच्छेति भावप्रधानो निर्देश; तेन इच्छात्वयोगिनीच्छेति उक्तं भवति। सा च प्रायेण स्वार्थं परार्थं वा अप्राप्ते वस्तुनीत्यप्राप्तेत्युक्तम्।

न च द्वेषाभावविशेष एवेच्छा, द्वेषेऽपि सति तद्विषयजिहासासम्भवात्। यस्मिंश्च सति इच्छामीति अनुव्यवसायसम्भावना तदिच्छात्वस्य व्यञ्जकम्। सा चात्मनःसंयोगादित्यादिकारणकथनम्।

ननु इच्छा अनुभवैकसमधिगम्या वा स्यात् कार्यावसेया वा? नाद्यः, अनुभवस्य अन्यथाप्युपपत्तेः; इष्टाभ्युपायज्ञाना[न]न्तरज्ञाने ' इच्छामि ' इत्यनुभवोपपत्तेः। न द्वितीयः, प्रयत्नादिकार्याणामुपादानज्ञानानन्तरज्ञानेनैव सम्पादनीयत्वाद्; इत्यत आह—**प्रयत्ने**त्यादि। ' उपादेयमेतद् ' इति ज्ञाने सति प्रयत्नानुपपत्तेः ' करोमि ' ' कुर्याम् ' इति वा ज्ञानमन्तरा-[2]लिक्रमवश्यमभ्युपगन्तव्यम्। [3]तच्च ज्ञानमिच्छेति वा नाम्नि विप्रतिपत्तिः।

1 उपादिच्छा-MS.। 2 कमरय-MS.। 3 तत्त्व-MS.।

ननु तथापीच्छात्वे किं प्रमाणम्? तद्रूपनिरूपणीयोऽनुभव एव। 'अत एव' 'इच्छामि' इति अनुभवोऽपि इच्छाकारोल्लेखीच्छाया व्यवस्थापको न ज्ञानस्य। उपादानेच्छा प्रयत्नस्य हेतुः, स्मरणेच्छा स्मृतेः। विहितनिषिद्धेष्विच्छातः प्रवृत्तस्य धर्माधर्मौ।

(२९३) **मैथुनेच्छा कामः। अ[1]भ्यवहारेच्छाऽभिलाषः। पुनः-पुनर्विषयरञ्जनेच्छा रागः। अनासन्नक्रियेच्छा सङ्कल्पः। स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यम्। दोष-दर्शनाद् विषयत्यागेच्छा वैराग्यम्। परवञ्चनेच्छा उपधा। अन्तर्निगूढेच्छा भावः। 'चिकीर्षा' 'जि[2]हीर्षा' इत्यादि क्रियाभेदादिच्छाभेदा भवन्ति॥**

ननु कामादयोऽपि तर्हि पृथग्वक्तव्याः, तेषां पृथग्लक्षणत्वाद्, इत्यत आह—**काम** इत्यादि। इच्छासामान्यलक्षणयोगं तेषु दर्शयति—**मैथुनेच्छा काम** इत्यादि। सर्वं निगदव्याख्यातम्। एवं सति चिकीर्षादयोऽपि इच्छावान्तरभेदाः प्राप्नुवन्ति; न; इत्याह—**चिकीर्षा जिहीर्षेति** क्रियाभेदादिच्छाभेदा भवन्ति। क्रियाभेद एव परं न त्विच्छा-भेद इत्यर्थः॥

(२९४) **प्रज्वलनात्मको द्वेषः। यस्मिन्सति प्रज्वलितमिवात्मानं मन्यते स द्वेषः। स चात्ममनसोः संयोगाद् दुःखा-पेक्षात् स्मृत्यपेक्षाद्वा उत्पद्यते। प्रयत्नस्मृतिधर्माधर्म-हेतुः। द्रो[3]हः, क्रोधः, मन्युः, अक्षमा, अमर्ष इति द्वेषभेदाः॥**

अविवेकिनां हेयहानप्रयत्नप्रसवसमर्थं गुणं निरूपयन्नाह—**प्रज्ज्वलनात्मक** इति। अत्रापि भावप्रधाननिर्देशेन प्रज्ज्वलनात्मकत्वं द्वेषलक्षणमित्युक्तं भवति। द्वेषत्वस्य च व्यवस्थापकं यद्विशिष्टे आत्मनि द्विष्टोऽहमिति व्यवसायसम्भावना।

ननु द्वेषोऽपि दोषदर्शनानन्तरभावी हानप्रयत्नजनकः। एवं च दोषदर्शनानन्तर-प्रसूतजिहासा हानप्रयत्नजनिकेति किं द्वेषस्वीकारेण? यश्च 'द्विष्टोऽहम्' इति प्रत्ययः स

---

1 अभ्यवहरणेच्छा-व्यो. (६२६), दे। 2 जिहीर्षा चेति क्रियाभेदाद्—व्यो. (६२६)।
3 क्रोधो द्रोहः-भा।

जिहासाविशिष्टमात्मानमाकल[1]यन् दोषं विषयीकरोति। धर्माधर्मयोरपि जिहासामात्रहेतु- कत्वेनैवोपपत्तेर्न द्वेषपरिशेषः। क्रोधादयोऽपि जिहासाभेदा एवेत्यत आह **स चेति**। **दुःखापेक्षाद्** इत्यनेन इच्छातिरिक्तहेतुतां दर्शयति। तथा हि विवेकिनां दोषदर्शनानन्तरं जिहासात एव हानप्रयत्नः। अविवेकिनां तु दोषविज्ञप्तिरहितानां दुःखशल्यसम्भेदे द्वेषान्नि- वृत्तिप्रयत्नः। अत एव 'द्विष्टोऽहम्' इति अनुभवोऽपि जिज्ञासाविरहान्न तदालम्बनः। धर्माधर्मावपि तदतिरिक्तद्वेषहेतुकाविति। द्रोहः, क्रोधः, मन्युः, अक्षमा, अमर्ष, इति द्वेषभेदाः, न जिहासाभेदाः। अलक्षितविकारश्चिरानुबद्धापकारावसानो द्वेषः द्रोहः। मुखादिविकारहेतुः प्रायेण क्षणमात्रस्थायी द्वेषः क्रोधः। अपकृतस्यापकारकरणासमर्थस्य देहविकारहेतुर्द्वेषो मन्युः। परमगुणेषु(परगुणेषु)द्वेषोऽक्षमा। स्वगुणपरिभवसमुत्थो द्वेषोऽमर्षः॥

(२९९) प्रयत्नः संरम्भ उत्साह इति पर्यायाः। स द्विविधो जीवनपूर्वकः इच्छाद्वेषपूर्वकश्च॥

इच्छाद्वेषहेतुकं गुणं निरूपयति—**प्रयत्न** इति। अत्रापि प्रयत्नत्वाभिसम्बन्धः प्रयत्न इति तात्पर्यम्। ननु न तावत्प्रयत्नो गुणः, न च प्रयत्नत्वम्, अलसत्वस्यापि स्वीकारप्रसङ्गात्। अलसत्वं प्रयत्नाभाव इति यदि, प्रयत्नोऽप्यलसत्वाभाव इति विपरीता- पत्तिः। 'अहं यते' इति प्रत्ययवद् 'अलसः' इति प्रत्ययः सम्भवति। प्रयत्ने तरतमा- भावस्याप्रतिक्षेपात्। ततश्च आलस्याभाव एव प्रयत्न इत्यत आह—**संरम्भ** इति। 'संरम्भः' 'प्रारम्भः', 'उद्यमः', इत्यादिपर्यायकीर्तनेन तन्मूलप्रत्ययविषयस्य भावरूपतां सूचयति। यदि त्वारम्भोऽभावः स्यात् क्वापि कदापि निषेध्यनिषेधाधिकरणनिरूपणीयः प्रत्य(र्या)यशब्दश्च स्यात् प्रलयवत्। न चालस्येऽप्येवम्, 'अलसो'ऽनुद्यमी 'अनारम्भक' इत्यादि पर्यायाभिधानदर्शनात्। ततश्च मानसप्रत्यक्षसिद्धः प्रयत्नो भावः, तदभावश्चालस्य- लक्षण इति सिद्धम्। यस्मिन् सति 'उत्साहयुक्तोऽहम्' इति प्रतीतिः कारणान्तरासम्भवे तत् प्रयत्नत्वस्य व्यवस्थापकम्। अस्मदाद्यात्मनां भेदो निरूपणीयः, अतोऽस्मदादीनां भेदको धर्मोऽभिधेय इति ईश्वरप्रयत्नं परिहृत्य ज्ञानेच्छयोरिव अस्मदादिप्रयत्नस्य भेद- माह—**स द्विविध** इति। जीवनं यदात्मगतधर्माधर्मकृतान्तःकरणस्य तदात्मना सम्बन्धः, जीवनं पूर्वं कारणं यस्य स तथा।

---

1 यन्न दोषं MS.।

(२९८ अ) तत्र जीवनपूर्वकः सुप्तस्य प्राणापानसन्तानप्रेरकः प्रबोधकाले चान्तः करणस्येन्द्रियान्तरप्राप्तिहेतुः। अस्य जी[1]वनपूर्वकस्यात्ममनसोः संयोगाद् धर्माधर्मापेक्षादुत्पत्तिः ॥

ननु जीवनपूर्वकप्रयत्नसत्त्वे नाध्यक्षं प्रमाणम्, सुषुप्तिदशायामिन्द्रियव्यापारविरहात्। न च प्राणाद्यन्तःकरणक्रियानुमेयम्, तत्क्रियाणां परमाणुक्रियावददृष्टमात्रसम्पाद्यत्वे विरोधाभावात्। दृष्टोपहारेणादृष्टस्य व्यापार इति प्रयत्नकल्पने परमाणुकर्मण्यपि **ततः**(तत्) कल्पनप्रसङ्गः। तत्रेश्वरप्रयत्नस्वीकारे तु प्राणादिकर्मण्यपि ईश्वरप्रयत्नानिवारणात्। एतेन 'सुषुप्तस्य प्राणादिक्रिया प्रयत्नपूर्विका, तत्क्रियात्वात्, जाग्रतस्तत्क्रियावद्' इति प्रयत्नमात्रपूर्वकत्वेनेश्वरप्रयत्ने सिद्धसाधनान्निरस्तम्। संसारिप्रयत्नपूर्वकत्वे जागरितत्वोपाधिग्रस्तम्, अन्यथा क्रियात्वमात्रेण परमाणुकर्मणोऽपि संसारिप्रयत्नपूर्वकत्वप्रसङ्गः। परमाणुज्ञानानुपपत्तेः संसारिप्रयत्नविरह इति यदि तदा प्राणादिज्ञानानुपपत्तेः संसारिप्रयत्नविरहः समान इत्यत आह—**तत्रे**ति। क्रियया तस्य सद्भाव इत्यर्थः। तथा हि 'विवादाध्यासिता शरीरान्तर्वृत्तिपवनान्तःकरणक्रिया, अस्मदादिप्रयत्नसम्पाद्या, शरीरान्तर्वृत्तिपवनान्तःकरणक्रियात्वात्, सम्प्रतिपन्नतत्क्रियावत्। न च जागरितत्वमत्रोपाधिः, जागरितत्वस्य इच्छाद्वेषपूर्वकप्रयत्नव्याप्तत्वात्। न च परमाणुक्रियायामपि अस्मदादिप्रयत्नपूर्वकत्वप्रसङ्गः, शरीरिणामुपलभ्यमानशरीराणां योग्यानुपलब्धिबाधितत्वात्। अनुपलब्धशरीरस्य ([2]**च**)प्रयत्न इष्यत एव। आगमादपि जीवनपूर्वकप्रयत्नसद्भावः; तथा च श्रूयते—

"यावदुद्यच्छते जन्तुस्तावत्कुर्यात् प्रतिक्रियाम्"। इत्यादि।

ज्ञानानुपपत्ताविच्छानुपपत्तेर्नियतविषयत्वानुपपत्तिरिति तस्य कारणमाह—**अस्ये**ति। धर्माधर्मकारणविशेषाद् विशेषजातीयस्य प्रयत्नस्य विषयस्य नियम इत्यर्थः।

(२९९) इतरस्तु हिताहितप्राप्तिपरिहारसमर्थस्य व्या[3]पारस्य हेतुः शरीरवि[4]धारकश्च। स चात्ममनसोः संयोगादिच्छापेक्षाद् द्वेषापेक्षाद्वोत्पद्यते ॥

इच्छाद्वेषपूर्वकप्रयत्नमाह—**इतरस्ति**ति। हिताहितप्राप्तिपरिहार[5]समर्थस्य पुरुषस्य [6]व्यापारं देहव्यापारं प्रति हेतुरिति प्रत्यक्षसिद्धे प्रयत्ने कार्यं दर्शयति। अपरमपि

---

1 अस्यात्ममनसोः संयोगाद्–व्यो; जीवनसञ्ज्ञकस्य–दे। 2 MS. अत्र निरर्थकः; 'च' स्यात्। 3 व्यायामस्य–दे। 4 विधायक–दे। 5 सामर्थ्यस्य MS.। 6 व्यायामं MS.।

कार्यमाह---**शरीरविधारकश्चे**ति । तस्योत्पत्तिकारणं निर्दिशति---**आत्ममनसो**-रित्यादिना ॥

(२९७) **गुरुत्वं जलभूम्योः पतनकर्मकारणम् । अप्रत्यक्षं पतनकर्मानुमेयं संयोगप्रयत्नसंस्कारविरोधि ।** [1]**तस्य चाबादिपरमाणुरूपादिवन्नित्यानित्यत्वनिष्पत्तयः ॥**

परत्वापरत्वयोर्बुद्धिकार्यत्वेन बुद्धिनिरूपणे, ततः कार्यतया सुखादीनां प्रयत्नान्तानां निरूपणे कृते, आत्मविशेषगुणतया धर्माधर्मयोर्विशेषगुणतया शब्दस्य च निरूपण**त्वा**-(त्व)प्राप्तौ प्रयत्ननिरूपणानन्तरं प्रयत्नप्रतिबन्धनीयगुणनिरूपणं प्रासङ्गिकं बाहुल्येन प्रयत्नप्रतिबन्ध्यगुणं तावन्निरूपयन्नाह---**गुरुत्वमि**ति । गुरूणां भावो धर्मो गुरुत्वं, तच्च न सामान्यमित्याह **जलभूम्यो**रिति । गुरुतरगुरुतमभावेन जलादिप्रतीतिः सामान्यरूपतां गुरुत्वस्य [2]निवारयति । न च यथा शब्दादौ तीव्रतरतमादिभेदेन सामान्यभेदः कारणभेदो वा तथा गुरुतरादावपीति वाच्यम्, प्रत्यक्षसिद्धशुक्लगुणापलापप्रसङ्गात् । प्रत्यक्षसिद्धत्वे शुक्लगुणानपलापे गुरुत्वस्यापि प्रमाणसिद्धत्वेनानपलापस्य समानत्वात्, कार्यभेदोपपत्तेश्च । ततश्च गुरुत्वमितरभे**दे**(दि) गुरुत्वसमानाधिकरणत्वात् ।

ननु गुरुत्वमेव असिद्धम् । लघुत्वं गुणः, तदभावो गुरुत्वम् गुरुत्वगुणपक्षे लघुत्ववत् । तथा च लक्षणमप्यसिद्धम् । तरतमभावश्च लघुत्ववत्समानः । न च गुरुत्वस्य चाक्षुषप्रत्यक्षत्वं केनाप्यङ्गीकृतम् । स्पार्शनप्रत्यक्षत्वं तु नास्ति, अधःस्थितपदार्थगुरुत्वस्य स्पर्शनव्यापारेणाप्रतीतेः । करोपरिस्थितजलादिद्विपलादिज्ञानं तु अवनमनविशेषानुमान-प्रसूतमेव । अवनमनविशेषश्च रसविशेषादेवोपपद्यमानो न गुरुत्वानुमापकः । न चापरं किञ्चित्प्रमाणमस्तीत्यत आह---**पतने**ति । प्रत्यक्षतानभ्युपगममाह---**अप्रत्यक्षमि**ति । नन्वेवं तर्हि पृष्ठादिसंलग्नगुरुत्वबोधः कुतः ? अवनमनविशेषादेव । अन्यथा मक्षिका-तूलपटला[दि] गुरुत्वप्रतीतिप्रसङ्गः ।

किं प्रमाणकं तर्हि गुरुत्वमित्यत आह---**पतनकर्मानुमेय**मिति । रसाच्च पतने पाषाणात् शर्करायाः पातविशेषो रसाधिक्यात्[स्यात्] ।

नन्वग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमिव अदृष्टवदात्मसंयोगात् पतनोत्पत्तौ न गुरुत्वकल्पनमिति । अथ वेगार्जितशरपतनवद् वियति विषयपतनस्य स्वसमवायिकारण-जन्यता पतनत्वेन तर्हि तेजोवायुगतोर्ध्वार्वाग्धोगमनेनापि स्वसमवायिकारणमात्रसमवेतासम-

---

1 अस्य भा । 2 निबाधयति MS. 'निषेधयति' इत्यपि पाठकल्पना शक्या ।

वायिकारणजन्येन भवितव्यम्। तथा च लघुत्वाद्यनेकगुणकल्पनमिति प्राप्तम्? न प्राप्तम्; परिशेषा[त्] सिद्धेः। अदृष्टविशेषार्जितज्वलनपवनकर्मजवेगप्रवाहप्रसूतत्वेनैव [1]उद्गमनादेरुपपत्तेः। आद्योद्गमने का गतिः इति चेत्; बीजाङ्कुरवदनादिवेगकर्मप्रवाहस्वीकारात्। पतनेऽप्येवं कल्पना इति चेत्; न वेगाऽभावेऽपि पतनदर्शनात्। न च लघुत्वाभावो गुरुत्वम्, प्रयत्नकार्यपतनवत् प्रकृतस्यापि पतनस्य भावकार्यत्वात् पतनकार्योन्नेयगुणे गुरुत्वे सिद्धे तदभावे एव लघुव्यवहारोपपत्तेः। [2]ततः कार्यानुपलब्धेश्च न लघुत्वं गुणान्तरम्। पतनं च लिङ्गं परिशेषाद् यत्परिकल्पयति तद् गुरुत्वमिति पतनासाधारणकारणेन गुरुत्वसामान्यस्य व्यवस्थितिरित्यभिसन्धिरित्यर्थः।

स्वकार्ये पतने कर्तव्ये संयोगप्रयत्नसंस्कारैर्विरोधात् पतनाऽनुत्पादकत्वमस्येत्याह—**संयोगेत्या**दि। तन्नित्यमनित्यं च। आप्यपार्थिवपरमाणुषु नित्यम्, **तत** (तत्) कार्येषु अनित्यं कारणगुणप्रक्रमेणोत्पद्यत इत्याह—**तस्य चे**ति।

ननु कारणगुणपूर्वप्रक्रमेण गुरुत्वमुत्पद्यत इत्युक्तम्, कारणगुरुत्वात् कार्ये गुरुत्वं समधिकं हीनं वा भवेत् सर्वथा गुरुत्वान्तरकार्यमुपलभ्येत, न चोपलभ्यते। न च रूपविशेषानुपलम्भवद् इहापि विशेषानुपलम्भः, द्विपलिकपदार्थद्वयसम्पर्केऽपि अवनमनविशेषाभावप्रसङ्गात्। रूपस्य चानुपलम्भोऽसिद्धः; कार्यान्तरं त्वनुपलब्धिबाधितमिति।

अत्रोच्यते—अवयवैरवयवी समारभ्यः, न तु परमाणुद्व्यणुकादिसङ्घातेन तत्र च समाहारगुरुत्वमवधार्यते न त्ववयवगुरुत्वम्, [3]तत्[अ]नवधारितगुरुत्वावयवैरवयवै(वी) समारभ्यमाणोऽधिकगुरुत्वयोग्यपि अनुपलभ्यमानपतनविशेषः, मक्षिकासन्निपातानुपलभ्यमानपतनविशेषद्रव्यवत्॥

(२९८) द्रवत्वं स्यन्दनकर्मकारणम्। त्रिद्रव्यवृत्ति। तत्तु द्विविधम् [4]सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकमपां विशेषगुणः। नैमित्तिकं पृथिवीतेजसोः सामान्यगुणः॥

जलभूमिगतगुणनिरूपणप्रसङ्गेन जलभूमितेजोगतं गुणं निरूपयति **द्रवत्वमि**ति। द्रवाणां भावो द्रवत्वं तस्य सामान्यलक्षणम्। तत्सामान्यस्य व्यवस्थापकं स्यन्दनकर्मासाधारणकारणत्वम्। ननु काठिन्याभावो द्रव्यत्वमस्तु; अन्यथा काठिन्यस्यापि गुणान्तर-

1 मेगभनादे MS.। 2 तत्कार्यानुपलब्धेश्च, इति सुसमीचीनं भाति। 3 तदनवधारित इत्यपि पाठाःस्यात्। 4 नैमित्तिकं सांसिद्धिकं च–दे।

त्वापत्तिरित्यत आह—**स्यन्दने**ति । प्रत्यक्षसिद्धं तावद्द्रवत्वम् । काठिन्याभावरूपतायां तूल-पिण्डादावपि द्रवत्वप्रतीतिप्रसङ्गः । काठिन्यं च संयोगभेदः गुणान्तरमिष्टमेव । स्यन्दनलक्षण-कार्यभेदादपि गुणभेदव्यवस्थितिरित्यर्थः । न च स्नेहकृतं स्यन्दनमिति तदुत्कर्षेऽप्यनुत्कर्षात् । न च घनीभूतघृतादिकमपेक्ष्य चिरस्यन्दि जलं जलापेक्षया वा शीघ्रस्यन्दि घृतम् ।

गुरुत्वादधिकद्रव्याधारतामाह—**त्रिद्रव्यवृत्ति** । जले सांसिद्धिकं क्षितितेजसो-र्नैमित्तिकमित्याह—**तत्तु** इति । सांसिद्धिकं विशेषगुणोऽपां भेदकत्वादित्याह—**सांसिद्धि-कमि**ति । करकाद्रवत्वमसांसिद्धिकमिति न वाच्यम्, प्रतिबद्धत्वात्, घृतादिवच्च नैमित्तिक-विलयनविरहात् । यद्यपि नैमित्तिकमपि क्षितितेजसोर्भेदकं तथापि न तज्जातीयस्य सर्वस्य भेदकमिति तयोः सामान्यगुण इत्याह— **नैमित्तिकमि**ति ।

ननु तेजोजातीयत्वे द्रवत्वं नोपलभ्यते । कनकादौ उपलभ्यमानमपि रूपवद् गुरुत्ववच्च पार्थिवमेव । न चात्यन्तानलसंयोगेनानुच्छिद्यमानत्वादभौमम् ; गुरुत्वरूपयोरपि तथाभावापत्तेः । न च तयोरुच्छेदेऽपि सदृशापरापरोत्पत्तेरनुच्छेदाभिमानः, बाधकाभावेन द्रवत्वेऽपि समानत्वात् । नैवम्; 'विवादाध्यासितं तेजो द्रवत्ववद्, रूपित्वात्, क्षितिवद्', इति पक्षधर्मतासरूपानुमानात् कनके द्रवत्वसिद्धेः । कनकस्य तैजसत्वं क्षित्युदकान्यत्वे सति रूपित्वाद् दीपवत् । कनकं न भौमम्, अत्यन्तानलसंयोगे सत्यपि अनुच्छिद्यमानद्रवत्वात्, जलपरमाणुवत् । न जलं नैमित्तिकद्रवत्वाधिकरणत्वात् क्षितिवत् । गुरुत्वस्य स्वाश्रय-जातीयव्यापकत्वे (त्व ?)नियमात् तेजोमात्रे गुरुत्वप्रसङ्गात् । भौमस्यापि गुरुत्वस्य [1]ध्यामादेरत्यन्तानलसंयोगेऽपि अनुच्छेदात् । 'सुवर्णं वा द्र[वत्व]वत्तैजसम्, अत्यन्तानल-संयोगेऽपि अनुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वात्, न यदेवं तदेवं यथा क्षित्यादि । भौममपि द्रवत्वं स्नेहवदौपाधिकमेवेति चेत् ? न; काचादिषु द्रवत्वेऽपि सङ्ग्रहाभावात्; आप्यत्वे च तत्सङ्ग्रहप्रसक्तेः ।

(२११) **सांसिद्धिकस्य गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः । सङ्घा-तदर्शनात् [2]सांसिद्धिकद्रवत्वमयुक्तमिति चेत् ? न; [3]दिव्येन तेजसा संयुक्तानामाप्यानां परमाणूनां परस्परं संयोगो द्रव्यारम्भकः सङ्घाताख्यः । तेन परमाणु-द्रवत्वप्रतिबन्धात् कार्ये हिमकरकादौ द्रवत्वानुत्पत्तिः ॥**

---

1 ध्यामादे MS. अत्रार्थो न स्पष्टः । 2 सांसिद्धिकमयुक्तम्—भा; दे । 3 दिव्यतेजः-संयुक्तानां—दे ।

तत्र सांसिद्धिकद्रवत्वस्य वैधर्म्यमाह—**सांसिद्धिकस्येति**। गुरुत्वं यथा पार्थिवपरमाणुषु नित्यं तत्कार्येषु कारणगुणपूर्वकमाश्रयविनाशाच्च विनश्यति तथा द्रवत्वमपीत्यर्थः ॥

ननु सांसिद्धिकं द्रवत्वमिति अयुक्तम्, करकादिनामाप्यानामपि नैमित्तिकद्रवत्वोपलब्धेरित्याह—**सङ्घातदर्शनादि**ति। तत्र निमित्तवशात् प्रतिबद्धद्रवत्वानां करकादीनामदृष्टवशादुत्पादेऽपि भौमानलसम्पर्कमनपेक्ष्यैव द्रवीभावेनोपलब्धिसम्भव इत्याह—**ने**ति। दिव्यतेजःसम्पर्कात् परमाणुषु द्र[1]वत्वप्रतिबद्धत्वे न तत्कार्येषु हिमकरकादिषु द्रवत्वप्रतिबन्ध इत्यर्थः ॥

(३००) **नैमित्तिकं च पृथिवीतेजसोरग्निसंयोगजम्। कथम्? [2]सर्पिरादीनां कारणेषु परमाणुष्वग्निसंयोगाद्वेगापेक्षात्कर्मोत्पत्तौ तज्जेभ्यो विभागेभ्यो द्रव्यारम्भकसंयोगविनाशात् कार्यद्रव्यनिवृत्तावग्निसंयोगादौष्ण्यापेक्षात् स्वतन्त्रेषु परमाणुषु द्रवत्वमुत्पद्यते। ततस्तेषु भोगिनामदृष्टापेक्षादात्माणुसंयोगात् कर्मोत्पत्तौ तज्जेभ्यः संयोगेभ्यो द्व्यणुकादिप्रक्रमेण कार्यद्रव्यमुत्पद्यते। तस्मिँश्च रूपाद्युत्पत्तिसमकालं कारण[3]गुणप्रक्रमेण द्रवत्वमुत्पद्यत इति ॥**

नैमित्तिकस्य वैधर्म्यमाह—**नैमित्तिकमि**ति। ननु क्षितितेजसोर्नैमित्तिकद्रवत्वं परमाणुषु, कार्ये वा? न परमाणुषु, कारणासम्भवात्। न कार्ये, कारणगुणपूर्वप्रक्रमेणोत्पादादित्याह—**कथमि**ति। उत्तरम् **सर्पि**रित्यादिना। परमाणुषु अग्निसंयोगादौष्ण्यापेक्षाद् द्रवत्वोत्पत्तौ तत्कार्येषु कारणगुणपूर्वप्रक्रमेण द्रवत्वसम्भव इत्यर्थः ॥

(३०१) **स्नेहोऽपां विशेषगुणः। सङ्ग्रहमृजादिहेतुः। अस्यापि गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः ॥**

---

1 बद्धत्व न उपकार्येषु MS. 'बद्धत्वेन तत्कार्येषु हिमकरकादिषु द्रवत्वप्रतिबन्धः' इत्यपि योग्यतरः पाठः स्यात्। सं. 2 सर्पिर्जतुमधूच्छिष्टादीनां–भा. अत्र 'सर्पिरादीनां कारणेषु' इति 'आदि'पदेन सूत्रोक्तानां सङ्ग्रहः। तथा हि 'सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम्' इति व्योमवत्यां पाठदर्शनात् 'सर्पिरादीनाम्' इत्येव पाठः समुचितः इति स्वीकृतः, सर्पिर्जत्वादिकारणेषु–दे। 3 गुणपूर्वप्रक्रमेण–दे।

जलादिसाधारणगुणप्रस्तावे जलासाधारणं गुणं निरूपयति—**स्नेह** इति। स्नेहत्वाभिसम्बन्धः स्नेह इति लक्षणार्थः। स्नेहत्वं पानौपाधिकसम्बन्ध इति प्रतीतिग्राह्यम्। न च जले औपाधिकी स्निग्ध(स्नेह)प्रतीतिः घृतादौ तु मुख्या इति वाच्यम्; पार्थिवत्वेन घृतादौ स्नेहे पाषाणादौ व्यभिचारात्। घृतत्वेन स्नेहे तैले तदभावप्रसङ्गात्, जलजातीये च सर्वत्राव्यभिचारात्। जलस्नेहस्य तैलादिगतत्वेन तेन विरोधिना स्यादित्यपि न; अदृष्टाकृष्टपार्थिवोपष्टम्भकतादात्म्येनाविरोधितापत्तेः। न च स्नेहवद्रौक्ष्यमपि गुणान्तरम्, स्नेहाभावेनैव रौक्ष्यप्रतीत्युपपत्तेः। न च विपरीतापत्तिः, रौक्ष्यस्य नियमेन स्नेहप्रतियोगितया चैव प्रतीतेः स्नेहत्वस्य स्वरूपेण प्रतीतेरित्याह **सङ्ग्रहे**ति। सङ्ग्रहः परस्परविष(वि.)क्तानां पिण्डीभावहेतुः संयोगविशेषः। मृजो मलापगः। 'आदि' ग्रहणान्मृदुत्वादिग्रहणम्। तेषां हेतुः स्नेहः। एतश्च द्रवीभूतकनकत्वादिभिः स्नेहरहितैरसङ्ग्रहादेरु(वो)न्नेयम्। वैधर्म्यान्तरमाह—**अस्या**विति। जलपरमाणुषु नित्यम्; तत्कार्ये कारणगुणपूर्वकम्। आश्रयादिनाशाच्च विनाश इति॥

(३०२) संस्कारस्त्रिविधः—वेगो, भावना स्थितिस्थापकश्च॥

जलादिनिरूपणप्रस्तावे परस्यापि चतुर्दशगुणाधिकरणस्य गुणं निरूपयति **संस्कार** इति।

ननु कः संस्कारः, वेगः स्थितिस्थापको भावना सर्वो वा? एकैकस्य संस्कारत्वे चतुर्विंशतिरिति व्याघातः। सर्वस्य च संस्कारशब्दवाच्यत्वे निमित्तविरहः। न च त्रिषु संस्कारत्वं जातिः, धर्माधर्मयोरपि अदृष्टत्वजातिस्वीकारे चतुर्विंशतित्वव्याघातात्। न च परस्परविलक्षणेषु व्यवस्थापकमन्तरेण सामान्यसम्भवः, गो गवयादिषु गोत्ववत्।

मैवम्; यन्निमित्तकः संस्कृत इति व्यवहारः [स] संस्कारत्वाद् [1]इतरेभ्यो भिद्यते। संस्कारत्वस्य च व्यवस्थापकम् उत्पादकसजातीयावस्थो[2]त्पादकगुणत्वम्। न चादृष्टत्वस्य भोगवदात्मावस्थोत्पदकव्यवस्था[3]पकत्वम्, भोगस्य सुखदुःखसाक्षात्काररूपतया नानात्वात्। न चैवं रूपरसगन्ध[4]स्पर्शेषु स्पर्शतद्विशेषगुणत्वव्यवस्थापकविशेषवशाद् एकजातिसम्भवे चतुर्विंशतित्व[5]व्याकोपः, स्पर्शवद्विशेषगुणत्वेन पृथिव्याद्यनेकप्रकारभेदकतया रूपादीनामेक-

---

1 इतरेतरेभ्यो MS.। 2 दकत्वं गुणत्वं MS.। 3 व्यवस्थापकम् MS.। 4 स्पर्शेऽस्पर्शवद्विशेष-MS.। 5 वापको यः, MS.।

जातीयताविरोधात् । वेगस्थितिस्थापकभावनानां तु यद्यपि स्वाश्रयभेदकत्वं तथापि परस्पर-पृथिव्यादिभेदकत्वानुपपत्तौ सर्वसंस्काराणामेकजातीयकत्वाविरोधः उत्पादकसजातीयावस्थोत्पत्तिलक्षणैककार्यनिर्वाहकतया एकजातीयत्वकल्पनममिवार्यमित्यभिप्रायवान् लक्षणाभेदेन अभिन्नं संस्कारं मत्वा सिद्धवदाह **संस्कार** इति ।

प्रकारे तु विप्रतिपत्तिः । चतुर्थमाधेयसंस्कारं केचन मन्यन्ते तन्मतनिराकरणार्थमाह—**त्रिविधः** । तथापि केन प्रकारेण त्रिविध इत्यत आह—**वेगो, भावना स्थितिस्थापक** इति । आधेयसंस्कारस्तु धर्माधर्मात्मको यदि तदा तत्रैवान्तर्भूतः, अतिरिक्तश्च न प्रमाणपथावतीर्णः ।

ननु 'व्रीहिभिर्यजेत' इति नियतं प्रोक्षितव्रीहियागान्यथानुपपत्त्या संस्कारः । 'व्रीहीन् प्रोक्षति' इति व्रीहीणां कर्मत्वान्यथानुपपत्त्यापि आधेयसंस्कारः । न च प्रोक्षणं जलक्रिया, तज्जनितफलशालित्वेन व्रीहीणां कर्मत्वम्, प्रोक्षणस्य समन्त्रजलसंयोगत्वेन सिद्धत्वात् । अन्यथा जलक्रियाजनितसंयोगाधाराणां कर्मत्वप्रसङ्गः । न च प्रोक्षणादिजन्यः, संस्कारो यजमानात्माधारः, 'तज्जनितफलशालितया नियमान्तं व्रीह्यादीनां कर्मत्वम्; कृषिचिकित्सादिकर्मणामपि पुरुषगतसंस्कारापादनप्रसङ्गात् । तत्र दृष्टद्वारेणैव फलोपपत्तौ नादृष्टकल्पनमिति यदि, प्रकृतेऽपि तर्हि तथाऽस्तु । यागादिभिरप्याधेयशक्तिद्वारा फलसम्पादनमित्यपि आधेयानां यागादीनां चिरनिवृत्तत्वात् यजमानाधारत्वे च नास्ति विप्रतिपत्तिः । ततोऽवश्यं विद्यमानव्रीह्याधारः संस्कारः परिकल्पनीयः । कृषिचिकित्सादिजनितत्वेन बीजाधारवद् अनुपलभ्यमानत्वेनातीन्द्रियः ।

अभिमन्त्रितमृदादौ विषापनयनोपनयनादि कार्यान्यथाऽनुपपत्त्याऽपि तद्गतसंस्कारोऽतीन्द्रियः । देवतासन्निधानमदृष्टकल्पनं चात्रानुपपन्नम्, देवतानां सदेहानां ब्रह्मादिलोकगतत्वेन सन्निधानानुपपत्तिः । अनुत्पाद्यज्ञानस्य तु सर्वविषयत्वेन सर्वत्राविशेषे अभिमन्त्रणानुपपत्तेः । अभिमन्त्रणाविधानवशेन व्यवहितेऽपि साक्षाज्ज्ञानमित्यपि न, यागादावप्येवंविधदेवतासन्निधानाधीयमानफलप्राप्तौ अदृष्टकल्पनाविलयप्रसङ्गात् । अभिमन्त्रणादृष्टकल्पने च चिकित्सादावपि तथात्वापत्तेः ।

विनष्टलाक्षारसावसेकबीजपूरतरुप्रसूतकुसुमारुणिमान्यथानुपपत्त्या संस्कारः ॥ **इति किरणावली समाप्ता** ॥ **शुभं भवतु** ॥ ग्रन्थाग्र ॥ ४९७० ॥

(३०३) तत्र वेगो मूर्तिमत्सु पञ्चसु द्रव्येषु, निमित्तविशेषापेक्षात् कर्मणो जायते। नियतदिक्क्रियाप्रबन्धहेतुः। स्पर्शवद्द्रव्यसंयोगविशेषविरोधी; क्वचित्कारणगुणपूर्वप्रक्रमेणोत्पद्यते।

(३०४) भावनासञ्ज्ञकस्तु आत्मगुणो [1]दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतु[2]र्भवति। ज्ञानमददुःखादिविरोधी पटूवाभ्यासादरप्रत्ययजः पटुप्रत्ययापेक्षादा[3]त्ममनसोः [4]संयोगादाश्चर्येऽर्थे पटुः [5]संस्कारो जायते यथा दाक्षिणात्यस्योष्ट्रद[6]र्शनादिति॥

(३०५) विद्याशिल्पव्यायामादिष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्वपूर्वसंस्कारमपेक्षमाणादुत्तरोत्तरस्मात्प्रत्ययादात्ममनसोः [7]संयोगात्संस्कारातिशयो जायते॥

(३०६) प्रयत्नेन [8]चक्षुषि मनः स्थापयित्वाऽपूर्वमर्थं दिदृक्षमाणस्य विद्युत्सम्पातदर्शनवदादरप्रत्ययः; तमपेक्षमाणादात्ममनसोः संयोगात्संस्कातिशयो जायते; यथा देवहृदे रा[9]जतसुवर्णपद्मदर्शनादिति॥

(३०७) स्थितिस्थापकस्तु स्पर्शवद्द्रव्येषु [10]वर्तमानो घनावयवसन्निवेशविशिष्टे[11]कालान्तरावस्थायिषु स्वाश्रयमन्यथाकृतं [12]यथावत्स्थापयति। स्थावरजङ्गमविकारेषु धनुःशाखा[13]शृङ्गदन्तास्थिसूत्रवस्त्रादिषु भुग्न[14]संवर्तितेषु स्थितिस्थापकस्य कार्यं संलक्ष्यते। नित्यानित्यत्वनिष्पत्तयोऽ[15]स्यापि [16]गुरुत्ववत्।

(३०८) धर्मः पुरुषगुणः। कर्तुः प्रियहितमोक्षहेतुरतीन्द्रियोऽन्त्यसुख-

1 दृष्टः–दे। 2 'भवति' दे पुस्तके नास्ति। 3 दात्ममनसः–दे। 4 संयोगविशेषात् –पा. ५. पु. २। 5 संस्कारातिशयो–भा। 6 'इति' दे पुस्तके नास्ति। 7 संयोगाच्च–दे। 8 मनश्चक्षुषि–भा। 9 सौवर्णराजत–व्यो. (६३६)। 10 वर्तमाने–दे। 11 विशिष्टे कालान्तरावस्थादिषु–दे। 12 यथावस्थितं–भा। 13 °दन्तशृङ्गमस्थिषु–दे। 14 भस्मसंवर्तितेषु तस्य कार्यं–दे। 15 अस्य व्यो. (६२७)। 16 गुरुत्ववद्द्रष्टव्याः पा. ५. पु. दे।

संविज्ञानविरोधी पुरुषान्तःकरण[1]संयोगविशुद्धाभिसन्धिजो वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः ॥

(३०९) तस्य [2]च साधनानि श्रुतिस्मृतिविहितानि वर्णाश्रमिणां सामान्यविशेषभावेनावस्थितानि द्रव्यगुणकर्माणि ॥

(३१०) तत्र सामान्यानि धर्मे श्रद्धा, अहिंसा, भूतहितत्वं, सत्यवचनम्, अस्तेयं, ब्रह्मचर्यम्, [3]अनुपधा, क्रोधवर्जनम्, अभिषेचनं, शुचिद्रव्यसेवनं, विशिष्टदेवताभक्तिः, उपवासोऽप्रमादश्च ॥

(३११) ब्राह्मणक्षत्रिय[4]विशां सामान्यानि धर्मसाधनानि इज्याऽध्ययनदानानि । ब्राह्मणस्य विशिष्टानि प्रतिग्रहाध्यापनयाजनानि स्ववर्ग[5]विहिताश्च संस्काराः । क्षत्रियस्य सम्यक्प्रजापालनम्, असाधुनिग्रहः, युद्धेष्वनिवर्तनं स्वकीयाश्च संस्काराः । वैश्यस्य क्रयविक्रयकृषिपशुपालनानि स्वकीयाश्च संस्काराः । शूद्रस्य [6]पूर्ववर्णपारतन्त्र्यम् अमन्त्रिकाश्च क्रियाः ॥

(३१२) आश्रमिणां तु ब्रह्मचारिणो गुरुकुल[7]निवासिनः स्वशास्त्रविहितानि गुरुशुश्रूषाऽग्नीन्धनभैक्ष्याचरणानि मधुमांसदिवास्वप्नाऽञ्जनाभ्यञ्जनादिवर्जनं च ॥

(३१३) विद्याव्रतस्नातकस्य कृतदारस्य गृहस्थस्य शालीनयायावरवृत्त्युपा[1]र्जितैरर्थैर्भूतमनुष्यदेवपितृब्रह्माख्यानां पञ्चानां महायज्ञानां सायम्प्रातरनुष्ठानम्; एकाग्निविधानेन पाकयज्ञसंस्थानां → च[2] नित्यानां शक्तौ विद्यमानायामग्न्याधेयादीनां च हविर्यज्ञसंस्थानाम्; अग्निष्टोमादीनां सोमयज्ञसंस्थानां च ←। ऋत्वन्तरेषु ब्रह्मचर्यमपत्योत्पादनं च ॥

---

1 °संयोगादुपजायते–दे विशुद्धाभिसन्धितो–दे। 2 तु भा। 3 अनुपधाऽस्तेयं ब्रह्मचर्यं –व्यो. (६४०)। 4 °वैश्यानामिज्याध्ययनदानानि–भा। 5 नियताश्च व्यो. (६४०) दे। 6 शूद्रस्य पारतन्त्र्य–दे। 7 गुरुकुलवासिनः–दे। 8 °पार्जितैर्भूत°–दे। 9 → ← एतच्चिह्नान्तर्गतः पाठः 'दे' पुस्तके भ्रष्टः।

(३१४) ब्रह्मचारिणो गृहस्थस्य वा[1] वनवासो वल्कलाजिनकेशश्मश्रुनखरोमधार[2]णं [3]वन्यहुतातिथिशेषभोजनानि वन[4]स्थस्य ॥

(३१५) त्रयाणामन्यतमस्य श्रद्धावतः सर्वभूतेभ्यो नित्यमभयं दत्त्वा संन्यस्य स्वानि कर्माणि, यमनियमेष्वप्रमत्तस्य षट्पदार्थप्रसङ्ख्यानाद् यो[5]गप्रसाधनं प्रव्रजितस्येति ॥

(३१६) दृष्टं च प्रयोजनमनुद्दिश्यैतानि साधनानि भावप्रसादं चापेक्ष्यात्मम[6]नसोः संयोगाद्धर्मोत्पत्तिरिति ॥

(३१७) अधर्मोऽप्यात्मगुणः । कर्तुरहितप्रत्यवायहेतुरतीन्द्रियोऽन्त्यदुःखसंविज्ञानविरोधी । त[7]स्य तु साधनानि शास्त्रे [8]प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसाऽनृतस्तेयादीनि, विहिताऽकरणं प्रमादश्च । [9]एतानि दुष्टाभिसन्धिं चापेक्ष्यात्मम[10]नसोः संयोगादध*र्मस्योत्पत्तिः ॥

(३१८) अविदुषो रा[11]गद्वेषवतः प्रवर्तकाद्धर्मात् प्र[12]कृष्टात्, स्वल्पधर्मसहिताद् ब्रह्मेन्द्रप्रजापतिपितृ[13]मनुष्यलोकेष्वाशयानुरूपैरिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति । तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात् प्रेततिर्यग्योनिस्थानेष्वनिष्टशरीरेन्द्रियविषयदुःखादिभिर्योगो भ[14]वति । [15]एवं प्रवृत्तिलक्षणाद्धर्मादधर्मसहिताद् देवमनुष्यतिर्यङ्नारकेषु पुनः पुनः संसा[16]रप्रबन्धो भवति ॥

(३१९) ज्ञानपूर्वकात्तु कृतादसङ्कल्पितफलाद् विशुद्धे कुले जातस्य दुःख[17]विगमोपायजिज्ञासोराचार्यमुपसङ्गम्योत्पन्नषट्पदार्थतत्त्वज्ञान-

---

1 वा ग्रामान्निर्गतस्य वनवासो–भा, वा ग्रामान्निसृत्य वनवासो–दे । 2 धारणं च–भा । 3 वन्याम्हुत–व्यो. (६४२) दे । 4 वानप्रस्थस्थ–भा । 5 योगसाधनम्–व्यो. (६४२) दे । 6 °मनःसंयोगात्–व्यो. (६४२) दे । 7 तस्य साधनानि–व्यो. (६४३ । 8 विप्रतिषिद्धानि–व्यो. (६४३) । 9 एतानि–च कं. टी. । 10 °मनःसंयोगात्–व्यो. (६४३) * दधर्मोत्पत्तिः–दे । 11 इदं 'व्यो' पुस्तके नास्ति । 12 प्रकृत्या–दे । 13 पितृ ऋषिमनुष्य–व्यो (६४४) । 14 भवतीति–दे । 15 इत्येवं–व्यो. ६४४ । 16 संसारबन्धो–भा । 17 वियोगोपाय–व्यो. (६४४) ।

स्याज्ज्ञाननिवृत्तौ विरक्तस्य [1]रागद्वेषाभावात् तज्जयोर्धर्माधर्मयो[2]रनुत्पत्तौ पूर्वसञ्चितयोश्चोपभोगान्निरोधे, सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य, रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्तते। [3]तदा निर्बीजस्यात्मनः शरीरादिनिवृत्तिः। पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष इति ॥

(३२०) शब्दोऽम्बरगुणः श्रोत्रग्राह्यः, क्षणिकः, कार्यकारणोभयविरोधी संयोगविभागशब्दजः प्रदेशवृत्तिः समानासमानजातीयकारणः। स द्विविधः—वर्णलक्षणो[4]ऽवर्णलक्षणश्च। तत्र अकारादिर्वर्णलक्षणः, शङ्खादिनिमित्तो[5]ऽवर्णलक्षणः ॥

(३२१) तत्र वर्णलक्षणस्योत्पत्तिरात्ममनसोः संयोगात् स्मृत्यपेक्षाद् वर्णोच्चारणेच्छा; तदनन्तरं प्रयत्नः तमपेक्षमाणादात्मवायुसंयोगाद् वायौ कर्म जायते। स चोर्ध्वं गच्छन्नुरः[6]कण्ठादीनभिहन्ति। ततः स्थान[7]वायुसंयोगापेक्षात्स्थानाकाशसंयोगाद्वर्णोत्पत्तिः ॥

(३२२) अवर्णलक्षणोऽपि[8]भेरीदण्डसंयोगाद्यपेक्षाद् भेर्याकाशसंयोगादुत्पद्यते; वेणुपर्वविभागापेक्षाद्वेण्वा[9]काशविभागाच्च ॥

(३३३) शब्दाच्च संयोगविभागनिष्पन्नाद्वीचीसन्तानवच्छब्दसन्तान इत्येवं [10]सन्तानेन [11]श्रोत्रप्रदेशमागतस्य ग्रहणम्। श्रोत्रशब्दयो[12]र्गमनागमनाभावाद[13]प्राप्तस्य चानुपलब्धेः परिशेषात्सन्तान[14]सिद्धिः ॥

\+ \+ \+ \+ \+

(३३४) उत्क्षेपणादीनां पञ्चानामपि कर्मत्वसम्बन्धः, एकद्रव्यवत्त्वम्; क्षणिकत्वम्, मूर्तद्रव्यवृत्तित्वम्, अगुणवत्त्वम्, गुरुत्वद्रव्यत्व-

---

1 रागद्वेषाद्यभावात्–भा। 2 रनुत्पत्तौ सञ्चितयो–व्यो. (६४४) दे। 3 तदा निरोधात् निर्बीजस्यात्मन–भा। 4, 5 ध्वनिलक्षणः–भा। 6 कण्ठादीन्–भा। 7 वायुसंयोगापेक्षपाणीत्–दे। 8 भेरीदण्डसंयोगापेक्षात्–भा। 9 वेणुपर्वाकाश–पा. ६. ७ पु; पर्वाकाश–व्यो. (६५०)–दे। 10 सन्तानन्यायेन–व्यो. (६५०) पा. ६. ७ पु। 11 श्रोत्रदेश दे. व्यो. (६५०)। 12 गमनासम्भवात्–व्यो. (६५०)। 13 अप्राप्तस्य ग्रहणं नास्ति–भा। 14 प्राप्तस्य चोपलब्धिरितिगुणपदार्थः सम्पूर्णः–दे।

प्रयत्नसंयोगजत्वम्, स्वकार्यसंयोगविरोधित्वम्, संयोगविभागनिरपेक्षकारणत्वम्, असमवायिकारणत्वम्, स्वपराश्रयसमवेतकार्यारम्भकत्वम्, समानजातीयानारम्भकत्वम्, द्रव्यानारम्भकत्वं च प्रतिनियतजातियोगित्वं दिग्विशिष्टकार्यारम्भकत्वं च विशेषः ॥

(३२५) तत्र उत्क्षेपणं शरीरावयवेषु तत्सम्बद्धेषु च यदूर्ध्वभाग्भिः [1]प्रदेशैः संयोगकारणम्, [2]अधोभाग्भिश्च विभागकारणं कर्म उत्पद्यते [3]गुरुत्वप्रयत्नसंयोगेभ्यः तदुत्क्षेपणम् ॥

(३२६) तद्विपरीतसंयोगविभागकारणं कर्म [4]अवक्षेपणम् ॥

(३२८) ऋजुनो द्रव्यस्याग्रावयवानां तद्देशैर्विभागः संयोगश्च मूलप्रदेशैः येन कर्म्मणाऽवयवी कुटिलः सञ्जायते तद् 'आकुञ्चनम् ॥

(३२८) तद्विपर्ययेण संयोगविभागोत्पत्तौ येन कर्मणाऽवयवी ऋजुः सम्पद्यते [5]तत्प्रसारणम् ॥

(३२९) यदा नियत[6]दिग्देशसंयोगविभागकारणं तद् गमनम् इति ॥

(३३०) एतत्पञ्चविधमपि कर्म शरीरावयवेषु तत्सम्बद्धेषु च सत्प्रत्ययमसत्प्रत्ययं [7]च। यदन्यत् तद[8]प्रत्ययमेतेष्वन्येषु च तद् गमनमेव।

(३३१) कर्म्मणां [9]जातिपञ्चत्वमयुक्तम्, गमनाविशेषात्। सर्वं हि[10] क्षणिकं कर्म च[11]लनमात्रम्; उत्पन्नं स्वाश्रयस्योर्ध्वमधः तिर्यग्वा[12] परमाणुविवरमात्रैः प्रदेशैः संयोगविभागान् करोति सर्वत्र [13]च गमनप्रत्ययोऽविशिष्टः। तस्माद् गमनमेव सर्वमिति ॥

(३३२) न, वर्गशः प्रत्ययानुवृत्तिर्व्यावृत्तिदर्शनात् 'इह उत्क्षेपणम्' परत्र 'अपक्षेपणम्' इत्येवमादि सर्वत्र वर्गशः [14]प्रत्ययानुवृत्ति-

1 'प्रदेशैः' इति व्यो. दे. पा. पु. १ इत्येतेषु नास्ति। 2 अधोभाग्भिश्च प्रदेशैः–भा। 3 गुरुत्वद्रवत्वप्रयत्न° व्यो. (६५४)। 4 अपक्षेपणम्–भा। 5 संप्रसारणम्–दे। 6 दिक्प्रदेश–भा। 7 चेति–दे। 8 तदप्रत्ययमेव तेष्वन्येषु च तद्गमनमिति–भा। 9 पञ्चकत्व–भा। 10 'हि' दे पुस्तके नास्ति। 11 गमनमात्रम्–भा। 12 वाऽप्यणुमात्रैः–भा। 13 सर्वत्र गमन°–भा। 14 प्रत्ययानुवृत्तिर्व्यावृत्तिश्च दृष्टा–व्यो. (६५८), दे. पा. ५ पु।

व्यावृत्ती दृष्टे, तद्धेतुः सा[1]मान्यविशेषभेदोऽवगम्यते। तेषामुदाद्युपसर्गविशे[2]षात् प्रतिनियतदिग्विशिष्टकार्या[3]रम्भाद् उपलक्षणभेदोऽपि[4] सिद्धः ॥

(३३३) एवमपि 'पञ्चैव' इत्यवधारणाऽनुपपत्तिः; निष्क्रमणप्रवेशनादिष्वपि वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनात्। [5]कार्यभेदात् तेषु प्रत्ययानुवृत्तिव्यावृत्ती इति चेत्? '[6]न' उत्क्षेपणादिष्वपि कार्यभेदादेव प्रत्ययानुवृत्तिव्यावृत्तिप्रसङ्गः। अथ समाने वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिसद्भावे उत्क्षेपणादीनामेव जातिभेदो न निष्क्रमणादीनामि[7]त्यत्र न विशेषहेतुरस्ति इति चेत्? ॥

(३३४) न, जातिसङ्करप्रसङ्गात्। निष्क्रमणादीनां जातिभेदात् प्रत्ययानुवृत्तिव्यावृत्तौ जातिसङ्करः प्रसज्यते। कथम्? द्वयोर्द्रष्ट्रोरेकस्मादपवरकादपवरकान्तरं गच्छतो युगपन्निष्क्रमणप्रवेशनप्रत्ययौ दृष्टौ; तथा द्वारप्रदेशे प्रविशति निष्क्रामति च। यदा तु प्रतिसीराद्यपनीतं भवति तदा न [8]प्रवेशनप्रत्ययो नापि निष्क्रमणप्रत्ययः [9]किन्तु गमनप्रत्यय एव भवति। तथा नालिकायां वंशपत्रादौ [10]पतति द्रष्टृणां युगपद् भ्रमणपतनप्रवेशनप्रत्यया दृष्टा इति जातिसङ्करप्रसङ्गः। न चैवमुत्क्षेपणादिषु प्रत्ययसङ्करो दृष्टः। तस्मादुत्क्षेपणादीनामेव जातिभेदात् प्रत्ययानुवृत्तिव्यावृत्ती निष्क्रमणादीनां तु कार्यभेदादिति ॥

(३३५) कथं युगपत्प्रत्ययभेद इति चेत्! अथ मतम्—यथा जातिसङ्करो नास्ति एवमनेक[11]कर्मसङ्करोऽपि नास्ति इत्येकस्मिन्कर्मणि युगपद्द्रष्टृणां भ्रमणपतनप्रवेशनप्रत्ययाः कथं भवन्तीति? ॥

---

1 सामान्यविशेषो–व्यो. (६५८)। 2 °भेदात्–भा. व्यो. (६५८)। 3 °रम्भत्वाद्–भा व्यो. (६५८) °रम्भकत्वोपलक्षण–दे। 4 सिद्ध इति–दे। 5 'यदि उत्क्षेपणादिषु सर्वत्र वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनाद् जातिभेद इष्यते 'एवं च निष्क्रमणप्रवेशनादिष्वपि' इत्यधिकः पाठः–भा. इत्यत्र; दे पुस्तके नास्ति। 6 'न' दे पुस्तके नास्ति। 7 °मित्यत्र विशेषहेतुरस्तीति–भा। 8 न निष्क्रमणप्रत्ययो नापि प्रवेशनप्रत्ययः–दे। 9 किन्तर्हि–दे। 10 पतति बहूनां द्रष्टृणां। 11 कर्मसमावेशोऽपि–भा; दे।

(३३४) अत्र—ब्रूमः—न, अवयवाऽविनो[1]र्दिग्विशिष्टसंयोगविभागानां भेदात्। यो हि द्रष्टाऽवयवानां पार्श्वतः पर्यायेण दिक्प्रदेशैः संयोगविभागान् पश्यति तस्य भ्रमणप्रत्ययो भवति। य[2]स्तु अ[3]वयविन ऊर्ध्वप्र[4]देशाद्विभागमधः संयोगं चा[5]वेक्षते तस्य पतनप्रत्ययो भवति। यः पुनर्नालिकान्तर्दे[6]शे संयोगं बहि[7]र्देशे च विभागं पश्यति तस्य प्रवेशनप्रत्ययो भ[8]वति, इति सिद्धः कार्यभेदान्निष्क्रमणादीनां प्रत्ययभेद इति॥

(३३५) भवतूत्क्षेपणादीनां जातिभेदात्प्रत्ययभेदः नि[9]ष्क्रमणादीनां तु कार्यभेदादिति। अथ गमनत्वं किं कर्मत्वपर्यायः? आहोस्विदपरं सामान्यमिति? कुतस्ते संशयः? समस्तेषू[10]त्क्षेपणादिषु भ्रमणादिषु च कर्मप्रत्ययवद् गमनप्रत्ययाविशेषात्कर्मत्वपर्याय इति गम्यते। यतस्तूत्क्षेपणादिवद् विशेषसञ्ज्ञयाऽभिहितं तस्मादपरं सामान्यं स्यादिति॥

(३३६) न, कर्मत्वपर्यायत्वात्। आत्मत्वपुरुषत्ववत् क[11]र्मत्वपर्याय एव गमनत्वमिति। अथ विशेषसञ्ज्ञया किमर्थं गमनग्रहणं कृतमिति? न; भ्रमणाद्यवरोधार्थत्वात्। उत्क्षेपणादिशब्दैरनवरुद्धानां भ्रमणपतनस्यन्दनादीनामवरोधार्थं गमनग्रहणं कृतमिति। अन्यथा हि यान्येव चत्वारि विशेषसञ्ज्ञयोक्तानि तान्येव सामान्यसञ्ज्ञाविषयाणि प्रसज्येरन्निति॥

(३३७) अथवाऽस्तु अपरं सामान्यं गमनत्वम्; अनियतदिग्देशसंयोगविभागकारणेषु भ्रमणादिष्वेव वर्तते। 'गमन'[12]शब्दश्चोत्क्षेपणादिषु भाक्तो द्रष्टव्यः, स्वाश्रयसंयोगविभागकर्तृत्वसामान्यादिति॥

---

1 दिग्देशविशिष्टः–व्यो. (६५९)। 2 यो–हि भा.–दे। 3 अवयविन्यूर्ध्व°–व्यो. (६५९)। 4 प्रदेशैर्विभाग–भा। 5 पश्यति–दे। 6, 7 देशेन–दे। 8 'भवति' इति दे पुस्तके नास्ति। 9 'निष्क्रमणादीनां तु कार्य भेदादिति' पाठोऽयं योमवत्यां कन्दलीटीकायां च नास्तीति अधिको भाति। 10 °षूत्क्षेपणादिषु कर्मप्रत्ययवद् गमनादिविशेषाद्–भा। 11 पर्याय एव–दे। 12 शब्दस्तु–दे।

(३३८) सत्प्रत्ययकर्मविधिः कथम्? चिकीर्षितेषु यज्ञाध्ययनदानकृष्यादिषु यदा हस्तमुत्क्षेप्तुमिच्छति अपक्षेप्तुं वा [1]तदा हस्तवत्यात्मप्रदेशे प्रयत्नः सञ्जायते। तं प्रयत्नं गुरुत्वं चापेक्षमाणादात्महस्तसंयोगाद् हस्ते कर्म भवति, हस्तवत् सर्वशरीरावयवेषु पादादिषु शरीरे चेति ॥

(३३९) तत्सम्बद्धेष्वपि कथम्? यदा हस्तेन मुसलं गृहीत्वेच्छां करोति 'उत्क्षिपामि हस्तेन मुसलम्' इति, तदनन्तरं प्रयत्नः। तमपेक्षमाणादात्महस्तसंयोगाद् यस्मिन्नेवकाले हस्ते उत्क्षेपणकर्मोत्पद्यते तस्मिन्नेव काले तमेव प्रयत्नमपेक्षमाणाद्धस्तमुसलसंयोगान्मुसलेऽपि कर्मेति। ततो दूरमुत्क्षिप्ते मुसले तदर्थेच्छा निवर्तते [2]पुनरप्यपक्षेपणेच्छोत्पद्यते। तदनन्तरं प्रयत्नः, तमपेक्षमाणाद् यथोक्ताद् [3]संयोगद्वयाद् हस्तमुसलयोर्युगपदपक्षेपणकर्मणी भवतः। ततोऽन्त्येन मुसलकर्मणा उलूखलमुसलयोरभिघाताख्यः संयोगः क्रियते। स संयोगो [4]मुसलगतवेगमपेक्षमाणोऽप्रत्ययं मुसले उत्पतनकर्म करोति। तत्कर्माभिघातापेक्षं मुसले संस्कारमारभते। तमपेक्ष्यमुसलहस्तसंयोगोऽप्रत्ययं हस्तेऽप्युत्पतनकर्म करोति ॥

(३४०) यद्यपि प्राक्तनः संस्कारो विनष्टः तथापि मुसलोलूखलयोः संयोगः। → [5]पटुकर्मोत्पादकः संयोगविशेषभावात् तस्य [6]संस्कारारम्भे साचिव्यसमर्थो भवति ← ॥

(३४१) अथवा प्राक्तन एव पटुः संस्कारोऽभिघातादविनश्यन्नवस्थित इ[7]त्यतः संस्कारवति पुनः संस्कारारम्भो [8]नास्ति। अतो यस्मिन् काले संस्कारापेक्षादभिघातादप्रत्ययं मुसले उत्पतनकर्म तस्मिन्नेव काले तमेव संस्कारमपेक्षमाणान्मुसलहस्तसंयोगादप्रत्ययं हस्तेऽप्युत्पतनकर्मेति ॥

---

1 तदा तदा–दे। 2 पुनः–दे। 3 संयोगात्–भा। 4 मुसलवेग–दे। 5 → ← एतचिह्नान्तर्गतः पाठः दे पुस्तके भ्रष्टः। 6 संस्कारसाचिव्ये समर्थो भवति–व्यो. (६६५)। 7 'इत्यतः' व्योमवत्यां नास्ति। 8 नास्तीत्यतः–व्यो. (६६५)।

(३४२) पाणिमुक्तेषु गमनविधिः कथम्? यदा तोमरं हस्तेन गृ[1]हीत्वा 'हस्तेन तोमरमुत्क्षिपामि' इति उत्क्षेप्तुमिच्छोत्पद्यते। [2]तदनन्तरं प्रयत्नः। तमपेक्षमाणाद्यथोक्तात् संयोगद्वयात् तोमरहस्तयोर्युगपदाकर्षणकर्मणी भवतः। प्रसारिते च हस्ते तदाकर्षणार्थः प्रयत्नो निवर्तते॥

(३४३) तदनन्तरं ति[2]र्यगूर्ध्वं दूरमासन्नं वा क्षिपामि इति इच्छा सञ्जायते। तदनन्तरं तदनुरूपः प्रयत्नः। तमपेक्षमाणस्तोमरहस्तसंयोगो नोदनाख्यः। तस्मात्तोमरे कर्मोत्पन्नं नोदनापेक्षं तस्मिन्संस्कारमारभते। ततः संस्कारनोदनाभ्यां तावत् कर्माणि भवन्ति यावद् हस्ततोमरविभाग इति। ततो विभागाद् निवृत्ते नोदने [3a]संस्कारादूर्ध्वं तिर्यग् दूरमासन्नं वा तदनुरूपाणि कर्माणि भवन्ति आपतनादिति॥

(३४४) तथा य[4]न्त्रमुक्तेष्वपि गमनविधिः, कथम्? यो बलवान् कृतव्यायामो वामेन करेण धनुर्विष्टभ्य दक्षिणेन शरं सन्धाय सशरां ज्यां मुष्टिना [5]गृहीत्वाऽऽकर्षणेच्छां करोति [6]सज्येषु 'आकर्षयाम्येतद्धनुः' इति। तदनन्तरं प्रयत्नः। तमपेक्षमाणादात्महस्तसंयोगादाकर्षणकर्म हस्ते यदैवोत्पद्यते तदैव तमेव प्रयत्नमपेक्षमाणाद्धस्तज्याशरसंयोगाद् ज्यायां शरे च कर्म। प्रयत्नविशिष्ट[7]हस्तज्यासंयोगमपेक्षमाणाभ्यां ज्याकोटिसंयोगाभ्यां कर्मणी भवतो धनुष्कोट्योः, इत्येतत्सर्वं युगपत्॥

(३४५) एवमाकर्णादाकृष्टे धनुषि 'नातः परमनेन गन्तव्यम्' इति यज्ज्ञानं ततस्तदाकर्षणार्थस्य प्रयत्नस्य विनाशः। [8]ततः ← पुनर्मोक्षणेच्छा सञ्जायते। [9]तदनन्तरं प्रयत्नः। तमपेक्षमाणादात्माङ्गुलि-

---

1 गृहीत्वेच्छां करोति–व्यो. (६६५)। 2 तदनन्तरं तदनुरूपः प्रयत्नः–व्यो. (६६५)। 3 तिर्यगूर्ध्वमथो दूरमासन्नं वा–व्यो. (६६६)। 3a संस्कार'तदनुरूपाणि–व्यो. (६६६) पा. १ पु। 4 यन्त्रमुक्तेषु गमनविधिः मु–भा। 5 गृहीत्वेच्छां–व्यो. (६६६)। 6 सज्येषु आकर्षाम्येतद् धनुः–व्यो. (६६६)। 7 ज्याशरसंयोग°–भा। 8 ततः ← (३४०) सूत्रे ६. → पट्ट कर्मोत्पादकः इत्येतदारभ्यः (३४५) ततः ← पर्यन्तं पाठो 'दे' पुस्तके भ्रष्टः। 9 तदनन्तरं तदनुरूपः प्रयत्नः–व्यो. (६६७)।

संयोगादङ्गुलिकर्म, तस्मा[1]ज्ज्याङ्गुलिविभागः। ततो विभागात् संयोगविनाशः। तस्मिन् विनष्टे प्रतिबन्धकाभावाद्यदा धनुषि-वर्तमानः स्थितिस्थापकः संस्कारः मण्डली[2]भूतं धनुर्यथावस्थितं स्थापयति तदा तमेव संस्कारमपेक्षमाणाद् धनुर्ज्यासंयोगाज्ज्यायां शरे च कर्मोत्पद्यते। [3]तत्स्वकारणापेक्षं ज्यायां संस्कारं करोति। तमपेक्षमाण इषुज्यासंयोगो नोदनम्। तस्मादिषावाद्यं कर्म नो[4]दना-पेक्षमिषौ संस्कारमारभते। तस्मात्संस्कारान्नोदनसहायात् तावत् कर्माणि भवन्ति यावदिषुज्याविभागः। विभागान्निवृत्ते नोदने कर्मा[5]ण्युत्तरोत्तराणि इषुसंस्कारादेवापतनादिति॥

(३४६) बहूनि कर्माणि क्रमशः, कस्मात्? संयोगबहुत्वात्। एकस्तु संस्कारोऽन्तराले कर्मणः, अपेक्षाकारणाभावादिति। एवमात्माधिष्ठि-[6]तेषु सत्प्रत्ययमसत्प्रत्ययं च कर्मोक्तम्॥

(३४७) अनधिष्ठितेषु बाह्येषु चतुर्षु महाभूतेषु अप्रत्ययं कर्म गमनमेव नोदनादिभ्यो भवति॥

(३४८) तत्र नोदनं गुरुत्वद्रवत्ववेगप्रयत्नान् समस्तव्यस्तानपेक्ष-माणो यः संयोगविशेषो नोदनमविभागहे[7]तोः कर्मणः कारणम्। तस्माच्चतुर्ष्वपि महाभूतेषु कर्म भवति यथा पङ्काख्यायां पृथिव्याम्॥

(३४९) वेगापेक्षो यः संयोगविशेषो [8]विभागहेतोरेकस्य कर्मणः कारणं सो[9]ऽभिघातः। त[10]स्मादपि चतुर्षु महाभूतेषु कर्म भवति। यथा पाषाणादिषु → नि[11]ष्ठुरे वस्तुन्यभिपतितेषु ←॥

---

1 अत्र कन्दल्यनुसारेण 'अङ्गुलिविभाग' इति पाठो भाति 'दे' पुस्तके तु एवमेवोपलभ्यते। 2 मण्डलीकृतं–दे। 3 ततश्च–दे। 4 तन्नोदनापेक्षं संस्कारमारभते–दे। 5 कर्माण्युत्तराणि तु संस्कारादेवपतनादिति–दे। 6 °धिष्ठितेषु तत्सम्बद्धेषु चलत्प्रत्ययमसरत्प्रत्ययं च–दे। 7 हेतोरेकस्य कर्मणः भा, परस्परमविभागकृतः कर्मणः–व्यो. (६६७), अविभागकृत एकस्य–दे। 8 परस्परं विभागकृतहेतो–दे। 9 सोऽभिघातः यथा पाषाणादिषु पाषाणाद्यभिघातात्–व्यो. (६७२)। 10 तस्मादपि भूतेषु–दे। 11 →← एतच्चिह्नान्तर्गताः पाठो 'दे' पुस्तके नास्ति।

(३५०) तथा पादादिभिर्नुद्यमानायामभिहन्यमानायां वा → पङ्काख्यायां पृथिव्यां ← यः संयोगो नोदनाभिघातयोरन्यतरापेक्षः उभयापेक्षो वा स संयुक्तसंयोगः। [1]तस्मादपि ये प्रदेशा न नुद्यन्ते → नाप्यभिहन्यन्ते ← तेष्वपि कर्म जायते ॥

(३५१) पृथिव्युदकयोर्गुरुत्वविधारकसंयोगप्रयत्नवेगाभावे → सति गुरुत्वाद्यदधोगमनं तत्पतनम् ←। यथा मुसलश[2]रीरादिषूक्तम्। तत्राद्यं गुरुत्वाद्, द्वितीयादीनि तु गुरुत्वसंस्काराभ्याम् ॥

(३५२) स्रोतोभूतानामपां स्थलान्निम्नाभिसर्पणं यत्तद् द्रवत्वात् स्यन्दनम्। कथम्? समन्ताद् रोधःसंयोगेनावयविद्रवत्वं प्रतिबद्धम्; अवयवद्रवत्वमपि एकार्थसमवेतं तेनैव प्रतिबद्धम्। [3]उत्तरोत्तरावयवद्रवत्वानि [4]तु संयुक्तसंयोगैः प्रतिबद्धानि। यदा तु मा[5]त्रया सेतुभेदः कृतो भवति तदा समन्तात्प्रतिबद्धत्वादवयविद्रवत्वस्य कार्यारम्भो नास्ति। से[6]तुसमीपस्थस्यावयवद्रवत्वस्योत्तरोत्तरेषामवयवद्र[7]वत्वानां प्रतिबन्धकाभावाद् वृत्तिलाभः।

(३५३) ततः क्रमशः संयुक्तानामेवाभिसर्पणम्। ततः पूर्वद्रव्यविनाशे सति प्रबन्धेनावस्थितैरवयवैर्दीर्घं द्रव्यमारभ्यते। तत्र च कारणगुणपूर्व[8]क्रमेण द्रवत्वमुत्पद्यते। → तत्र कारणानां सं[9]युक्तानां प्रबन्धेन गमने यदवयविनि कर्मोत्पद्यते ← तत्स्यन्दनाख्यमिति ॥

(३५४) संस्कारात्कर्म इष्वादिषूक्तम् तथा चक्रादिष्ववयवानां पार्श्वतः प्रतिनियतदिग्देशसंयोगविभागोत्पत्तौ [10]यदवयविनः संस्कारादनियतदिग्देशसंयोगविभागनिमित्तं कर्म तद् भ्रमणमिति ॥ → [11]एवमादयो गमनविशेषाः ← ।

---

* → ← एतच्चिह्नान्तर्गताः पाठा ‘दे’ पुस्तके न सन्ति। 1 तस्मादपि पृथिव्यादिषु कर्म भवति ये च प्रदेशा–भा। 2 शरीरेष्वादिषूक्तम्–दे। 3 उत्तरोत्तराणि त्वयववद्रवत्वानि–दे। 4 ‘तु’ भा इत्यत्र नास्ति। 5 ‘मात्रया’ दे, ‘व्यो’ पुस्तकयोर्नास्ति। 6 सृतोस्तु–दे। 7 द्रवत्वानामपि–दे। 8 प्रक्रमेण–व्यो. (६७४)। 9 ‘संयुक्तानां’ इति व्योमवत्यां नास्ति। 10 यद्वयविनि–व्यो. (६५४)। तदवयविनि–पा. ९. पु। 11 एतच्चिह्नान्तर्गतः पाठो व्योमवत्यां नास्ति।

(३८५) प्राणाख्ये तु वायौ कर्म आत्मवायुसंयोगादिच्छाद्वेषपूर्वक प्रयत्नापेक्षाज् जाग्रत इच्छानुविधानदर्शनात् । सुप्तस्य तु जीवनपूर्वकप्रयत्नापेक्षात् ॥

(३८६) [1]आकाशकालदिगात्मनां सत्यपि द्रव्यभावे निष्क्रियत्वं सामान्यादिवदमूर्तत्वात् । मूर्तिः असर्वगतद्रव्यपरिमाणं तदनुविधायिनी च क्रिया; सा चाकाशादिषु नास्ति; तस्मान्न तेषां क्रियासम्बन्धोऽ[2]स्तीति ॥

(३८७) सविग्रहे मनसि इन्द्रियान्तरसम्बन्धार्थं जाग्रतः कर्म आत्ममनःसंयोगादिच्छाद्वेषपूर्वकप्रयत्नापेक्षात्; अन्वभिप्रायमिन्द्रियान्तरेण विषयोपलब्धिदर्शनात् । सुप्तस्य प्रबोधकाले जीवनपूर्वकप्रयत्नापेक्षात् ॥

(३८८) अपसर्पणकर्मोपसर्पणकर्म चात्ममनःसंयोगाददृष्टापेक्षात् । कथम्? यदा जीवनसहकारिणो धर्माधर्मयोरुपभोगात् [3]प्रक्षयोऽन्योन्याभिभवो वा तदा जीवनस[4]हायवैकल्ये तत्पूर्वकप्रयत्नवैकल्यात् प्राणनिरोधे सति अन्याभ्यां [5]लब्धवृत्तिभ्यां धर्माधर्माभ्यामात्ममनःसंयोगसहा[6]याभ्यां मृतशरीराद्विभागकारणमपसर्पणकर्मोत्पद्यते ॥

(३८९) ततः शरीराद् बहिरपगतं ताभ्यामेव धर्माधर्माभ्यां [7]समुत्पन्नेनातिवाहिकशरीरेण सम्बध्यते । तत्सङ्क्रान्तं च स्वर्गं नरकं वा गत्वाऽऽशयानुरूपेण शरीरेण [8]सम्बध्यते । तत्संयोगार्थं कर्मोप[9]सर्पणमिति । योगिनां च बहिरुद्रेचितस्य मनसोऽऽभिप्रेतदेशगमनं प्रत्यागमनं च । तथा सर्गकाले प्रत्यग्रेण शरीरेण सम्बन्धार्थं कर्मादृष्टकारितम् ॥

---

1 आकाशकालदिगात्मानः सत्यपि द्रव्यभावे निष्क्रियाः–व्यो. (६७५) दे । 2 'इति' दे पुस्तके नास्ति । 3 प्रत्यक्षयो–दे । 4 सहाययोर्वैकल्यात्–भा । 5 वृत्तिलब्धधर्माधर्माभ्यां–व्यो. (६७६) दे । 6 सहकारिभ्यां०–व्यो. (६७६) । 7 सम्पादितेन–व्यो. (६७६) । 8 संयुज्यते –व्यो. (६७६) । 9 कर्मोपसर्पणाख्यमिति–व्यो (६७६) दे ।

(३६०) [1]अन्यदपि महाभूतेषु यत्प्रत्यक्षानुमानाभ्यामनुपलभ्यमानकारणमुप[2]कारापकारसमर्थं तदप्यदृष्टकारितम्; यथा सर्गादावणुकर्म, अग्निवाय्वोरूर्ध्वतिर्यग्गमने, महाभूतानां प्रक्षोभणम्, [3]अभिषिक्तानां मणीनां तस्करं प्रति गमनम्, अयसोऽयस्कान्ताभिसर्पणं चेति ॥

॥ कर्मपदार्थः ॥

\+ \+ \+ \+ \+

(३६१) सामान्यं द्विविधम्—परमपरं च । स्वविषयसर्वगतम[4]भेदात्मकमनेकवृत्ति, एकद्विबहुष्वात्मस्व[5]रूपानुवृत्तिप्रत्ययकारणं, स्वरूपाभेदेनाधारेषु प्रबन्धेन वर्तमानमनुवृत्तिप्र[6]त्ययकारणम् ॥

(३६२) कथम्? प्रतिपिण्डं सामान्यापेक्षं प्रबन्धेन ज्ञानोत्पत्तौ अभ्यासप्रत्ययजनिताच्च संस्कारादतीतज्ञानप्रबन्धप्रत्यवेक्षणाद् यदनुगतमस्ति तत्सामान्यमिति ॥

(३६३) तत्र [7]सत्ता परं सामान्यमनुवृत्तिप्रत्ययकारणमेव । यथा परस्परविशिष्टेषु चर्मवस्त्रकम्बलादिष्व[8]न्यस्मा[9]न्नीलद्रव्याभिसम्बन्धात् '[10]नीलं नीलम्' इति प्रत्ययानुवृत्तिः । तथा परस्परविशिष्टेषु द्रव्यगुणकर्मस्वविशिष्टा 'सत्सद्' इति प्रत्ययानुवृत्तिः । [11]सा चार्थान्तरसम्बन्धाद् भवितुमर्हतीति यत्तदर्थान्तरं सा सत्ता इति सिद्धा । [12]सत्तानुसम्बन्धात् 'सत्सद्' इति प्रत्यानुवृत्तिः तस्मात्सामान्यमेव ॥

(३६४) अपरं द्रव्यत्वगुणकर्मत्वादि, अनुवृत्ति[13]व्यावृत्तिप्रत्ययहेतुत्वात् सामान्यं विशेषश्च भवति । तत्र द्रवत्वं परस्परविशिष्टेषु पृथि-

1 एवमन्यदपि–भा । 2 °मुपकारापकारसमर्थं च भवति–भा–दे । 3 'अभिषिक्तानाम्' इति व्योमवत्यां नास्ति; अधिवासितमणीनां–दे । 4 °मभिन्नात्मक°–भा । 5 स्वरूपानुगमप्रत्ययकारि–भा । 6 बुद्धिकारणम्–व्यो. (६८६) दे । 7 सत्तासामान्यं परं–भा । 8 °ष्वेकस्मात्–भा । 9 नीलिद्रव्या. पा–६. पु; नीलद्रव्यसम्बन्धात्–व्यो. (६८७) । 10 नीलमिति–दे । 11 चार्थान्तराद् भवितु–भा । 12 सत्तासम्बन्धात्–व्यो. (६८७) । 13 व्यावृत्तिहेतुत्वात्–भा. दे ।

व्यादिष्व[1]नुवृत्तिप्रत्ययहेतुत्वात्सामान्यम्, गुणकर्मभ्यो व्यावृत्तिप्रत्ययहेतुत्वाद्विशेषः। तथा गुणत्वं परस्परविशिष्टेषु रूपादिष्वनुवृत्तिहेतुत्वात् सामान्यं द्रव्यकर्मभ्यो व्यावृत्तिहेतुत्वाद्विशेषः। तथा कर्मत्वं → प[2]रस्परविशिष्टेषूत्क्षेपणादि[3]ष्वनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं द्रव्यगुणेभ्यो व्यावृत्तिहेतुत्वाद्विशेषः ← ॥

(३६५) एवं पृथिवीत्वरूपत्वोत्क्षेपणत्वगोत्वघटत्वपटत्वादीनामपि प्राण्यप्राणिगतानामनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यविशेषभावः सिद्धः। [4]एतानि द्रव्यत्वादीनि प्रभूतविषयत्वात् प्राधान्येन सामान्यानि स्वाश्रय[5]विशेषाद् भक्त्या विशेषाख्यानीति ॥

(३६६) लक्षणभेदादेषां द्रव्यगुणकर्मभ्यः पदार्थान्तरत्वं सिद्धम्। अत एव च नित्यत्वम् ॥

(३६७) द्रव्यादिषु वृत्तिनियमात् प्रत्ययभेदाच्च परस्परतश्चान्यत्वम्। प्रत्येकं स्वाश्रयेषु लक्षणविशेषाद् विशेषलक्षणभावाच्च एकत्वम् ॥

(३६८) यद्यपि अपरिच्छिन्नदेशानि सामान्यानि तथाप्युपलक्षणनियमात् कारणसामग्रीनियमाच्च स्वविषयसर्वगतानि। अन्तराले च संयोगसमवायवृत्त्यभावादव्यपदेश्यानीति ॥

॥ सा[6]मान्यः पदार्थः ॥

\+ + + + +

(३६९) [7]अन्तेषु भवा अन्त्याः स्वाश्रयविशेषकत्वाद्विशेषाः। विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतवः ॥

(३७०) यथाऽस्मदादीनां गवादिष्वश्वादिभ्यः तुल्याकृतिगुणक्रियाऽवयवसंयोगनिमित्ता प्रत्ययव्यावृत्तिर्दृष्टा 'गौः शुक्लः शीघ्रगतिः

1 °ष्वनुवृत्तिहेतुत्वात्–भा। 2 → ← एतच्चिह्नान्तर्गतः पाठः 'दे' पुस्तके नास्ति। 3 °ष्वनुवृत्तिहेतुत्वाद्–व्यो. (६८८)। 4 एतानि तु–भा। 5 विशेषात्तु–दे। 6 'दे' पुस्तकं विहायान्यत्रायं पाठो नास्ति; पदार्थसमाप्तिनिदर्शकत्वात्सर्वत्र स्वीकृतः। 7 अन्त्येषु–दे।

[1]पीनः ककुद्मान् महाघण्ट' इति; तथाऽस्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनस्सु चान्यनिमित्तासम्भवाद् ये[2]भ्यो निमित्तेभ्यः प्रत्याधारं 'वि[3]लक्षणोऽयं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिर्देशकालवि[4]प्रकर्षदृष्टे च परमाणौ 'स एवाऽयम्' इति प्रत्यभिज्ञानं च भवति तेऽन्त्याः विशेषाः ॥

(३७१) यदि पुनरन्त्यविशेषमन्तरेण योगिनां योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं [5]ततः किं स्यात्? नैवं भवति। यथा न योगजाद्धर्मादशुक्ले शुक्लः प्रत्ययः सञ्जायते [6]अत्यन्ताऽदृष्टे च प्रत्यभिज्ञानम्, यदि स्यान्मिथ्या भवेत्; तथेहापि अन्त्यविशेषमन्तरेण यो[7]गिनां न योगजा*द्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं वा भवितुमर्हति ॥

(३७२) अथ अन्त्यविशेषेष्विव परमाणुषु कस्मान्न स्वतः प्रत्ययवृत्तिः कल्प्यत [8]इति चेत्? न, तादात्म्यात्। इह अतदात्मकेष्वन्यनिमित्तः प्र[9]त्ययो भवति यथा घटादिषु प्रदीपात् न तु प्रदीपे प्र[10]दीपान्तरात्। यथा [11]गवाश्वमांसादीनां स्वत एवाशुचित्वं तद्योगादन्येषां तथेहापि तादात्म्या[12]दन्त्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः तद्योगात् [13]परमाण्वादिष्विति ॥

॥ [14]विशेषः पदार्थः ॥

\+ \+ \+ \+ \+

(३७३) अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः [15]स समवायः। द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानामकार्यकारणभूतानां वाऽयुतसिद्धानामाधार्याधारभावेनावस्थितानाम्

1 पीनककुद्मान्–भा। 2 एभ्यो–दे। 3 विलक्षणोऽयमिति–दे। 4 विप्रकर्षे च–भा; विप्रकृष्टदृष्टे–व्यो. (६९४); विप्रकृष्टे–पा. ७. पु। 5 को दोषः? व्यो. (६९४) दे पुस्तके त्वयं पाठो नास्ति। 6 अत्यन्तादृष्टपूर्वे–दे। 7 'योगिनां' व्यो (६९४) पुस्तके नास्ति। *धर्मान्न–दे। 8 इति न–दे। 9 प्रत्ययो दृष्टो–व्यो. (६९५)। 10 प्रदीपात्–व्यो. (६९५) दे। 11 यथा वाश्वमांसादीनां–दे। 12 अनया विशेषेषु–दे। 13 परमाणुषु–व्यो. (६९५)। 14 पाठोऽयं 'दे' पुस्तके एव दृश्यते पदार्थसमाप्तिनिर्देशकत्वात्स्वीकृतः। 15 'स' दे पुस्तके नास्ति।

, इह [1]इदम् . इति बुद्धिर्यतो भवति, यतश्चासर्वगतानामधिगतान्यत्वानामवि[2]ष्वग्भावः स समवायाख्यः सम्बन्धः ॥

(३७४) कथम्? यथा 'इह कुण्डे दधि' इति प्रत्ययः सम्बन्धे सति दृष्टः तथा '[3]इह तन्तुषु पटः' 'इह वीरणेषु कटः' 'इह द्रव्ये द्रव्यगुणकर्माणि' 'इह गुणे गुणत्वम्' 'इह कर्मणि, कर्मत्वम्' 'इह [4]नित्यद्रव्येऽन्त्या विशेषाः' इति प्रत्ययदर्शनादस्त्येषां सम्बन्ध इति ज्ञायते ॥

(३७५) न चाऽसौ संयोगः, सम्बन्धिनामयुतसिद्धत्वादन्यतरकर्मादिनि[5]मित्तासम्भवाद् विभागान्तरत्वादर्शनादधि[6]करणाधिकर्तव्ययोरेव भावादिति ॥

(३७६) स च द्रव्यादिभ्यः पदार्थान्तरं, भाववल्लक्षणभेदात्। यथा भावस्य द्रव्यत्वादीनां स्वाधारेष्वात्मानुरूपप्रत्ययकर्तृत्वात् स्वाश्रयादिभ्यः परस्परतश्चार्थान्तरभावः तथा समवायस्यापि पञ्चसु पदार्थेषु 'इह' इति प्रत्ययदर्शनात् तेभ्यः पदार्थान्तरत्वमिति ॥

(३७७) न च संयोगवन्नानात्वं भावलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च। तस्माद् भाववत्सर्वत्र एकः समवाय इति ॥

(३७८) ननु यद्येकः [7]समवायो द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सह सम्बन्धैकत्वात्पदार्थसङ्करप्रसङ्ग इति?

(३७९) न, आधाराधेयनियमात्। यद्यप्येकः समवायः [8]सर्वत्र स्वतन्त्रः [9]तथाप्याधाराधेयनियमोऽस्ति। कथम्? द्रव्येष्वेव द्रव्यत्वम्, गुणेष्वेव गुणत्वम्, कर्मस्वेव कर्मत्वमिति ॥

---

1 इहेति दे। 2 अविष्वग्भावेनावस्थितानाम् व्यो. (६९८)। 3 इह तन्तुषुः पटः इह द्रव्ये द्रव्यगुणकर्माणि दे; द्रव्यगुणकर्मणी–भा। 4 नित्यद्रव्येषु–दे। 5 निमित्तप्रत्ययाभावात्–दे। 6 करणकर्तव्ययोरेव–दे। 7 यद्येकः समवायो ननु–दे। 8 'सर्वत्र' दे पुस्तके नास्ति। 9 तथाऽऽधारा° दे।

(३८०) एवमादि कस्मात्? अन्वयव्यतिरेकदर्शनात्। 'इह' इति स[1]मवायनिमित्तस्य ज्ञानस्यान्वयदर्शनात् सर्वत्र 'एकः समवाय' इति गम्यते। द्रव्यत्वादिनिमित्तानां व्यतिरेकदर्शनात् [2]प्रतिनियमो ज्ञायते ॥

(३८१) यथा कुण्डदध्नोः [3]संयोगैकत्वे भवत्या[4]श्रयाश्रयिभावनियमः तथा [5]द्रव्यत्वादीनामपि समवायैकत्वेऽपि व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयनियम इति ॥

(३८२) सम्बन्धनित्यत्वेऽपि न संयोगवदनित्यत्वम्, भा[6]ववदकारणत्वात्। यथा प्रमाणतः कारणानुपलब्धेर्नित्यो भाव' इत्युक्तम् तथा समवायोऽ[7]पीति। न हि कस्य किञ्चित्कारणं प्रमाणत उपलभ्यते इति ॥

(३८३) कया पुनर्वृत्त्या द्रव्यादिषु समवायो वर्तते? न संयोगः सम्भवति, [8]तस्य गुणत्वेन द्रव्याश्रितत्वात्; नापि समवायः तस्यैकत्वात्; न चान्या वृत्तिरस्तीति? ॥

(३८४) न [9]तादात्म्यात्। यथा द्रव्यगुणकर्मणां सदात्मकस्य भावस्य नान्यः सत्तायोगोऽस्ति; एवमविभागिनो वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति। तस्मात्स्वात्मवृत्तिः ॥

(३८५) अत एवातीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात् स्वात्मगतसंवेदनाभावाच्च। तस्माद् 'इह' बुद्ध्यनुमेयः समवाय [10]इति ॥

यो[11]गाचारविभूत्या यस्तोषयित्वा महेश्वरम् ॥
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः ॥

---

1 समवायनिमित्तज्ञानस्य–दे। 2 प्रतिनियमोऽपि विज्ञायते–दे। 3 संयोगैकत्वेऽपि–दे। 4 °श्रयाश्रयिनियमः–दे। 5 द्रव्यत्वादीनां समवायैकत्वेऽपि–दे। 6 कथम्? भाववदकारणत्वात्–दे। 7 'इति' दे पुस्तके नास्ति। 8 अस्य–दे। 9 तादात्म्याद् भाववत्–दे। 10 इति सिद्धं, समवायः पदार्थ इति पदार्थप्रकाशाख्यं भाष्यं कृतिराचार्यभगवत्प्रशस्तकरणपादानां–दे। 11 इदं पद्यं पु. पुस्तके 'दे' पुस्तके चास्ति नान्येषु पुस्तकेषु ॥

परिशिष्ट १

* श्रीमदुदयनाचार्यविरचिता **लक्षणावली** ।

प्रणम्य पार्वती[1]नाथं नित्यविज्ञानमीश्वरम् ।
द्रव्यादिसर्वमेयानां करिष्ये **लक्षणावलीम्** ।

(१) अभिधेयः पदार्थः । स द्विविधो भावाभावभेदात् ।

(२) तत्र नञर्थविषयत्वरहितप्रत्ययविषयो भावः । स च षोढा द्रव्यादिभेदेन ।

(३) तत्रानित्यद्रव्यगुणकर्मसामान्यविशेषाः समवेताः ।

(४) नित्यद्रव्यसमवायाभावाः समवेतत्वरहिताः ।

(५) द्रव्यगुणकर्माणि समवेतवन्ति ।

(६) सामान्यविशेषसमवायाभावाः समवेतरहिताः ।

(७) तत्र गुणात्यन्ताभावानधिकरणं द्रव्यम् । मूर्तत्वरहितसमवेतसमवेतत्वरहितमूर्तत्वरहितामूर्तत्वरहितसमवेतजातिमद्वा(१) । गन्धासमवेतगगनारविन्दसमवेतजातिमद्वा(२) । समवेतसमवेतजातिमद्वा(३) ।

(८) तच्च नवधा भिद्यते पृथिव्यादिभेदेन ।

(९) तमो द्रव्यं न भवति, आलोकनिरपेक्षचक्षुर्ग्राह्यत्वात्, आलोकाभाववत् । तमः शब्दवाच्यत्वेन विप्रतिपत्तिविषयतया पक्षत्वम् । आलोकाभावशब्दवाच्यतया सम्प्रति-

---

* अस्याः शेषशार्ङ्गधराचार्यकृता टीकाप्यस्ति, अनुपलब्धेर्न सम्पादिता—सं ।

1 °कान्तं–पा. ३. पुस्तके ।

१ मूर्तत्वरहितं यत्समवेतं गुणादिकं तत्समवेतत्वरहिता मूर्तत्वरहितसमवेताऽमूर्तत्वरहितसमवेता या जातिस्तद्वत् ।

२ गन्धासमवेता गगनसमवेताऽरविन्दसमवेता च या जातिस्तद्वदित्यर्थः । सत्तामादाय गुणादावतिव्याप्तिरतो **गन्धासमवे**तेति ।

३ समवेतं समवेतं यत्र तत् समवेतसमवेतं गुणादिकं तत्समवेतं यत्र तत् समवेतसमवेतसमवेतमित्यर्थः ।

पत्तिविषयतया साध्ययोगित्वेन सपक्षत्वमिति न पक्षसपक्षयोरैक्यदोषः। तमःशब्दो द्रव्यवाचको न भवति, (१) आलोकशब्दान्यत्वे सति आलोकनिरपेक्षचक्षुर्ग्राह्यवाचित्वात्, आलोकाभावशब्दवत्।

(१०) तत्र गन्धात्यन्ताभावरहिता पृथिवी। करकासमवेतवाजिविषाण-जातिमती वा(२)।

(११) सा द्विविधा नित्यानित्यभेदात्। नित्यः परमाणुरनित्या कार्यरूपा।

(१२) पृथिवीत्वं नित्यवृत्तिघटपटवृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः। न च पक्षासिद्धिः; घटो गगनवृत्तित्वरहितपटवृत्तिजातिमान् घटपटव्यतिरेकित्वरहितत्वात् पटवदिति पृथिवीत्वसिद्धिः। न च सत्ताऽसिद्धिः, गगनं द्रव्येतरजातिमद् भूतत्वाद् घटादिवदित्यनुमानात्सत्तासिद्धिः। न च द्रव्यत्वासिद्धिः; गगनादि रूपावृत्तिजातिमद् गुणत्वाद् घटवदिति द्रव्यत्वसिद्धिः।

(१३) कार्यं त्रिविधं शरीरादिभेदेन। तत्र भोगायतनमन्त्यावयवि शरीरम्। शरीरसंयुक्तमपरोक्षप्रतीतिसाधनमतीन्द्रियमिन्द्रियम्। ज्ञानकरणजन्यत्वरहितज्ञानत्वमपरोक्षत्वम्। अतीन्द्रियत्वं नामाज्ञातसाधनत्वम्। प्रतीयमानतया भोगसाधनं विषयः।

॥ इति पृथिवीप्रकरणम् ॥

(१४) पृथिवीवृत्तित्वरहितहिमकरकावृत्तिजातिमज्जलम्।

(१५) तन्नित्यानित्यभेदाद् द्विविधम्।

(१६) जलत्वं नित्यवृत्ति हिमकरकावृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः। करका गगनवृत्तित्वरहितहिमवृत्तिजातिमती स्नेहाधिकरणत्वात् हिमवत् इति करकायां तत्सिद्धिः।

(१७) अनित्यं त्रिविधं शरीरादिभेदात्। शरीरं वरुणलोके। जलपरमाणवः पारम्पर्येण शरीरारम्भकाः इन्द्रियारम्भकत्वात् पार्थिवपरमाणुवत्। इन्द्रियारम्भकत्वं तु रसनस्याप्यत्वात्सिद्धम्। रसनमाप्यं रूपादिषु पञ्चसु मध्ये रसस्यैवाभिव्यञ्जकत्वात्,

---

१ आलोकशब्दस्यालोकनिरपेक्षचक्षुर्ग्राह्यालोकवाचित्वात्, तत्र च द्रव्यवाचकत्वाद् व्यभिचार इति सत्यन्तम्।

२ करकायामसमवेता वाजिनि विषाणे च समवेता या जातिस्तद्वतीत्यर्थः।

सक्तुरसाभिव्यञ्जकसलिलवदिति । रसनसिद्धिस्तु रसोपलब्धिकरणसाध्या अपरोक्षप्रतीतित्वात् रूपोपलब्धिवदिति । विषयस्तु सरित्समुद्रादिर्हिमकरकादिः । न च करकायाः कठिन्यात् पार्थिवत्वमाशङ्कनीयम्, अनन्तरमेव स्वभावापगमादिति ॥

॥ इत्यापः प्रकरणम् ॥

(१८) रसात्यन्ताभावसमानाधिकरणरूपाधिकरणं तेजः । करकावृत्तित्वरहित-विद्युदाकरजवृत्तिजातिमद्वा ।

(१९) विद्युत्तेजः करकावृत्तित्वरहिताकरजवृत्तिजातिमती वा विद्युद्—व्यति-रिक्ताकरजान्यत्वरहितत्वात् आकरजवत् ।

(२०) आकरजं सुवर्णादि ।

(२१) ननु सुवर्णादिकं पार्थिवं नैमित्तिकद्रवत्वाधिकरणत्वाद् घृतवत् । अनेन पार्थिवत्वसिद्धावाकरजवृत्तिजातिमत्त्वसाधनेऽपि विद्युत्तेजसो न तैजसत्वसिद्धिरिति चेन्न ।

(२२) सुवर्णादिकमपार्थिवम्, अत्यन्ताग्निसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधि-करणत्वाद् 'इति प्रत्यनुमानेनापार्थिवत्वसिद्धौ असांसिद्धिकद्रवत्वेन तत्सिद्धिः । अन्यथा पार्थिवत्वे द्रवत्वमत्यन्ताग्निसंयोगे उच्छिद्येतेति तर्कोऽनुसरणीयः ।

(२३) तच्च द्विविधम् । नित्यमनित्यं चेति ।

(२४). तेजस्त्वं नित्यवृत्ति विद्युदाकरजवृत्तिजातित्वात् सत्तावदिति नित्यत्व-सिद्धिः । साधितं तेजस्त्वम् ।

(२५) अनित्यं त्रिविधम् । शरीरादिभेदेन । शरीररामादित्यलोके । तस्यापि पूर्ववत्सिद्धिः । इन्द्रियं रूपोपलम्भकं चक्षुः । रूपोपलब्धिः करणसाध्या क्रियात्वाच्छिदि-क्रियावदिति तत्सिद्धिः ।

(२६) कर्तृप्रेर्यं करणम् । धातुवाच्या क्रिया ।

(२७) चक्षुः तैजसं रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वादालोकवत् । विषयस्तु भौमादिः । इति तेजःप्रकरणम् ॥

(२८) रूपात्यन्ताभावाधिकरणस्पर्शाधिकरणो वायुः ।

(२९) विप्रतिपन्नः स्पर्शो रूपरहितद्रव्यवृत्तिः स्पर्शत्वरहितशब्दान्यत्वरहि-तत्वात् शब्दवदिति वायुसिद्धिः ।

(३०) स च द्विविधः। नित्यानित्यभेदेन।

(३१) वायुत्वं नित्यवृत्तित्वरहितवायुत्वान्यवृत्तित्वरहितत्वात् पृथिवीत्ववदिति तत्सिद्धिः।

(३२) कार्यं त्रिविधं शरीरादिभेदेन। वायुत्वं शरीरवृत्ति बाह्येन्द्रियवृत्ति-जातित्वात्सत्तावदिति तत्सिद्धिः। स्पर्शोपलम्भकमिन्द्रियं वायवीयं रूपादिषु पञ्चसु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वाद् व्यजनपवनवत्। विषयस्तु उपलभ्यमानस्पर्शाधिष्ठानभूतः प्राणस्तु शरीरादिप्रेरणहेतुर्वायुः। इति वायुप्रकरणम्॥

(३३) शब्दात्यन्ताभावानधिकरणं नभः। संयोगजन्यजन्यविशेषगुणसमा-नाधिकरणविशेषाधिकरणं वा।

(३४) शब्दः क्वचिदाश्रितः गुणत्वाद् रूपवत्। न च शब्दस्य स्पर्शवदाश्रयः स्पर्शासहकारित्वाद् बुद्धिवदिति। न च कालाद्याश्रयः, बाह्येन्द्रियग्राह्यत्वाद् रूपवदिति परिशेषात्तत्सिद्धिः। इत्याकाशप्रकरणम्॥

(३५) अनियतपरत्वासमवायि समवायिपरत्वासमवायिसमवायिमूर्तत्वरहितः कालः।

(३६) गगनम्, अनियतपरत्वासमवायित्वरहितमूर्तत्वरहितज्ञानसमवायित्व-रहितत्वद्द्रव्यान्यद् अमूर्तत्वादात्मवद्, इति तत्सिद्धिः। इति कालप्रकरणम्॥

(३७) अनियतपरत्वासमवायिसमवायिनी मूर्तत्वरहिता दिक्।

(३८) कालो विशेषगुणरहितो मूर्तद्रव्यान्यः, मूर्तत्वरहितत्वाद् आकाशादि-वदिति तत्सिद्धिः। इति दिक् प्रकरणम्॥

(३९) ज्ञानात्यन्ताभावरहित आत्मा। परत्वासमवायिसमवायित्वरहितशब्दा-समानाधिकरणकार्याश्रयो वा।

(४०) ज्ञानं क्वचिदाश्रितं गुणत्वाद्रूपवदिति तत्सिद्धिः।

(४१) न च शरीरेन्द्रियाणां तदाश्रयत्वं कार्यत्वाद् घटवदिति। कार्यस्य तदाश्रयत्वे स्वर्गाद्यर्थितया ज्योतिष्टोमाद्युपदेशो न स्यात्। न च मनसस्तदाश्रयत्वं करणत्वाच्चक्षुर्वत्।

(४२) स द्विविधः, ईश्वरानीश्वरभेदात् ।

(४३) अङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवदिति ईश्वरसिद्धिः ।

(४४) द्वितीयस्तु अहंप्रत्ययवेद्यः । स च नाना व्यवस्थावचनादिति । इत्यात्मप्रकरणम् ।

(४५) स्पर्शरहितत्वे सति मूर्तं मनः । विशेषगुणात्यन्ताभावाधिकरणत्वे सति मूर्तं वा ।

(४६) पृथिवीवृत्ति पृथिवीत्वरहितवृत्ति वृत्तित्वरहितगुणत्वव्याप्यजातिमान् विशेषगुणः ।

(४७) आत्मप्रतीतिः करणसाध्या, अपरोक्षप्रतीतित्वाद् रूपोपलब्धिवदिति तत्सिद्धिः । इति मनःप्रकरणम् ॥

॥ इति द्रव्यपदार्थः ॥

(४८) संयोगाजन्यसंयोगासमवायिसमवेतत्वरहितसंयोगासंयोगसमवेतवान् गुणः । विभागाजन्यविभागासमवायिसमवेतत्वरहितविभागाविभागसमवेतवान् गुणः ।

(४९) रूपं संयोगाजन्यसंयोगासमवायिसमवेतत्वरहितसंयोगसमवेतत्वरहित-संयोगसमवेतवत्, रूपत्वरहितसंयोगान्यत्वरहितत्वात् संयोगवदिति गुणत्वसिद्धिः ।

(५०) चतुर्विंशतिप्रकारो रूपादिभेदेन ।

(५१) रसासमवेतनीलपीतसमवेतवद्रूपम् । गुणत्वे सति चक्षुर्मात्रग्राह्यं वा । तत्सप्तप्रकारम् ।

(५२) न च रूपग्राहकं चक्षुश्चक्षुर्मात्रग्राह्यं रूपमित्यन्योन्याश्रयत्वम्; नयन-गोलकाधिष्ठानत्वेन चक्षुर्निरूपणात् ।

(५३) शुक्लो रसासमवेतनीलसमवेतवान् शुक्लत्वरहितनीलान्यत्वरहितत्वान्नील-वदिति रूपत्वसिद्धिः ।

(५४) नीलं स्वमात्रसमवेतवत् स्वमात्रसमवेतत्वरहितनीलान्यत्वरहितत्वाद् घटवदिति नीलत्वजातिसिद्धिः ।

(५५) नीलत्वरहितघटत्वात्यन्ताभावत्वरहितः स्वशब्दार्थः ।

(५६) गुणत्वे सति रसनग्राह्यो रसः ।

(५७) स च षोढा माधुर्यादिभेदेन ।

(५८) क्षीरेक्षुगुडसलिलेषु माधुर्यादिसाम्येपिऽवान्तरजातिभेदस्य विद्यमानत्वाद् विशेषगुणसिद्धिः ।

(५९) गुणत्वे सति घ्राणग्राह्यो गन्धः ।

(६०) जलादावौपाधिकी गन्धप्रतीतिर्न स्वभावत इति विशेषगुणत्वसिद्धिः ।

(६१) जलं न गन्धाधिकरणं पाकजरूपानधिकरणत्वात्तेजोवत् । वायोः पक्षतुल्यत्वान्न व्यभिचारः ।

(६२) गुणत्वे सति त्वगिन्द्रियग्राह्यः स्पर्शः ।

(६३) स त्रिविधः । शीतोष्णानुष्णाशीतभेदात् ।

(६४) नन्वनुष्णाशीतस्पर्शस्य कथं विशेषगुणत्वम्, तस्य पृथिवीवायुसाधारणत्वात्; पाकजत्वापाकजत्वाभ्यामवान्तरजातिभेदेन विशेषगुणत्वे नैमित्तिकद्रवत्वस्याप्यत्यन्ताग्निसंयोगे सत्युच्छेदानुच्छेदाभ्यामवान्तरजातिसद्भावेन विशेषगुणता स्यात् । ततश्च नैमित्तिकद्रवत्वस्य सामान्यगुणपाठो निरर्थकः स्यात् । अनुष्णाशीतस्पर्शस्य वा पाठः स्यात् । ततश्च वायोर्बाह्येन्द्रियग्राह्यविशेषगुणपाठो निरर्थकः स्यात् । सेयमुभयतः पाशारज्जुः ।

(६५) मैवम् । अवान्तरजातिभेदस्य क्षीरेक्षुगुडमाधुर्यादिवदनुभवसिद्धत्वात् । अन्यथा महान्धकारे स्पर्शोपलम्भमात्रेण वायुर्वातीति प्रत्ययो न स्यात् ।

(६६) न चैवं सति नैमित्तिकद्रवत्वस्यान्तरजातिभेदानुभवः ।

(६७) वायुस्पर्शः पृथिवीवृत्तित्वरहितगुणत्वव्याप्यजातिमान्, अपाकजस्पर्शतेजःस्पर्शवदित्यनुमानात् ।

(६८) पृथक्त्वासमवेतसर्वान्योन्याभावसमानाधिकरणद्रव्यसमवेतवती सङ्ख्या ।

(६९) आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधीः । एकत्वोभयगोचरा मतिः । अतो द्वित्वम् । ततो जायते द्वित्वत्वप्रमितिः स्वतोऽपि परतः । द्वित्वप्रमानन्तरं द्वे द्रव्ये ' इति धीः । इयं । निगदिता द्वित्वोदयप्रक्रिया ॥

(७०) सङ्ख्यासमवेत्वरहितसङ्ख्यासमवायिसमवेतवत् परिमाणम् ॥

(७१) शब्दासमवायिकारणसमवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणसमवेतपरिमाणासमवायिसमवेतत्वरहिताधिकरणं पृथक्त्वम् ॥

(७२) विभागासमवेतत्वाभावाविरोधिसमवेतप्रध्वंसप्रतियोगित्वानधिकरणसमवेतत्वानधिकरणगुणत्वसाक्षाद्व्याप्यजात्यधिकरणं संयोगः। विभागासमवेतसर्वान्योन्याभावसमानाधिकरणसमवेतशब्दासमवायिसमवेतवान् वा संयोगः ॥

(७३) संयोगासमवेतसर्वान्योन्याभावसमानाधिकरणसमवेतशब्दासमवायिसमवेतवान् विभागः ॥

(७४) विशेषणतया परप्रत्ययनिमित्तं परत्वम् ॥

(७५) विशेषणतया अपरप्रत्ययनिमित्तमपरत्वम् ॥

(७६) अर्थप्रकाशो बुद्धिः ॥

(७७) यस्मिन् सत्यनुरागस्तत् सुखम्।

(७८) यस्मिन्सत्यनुद्वेषस्तद् दुःखम् ॥

(७९) प्रार्थना इच्छा ॥

(८०) ज्वलनात्मको द्वेषः ॥

(८१) प्रयत्न उत्साहः ॥

(८२) आद्यपतनासमवायिकारणं गुरुत्वम् ॥

(८३) आद्यस्यन्दनासमवायिकारणं द्रवत्वम् ॥

(८४) पृथिवीवृत्त्यवृत्तिरससमानाधिकरणवृत्तिशब्दावृत्तिगुणत्वसाक्षाद्व्याप्य-जातिमान् स्नेहः। द्रवत्वनिष्ठत्वरहितात्मविशेषगुणनिष्ठत्वरहितपरत्वापरत्वात्यन्ताभावप्रतियोगिसत्ताऽवान्तरजातिमदसमवायिकारणं स्नेहः। द्रवत्वरहितध्वंसान्यत्वविशेषगुणमात्रजनकरहितात्यन्ताविशेषगुणमात्रजनकरहितात्यन्ताविशेषगुणरहितभावत्वं समवायिकारणं स्नेहः। सङ्ग्रहादिहेतुः ॥

(८५) गगनसमवेतसमवेत्वरहितमूर्तामूर्तसमवेतसमवेतवान् संस्कारः ॥

(८६) विहितक्रियया साध्यः पुंगुणो धर्मः ॥

(८७) निषिद्धक्रियया साध्यः पुंगुणोऽधर्मः ॥

(८८) गुणत्वे सति श्रोत्रग्राह्यः शब्दः ॥

॥ इति गुणपदार्थः ॥

(८९) संयोगासमवेतसंयोगासमवायिसमवेतवत् कर्म।

(९०) तच्च पञ्चविधम्। उत्क्षेपणादिभेदेन।

(९१) तत्राधोदेशविभागोर्ध्वदेशसंयोगजनकं कर्म उत्क्षेपणम् ॥

(९२) ऊर्ध्वदेशविभागाधोदेशसंयोगजनकं कर्म अपक्षेपणम् ॥

(९३) अग्रदेशविभागमूलदेशसंयोगजनकं कर्म आकुञ्चनम् ॥

(९४) मूलदेशविभागाग्रदेशसंयोगजनकं कर्म प्रसारणम् ।

(९५) उत्क्षेपणाकुञ्चनं प्रयत्नजनिष्ठं न च गमनस्यापि प्रसङ्गादप्रयत्नजं कर्म गमनम् ।

(९६) ननु पञ्चैव कर्माणीति नोपपद्यते भ्रमणादीनां सत्त्वादिति चेन्न ।

(९७) भ्रमणादयोऽपि कर्मविशेषा इत्युक्तं शास्त्रकृद्भिः ॥

॥ इति कर्मपदार्थः ॥

(९८) समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणसमवेतं सामान्यम् ॥

[इति सामान्यपदार्थः]

(९९) समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणरहिताः समवेतरहितसमवेता विशेषाः ॥

[इति विशेषपदार्थः]

(१००) नित्यः सम्बन्धः समवायः । समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणाभावो वा ॥

[इति समवायपदार्थः]

(१०१) नञर्थविषयप्रत्ययविशेषोऽभावः ।

(१०२) स च चतुर्धा भिद्यते । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

(१०३) उत्तरैकावधिरभावः प्रागभावः ।

(१०४) पूर्वैकावधिरभावः प्रध्वंसाभावः ।

(१०५) तादात्म्यप्रतियोगिकोऽभावोऽन्योन्याभावः ।

(१०६) उभयावधिरहितसंसर्गाभावोऽत्यन्ताभावः ॥

[इत्यभावपदार्थः]

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः ।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥ १ ॥
विद्यासन्ध्योदयोद्रेकादविद्यारजनीक्षये ।
यदुदेति नमस्तस्मै कस्मैचिद्विश्वतस्त्विषे ॥ २ ॥

इति श्रीमदुदयनाचार्यविरचिता लक्षणावली समाप्ता॥

परिशिष्ट २

वैशेषिकदर्शन सूत्रपाठः।

[अथ प्रथमाध्याये प्रथममाह्निकम्]

(१) अथातो धर्मं व्याख्यास्यामः।

(२) यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।

(३) तद्वचनादाम्नायस्य[1] प्रामाण्यम्।

(४) धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्[2]।

(५) पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि।

(६) रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ [3]प्रयत्नाश्च गुणाः।

(७) उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि।

(८) सदनित्यं द्रव्यवत्कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः।

(९) द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम्[4]।

(१०) द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्[5]।

(११) कर्म कर्मसाध्यं न विद्यते।

(१२) न द्रव्यं कार्यं कारणं च वधति[6]।

(१३) उभयथा गुणाः[7]।

---

1 तद्वचनादाम्नायप्रामाण्यम्–च। 2 सूत्रमिदं 'च' 'मि' इत्यत्र नास्ति। 3 प्रयत्नश्च –च; मि। 4 सूत्रमिदं 'च' 'मि' इत्यत्र नास्ति। 5 'गुणाश्च गुणान्तरम्' इति पृथक् सूत्रं 'च' 'मि' इत्यत्र। 6 कार्याविरोधि द्रव्यं कारणाविरोधि च–'च'; मि। 7 गुणः 'च' 'मि'। अस्मात्सूत्रादनन्तरं 'मि' पुस्तके 'कारणाभावात् कार्याभावः। न तु कार्याभावात् कारणाभावः' इति सूत्रद्वयस्य पाठः। उपस्कारे तु द्वितीयाह्निके एवैतयोः सूत्रयोः पाठः। 'च' पुस्तकेऽप्येते सूत्रेऽत्र न स्तः।

(१४) कार्यविरोधि कर्म ।

(१५) [1]क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् ।

(१६) [2]द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् ।

(१७) एकद्रव्यमगुणं संयोगविभागेष्व[3]नपेक्षकारणमिति कर्मलक्षणम् ।

(१८) द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् ।

(१९) तथा गुणः ।

[4](२०) संयोगविभागवेगानां कर्म समानम् ।

(२१) [4]न द्रव्याणां कर्म ।

(२२) व्यतिरेकात्[5] ।

(२३) द्रव्याणां द्रव्यं कार्य्यं सामान्यम्[6] ।

(२४) गुणवैधर्म्यान्न कर्मणां कर्म[7] ।

(२५) द्वित्वप्र[8]भृतयः सङ्ख्याः [9]पृथक्त्वसंयोगविभागाश्च ।

(२६) असमवायात् सा[10]मान्यकार्यं कर्म न विद्यते ।

(२७) संयोगानां द्रव्यम् ।

(२८) रूपाणां रूपम् ।

(२९) गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ।

(३०) संयोगविभागा[11]श्च कर्मणाम् ।

(३१) कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् ।

[इति प्रथमाध्यायस्य प्रथममाह्निकम्]

---

1 क्रियावद् गुणवत्–च; मि । 2 न गुणवान्–मि । 3 ष्वनपेक्षं–'च'; मि । 4 संयोगविभागानां कर्म–च । 4, 5 न द्रव्याणां व्यतिरेकात् 'च' इत्येकं सूत्रम् । 'मि' इत्यत्रापि 'न द्रव्याणां कर्म व्यतिरेकात्' इत्येकं सूत्रम् । 6, 7 सूत्रद्वयं विपर्यस्तं 'च' 'मि' पुस्तकयोः । 8 प्रभृतयश्च–मि । 9 पृथक्त्वं–च । 10 सामान्यं कर्म कार्यं न विद्यते–च; सामान्येति–मि. पुस्तके नास्ति । 11 'च' 'च' 'मि' पुस्तकयोर्नास्ति ।

[अथ प्रथमाध्यायस्य द्वितीयमह्निकम्]

(१) कारणाभावात् कार्याभावः ।

(२) न तु कार्याभावात् कारणाभावः ।

(३) सामान्यं विशेष इति बुद्ध्यपेक्षम् ।

(४) भावोऽनुवृत्तेरेव हेतुत्वात्सामान्यमेव[1] ।

(५) द्रव्यत्वं गुणत्वं [2]कर्मत्वं च सामान्यानि विशेषाश्च ।

(६) अन्यत्रान्त्येभ्यो विशेषेभ्यः ।

(७) [3]सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ।

(८) द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ।

(९) [4]गुणकर्मसु च भावान्न कर्म न [5]गुणः ।

(१०) सामान्यवि[6]शेषाभावेन च ।

(११) अ[7]नेकद्रव्यत्वेन द्रव्यत्वमुक्तम् ।

(१२) सामान्यविशेषाभावेन च ।

(१३) [8]तथा गुणेषु भावाद् गुणत्वमुक्तम् ।

(१४) सामान्यविशेषाभावेन च ।

(१५) [9]कर्मसु भावात्कर्मत्वमुक्तम् ।

(१६) सामान्यविशेषाभावेन च ।

(१७) [10]सदितिलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः ।

[इति प्रथमाध्याये द्वितीयमाह्निकम्]

---

1 भावः सामान्यमेव–च । 2 कर्मत्वं सामान्यानि–मि । 3 सदिति यतो द्रव्यगुणकर्मसु–च; सन्यतो......मि । 4 'एकद्रव्यत्वान्न द्रव्यम्' इत्यधिकं सूत्रमस्मात्सूत्रात्प्राक् 'च' पुस्तके । 5 गुणश्च–मि । 6 विशेषाभावाच्च–च; 'मि' पुस्तके इदं सूत्रं नास्ति । 7 एकद्रव्यत्वेन–च । 8 गुणे भावाद्–च । 9 कर्मणि–'च'; मि । 10 सल्लिङ्गाविशेषात्–च 'मि' पुस्तके 'सत्' इति नास्ति ।

[अथ द्वितीयाध्यायस्य प्रथममाह्निकम्]

(१) रूपरसगन्धस्पर्शवती पृथिवी ।

(२) रूपरसस्पर्शवत्य आपो द्रव्याः स्नि[1]ग्धाः ।

(३) तेजो रूपस्पर्शवत् ।

(४) [2]स्पर्शवान् वायुः ।

(५) त आकाशे न विद्यन्ते ।

(६) सर्पिर्जतुमधूच्छि[3]ष्टानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् ।

(७) त्रपुसीसलोहरजतसु[4]वर्णानामग्निसंयोगाद् [5]द्रवत्वमद्भिः सामान्यम् ।

(८) विषाणी ककुद्मान् प्रान्तेबालधिः सास्नावान् इति गोत्वे दृष्टं लिङ्गम् ।

(९) [6]स्पर्शश्च वायोः ।

(१०) [7]न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः ।

(११) [8]अद्रव्यत्वेन द्रव्यम् ।

(१२) [9]क्रियावत्वाद् गुणवत्वाच्च ।

(१३) अ[10]द्रव्यत्वेन नित्यत्वमुक्तम् ।

(१४) वायोर्वायुसम्मूर्छनं ना[11]नात्वलिङ्गम् ।

(१५) वा[12]युसन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ।

(१६) सामान्यतो दृष्टाच्चाविशेषः ।

(१७) तस्मादागमिकम् ।

(१८) सञ्ज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् ।

(१९) प्रत्यक्षप्र[13]वृत्तत्वात् सञ्ज्ञाकर्मणः ।

(२०) निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् ।

(२१) तदलिङ्गमेकद्र[14]व्यत्वात्कर्मणः ।

---

1 स्निग्धाश्च–च । 2 वायुः स्पर्शवान्–'च' 'मि' । 3 मधूच्छिष्टानां पार्थिवनामग्नि ......च । 4 सुवर्णादीनां तैजसानां–च; मि । 5 द्रवताऽद्भिः–च । 6 'स्पर्शश्च' इत्येव सूत्रं 'च' पुस्तके वायोः स्पर्शश्च–मि । 7 न चान्येषां...... मि । 8 अद्रव्यत्वाद् 'च'; मि । 9 सूत्रमिदं 'मि' पुस्तके नास्ति । 10 अद्रव्यत्वेन–च; अद्रव्यत्वेना–मि । 11 नानात्वे–च । 12 वायुरिति सति–च; मि । 13 पूर्वकत्वात्–च; मि । 14 द्रव्यवत्वात्–च ।

(२२) कारणान्तरानुकॢप्तिवैधर्म्याच्च ।

(२३) संयोगादभावः कर्मणः ।

(२४) [1]कारणगुणपूर्वकः कार्यगुणो दृष्टः ।

(२५) [1]कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः ।

(२६) [1]परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न [2]मनो गुणः ।

(२७) [3]परिशेषाल्लिङ्गमाकाशस्य ।

(२८) द्रव्यत्वनित्यत्वे वायुना व्याख्याते ।

(२९) तत्त्वं भावेन ।

(३०) [4]शब्दलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च ।

(३१) [5]तदनुविधानादेकपृथक्त्वं चेति ।

[इति द्वितीयाध्याये प्रथममाह्निकम्]

[अथ द्वितीयाध्याये द्वितीयमाह्निकम्]

(१) पुष्पवस्त्रयोः सति सन्निकर्षे [6]गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् ।

(२) व्यवस्थितः पृथिव्यां गन्धः ।

(३) [7]एतेनोष्णता व्याख्याता ।

(४) ते[8]जस उष्णता ।

(५) अप्सु शीतता ।

(६) अ[9]परस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि ।

(७) [10]द्रव्यत्वनित्यत्वे वायुना व्याख्याते ।

---

1 कारणगुणपूर्वः कार्यगुणो दृष्टः, कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः इत्येकं सूत्रं 'च' पुस्तके । मि पुस्तके तु सूत्राणामयं क्रमः, शब्दः स्पर्शवतामगुण इति, (२३) कारणगुणपूर्वकः कार्यगुणो दृष्टः (२४) कार्यान्तराप्रादुर्भावात् (२५) शब्दः स्पर्शवतामगुणः, (२६) परत्र समवायात्, (२७) प्रत्यक्षत्वाच्च (२८) न [दिक्] कालात्मगुणो न मनसो गुणः (२९) 2 न मनोगुणः इति पृथक् सूत्रं 'च' पुस्तके । 3 'लिङ्गमाकाशस्य' इत्येव सूत्रं 'च' पुस्तके । शब्दो लिङ्गमाकाशस्य इति–मि । 4, 5 इदं सूत्रद्वयं 'च' 'मि' पुस्तकयोर्नास्ति । 6 गन्धान्तरा–'च' मि । 7 एतेनाप्सूष्णता व्याख्याता इति द्वितीयं सूत्रं 'च' मि पुस्तकयोः । 8 तेजस्युष्णता–च; तेजः सूष्णता–मि । 9 अपरस्मिन्परं युगपदयुगपच्चिरं–च; मि । 10 सूत्रमिदं 'मि' पुस्तके नास्ति ।

(८) [1]तत्त्वं भावेन ।

(९) [2]नित्येष्वभावादनित्येषु भावात्कारणे कालाख्येति ।

(१०) इत इदमिति यतस्तद्दि[3]श्यं लिङ्गम् ।

(११) द्रव्यत्वनित्यत्वे वायुना व्याख्याते ।

(१२) तत्त्वं भा[4]वेन ।

(१३) कार्यविशेषेण नानात्वम् ।

(१४) [5]आदित्यसंयोगाद् भूतपूर्वाद् भविष्यतो प्राची ।

(१५) तथा दक्षिणा प्रतीची उदीची च ।

(१६) एतेन दि[6]गन्तरालानि व्याख्यातानि ।

(१७) सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः ।

(१८) [7]दृष्टं च दृष्टवत् ।

(१९) यथादृष्ट[8]मयथादृष्टत्वाच्च ।

(२०) वि[9]द्याविद्यातश्च संशयः ।

(२१) [10]श्रोत्रग्रहणो योऽर्थः स शब्दः ।

(२२) तुल्यजातीयेष्वर्थान्त[11]रभूतेषु विशेषस्योभयथा दृष्टत्वात् ।

(२३) एकद्र[12]व्यत्वान्न द्रव्यम् ।

(२४) नापि [13]कर्माचाक्षुषत्वात् ।

(२५) गुणस्य सतोऽपवर्ग कर्मभिः साधर्म्यम् ।

---

1 सूत्रमिदं ‘ मि ’ पुस्तके नास्ति, किन्तु अस्मात्सूत्रादनन्तरं ‘ कार्यविशेषेण नानात्वम् ’ इत्यधिकं सूत्रं ‘ च ’ मि पुस्तकयोः । 2 एकं सूत्रं द्वे सूत्रे कृत्वा विभक्तं ‘ च ’ ‘ मि ’ पुस्तकयोः; तद्यथा–कारणे कालाख्येति, इति पृथक् सूत्रम् । 3 दिशो लिङ्गम्–च; दिशां लिङ्गम्–मि । 4 भावात्–मि । 5 ‘ भूतपूर्वात् ’, ‘ भविष्यतः ’, ‘ आदित्यसंयोगाद् भूतपूर्वाद् भविष्यतो भूताच्च ’ इति सूत्रत्रयमत्र ‘ मि ’ पुस्तके । 6 दिगन्तराणि–च; मि । 7 अत्र ‘ दृष्टमदृष्टम् ’ इत्यधिकं सूत्रं ‘ च ’ पुस्तके; दृष्टमदृष्टं च–मि । 8 °मयथादृष्टमुभयथा दृष्टत्वात्–च; °मयथादृष्टम्–मि । 9 विद्योपलब्धिरविद्यानुपलब्धिः–मि । 10 ‘ तस्मिन् द्रव्यं कर्म गुण इति संशयः ’ इत्यधिकं सूत्रमत्र ‘ च ’ पुस्तके । 11 °भूतेषु च–च; अत्र उभयथा दृष्टत्वाच्च इति पृथक् सूत्रं ‘ मि ’ पुस्तके । 12 °द्रव्यवत्त्वा ‘ च ’ । 13 अचाक्षुषत्वान्न कर्म–‘ च ’; अचाक्षुषत्वाच्च प्रत्यक्षस्य शब्दो न कर्म–‘ मि ’ कर्माचाक्षुषत्वात् प्रत्ययस्य–मुं ।

(२६) सतो लिङ्गाभावात् ।

(२७) नित्यवैधर्म्यात् ।

(२८) [1]अनित्यश्चायं कारणतः ।

(२९) [2]न चासिद्धं विकारात् ।

(३०) [3]अभिव्यक्तौ दोषात् ।

(३१) संयोगाद् वि[4]भागाच्च ।

(३२) लिङ्गाच्चानित्यः [5]शब्दः ।

(३३) द्वयोस्तु प्रवृत्त्यभावात् ।

(३४) प्र[6]थमाशब्दात् ।

(३५) [7]सम्प्रतिपत्तिभावाच्च ।

(३६) सन्दिग्धाः सति बहुत्वे ।

(३७) सङ्ख्याभावः [8]सामान्यतः ।

[इति द्वितीयाध्याये द्वितीयमाह्निकम्]

[अथ तृतीयाध्यायस्य प्रथममाह्निकम्]

(१) प्रसिद्धा इन्द्रियार्थाः ।

(२) इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्था[9]न्तरस्य हेतुः ।

(३) सोऽनपदेशः ।

(४) कारणाज्ञानात् ।

(५) [10]कार्येषु ज्ञानात् ।

(६) अज्ञानाच्च ।

---

1 कारणतो विकारात् 'च'–कारणवतो विकारात्–मि । 'च' पुस्तके 'कार्यत्वात्' 'अभावात्' इत्यधिकं सूत्रद्वयमत्र । 2 सूत्रमिदं 'च' 'मि' पुस्तकयोर्नास्ति । न्यायवर्तिकेऽप्ययमेव सूत्रपाठः। 3 'अभिव्यक्तौ' इति 'च' 'मि' पुस्तकयोर्नास्ति । 4 विभागाच्छब्दात्र शब्दनिष्पत्ते–च; विभागाच्छब्दाच्च–मि । 5 'शब्दः' इति च 'मि' पुस्तकयोर्नास्ति । 6 अस्मात्सूत्रात्पूर्वं 'सङ्ख्याभावात्' इति सूत्रमधिकं 'च' 'मि' पुस्तकयोः । इदं सूत्रं 'मि' पुस्तके नास्ति । 7 सूत्रमिदं पुनराह्निकान्ते 'मि' पुस्तके । 8 सामान्यवतः–मि । 9 °र्थान्तरत्वे–'च' । अत्र 'इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्यः' इत्यधिकं सूत्रं 'मि' पुस्तके 'प्रसिद्धेः' इति पाठान्तरम्–मि । 10 कार्याज्ञानात्–'च' 'मि' ।

(७) [1]अन्यदेव हेतुरित्यनपदेशः ।

(८) [2]अर्थान्तरं ह्यर्थान्तरस्यानपदेशः ।

(९) [3]संयोगि समवाय्येकार्थसमवायि विरोधि च ।

(१०) [4]कार्यं कार्यान्तरस्य ।

(११) विरोध्यभूतं भूतस्य ।

(१२) [5]भूतमभूतस्य ।

(१३) [6]भूतो भूतस्य ।

(१४) प्रसिद्धिपूर्वकत्वादपदेशस्य ।

(१५) अ[7]प्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः ।

(१६) [8]यस्माद्विषाणी तस्मादश्वः ।

(१७) [8]यस्माद्विषाणी तस्माद्गौरिति चानैकान्तिकस्योदाहरणम् ।

(१८) आ[9]त्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत् ।

(१९) प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम् ।

[इति तृतीयाध्याये प्रथममाह्निकम्]

[अथ तृतीयाध्याये द्वितीयमाह्निकम्]

(१) आत्मेन्द्रियार्थसन्निकर्षे ज्ञा[10]नस्य भावोऽभावश्च मनसो लिङ्गम् ।

(२) [11]तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ।

(३) प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैक[12]म् ।

---

1 अन्य एव–' च '; मि । 2 सूत्रमिदं ' च ' पुस्तके नास्ति; अर्थान्तरमर्थान्तरस्या–मि । 3 अस्मात्सूत्रादारभ्य चतुर्दशसूत्रपर्यन्तमेकं सूत्रं ' च ' पुस्तके । 4 कारणं कार्यान्तरस्य–मि । ' च ' पुस्तकेऽपि तद्विद्यते । 5 इत्येतदनन्तरं अभूतमभूतस्य, भूतं भूतस्य इत्येकस्मिन्नेव सूत्रे ' च ' पुस्तके पाठः । अभूतमभूतस्य ' इत्यधिकं सूत्रं ' मि ' पुस्तकेऽपि । 6 भूतं–' च ' ' मि ' । 7 ' अप्रसिद्धोऽनपदेशः ' ' असन् सन्दिग्धश्चानपदेशः ' इति पृथक् सूत्रद्वयं ' च ' पुस्तके; मि पुस्तकेऽपि पृथक् सूत्रद्वयं किन्तु द्वितीयसूत्रं ' असन् सन्दिग्धश्च ' इत्येव । 8 विषाणी तस्मादश्वो विषाणी तस्माद् गौरिति–च; मि पुस्तके सूत्रद्वयमिदं नास्ति । 9 आत्मेन्द्रियमनोऽर्थ...... ' च ' ' मि ' 10 ज्ञानस्याभावो भावश्च–' च '; ' मि , । 11 ' तस्य ' इति ' च ' ' मि ' पुस्तकयोर्नास्ति । 12 चैकं मनः –' च '; ' मि ' ।

(४) प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सु[1]खदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि ।

(५) [2]तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ।

(६) य[3]ज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ।

(७) सामान्यतो दृष्टाच्चाविशेषः ।

(८) [4]तस्मादागमिकः ।

(९) अहमिति श[5]ब्दव्यतिरेकान्नागमिकम् ।

(१०) [6]यदि दृष्टमन्वक्षमहं देवदत्तोऽहं यज्ञदत्त इति ।

(११) [7]दृष्ट आत्मनि लिङ्गे एक एव दृढत्वात्प्रत्यक्षवत्प्रत्ययः ।

(१२) देवदत्तो गच्छति [8]यज्ञदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः ।

(१३) सन्दिग्धस्तूपचारः ।

(१४) अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः ।

(१५) देव[9]दत्तो गच्छतीत्युपचारादभिमानात् तावच्छरीरप्रत्यक्षोऽहङ्कारः ।

(१६) [9]सन्दिग्धस्तूपचारः ।

(१७) न तु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयो[10]र्ज्ञानं विषयः ।

(१८) [11]अहमिति मुख्ययोगाभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद् विशेषसिद्धेर्नागमिकः ।

(१९) सुखदुःख[12]ज्ञाननिष्पत्त्यविशेषादैकात्म्यम् ।

---

1 सुखदुःखे इच्छाद्वेषौ प्रयत्नश्चेत्यात्मलिङ्गानि–च; विकाराः परात्मनि लिङ्गम्–मि । 2 'तस्य' इति 'च' 'मि' पुस्तकयोर्नास्ति । 3 यज्ञदत्त इति सति ......च; अहं यज्ञदत्त–मि । 4 तस्मादागमिकम्–'च'; 'मि' । 5 शब्दस्य–च; शब्दव्यतिरेकेण–मि । 6 यदि च दृष्टप्रत्यक्षोऽहं–'च'; यदि च द्रष्टुः प्रत्यक्षोऽहं यज्ञदत्तः–'मि' पुस्तके सूत्रम् । 7 सूत्रमिदं 'च' 'मि' पुस्तकयोर्नास्ति । 8 विष्णुमित्रो गच्छतीति चोपचाराच्छरीरप्रत्यक्षः–च; 'मि' पुस्तके तु सूत्रमिदं नास्ति । 9 सूत्रद्वयमिदं 'च' 'मि' पुस्तकयोर्नास्ति । 10 ज्ञानविशेषः–'च'; 'मि' । 11 इदं सूत्रं 'च' 'मि' पुस्तकयोर्नास्ति । 12 सुखदुःखनिष्पत्त्य......'च'; दैकात्म्ये न व्यवस्था–मि ।

(२०) व्य[1]वस्थातो नाना ।

(२१) शा[2]स्त्रसामर्थ्या च ।

[इति तृतीयाध्याये द्वितीयमाह्निकम्]

[अथ चतुर्थाध्याये प्रथममाह्निकम्]

(१) [3]सदकारणवन्नित्यम् ।

(२) तस्य कार्यं लिङ्गम् ।

(३) [4]कारणभावात्कार्यभावः ।

(४) [5]अनित्य इति विशेषतः प्रतिषेधभावः ।

(५) [6]अविद्या ।

(६) महत्यनेकद्रव्यवत्त्वाद् रूपाच्चोपलब्धिः ।

(७) [7]सत्यपि द्रव्यत्वे महत्वे रूपसंस्काराभावाद् वायोरनुपलब्धिः ।

(८) [8]अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ।

(९) [9]तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् ।

(१०) [10]तस्याभावादव्यभिचारः ।

(११) सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि ।

(१२) अरू[11]पिष्वचाक्षुषाणि ।

(१३) एतेन गुणत्वे भावे च सर्वे[12]न्द्रियं ज्ञानं व्याख्यातम् ।

[इति चतुर्थाध्याये प्रथममाह्निकम्]

---

1 नाना व्यवस्थात–‘ च ’; ‘ मि ’ ‘ पुस्तके सूत्रमिदं नास्ति । 2 ‘ मि ’ पुस्तके सूत्रमिदं नास्ति । 3 सदकारणवत्तन्नित्यम्–‘ च ’। 4 कारणभावाद्धि–‘ च ’; कारणाभावाद्धि कार्याभावः–मि । 5 अनित्यमिति च विशेषप्रतिषेधभावः–‘ च ’। 6 अविद्या च–‘ च ’; अविद्या चास्मदादीनाम्–‘ मि ’। 7 अस्मात्सूत्रात्पूर्वम् ‘ अद्रव्यत्वात् परमाणावनुपलब्धिः ’ इत्यधिकं सूत्रं ‘ च ’ ‘ मि ’ पुस्तकयोः; सत्यपि द्रव्यत्वे महत्वे–इति भागः ‘ च ’ ‘ मि ’ पुस्तकयोर्नास्ति; वायावनुपलब्धिः–‘ च ’। 8 अनेकद्रव्येण द्रव्येण समवायाद्रूपविशेषाच्चोपलब्धिः–च; सूत्रमिदं ‘ मि ’ पुस्तके नास्ति । 9 एतेन–‘ च ’; मि । 10 तद्भावा°–‘ च ’; ‘ मि ’। 11 °ष्वचाक्षुषत्वात्–‘ च ’; ‘ मि ’। 12 सर्वेन्द्रियज्ञानं–च ।

[अथ चतुर्थाध्याये द्वितीयमाह्निकम्]

(१) [1]तत्पुनः पृथिव्यादिकार्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसञ्ज्ञकम् ।

(२) [2]प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते ।

(३) गुणान्तराप्रादुर्भावाच्च न[3]त्र्यात्मकम् ।

(४) अ[4]णुसंयोगस्त्वप्रतिषिद्धः ।

(५) [5]तत्र शरीरं द्विविधं योनिजमयोनिजं च ।

(६) [6]अनियतदिग्देशपूर्वकत्वात् ।

(७) ध[7]र्मविशेषाच्च ।

(८) [8]समाख्याभावाच्च ।

(९) स[9]ञ्ज्ञाया आदित्वात् ।

(१०) [10]सन्त्ययोनिजाः ।

(११) वेदलिङ्गाच्च ।

[इति चतुर्थाध्याये प्रथममाह्निकम्]

[अथ पञ्चमाध्याये प्रथममाह्निकम्]

(१) आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ।

(२) [11]तथा हस्तसंयोगाच्च मुसले कर्म ।

(३) अभिघातजे [12]मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः ।

(४) तथाऽऽत्मसंयोगो ह[13]स्तकर्मणि ।

---

1 सूत्रमिदं 'च' 'मि' पुस्तकयोर्नास्ति । 2 प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात्–संयोगस्य 'च'; प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वात् वायुवनस्पति- संयोगवत्–'मि'। 3 त्र्यात्मकमपि न–'च'; 'मि'। 4 अस्यात्सूत्रात् पूर्वं आत्मसंयोगश्च प्रतिषिद्धो मिथः पञ्चानाम्–'मि' आत्मसंयोगस्त्वविप्रतिपञ्चो...च इत्याधिकं सूत्रं द्वयोः पुस्तकयोः । अणुसंयोग स्त्वप्रतिषिद्धो मिथः पञ्चानाम्–मि; सूत्रमिदं 'च' पुस्तके नास्ति । 5 तच्च–मि; इदमपि सूत्रं 'च' पुस्तके नास्ति । 6 अनेकदेशं–'च'; 'मि'। 7 धर्मविशेषात्–'च'; मि । 8 समाख्याभावात्–'च'–'मि'; इतः पूर्वं 'कार्यविशेषात्' इत्यधिकं सूत्रं 'च' 'मि' पुस्तकयोः । 9 सञ्ज्ञादिमत्त्वात्–'च'; 'मि'। 10 (१०), (११) सूत्रद्वयस्य स्थाने सम्पूर्णमेकं सूत्रं 'च' पुस्तके 'सन्त्ययोनिजा वेदलिङ्गाच्च' इति । मि पुस्तके तु सूत्रद्वयमिदं नास्ति । 11 तथा मुसलकर्म हस्तसंयोगाच्च–च; 'मि' पुस्तके इदं सत्रं नास्ति । 12 मुसलकर्मणि–'च'। 13 हस्तमुसलकर्मणि–'च'।

(५) [1]अभिघातान्मुसलसंयोगाद्धस्ते कर्म ।

(६) [2]आत्मकर्म हस्तसंयोगाच्च ।

(७) संयोगाभावे गुरुत्वात्पतनम् ।

(८) नोदनविशेषाभावान्नोर्ध्वं न तिर्यग्गमनम् ।

(९) प्रयत्नविशेषान्नोदनविशेषः ।

(१०) नोदनविशेषादुदसनविशेषः ।

(११) हस्तकर्मणा दारककर्म व्याख्यातम् ।

(१२) तथा दग्धस्य वि[3]स्फोटने ।

(१३) य[4]त्नाभावे प्रसुप्तस्य चलनम् ।

(१४) [5]तृणे कर्म वायुसंयोगात् ।

(१५) मणिगमनं सूच्यभिसर्पणमित्यदृष्टका[6]रणकम् ।

(१६) इषावयुगपत्संयोगविशेषाः कर्मान्यत्वे हेतुः ।

(१७) नोदनादाद्यमिषोः कर्म त[7]त्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च ।

(१८) संस्काराभावे गुरुत्वात्पतनम् ।

[इति पञ्चमाध्यायस्य प्रथममाह्निकम्]

[अथ पञ्चमाध्यायस्य द्वितीयमाह्निकम्]

(१) नो[8]दनाभिघातात्संयुक्तसंयोगाच्च पृथिव्यां कर्म ।

(२) तद्विशेषेणादृष्टकारितम्[9] ।

(३) [10]अपां संयोगाभावे गुरुत्वात्पतनम् ।

(४) द्रवत्वात्स्यन्दनम् ।

---

1 मुसलाभिघातात्तु–' च '; मुसलाभिघाताच्च–' मि '। 2 तथाऽत्म°–' च '; मि । 3 विस्फोटनम्–' च '; सूत्रमिदं ' मि ' पुस्तके नास्ति। 4 प्रयत्नाभावे गुरुत्वात् सुप्तस्य पतनम् –' च '; मि । 5 तृणकर्म–' च '। 6 °कारितानि–' च '; मि । 7 कर्म कर्मकारिताच्च–' च । 8 नोदनादभिघातात्–' च '। 9 सूत्रमिदं ' मि ' पुस्तके नास्ति। 10 इत अर्ध्वं ' च ' पुस्तके ' तद् विशेषेणादृष्टकारितम् ' इत्यधिकं सूत्रम् ।

(५) [1]नाड्यो वायुसंयोगादारोहणम् ।

(६) [2]नोदनापीडनात्संयुक्तसंयोगाच्च ।

(७) वृक्षाभिसर्पणमित्यदृष्ट[3]कारितम् ।

(८) अपां सङ्घातो विलयनं च ते[4]जःसंयोगात् ।

(९) तत्र [5]विस्फूर्जथुर्लिङ्गम् ।

(१०) वैदिकं च ।

(११) अपां संयोगाद्विभागाच्च [6]स्तनयित्नोः ।

(१२) पृथिवीकर्मणा ते[7]जः कर्म वायुकर्म च व्याख्यातम् ।

(१३) अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवन[8]मणूनां मनसश्चाद्यं कर्मादृष्टकारितम् ।

(१४) हस्तकर्मणा मनसः कर्म व्याख्यातम्[9] ।

(१५) आत्मेन्द्रियमनोऽर्थसन्निकर्षात्सु[10]खदुःखे ।

(१६) त[11]दनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः संयोगः ।

(१७) अपसर्पणमुपसर्पणमशितपीत[12]संयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ।

(१८) तदभावे संयोगाभावोऽप्रादुर्भा[13]वश्च मोक्षः ।

(१९) द्रव्यगुणकर्म[14]निष्पत्तिवैधर्म्याद्भावस्तमः ।

(२०) ते[15]जसो द्रव्यान्तरेणावरणाच्च ।

(२१) दिक्कालावाकाशं च क्रि[16]यावद्वैधर्म्यान्निष्क्रियाणि ।

---

1 नाड्या–' च '; मि । 2 नोदनात्–' च ' । 3 कारितानि–मि । 4 तेजसः–' च ' 5 अवस्फूर्जथुः–' च ' अपस्फूर्जथुः–मि । 6 स्तनयित्नुः–' च '; मि । 7 तेजसः–मि । 8 °मणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि–' च '; मि । 9 सूत्रमिदं ' मि ' पुस्तके नास्ति । 10 सुखदुःखे तदनारम्भः–च । 11 आत्मस्थे मनसि सशरीरस्य–' च '; ' तदनारम्भश्चात्मस्थमनसि ' ' सशरीरस्य सुखदुःखाभावः ' ' संयोगः ' इति पृथक् सूत्रत्रयं ' मि ' पुस्तके । अस्मात्सूत्रादनन्तरं कार्यकर्मणा आत्मकर्म व्याख्यातम्–' च ' पुस्तके कायकर्मणाऽत्मकर्मधर्मयोरनुत्पत्तिः–इति च ' मि ' पुस्तके अधिकं सूत्रम् । 12 संयोगः–' च ' । 13 °र्भावः स मोक्षः–च; °भावश्च स मोक्षः–मि । 14 ' कर्मवैधर्म्याद् भावाभावमात्रं–' च '; ' भाऽभावः ' इति ' मि ' व्याख्यानुसारी पाठः । 15 सूत्रमिदं ' मि ' पुस्तके नास्ति । 16 क्रियावद्भ्यो–' च ', मि ।

(२२) एतेन कर्माणि गुणाश्च व्याख्याताः ।

(२३) निष्क्रियाणां समवायः [1]कर्मभ्यो निषिद्धः ।

(२४) कारणं त्वसमवायिनो गुणाः[2] ।

(२५) [3]गुणैर्दिग् व्याख्याता ।

(२६) कारणेन कालः ।

[इति पञ्चमाध्यायस्य द्वितीयमाह्निकम्]

[अथ षष्ठाध्यायस्य प्रथममाह्निकम्]

(१) बुद्धिपूर्वावाक्यकृति[4]र्वेदे ।

(२) ब्रा[5]ह्मणे सञ्ज्ञाकर्म सिद्धिलिङ्गम् ।

(३) बुद्धिपूर्वो ददातिः ।

(४) तथा प्रतिग्रहः ।

(५) [6]आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात् ।

(६) [7]तद् दुष्टभोजने न विद्यते ।

(७) दुष्टं हिंसायाम् ।

(८) त[8]स्य समभिव्याहरतो दोषः ।

(९) तददुष्टे न विद्यते ।

(१०) [9]पुनर्विशिष्टे प्रवृत्तिः ।

(११) समे हीने वा[10] प्रवृत्तिः ।

---

1 कर्मभ्यं प्रतिषिद्धः–'च'; कर्मभि प्रतिषिद्धः–'मि'। 2 इदं सूत्रं 'मि' पुस्तके नास्ति। 3 गुणैश्च–'मि'। 4 वेदः–मि। 5 अस्मात्सूत्रात् पूर्वं "न चास्मद् बुद्धिभ्यो लिङ्गमृषेः–'च'; स वाऽस्मद् बुद्धिभ्यो......मृषेः–'मि' इत्यधिकं सूत्रम्, तथा ब्राह्मणे–'च'; ब्राह्मणसञ्ज्ञा–'मि'। 6 अस्मात्सूत्रात्पूर्वं 'तयोः क्रमो यथाऽनितरेतराङ्गभूतानाम्–च तयोश्च क्रमो......भूतानाम्–'मि' इत्यधिकं सूत्रं पुस्तकद्वये; आत्मगुणेषु आत्मान्तरगुणानामकारणत्वात्–'च'; 'मि'। 7 अस्मात्सूत्रात्प्राक् 'अदुष्टभोजनात् समभिव्याहरतोऽभ्युदयः' इत्यधिकं सूत्रं 'च'; 'मि' पुस्तकयोः। 8 'तस्य' 'च' पुस्तके नास्ति; 'मि' पुस्तके तु सूत्रमिदं नास्ति। 9 'पुनर्' 'च' पुस्तके नास्ति; 'मि' पुस्तके तु सूत्रमिदं नास्ति। 10 चाप्रवृत्तिः–'च'; मि पुस्तके तु इदं सूत्रं नास्ति।

(१२) एतेन हीनसमविशिष्टधार्मिकेभ्यः [1]परस्वादानं व्याख्यातम् ।

(१३) तथा विरुद्धानां त्यागः ।

(१४) हीने परे त्यागः[2] ।

(१५) समे आत्मत्यागः परत्यागो वा ।

(१६) विशिष्टे आत्मत्याग [3]इति ।

[इति षष्ठाध्यायस्य प्रथममाह्निकम्]

[अथ षष्ठाध्यायस्य द्वितीयमाह्निकम्]

(१) दृ[4]ष्टादृष्टप्रयोजनानां दृष्टाभावे [5]प्रयोजनमभ्युदयाय ।

(२) अभिषेचनोपवासब्रह्मचर्यगुरुकुलवास[6]वानप्रस्थयज्ञदानप्रोक्षणदिङ्नक्षत्र-मन्त्रकालनियमाश्चादृष्टाय ।

(३) चातुराश्रम्यमु[7]पधा अनुपधाश्च ।

(४) भा[8]वदोष उपधाऽदो[9]ऽदोषोऽनुपधा ।

(५) य[10]दिष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितं च तच्छुचि ।

(६) अशुचीति शुचिप्रतिषेधः ।

(७) अर्थान्तरं च ।

(८) अयतस्य शुचिभोजनादभ्युदयो न[11] विद्यते नियमाभावाद् विद्यते वाऽर्थान्तरत्वाद् यमस्य ।

(९) असति चाभावात् ।

(१०) सुखाद्रागः ।

(११) त[12]न्मयत्वाच्च ।

---

1 परादानं–'च'; 'मि' पुस्तके तु इदं सूत्रं नास्ति। 2 सूत्रमिदं 'च'; 'मि' पुस्तकयोर्नास्ति। 3 इति 'च' 'मि' पुस्तकयोर्नास्ति। 4 दृष्टानां–'च'; मि'। 5 प्रयोगो–च। 6 वानप्रस्थ्य-'च'। 7 उपधाश्चानुपधाश्च–'च'; 'चातुराश्रम्यम्' 'उपाधाऽनुपधाश्चः' इति पृथक् सूत्रद्वयं 'मि' पुस्तके। 8, 9 सूत्रद्वयं पृथक् 'च' पुस्तके; 'मि' पुस्तके तु 'भावदोष उपधा इत्येव सूत्रम्। 10 इष्ट—'च'। 11 न विद्यते यमाभावात्–'च' पुस्तके इत्येतावत्पर्यन्तं सूत्रम्; मि पुस्तके तु न विद्यते' इत्येतावत्पर्यन्तमेव सूत्रम्। 12 तन्मयत्वात्–'च'; 'मि' पुस्तके तु सूत्रमिदं नास्ति।

(१२) अ[1]दृष्टाच्च ।

(१३) [2]जातिविशेषाच्च ।

(१४) इच्छाद्वेषपूर्विका [3]धर्माऽधर्मप्रवृत्तिः ।

(१५) त[4]त्संयोगे विभागः ।

(१६) आत्मकर्मसु मोक्षो व्याख्यातः ।

[इति षष्ठाध्याये द्वितीयमाह्निकम्]

[अथ सप्तमाध्याये प्रथममाह्निकम्]

(१) उक्ता गुणाः ।

(२) [5]पृथिव्यादिरूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याश्च ।

(३) एतेन [6]नित्येषु नित्यत्वमुक्तम् ।

(४) अप्सु तेजसि वायौ च नि[7]त्या द्रव्यनित्यत्वात् ।

(५) अनित्येष्वनित्या द्रव्यानित्यत्वात् ।

(६) [8]कारणगुणपूर्वकाः पृथिव्यां पाकजाः ।

(७) [9]एकद्रव्यत्वात् ।

(८) अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते ।

(९) [10]कारणबहुत्वाच्च ।

---

1 अदृष्टात्–'च'; अस्मात्सूत्रात्पूर्वं 'तृप्तेः' इति 'च' पुस्तके 'न तृप्तः' इति च 'मि' पुस्तके अधिकं सूत्रम्, 'मि' पुस्तके 'एतेन द्वेषो व्याख्यातः' इत्यपि 'न तृप्तः' इत्येतदनन्तरमधिकं सूत्रम् । 2 जातिविशेषाच्च रागविशेषः–'च'; 'मि'। 3 धर्माधर्मयोः–'च'; 'मि' पुस्तके तु सूत्रमिदं नास्ति। 4 ततः–'च'; 'ततः संयोगः' 'विभागश्च' इति पृथक् सूत्रद्वयं 'मि' पुस्तके। 5 पृथिव्यां...दनित्याः–'च' अस्मात्सूत्रात्पूर्वं 'गुणलक्षणं चोक्तम्' 'इदमेवं गुणमिदमेवं गुणमिति चोक्तम्' इति सूत्रद्वयमधिकं 'च' पुस्तके; 'मि' पुस्तके तु अधिकं सूत्रद्वयं नास्ति; एवं पृथिव्यादि... इति सूत्रमपि नास्ति । 6 नित्येष्वनित्यत्व–'च'–मि; अस्मात्सूत्रात्प्राक् 'अग्निसंयोगाच्च'; 'गुणान्तरप्रादुर्भावात्'–इति सूत्रद्वयमधिकं 'च' पुस्तके। 7 नित्यत्वं–मि। 8 कारणगुणपूर्वाः–'च'; पाकजाश्च इति पृथक् सूत्रं 'मि' पुस्तके। इत ऊर्ध्वं 'अप्सु तेजसि वायौ च कारणगुणपूर्वाः पाकजा न विद्यन्ते' 'अगुणवतो द्रव्यस्य गुणारम्भात् कर्मगुणा अगुणाः' एतेन पाकजा व्याख्याताः इति सूत्रत्रयं 'च' पुस्तके; अप्सु... ...गुणपूर्वकाः' 'कर्मगुणा अगुणाः' 'एतेन...व्याख्याताः' इति च सूत्रत्रयं 'मि' पुस्तके वर्तते। 9 एकद्रव्यवत्त्वात् 'च'; एकद्रव्यत्वाच्च–'मि'। 10 कारणबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाच्च महत्–'च'; मि।

(१०) अ[1]तो विपरीतमणु ।

(११) अणुमहदिति तस्मिन् विशेषभावाद् विशेषाभावाच्च ।

(१२) एककालत्वात् ।

(१३) दृष्टान्ताच्च ।

(१४) अणुमहत्त्वयोरणुत्त्वमहत्त्वाभाव; कर्मगुणैर्व्याख्यातः ।

(१५) [2]कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः ।

(१६) अणुत्वमहत्त्वाभ्यां [3]कर्मगुणाश्च व्याख्याताः ।

(१७) एतेन दीर्घत्वह्रस्वत्वे व्याख्याते ।

(१८) [4]अनित्येऽनित्यम् ।

(१९) [5]नित्ये नित्यम् ।

(२०) नित्यं परिमण्डलम् ।

(२१) अविद्या च[6] विद्यालिङ्गम् ।

(२२) विभवान्महानाकाशस्तथा[7] चात्मा ।

(२३) तदभावादणु मनः ।

(२४) गुणैर्दिग् व्याख्याता ।

(२५) [8]कारणे कालः ।

[इति सप्तमाध्याये प्रथममाह्निकम्]

[अथ सप्तमाध्यायस्य द्वितीयमाह्निकम्]

(१) रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम् ।

---

1 तद्विपरीत°–'च'; सूत्रमिदं 'मि' पुस्तके नास्ति । 2 अत्र 'च' पुस्तके सूत्रक्रमव्यत्यासो यथा 'अणुत्व...व्याख्याताः' इति प्रथमं तदनन्तरं 'एतेन...तदनन्तरं...कर्मभिः'...इति ।'मि' पुस्तके तु कर्मभिः...इत्येकं सूत्रं 'गुणैश्च गुणा व्याख्याताः' एवं पृथक् कृतम् । तत्र गुणैः गुणा–च । 3 कर्मगुणा अगुणाः–च । 4 तदनित्ये–च । 5 सूत्रमिदं 'च' पुस्तके नास्ति, मि पुस्तके त्वस्मात्सूत्राधिकं 'एतदनित्यम्, इति सूत्रम् । 6 च इति 'च' पुस्तके नास्ति । 7 'तथा चात्मा' इति पृथक् सूत्रं 'च' पुस्तके । 8 कारणेन–'च'; 'मि' ।

(२) [1]तथा पृथक्त्वम् ।

(३) एकत्वैकपृथक्त्वयोरेकत्वै[2]कपृथक्त्वाभावोऽणुत्वमहत्वाभ्यां व्याख्यातः ।

(४) निःसङ्ख्यत्वात्कर्मगुणानां सर्वैकत्वं न विद्यते[3] ।

(५) [4]भ्रान्तं तत् ।

(६) [5]एकत्वाभावाद् भक्तिस्तु न विद्यते ।

(७) कार्यकारणयोरे[6]कत्वैकपृथक्त्वाभावादेकत्वैकपृथक्त्वं न विद्यते ।

(८) एतदनि[7]त्ययोर्व्याख्यातम् ।

(९) अन्यतरकर्मज उभयकर्मजः संयोगश्च संयोगः ।

(१०) एतेन विभागो व्याख्यातः ।

(११) संयोगविभागयोः संयोगविभागाभावोऽणुत्वमहत्वाभ्यां व्याख्यातः ।

(१२) क[8]र्मभिः कर्माणि गुणैर्गुणाऽणुत्वमहत्त्वाभ्यामिति ।

(१३) युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्यते ।।

(१४) [9]गुणत्वात् ।

(१५) [10]गुणोऽपि विभाव्यते ।

(१६) निष्क्रियत्वात् ।

(१७) [11]असति नास्तीति च प्रयोगात् ।

(१८) शब्दार्थाव[12]सम्बन्धौ ।

---

1 तथा पृथक्त्वम्–इति न पृथक् सूत्रं 'च' पुस्तके किन्तु प्रथमसूत्रे एव तद् विद्यते–एवं "तयोर्नित्यत्वानित्यत्वे तेजसो रूपस्पर्शाभ्यां व्याख्याते" "निष्पत्तिश्च" इति सूत्रद्वयमधिकमपि 'च' पुस्तके। 2 °रेकत्वपृथक्त्वाभावो–'च'। अस्मात् सूत्रात्प्राक् " 'कर्मभिः कर्माणि गुणै गुणाः' इत्यधिकं सूत्रं 'च' पुस्तके अस्यैव सूत्रस्य विभागं कृत्वा 'गुणैर्गुणाः' इति पृथक्कृत्य सूत्रद्वयं 'मि' पुस्तके अधिकम्। 4 सूत्रमिदं 'च'; 'मि' पुस्तकयोर्नास्ति। 5 एकत्रस्याभावाद् भाक्तं–'च'; एकस्याभावाद् भाक्तं–'मि'। 6 °रेकत्वपृथक्त्वाभावादेकत्वपृथक्त्वे–'च'; °रेकत्वपृथक्त्वाभावादेक। पृथक्त्वं–मि। 7 °दनित्यनित्ययो–च। 8 'कर्मभिः कर्माणि गुणैर्गुणाः' इत्येतावदेव सूत्रं 'च' पुस्तके 'मि' पुस्तके तु गुणैर्गुणाः इति पृथक्कृत्य सूत्रद्वयं कृतम्। 9 सूत्रमिदं 'मि' पुस्तके नास्ति। 10 गुणे च भाष्यते–'च' 'मि'। 11 सूत्रमिदं 'मि' पुस्तके नास्ति। 12 °वसम्बद्धौ–'च'।

(१९) संयोगिनो दण्डात्समवायिनो [1]विशेषाच्च ।

(२०) सामयिकः शब्दादर्थप्रत्ययः

(२१) [2]एकदिक्काभ्यामेककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरं च ।

(२२) कारणपरत्वात्कारणापरत्वाच्च ।

(२३) परत्वापरत्वयोः परत्वापरत्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ।

(२४) [3]कर्मभिः कर्माणि ।

(२५) गुणैर्गुणाः ।

(२६) [4]इहेदमिति यतः कार्यकारणयोः स समवायः ।

(२७) द्रव्यत्व[5]गुणत्वप्रतिषेधो भावेन व्याख्यातः ।

(२८) [6]तत्त्वं भावेन ।

[इति सप्तमाध्याये द्वितीयमाह्निकम्]

[अथाष्टमाध्याये प्रथममाह्निकम्]

(१) द्रव्येषु ज्ञानं व्याख्यातम् ।

(२) [7]तत्रात्मा मनश्चाप्रत्यक्षे ।

(३) ज्ञाननिर्देशे ज्ञाननि[8]ष्पत्तिविधिरुक्तः ।

(४) गुणकर्मसु[9]सन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणम् ।

(५) सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानम्[10] ।

(६) सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु ।

(७) द्रव्ये गुणकर्मापेक्षम् ।

---

1 विषाणाच्च–'च'; विषाणाच्च दृष्टत्वादहेतुः–मि । इत ऊर्ध्वं "दृष्टत्वादहेतुः प्रत्ययः" "तथा प्रत्ययाभावः" "सम्बद्धसम्बद्धादिति चेत्सन्देहः" इति सूत्रत्रयमधिकं 'च' पुस्तके । 2 एकदिक्कालाभ्यां......परमपरम्–'च'; एकदिक्काभ्यां सन्निकृष्टः...मि । 3 'कर्मभिः कर्माणि गुणैर्गुणाः इत्येकं सूत्रं 'च' पुस्तके । 4 इहेति–च । 5 °गुणत्वकर्मत्वप्रतिषेधो–'च'; द्रव्यगुणकर्मत्व–'मि' । 6 तत्त्वं च–'च' । 7 'मन आत्मा च'–'च'; मि पुस्तके सूत्रमिदं नास्ति । 8 निष्पत्तिरुक्ता –'च'; 'मि' मि पुस्तके "आत्ममनसी कारणे व्याख्याते" इत्यधिकमित ऊर्ध्वं सूत्रम् । 9 असन्निकृष्टेषु......कारणं कारणकारणं च–'च' । 10 सूत्रमिदं 'मि' पुस्तके नास्ति ।

(८) गुणकर्मसु गुणकर्माभावाद् गुणकर्मापेक्षं न विद्यते ।

(९) समवायिनः श्वैत्यात् [1]श्वैत्यबुद्धेश्च श्वेते [2]बुद्धिस्ते एते कार्यकारणभूते ।

(१०) [3]द्रव्येष्वनितरेतरकारणाः ।

(११) कारणायौगपद्यात् कारणक्रमाच्च घटपटादिबुद्धीनां क्रमो न हेतुफलभावात्[4] ।

[[5]इति अष्टमाध्याये प्रथममाह्निकम्]

[अथाष्टमाध्याये द्वितीयमाह्निकम्]

(१) [6]अयमेष त्वया कृतं भोजयैनमिति बुद्ध्यपेक्षम् ।

(२) दृष्टेषु भावाददृष्टेष्वभावात् ।

(३) अर्थ इति द्रव्यगुणकर्मसु ।

(४) द्रव्येषु [7]पञ्चात्मकत्वं प्रतिषिद्धम् ।

(५) भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने [8]प्रकृतिः ।

(६) तथापस्तेजोवायुश्च [9]रसरूपस्पर्शाविशेषात् ।

[इत्यष्टमाध्यायस्य द्वितीयमाह्निकम्]

[अथ नवमाध्यायस्य प्रथममाह्निकम्]

(१) क्रियागुणव्यपदेशा[10]भावात् प्रागसत् ।

(२) [11]सदसत् ।

(३) [12]असतः क्रियागुणव्यपदेशाभावादर्थान्तरम् ।

(४) सच्चासत् ।

---

1 श्वैत्यबुद्धेः–'च'। 2 बुद्धिस्ते कार्यकारणभूते–'च'; मि। 3 द्रव्येष्वनितरेतरकारणात्कारणायौगपद्यात्–'च'; °द्रव्येष्व......कारणाः प्रत्ययाः–मि। 4 अस्य सूत्रस्य स्थाने 'च' पुस्तके "तथा द्रव्यगुणकर्मसु कारणविशेषात्" इति सूत्रम्। 5 'च' पुस्तके तु अष्टमनवमदशमाध्यायेषु आह्निकविभागो नास्ति। 6 अयमेष कृतं त्वया...'च'; अयं त्वया भोजयै°...'मि'; 'मि' पुस्तकव्याख्याकारेण इदं सूत्रं द्वितीयं च सूत्रं प्रथमाह्निकस्थं गणयित्वा व्याख्यातम्। 7 पञ्चात्मकं प्रत्युक्तम्–'च'; 'द्रव्येषु पञ्चकात्मकम्' इत्येव सूत्रं 'मि' पुस्तके। 8 'प्रकृतिः' इति 'च'; 'मि' पुस्तकयोर्नास्ति। 9 रसरूपस्पर्शज्ञानेषु रसरूपस्पर्शविशेषात्–'च'; 'तथापस्तेजो वायुश्च' 'रसरूपस्पर्शन' इति सूत्रद्वयं 'मि' पुस्तके। 10 भावादसत्–'च'; मि। 11 सूत्रमिदं 'मि' पुस्तके नास्ति। 12 असतः सत्–'च'; असति–मि।

(५) [1]यच्चान्यदसदतस्तदसत् ।

(६) असदिति भूतप्रत्यक्षाभावाद् भूतस्मृतेर्विरोधिप्रत्यक्षवात्[2] ।

(७) तथाभावे भावप्रत्यक्षत्वाच्च ।

(८) एतेनाघटोऽगौरधर्मश्च व्याख्यातः[3] ।

(९) अभूतं नास्तीत्यनर्थान्तरम् ।

(१०) नास्ति घटो गेहे इति सतो घटस्य गेहसं[4]सर्गप्रतिषेधः ।

(११) आ[5]त्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम् ।

(१२) तथा द्रव्यान्तरेषु [6]प्रत्यक्षम् ।

(१३) [7]असमाहितान्तःकरणा उपसंहृतसमाधयस्तेषाम् ।

(१४) तत्समवायात्कर्मगुणेषु ।

(१५) आत्मसमवायादात्मगुणेषु ।

[इति नवमाध्यायस्य प्रथममाह्निकम्]

[अथ नवमाध्यायस्य द्वितीयमाह्निकम्]

(१) अस्येदं कार्यं कारणं [8]संयोगि विरोधि समवायि चेतिलैङ्गिकम् ।

(२) अस्येदं कार्यकारणसम्बन्धश्चावयवाद् भवति[9] ।

(३) एतेन शाब्दं व्याख्यातम् ।

(४) हेतुरपदेशो लिङ्गं[10]प्रमाणं कारणमित्यनर्थान्तरम् ।

(५) अस्येदमिति [11]बुद्ध्यपेक्षितत्वात् ।

(६) आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः ।

---

1 यच्चान्यसतस्तदप्यसत्–'च'; यच्चान्य सत° –मि। 2 °विरोधिप्रत्यक्षत्वाच्च ज्ञानम् – 'च'; मि। 3 इतः परं 'मि' पुस्तकं खण्डितत्वान्नोपलभ्येत। 4 °संयोगप्रतिषेधः 'च'। 5 अस्मात्सूत्रात्प्राक् "नास्त्यन्यश्चन्द्रमा इति सामान्याच्चन्द्रमसः प्रतिषेधः" "सदसतोर्वैधर्म्यात् कार्ये सदसत्ता न" इति सूत्रद्वयमधिकं 'च' पुस्तके। 6 'च' पुस्तके 'प्रत्यक्षम्' इति नास्ति। 7 इदं सूत्रं 'च' पुस्तके नास्ति, किन्तु "आत्मेन्द्रियमनोऽर्थसन्निकर्षाच्च" इत्यधिकं सूत्रं तत्रास्ति। 8 सम्बन्धि एकार्थसमवायि विरोधि . . . 'च'। 9 इदं सूत्रं 'च' पुस्तके नास्ति। 10 लिङ्गं निमित्तं प्रमाणं . . . 'च'। 11 बुद्ध्यपेक्षत्वात्–'च'।

(७) [1]तथा स्वप्नः ।

(८) स्वप्नान्तिकम् ।

(९) धर्माच्च ।

(१०) इन्द्रियदोषात्सं[2]स्कारदोषाच्चाविद्या ।

(११) [3]तद्दुष्टज्ञानम् ।

(१२) अदुष्टं विद्या ।

(१३) आर्षं सिद्धदर्शनं च धर्मेभ्यः ।

[इति नवमाध्यायस्य द्वितीयमाह्निकम्]

[अथ दशमाध्यायस्य द्वितीयमाह्निकम्]

(१) [3]इष्टानिष्टकारणविशेषाद् विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः ।

(२) [4]संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः ।

(३) तयोर्निष्पत्तिः [5]प्रत्यक्षलैङ्गिकाभ्याम् ।

(४) [6]अभूदित्यपि ।

(५) सति च कार्या[7]दर्शनात् ।

(६) [8]एकार्थ समवायिकारणान्तरेषु दृष्टत्वात् ।

(७) [9]एकदेश इत्येकस्मिन् शिरः पृष्ठमुदरं मर्माणि तद्विशेषस्तद्विशेषेभ्यः ।

[इति दशमाध्यायस्य प्रथममाह्निकम्]

[अथ दशमाध्यायस्य द्वितीयमाह्निकम्]

(१) कारणमिति द्रव्ये कार्यसमवायात् ।

---

1 'तथा स्वप्नः स्वप्नान्तिकं च' इत्येकं सूत्रं 'च' पुस्तके । 2 संस्काराच्चाविद्या–च । 3 तद्दुष्टं ज्ञानम्–'च' । अस्मात्सूत्रात्प्राक् 'आत्मसमवायः सुखदुःखयो पञ्चम्योऽर्थान्तरत्वे हेतुस्तदाश्रयिभ्यश्च गुणेभ्यः "इत्यधिकं सूत्रं 'च' पुस्तके । 4 संशयनिर्णययोरर्थान्तराभावश्च . . .'च' । 5 'ज्ञानाभ्यां व्याख्याता' इत्यधिकं 'च पुस्तके । 6 अस्मात्सूत्रात्प्राक् "भूतमिति प्रत्यक्षं व्याख्यातम्" "भविष्यतीति कार्यान्तरे दृष्टत्वात्" "तथा भवतीति सापेक्षेभ्योऽनपेक्षेभ्यश्च" इति त्रीणि सूत्राण्यधिकानि 'च' पुस्तके; अत्र च अभूदित्यभूतात्–इति सूत्रं 'च' पुस्तके । 7 °समवायात् 'च'। 8 एकार्थसमवायिषु कारणान्तरेषु दर्शनादेकदेश इत्येकस्मिन्–'च' । 9 "शिरः पृष्ठमुदरं पाणिरिति तद्विशेषेभ्यः इत्येव सूत्रं 'च' पुस्तके ।

(२) संयोगाद्वा ।

(३) [1]कारणे समवायात् कर्माणि ।

(४) तथा रूपे का[2]रणैकार्थसमवायाच्च ।

(५) [3]कारणसमवायात् संयोगः पटस्य ।

(६) [4]कारणाकारणसमवायाच्च ।

(७) [5]संयुक्तसमवायादग्नेर्वैशेषिकम् ।

(८) दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय ।

(९) तद्वचनादा[6]म्नायस्य प्रामाण्यमिति ।

[इति दशमाध्यायस्य द्वितीयमाह्निकम्]

[इति वैशेषिकदर्शनसूत्रपाठः]

---

1 कारणसमवायात् कर्माणि—च । 2 कारणकारणसमवायाच—'च' । 3 कारणसमवायात्संयोगे—'च' । 4 तथा कारणा...'च' । 5 इत ऊर्ध्वं "लैङ्गिकं प्रमाणं व्याख्यातम्" इत्यधिकं सूत्रं 'च' पुस्तके । 6 °दाम्नायप्रामाण्यमिति–'च' ।